GOVERNMENT OF INDIA

DEPARTMENT OF ARCHAEOLOGY

CENTRAL ARCHAEOLOGICAL LIBRARY

CALL No. 091.4912 G.O.M.L.M.

D.G.A. 79.

# A TRIENNIAL CATALOGUE OF MANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

## 1916-17 TO 1918-19

FOR THE

## GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

S. KUPPUSWAMI SASTRI, M.A.

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS

28262

*Prepared under the orders of the Government of Madras*

091.4912
G.O.M.L.M.

**Volume III.—Part 1—Sanskrit B**

MADRAS
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS

1922

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
Acc. No. 28262
Date. 16/3/60.
Call No. 091.4912/G.O.M.L.M.

# A TRIENNIAL CATALOGUE OF MANUSCRIPTS.

## 1916-17 TO 1918-19.

---

## VOLUME III.

---

## PART 1—SANSKRIT—B.

---

### R. No. **2349.**

Paper. 10¾ × 9½ inches. Foll. 8. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

वाजपेयाद्यच्छावाकप्रयोगः.

VĀJAPĒYĀDYACCHĀVĀKAPRAYŌGAḤ.

Gives the details of procedure so far as it relates to the priest called Acchāvāka in the Vājapēya and a few other various sacrifices.

The Original MS. is dated: Saturday, the 3rd day of the dark fortnight in the month of Caitra of the year Plavaṅga.

**Beginning:**

वाजपेयस्याच्छावाकप्रयोग उच्यते—

मधुपर्कादिस्वकीयाज्यशस्त्रात्समानम् । आज्यशस्त्रे विशेषः । हिं भूर्भुवस्सुवरोंशोंसावोन्तमीळिष्व्यो अर्चिषावना विश्वा परिष्वजत् । कृष्णा कृणोति जिह्वयों त्रिः ।

**End:**

ऋकि तत्वां चेति मचीयोंशों सावोमिहेन्द्राग्नी उपह्वये । ऋकि सोमपा सोमपीतयोमिन्द्राग्नी अवसागतमस्मभ्यमित्यादि शस्त्रशेषं समानम् । माध्यन्दिनसवनमग्निष्टोमवत् ॥

---

### R. No. **2350.**

Paper. 10¾ × 9½ inches. Foll. 12. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. M. Ramakrṣṇa Kavi of Vanaparti who apparently got it from Trivandrum.

मत्तविलासप्रहसनम्.

MATTAVILĀSAPRAHASANAM.

Foll. 1a—11b. Fol. 12a states that this MS. was compared with the MS. of the Raja of Charakal. Fol. 12b is left blank.

A drama of the Bhāṇa kind describing the vices of the Pāśupatas at Conjeeveram: by Mahēndra Vikramavarman, son of Siṁhaviṣṇu of the Pallava dynasty.

Complete.

**Beginning:**

(नान्यन्ते ततः प्रविशति सूत्रधारः)

(सू)—

भूषावेषवपुःश्रिया[1] गुणकृतानाश्रित्य भेदान् गतं
भावावेशवशादनेकरसतां त्रैलोक्ययात्रामयम् ।
नृत्तं निष्प्रतिबद्धबोधमहिमा यः प्रेक्षकश्च स्वयं
स व्याप्तावनिभाजनं दिशतु मे दिव्यः कपाली यशः ॥

भोः समासादितः खलु मया यवीयसीं भार्यामधिकृत्य समुत्पन्नव्यली-कायां ज्येष्ठायां मे कुटुम्बिन्यां सुकरतरः प्रसादोपायः। यचिरस्याद्य वयं प्रेक्षाधिकारे परिषदा नियुक्तास्स्मः । तद्यावदेनामुपसर्पामि । (परिक्रम्य, नेपथ्याभिमुखमवलोक्य) आर्ये इतस्तावत् ।

* * * *

नटी—किं दाणिं अय्येण पउञ्जिदव्वो अअं पओओ ।

सूत्र—ननु त्वयैवाभिहितं मत्तविलासप्रहसनमिति ।

नटी—णूणं इमस्सि पक्खवादी मे कोलेजणअभिप्पाआणुरूपं[2] भणाविदम्हि । अय्य कदमो उण सो कवी । जे इमाए किदीए पआसीयदि ।

सू—भवतु श्रूयताम्, पल्लवकुलधरणीमण्डलकुलपर्वतस्य सर्वनयविजितसमस्तसामन्तमण्डलस्याखण्डलसमपराक्रमश्रियः श्रीमहिमानुरूपदानविभूतिपरिभूतराजराजस्य श्रीसिंहविष्णुवर्मणः पुत्रः शत्रुषड्वर्गनिग्रहपरः परहितपरतन्त्रतया महाभूतसधर्मा महाराजः श्रीमहेन्द्रविक्रमवर्मा नाम ।

---

[1] क्रिया इति पाठान्तरम्. [2] गदम् इति पाठान्तरम्.

अपिच—

प्रज्ञादानदयानुभावधृतयः कान्तिः कलाकौशलं
सत्यं शौर्यममायता विनय इत्येवंप्रकारा गुणाः ।
अप्रासस्थितयस्समेत्य शरणं याता यमेकं कलौ
कल्पान्ते जगदादिमादिपुरुषं सर्गप्रभेदा इव ॥

* * * *

सू—अहं तु—

संप्रति सङ्गीतधनः कविगुणकथ यासि निम्नतां नीतः ।

(नेपथ्ये) प्रिये देवसोमे ।

सू— युवतिसख एष सुरया कपालविभवः कपालीव ॥

(निष्क्रान्तौ)

स्थापना ॥

**End:**

शाक्यभिक्षुः—निष्क्रान्तः ।

कपाली—प्रिये देवसोमे गच्छावस्तावत् ।

भरतवाक्यम् ॥

शश्वद्भूत्यै प्रजानां वहतु विधिहुतामाहुतिं जातवेदा
वेदान् विप्रा भजन्तां सुरभिदुहितरो भूरिदोहा भवन्तु ।
उद्युक्तः स्वेषु धर्मेष्वयमपि विगतव्यापदाचन्द्रतारं
राजन्वानस्तु शश्वप्रशमितरिपुणा शत्रुमल्लेन लोकः ॥

निष्क्रान्तौ ॥

**Colophon:**

मत्तविलासप्रहसनं समाप्तम् ॥

---

## R. No. 2351.

Paper. 10¾ × 9¼ inches. Foll. 12. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

Fol. 12b is left blank.

### कात्यायनदर्शपूर्णमासहौत्रम्.

### KĀTYĀYANADARŚAPŪRṆAMĀSAHAUTRAM.

Similar to the work described under No. 1144 of the D.C.S. MSS., Vol. II, but according to the Kātyāyana-school.

**Incomplete.**

**Beginning:**

अध्वर्यो देवता आचक्ष्व तासामानुपूर्व्यमुच्चैरुपांशु ताश्च यजमानस्य प्रवरनक्षत्रनामधेयानि च । अग्निश्च सोमश्चाज्यभागदेवते । अग्निरग्नीषोमौ प्रधानदेवताः स्विष्टकृत्प्रयाजादयोऽङ्गदेवताः ।

**End:**

वैकङ्कतं षडङ्गुलमन्तर्वानं प्रादेशमात्रमर्धचन्द्राकारं पूर्णपात्रं वैकङ्कतं स्रुक् पुष्कराकारं षडवत्तं वैकङ्कतं षडङ्गुलम् ।

---

R. No. **2352.**

Paper. 10⅜ × 9½ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

आदित्यपुराणसंग्रहः.

ĀDITYAPURĀṆASAÑGRAHAḤ.

Foll. 1*a*—34*b*. Foll. 35—36 are left blank.

An abridgment of the work described under No. 2338 of the D.C.S. MSS., Vol. IV, Part 2, but with the second Adhyāya of the Uttarakhaṇḍa included in the beginning of this work.

The date of the original MS.: Wednesday in the dark fortnight of the Pauṣa month in the year Prabhava. The name of the scribe is given as Rājamannār Kṛṣṇa Śāstri.

Contains extracts from the Adhyāyas 1, 2, 5, 8, 9, 10, 12, 13, 14, 15, 18, 20, 26, 27, 28, 31, 33, 35, 37, 40, 42, 51, 53, 55, 57, 62, 66.

**Beginning:**

ओं नमो भगवते आदित्यायाखिलजगतामात्मस्वरूपेण कालरूपेण च चतुर्विधभूतनिकायानां ब्रह्मादिस्तम्भपर्यन्तानामन्तर्हृदयेषु बहिरप्याकाश इवोपाधिना व्यवधीयमानो भगवानेक एव ।

**End:**

सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते ।
न कश्चित्सदृशो लोके विप्रे वाजसनेयिनम् ॥
एतत्सर्वं समाख्यातं ब्राह्मणानां च वैभवम्
इतोऽन्यच्छ्रोतुमिच्छा चेच्छृणुध्वं तत्सविस्तरात् ॥

**Colophon:**

इत्यादित्यपुराणे उत्तरखण्डे सनत्कुमारसंहितायां ब्राह्मणप्रशंसा नाम द्वितीयोऽध्यायः ॥

## R. No. 2353.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 12. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Khan Muhammad Sahib of Pīthapuram, Gōdāvari district.

सूर्यमन्त्रव्याख्या.

### SŪRYAMANTRAVYĀKHYĀ.

A commentary on the Vedic Mantras in praise of Sūrya (the Sun-god), collected from the various Saṁhitās and Brāhmaṇas.

Complete.

**Beginning:**

उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् । केतवः प्रज्ञापकाः सूर्याश्वाः । यद्वा सूर्यरश्मयः । सूर्यं . . . प्रेरकं वहन्ति उत वहन्ति विश्वाय सर्वस्मै दृशे द्रष्टुं यथा सर्वे जनाः सूर्यं पश्यन्ति तथा ऊर्ध्वं वहन्तीत्यर्थः ।

**End:**

त्रिंशद्धाम विराजति । वाक् पतङ्गाय . . . . . . . . . त्रिंशद्धामानि वचनव्यच(व्यत्य)यः । सर्वस्याहोरात्रस्यावयवभूतानि । अहश्शब्दोऽवधारणे । द . . . . . . . . . . विशेषेण दीप्यते । व्यत्ययेनैकवचनम् । मुहूर्तान्यत्र धामानि इत्युच्यन्ते । पञ्चदश . . . . . . . . (पन्था)नं गच्छतीति पतङ्गः तस्मै सूर्याय ।

---

## R. No. 2354.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 34. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Vempati Ammana Śāstri of Masulipatam.

Fol. 1 contains the Aupāsanaviṣaya.

(a) जातकसंस्कारः.

### JĀTAKASAṀSKĀRAḤ.

Foll. 2a—6a.

Same work as that described under R. No. 2160 ante, wherein see for the beginning.

Complete.

**End:**

लग्नाधिपो रन्ध्रपसंयुतश्चेत् तृतीयभावाधिपभावपानाम् ।
द्विसप्त एकादशभावपानां पाते मृतिस्सिद्धिमुपैति जन्तुः ॥
तत्तत्स्थानगतानां च पाते च मरणं भवेत् ।
तेषां च शुभसंयोगे ह्यायुर्वृद्धिः प्रजायते ॥

**Colophon:**

इत्युमामहेश्वरसंवादे जातकसंस्कारः समाप्तः ॥

---

(*b*) जातकसारावलिः.

JĀTAKASĀRĀVALIḤ.

Foll. 6*b*—33*a*. Foll. 33*b* and 34 are left blank.

By Viṣṇu. Slightly different from that described under No. 13718 of the D.C.S. MSS., Vol. XXIV.

Complete.

**Beginning:**

आचार्यैर्बहुभिः प्रोक्तं बहुधा तत्त्वदर्शिभिः ।
विष्णुस्सारं समुद्धृत्य वक्ष्ये नक्षत्रजातकम् ॥

इनशशिकुजराहुजीवमन्दज्ञकेतुः भृगुज इति नवानां कृत्तिकादिक्रमेण ।
६ १० ७ १८ १६ १९ १७ ७ २०
रसनयमुनिजायातोयधीकासटा सा नर इति च नवानां भास्करादिक्रमेण ॥
जन्मर्क्षे दशां विन्द्याद्दशामूलदशास्त्रिभिः ।
हत्वा रामहृताः कुर्यात्साब्दे संपुष्टयेत्पुनः ॥

**End:**

शुक्रदशायां पुंसां बुधस्य चान्तर्दशा यथा भवति ।
धनलग्नसौख्यं च तथा मनोरथदशा यथा भवति ॥
भवति तथा धनलब्धसौख्यं च मनोरथातीतम् ।

शुक्रमहादशायां केत्वन्तर्दशावर्षाः १ मासाः २. फलम्—

कलहं बान्धवैस्सार्धं शत्रुजातैस्तु विग्रहम् ।
चलाचलस्थानभङ्गं शुक्रस्यान्तर्गते ध्वजे ॥

किं च—

कलहं बान्धवैस्सार्धं शत्रुभिश्चैव विग्रहम् ।
स्थानच्युतिर्मानहानिः शुक्रस्यान्तर्गते शिखी ॥

**Colophon:**

इति श्रीनक्षत्रजातकसारावलिः समाप्ता ॥

---

R. No. **2355.**

Paper. 10¾ × 9⅝ inches. Foll. 23. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

**भारतवचनानि.**

BHĀRATAVACANĀNI.

Extracts from the six Parvans of the Mahābhārata—viz., Bhīṣma, Drōṇa, Karṇa, Śalya, Sauptika and Strī Parvans—intended to support and illustrate the principles of the Advaita Vēdanta: by Purāṇam Hayagrīva Śāstri, son of Vēṅkaṭanārāyaṇa and Sāvitrī who was the daughter of Vēṅkaṭēśa of Kauśikagōtra. The compiler states that he has given extracts from the commentary of Nīlakaṇṭha and from Śaṅkarācārya's Bhāṣya for the Bhagavadgītā portion. The work is stated to have been printed and published on the fullmoon day in the Māgha month of the Rākṣasa year. It is also stated that the number references to stanzas and Adhyāyas are in accordance with the Nīlakaṇṭha's commentary.

Complete.

**Beginning:**

श्रीमहाभारते आदिपर्वणि विशेषः ।

श्रीमदनन्तनिगमान्तपरमाद्वैतसिद्धान्तप्रतिपादकाखिलसद्ग्रन्थेष्वत्यन्तोत्कृष्टतया चाखिलपुरुषार्थप्रदपञ्चमवेदत्वेन चाशेषाभ्यर्हितजनैः पौनःपुन्येनोद्घुष्यमाणश्रीमहाभारतान्तर्गतभीष्मपर्वद्रोणपर्वकर्णपर्वशल्यपर्वसौप्तिकपर्वस्त्रीपर्वाभिधानपर्वषट्कात्मकोऽयं ग्रन्थः सेतुशीताचलान्तर्धरणीतलवासिनामास्तिकमतावलम्बिनामस्मदीयाखिलसत्पुरुषाणामत्यन्तोपकाराय श्रीहयग्रीवदेवकरुणारसपूर्णपुराणवंशपयोनिधिसुधाकरस्य श्रीदप्पयसिद्धान्ततत्त्वविच्छिखामणेः श्रीमद्वेङ्कटनारायणविद्वच्चूडामणेस्तनयेन श्रीमत्सौशील्यसौजन्यादिभिररुन्धत्यनसूयाप्रभृत्युत्तमपुण्यवनितायाः श्रीमत्कौशिकगोत्रसम्भूतवेङ्कटेशाख्यविद्वदग्रगण्यतनूजायाः साविञ्याम्बायाः गर्भशुक्तिमुक्ताफलेन स्वपितृचरणकरुणासमासादितश्रीमद्धयग्रीवमन्त्रराजोपासनालब्धसंस्कृतप्राकृतवैकृताद्यनेकभाषारचितनिखिलतन्त्रस्वतन्त्रप्रतिभाधुरेण पुराणंहयग्रीवशास्त्रिणा नानादेशेभ्य आनीतान् श्रीमन्महाभारतमूलग्रन्थान् श्रीम-

वैशम्पायननीलकण्ठाचार्यादिभिर्विरचितान् व्याख्यानग्रन्थांश्च सम्यक् संशोध्य निखिलाध्येतृजनानां विशेषतः पठनसौलभ्यापादनाय प्रतिश्लोकसङ्ख्यादिभिस्समलङ्कृत्य तत्तद्दुरूहार्थप्रतिपादकघट्टेषु श्रीमन्नीलकण्ठीयव्याख्यां यथाश्लोकसङ्ख्यं संयोज्य भगवद्गीताख्यपरमाद्वैतप्रतिपादकघट्टस्य श्रीमच्छङ्करभगवत्पादविरचितभाष्यसंयोजनेन सपारिष्कृत्य राक्षससंवत्सरमाघशुक्लपूर्णिमायां दिने चादर्शाख्ये स्वकीयमुद्राक्षरशालायां मुद्राक्षरैः सुष्ठु प्रकाशितः ।

अध्यायसङ्ख्या—

| | | | | | |
|---|---|---|---|---|---|
| आदिपर्वणि | अध्यायाः ... | २१४. | सौप्तिकपर्वणि | अध्यायाः | १८. |
| सभापर्वणि | ,, ... | ८०. | स्त्रीपर्वणि | ,, | २७. |
| आरण्यपर्वणि | ,, ... | ३१४. | शान्तिपर्वणि | ,, | ३६६. |
| विराटपर्वणि | ,, ... | ७२. | आनुशासनिकपर्वणि | ,, | १६८. |
| उद्योगपर्वणि | ,, ... | १९७. | अश्वमेधपर्वणि | ,, | ९२. |
| भीष्मपर्वणि | ,, ... | १२४. | आश्रमवासिकपर्वणि | ,, | ३९. |
| द्रोणपर्वणि | ,, ... | २०३. | मौसलपर्वणि | ,, | ८. |
| कर्णपर्वणि | ,, ... | ९७. | महाप्रस्थानिकपर्वणि | ,, | ३. |
| शल्यपर्वणि | ,, ... | ९६. | स्वर्गारोहणपर्वणि | ,, | ६. |

अत्र प्रतिपादितपर्वणामध्यायानां च सङ्ख्यानिर्णयः व्याख्याकर्तृभिर्नीलकण्ठाचार्यादिभिरुद्दिष्टक्रमेणैव परिष्कृतः। पर्वसङ्ग्रहाध्यायोक्तक्रमस्य किञ्चिन्न्यूनातिरेकता तु तत्र तत्राध्यायादीनां सङ्कोचविस्तृत्यादिभिर्जाता नान्यथेति मन्तव्यम् ।

श्रीमहाभारते आदिपर्वप्रारम्भः—

अभ्रश्यामः पिङ्गजटाबद्धकलापः प्रांशुर्दण्डी कृष्णमृगत्वक्परिधानः ।
सर्वान् लोकान् पावयमानः कविमुख्यः पाराशर्यः पर्वसुरूपं विवृणोतु ॥
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

रोमहर्षणस्याविरुग्रश्रवाः सौतिः पौराणिके नैमिशारण्ये शौनकस्य कुलपतेर्द्वादशवार्षिकसत्रे वर्तमाने ।

* * * *

पुरा किल सुरैस्सर्वैस्समेत्य तुलया धृतम् ॥
चतुर्भ्यस्सरहस्येभ्यो वेदेभ्यो ह्यधिकं यदा ।

* * * *

तदाप्रभृति लोकेऽस्मिन् महाभारतमुच्यते ॥
महत्त्वे च गुरुत्वे च क्रियमाणं यतोऽधिकम् ।
महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते ॥*

* * * *

**Colophon:**

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामादिपर्वणि अनुक्रमणिकाध्यायो नाम प्रथमोऽध्यायः ।

**End:**

भारतं भवने यस्य तस्य हस्तगतो जयः ।
महाभारतमाख्यानं क्षितिं गां च सरस्वतीम् ॥
ब्राह्मणान् केशवं चैव कीर्तयन्नावसीदति ।
वेदे रामायणे पुण्ये भारते भरतर्षभ ।
आदौ चान्ते च मध्ये च हरिस्सर्वत्र गीयते ॥

**Colophon:**

इति भारतवचनानि समाप्तानि ॥

---

## R. No. 2356.

Paper. 10¾ × 9¼ inches. Foll. 38. Lines, 20 in a page. Grantha. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Chandrabhaṭla Joggayya Śāstrigāru of Pithapuram, Gōdāvari district.

(*a*) महालक्ष्मीरत्नकोशः.

MAHĀLAKṢMĪRATNAKŌŚAḤ.

Foll. 1*a*—35*b*.

Same work as that described under No. 8019 of the D.C.S. MSS., Vol. XV, wherein see for the beginning.

Contains the following Adhyāyas (89 to 103):—

८९. आनन्दयज्ञकथनम्.
९०. श्रीविद्यासंपुटमाहात्म्यम्.
९१. नित्याषोडशमन्त्रप्रयोगः.
९२. श्रीदेव्यादिमन्त्रयन्त्रोद्धारः.
९३. शार्दूल्यादिविद्यामन्त्रयन्त्रोद्धारः.
९४. इन्द्राद्यग्निदेवविद्यानिरूपणम्.
९५. यमविद्यानिरूपणम्.
९६. वरुणवायुविद्यानिरूपणम्.
९७. राजाधिराजेशानविद्या.
९८. दमकादिविद्यानिरूपणम्.
९९. सृष्टिसंहारयन्त्रार्चनम्.
१००. सर्वसंक्षोभिण्यादिविद्या.

१०१. परानवकमन्त्रकथनम्.
१०२. पुरानवकमन्त्रकथनम्.
१०३. क्रममालामन्त्रपूजा.

**End:**

एकवारं जपेदेनां सर्वपूजाफलं लभेत् ॥
श्रीषोडशार्णमन्त्रस्य क्रमतः कथितं मया।
न कस्यचिन्मयाख्यातं सर्वसौभाग्यदायिनि ॥
अर्चने तु समा(नमोऽ)न्तन होमे स्वाहान्तकेन तु।
तर्पणे तर्पयामीति कुर्यात्सौभाग्यवृद्धये ॥

**Colophon:**

इति श्रीमहालक्ष्मीकल्पे नारायणब्रह्मसंवादे माहेश्वरसंवादे तथा उमामहेश्वरसंवादे मत्यक्षसिद्धिप्रदे शङ्करेण विरचिते श्रीमहालक्ष्मीरत्नकोशाख्ये त्रिशततमोऽध्यायः ॥

ग्रन्थसङ्ख्या बाणसहस्रसङ्ख्या समाप्ता ॥

---

(*b*) पञ्चाशद्वर्णबीजानि.

PAÑCĀŚADVARṆABĪJĀNI.

Foll. 35*b*—37*a*.

An explanation of the Mantras consisting of the 50 separate letters of the Sanskrit alphabet.

Complete.

**Beginning:**

यान्तवान्तयुतं बिन्दुवामनेत्रसमन्वितम्।
श्रीबीजमिति तत्प्रोक्तं सर्वकर्मफलप्रदम् ॥
कद्रान्तं वादिसंयुक्तं महामायासमन्वितम्।
बिन्दुना सहितं देवि बीजं कन्दर्पमुच्यते ॥

**End:**

क्षं भूमिबीजं क्षं क्षेत्रपालकं नारसिंहकम्।
पञ्चाशद्वर्णबीजानि कथितानि बुधैः क्रमात् ॥

(c) आणवोपायसूत्राणि.

ĀṆAVŌPĀYASŪTRĀṆI.

Foll. 37a—38a. Fol. 38b gives the contents of the work Mahālakṣmīratnakōśa.

A treatise in the form of Sūtras explaining the three paths of salvation as relating to the Śāmbhavas, the Śāktas and the Siddhānta Śaivas.

Contains the Śāmbhavōpāya, Śāktōpāya and Āṇavōpāya.

**Beginning:**

त्रिविधक्रमाण्याणवोपायसूत्राण्याह—

चैतन्यमात्मा १. अज्ञानं बन्धः २. ज्ञानं बन्धः ३. योनिवर्गः कलाशरीरम् ४. ज्ञानाधिष्ठानं मातृका ५. उद्यमो भैरवः ६. शक्तिचक्रानुसन्धाने विश्वसंहारः ७. जाग्रत्स्वप्नसुषुप्तिभेदे तुर्याभोगसम्भवः ८.

**End:**

त्रिपदाद्यनुप्राणनम् ६९. चित्तस्थितिवच्छरीरकरणबाह्येषु ७०. अभिपाद्गतिसंवाह्यस्य ७१. तथा रूढप्रमितेस्तत्क्षयाज्जीवसंक्षयः ७२. नासिकान्तर्मध्यसंयमात्किमत्र सव्यापसव्यसौषुम्नेषु ७३. भूयः स्यात् प्रतिमीलनम् ॥ ७४ ॥

**Colophon:**

इत्याणवोपायसूत्राणि ॥

---

R. No. 2357.

Paper. 10¾ × 9⅝ inches. Foll. 38. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

कात्यायनसूत्रपद्धतिः.

KĀTYĀYANSŪTRAPADDHATIḤ.

Foll. 1a—38a. Fol. 38b gives particulars of the comparison of the copy with the original.

Contains the 20th Adhyāya which gives the ritualistic procedure for the performance of the Aśvamēdha sacrifice, by Yājñikadēva.

**Beginning:**

सर्वकामस्य राज्ञोऽश्वमेधयज्ञो भवति। तस्य भारम्भः फाल्गुनशुक्लाष्टम्यां नवम्यां वा भवति। ग्रीष्मर्तौ वा शुक्लाष्टम्यां नवम्यां वा। तत्र प्रथमं मातृपूजापूर्वकमाभ्युदयिकं श्राद्धम्। ततो गार्हपत्ये ब्रह्मौदनं पचनम्। तत्र प्रथममध्वर्युः कस्मिंश्चित्पात्रे आनडुहे चर्मणि वा तण्डुलानां चत्वारि पात्राणि निर्वपति।

* * * *

एवं सानुचरीणामलङ्कृतानां निष्काभरणयुक्तानां पत्नीनामागमनानन्तरं यजमानस्ताभिः पत्नीभिस्सहान्यगारं प्रविशति ।

* * * *

इति प्रायश्चित्तानि ।

अथ संवत्सरे पूर्णे इष्टकापश्वादिकरणम्—फाल्गुनारम्भवर्षे आगामिवर्षे फाल्गुन्यां पौर्णमास्यां प्राजापत्य एवेष्टकापशुः प्राजापत्यमालभ्योत्सीदन्तीष्ट्य इति पुनरुपादानस्य पक्षान्तरनिवृत्त्यर्थत्वात् ।

End :

एतेषामेकादशिनीधर्मेणानुष्ठानम् । याज्ञिकानां मते यूपैकादशिनी चेदित्यत्र ये वैशेषिका धर्मा उक्ताः त एवैतेषु पशुष्वेकादशिनीवत् भवन्ति तद्व्यतिरिक्तास्तु निरूढधर्मा इति गणधर्मा ऊहाश्चैकादशिनीवत् । कर्कमते सर्वेष्वन्वाहार्यो दक्षिणा । याज्ञिकानां मते निरूढवत्पशुवरधेनूनामन्यतरद्दक्षिणा ॥

Colophon :

इति श्रीसम्राट्स्थपतित्रिरग्निचिन्महायाज्ञिकदेवेन कृतायां कात्यायनसूत्रपद्धतौ विंशतितमोऽध्यायः ॥

अश्वमेधस्समाप्तः ॥

---

R. No. 2358.

Paper. 10⅞ × 9¼ inches. Foll. 22. Lines, 20 in a page. Grantha and Telugu. Good.

Transcribed in 1217-18 from a MS. of M.R.Ry. Kolacala Veṅkatappayyagaru of Uyyūru, Kistna district.

## निर्णयकौमुदी.

## NIRṆAYAKAUMUDĪ.

Foll. 1a—16b.

A treatise explaining the determination of the time of various feasts and fasts observed by Hindus and of certain astronomical events, such as are usually found in a calendar.

Complete.

**Beginning :**

रतिकामः सुसंपूज्यः कर्तव्यश्च महोत्सवः ।
दानानि च प्रदेयानि तेन तुष्यति माधवः ॥ इति ॥

माघशुक्लसप्तमी रथसप्तमी। तस्यां परिविद्धायां भास्करं पूजयेत्।

सप्तमी माघमासस्य शुक्ला या चाष्टमी युता।
मुहूर्तमपि कर्तव्या स्नानदानव्रतादिषु॥ (इति)

स्मृत्यन्तरात्। स्कान्देऽपि—

रविवारेण युक्तायां सप्तम्यामरुणोदये।
पुंनक्षत्रे सिते माघे भास्करं यस्तु पूजयेत्॥
न रोगो न भयं तस्य नाल्पमृत्युर्न चापदः।
सर्वान् कामानवाप्नोति सूर्यलोकं स गच्छति॥

इति स्मृत्यन्तरे तत्स्वरूपं चोक्तम्।

**End:**

मध्यभागे तया विद्धा नाडिका घटिका स्मृता॥
तद्रन्ध्रेणाम्भसा पात्रं यावत्कालेन पूर्यते।
स कालो नाडिका तस्याष्षष्टिभागो विनाडिका॥
नाडीद्वयं मुहूर्तस्तु ते पञ्चदश वासरः।
एवं रात्रेस्तथा पक्षमासर्त्वयनवत्सराः॥

माषशब्दः—

पञ्चगुञ्जात्मको माषः तेषु वर्णास्तु षोडश।
निष्कस्सुवर्णचत्वारः पञ्चदादि प्रकीर्तिताः॥

**Colophon:**

निर्णयकौमुदी समाप्ता॥

Foll. 16*b*—20*b* contain some sentences relating to the fixing of auspicious time for the performance of certain ceremonies. Foll. 21*a*—22*a* give the following contents of the MS. described above. Fol. 22*b* is left blank.

| | Pages. | | Pages. |
|---|---|---|---|
| १. मासशिवरात्रिनिर्णयः ... | 3 | ७ बुधाष्टमी ... | 7 |
| २. माघकृष्णचतुर्दशी ... | 3 | ८. गुरुवारव्रतम् ... | 8 |
| ३. पारणा ... | 4 | ९. शनित्रयोदशी ... | 8 |
| ४. फाल्गुनमासः ... | 4 | १०. कृष्णाङ्गारचतुर्दशी ... | 9 |
| ५. कामदहनम् ... | 5 | ११. दवनतृतीया ... | 9 |
| ६. होलिका ... | 6 | १२. क्षीणाचन्द्रदर्शनपूर्णिमा | 10 |

| | | Page. |
|---|---|---|
| १३. पुष्करनिर्णयः | ... | 10 |
| १४. अलभ्ययोगः | ... | 12 |
| १५. महाव्यतीपातः | ... | 13 |
| १६ गोविन्दद्वादशी | ... | 13 |
| १७. गुड्कचक्रम् | ... | 14 |
| १८. नक्षत्राणि | ... | 15 |
| १९. बीजावापः | ... | 16 |
| २०. बीजावापनक्षत्राणि | ... | 16 |
| २१. लातादिस्थापनम् | .. | 17 |
| २२. लवनक्रिया | ... | 17 |
| २३. वृक्षच्छेदः | ... | 18 |
| २४. अनध्यायनिर्णयः | ... | 18 |
| २५. प्रदोषनिर्णयः | ... | 19 |
| २६. उपनयननक्षत्रम् | ... | 20 |
| २७. विवाहनक्षत्राणि | ... | 20 |
| २८. पञ्चशलाकचक्रलक्षणम् | | 21 |
| २९. सप्तशलाकचक्रसम्मतिः | | 21 |
| ३०. कुहूयोगलक्षणम् | ... | 22 |
| ३१. अमृतादियोगः | ... | 22 |
| ३२. अमृतसिद्धयोगः | ... | 22 |
| ३३. दग्धयोगः | ... | 23 |

| | | Page. |
|---|---|---|
| ३४. ज्वालामुखीयोगः | ... | 23 |
| ३५. त्रिपुष्करयोगः | ... | 23 |
| ३६. उत्पातयोगः | ... | 23 |
| ३७. मृत्युयोगः | ... | 24 |
| ३८. अवमात्रिद्युस्पृक् | ... | 24 |
| ३९. चन्द्रोदयज्ञानम् | ... | 24 |
| ४०. ग्रहकूटफलम् | ... | 26 |
| ४१. अमृतघटिकाः | ... | 27 |
| ४२. पञ्चाङ्गलेखनक्रमः | ... | 28 |
| ४३. वारप्रवृत्तिः | ... | 29 |
| ४४. पादच्छाया | ... | 30 |
| ४५. कर्णवेधनक्षत्राणि | ... | 32 |
| ४६. अन्नप्राशनम् | ... | 35 |
| ४७. केशखण्डनम् | ... | 36 |
| ४८. अक्षरस्वीकारः | ... | 36 |
| ४९ निषेकः | ... | 37 |
| ५०. हलचक्रसम्मतिः | ... | 39 |
| ५१. बीजानि | ... | 39 |
| ५२. उपनयननक्षत्राणि | ... | 39 |
| ५३. विवाहनक्षत्राणि | ... | 40 |

---

R. No. 2359.

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 28. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

## वेदतत्त्वनिरूपणम्.

## VĒDATATTVANIRŪPAṆAM.

A treatise explaining the chief characteristics of the Vēdas and expatiating on the superiority of the Śuklayajus over the Kṛṣṇayajurvēda: by Kṛṣṇasūri.

Contains the first Prakaraṇa.

**Beginning:**

कृष्णं कृपालुं पुरुषोत्तमं तं राधासमेतं रमणीयरूपम् ।
रमापतिं राघवपूर्वरूपं नमामि नित्यं पुरुषार्थसिद्ध्यै ॥
श्रीरामं जानकीजानिं साम्बं वाणीं गणेश्वरम् ।
योगीश्वरं याज्ञवल्क्यं कण्वादिसहितं मुनिम् ॥
कात्यायनेन सहितं वन्देऽहन्त्विष्टसिद्धये ।
वन्देऽहं मङ्गलात्मानं भास्वन्तं वेदविग्रहम् ॥
याज्ञवल्क्यं मुनिश्रेष्ठं विष्णुं हरिहरप्रभुम् ।
जितेन्द्रियं जितक्रोधं सदा ध्यानपरायणम् ॥
आनन्दनिलयं वन्दे योगानन्दं मुनीश्वरम् ।
निर्जित्य वादसमये ऋषीन् सर्वानुपस्थितान् ॥
गावो येन हृ(ह)तास्तस्मै नमोऽस्तु ब्रह्मरा(मूर्त)ये ।

* * * *

यद्यप्यहं ब्रह्म सत्यं जगन्मिथ्येति जानताम् ।
अयोग्यमेव चास्माकं वेदतत्त्वनिरूपणम् ॥

* * *

मन्त्रब्राह्मणोभयभिन्नजगद्भिन्नत्वस्य मन्त्रब्राह्मणात्मकवेदे सत्त्वाल्लक्षणसमन्वयः कार्यः । वैदिकसङ्केतविशेषसम्बन्धेन ब्राह्मणपदवत्त्वं ब्राह्मणस्य लक्षणम् । वेदमूलपाणिनीयसङ्केतसम्बन्धेनाख्यातपदवत्त्वमाख्यातानां लक्षणमिव ऋक्प्रचुरवेदत्वं ऋग्वेदस्य लक्षणम् । पादबद्धमन्त्रवत्त्वमृचां लक्षणम् ।

* * * *

**Colophon:**

इति लक्षणग्रन्थस्समाप्तः ॥

**End:**

पूर्वोपन्यस्तस्मृतिपुराणादीनां तु श्रुतिमूललिङ्गत्वेनैकान्तरितप्रामाण्यस्य श्रुतीनां तच्छ्रुतीनां तच्छ्रुतित्वेनैव साक्षात्प्रामाण्यस्य च पूर्वमीमांसायां व्यवस्थापनात्तेत्त्वन्यत्र विस्तर इति सुधीभिरवाहितमनस्कैः पण्डितोत्तमैराकलनीयम् ॥

नामूलं लिखितं किञ्चिन्नाश्रुतं नाविचारितम् ।
इति कृत्वा मयि दयामीक्षध्वं विबुधा इदम् ॥

**Colophon:**

इति श्रीपदवाक्यप्रमाणपारावारीणायातयामाग्रेसरशालिश्रौतस्मार्तकर्मानुष्ठानपरश्रीकृष्णपदारविन्दगलितमधुपानतृषभृङ्गायमाणान्तःकरणकल्लोधितकृष्णाख्य-

ब्रह्मात्मैक्यबुद्धिसाक्षिकप्रमात्रभिन्नश्रीकृष्णपण्डितविरचिते श्रीवेदतत्त्वनिरूपणे शिष्टोपकारनिरूपणं नाम प्रथमं प्रकरणं सङ्क्षेपतः समाप्तिमगमत् । इति शिवम् ।

नास्माकं शिबिका न वाहनवरो वाजी गजो वा महान्
नोष्णीषं च न कुण्डलं न वसनं नोर्णायुगं भास्वरम् ।
नो गौरं वपुरुत्तमं न च पटुः शिष्यश्च वाग्मी महान्
किन्त्वेका गुरुपूर्विका . नवती विद्यानवद्यास्ति नः ॥
यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे न हि ।
यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्न हि ॥
श्रीकृष्णसूरिरचितं वेदतत्त्वनिरूपणम् ।
प्रीत्यै भूयाद्भगवतः श्रीकृष्णस्याम्रशालिनः ।
कोलाहलोऽत्र कुधियां न प्रत्यूहो विवेकिनाम् ॥
कलिदोषो जगन्नाथदासमीष्टे न वीक्षितुम् ।
बृहदास्य . . निविष्टं विलुठितमाभीरनारीभिः :
सत्यचिदानन्दघनं ब्रह्म नराकारमालम्बे ॥
स जयति गोकुलसदनः सरसिजवदनः शिशुर्घनश्यामः ।
पदनखरुचिजितमदनः कृतखलकदनः कृपाजलधिः ॥
अभ्यस्य विद्यां धनमर्जयन्तु ख्यातिं च मूर्खान् प्रति साधयन्तु ।
वयं तु गोविन्द . . . . . . . . . . ॥

---

R. No. 2360.

Paper. 10¼ × 2¼ inches. Foll. 18. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

इष्टिप्रयोगः.

ISṬIPRAYŌGAḤ.

Similar to the work described under R. No. 931(*b*) ante.

Contains the following topics :—

१. अन्त्येष्टिः.
२. पवित्रेष्टिः.
३. दर्शपूर्णमासप्रतिपदार्थप्रायश्चित्तम्.
४. पवमानेष्टिपावकेष्टी.
५. अदितीष्ट्यन्वारम्भणीयेष्टी.
६. आग्रयणेष्टिः.
७. पथिकृदिष्टिवैश्वानरेष्टी.

**Beginning:**

अथाग्निहोत्रिणां विशेषः—

सायं होमानन्तरं रात्रावेव मृतिशङ्का चेत् अग्निहोत्रिण औपासनिनो वा प्रातर्होमं तथै(दै)व कुर्यात् । कृष्णपक्षे रात्रौ चेन्मृतिशङ्का तदावशिष्टदिवसानां सायं प्रातराहुतीस्तथै(दै)व जुहुयात् । तथै(दै)व दर्शेष्टिं कुर्यात् ।

• • • •

एकैकवारमुल्कोपरि कुठारप्रहरं च कुर्यात् । यावत्सदक्षिणाः । सप्त-समित्प्रक्षेपाः कुठाराश्च भवन्ति । ततः कपालमोक्षादि सर्वं समानमित्याहि-ताग्निविषये ।

**Colophon:**

अन्त्येष्टिस्समाप्ता ॥

**End:**

ये यजामहेऽग्निं वैश्वानरं पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश । वैश्वानरस्सहसा पृष्टो अग्निस्स नो दिवा स रिषः पातु नक्तं वौ । संस्थाजपान्तं कुर्यात् ॥

**Colophon:**

पथिकृद्वैश्वानरहौत्रस्समाप्तः ॥

Fol. 18*b* is left blank.

---

## R. No. 2361.

Paper. 10¼ × 9¼ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Veṅkaṭa Śāstrigāru of Cintalapudi, Gudivada taluk, Kistna district.

### कुहनाभैक्षवप्रहसनम्.

### KUHANĀBHAIKṢAVAPRAHASANAM.

A drama of the kind called Prahasana in which the chief sentiment produced is that of mirth. It is intended to ridicule an hypocritical ascetic for his love to a public woman. The author of the work is Ayyalunātha, son of Bommakaṇṭhi Gaṅgādhara. It was staged on the occasion of the vernal festival of God Gōpikāramaṇa worshipped in the town of Rājaśēkhara.

Incomplete.

**Beginning:**

देवानाममृतप्रदानसमये संप्राप्तकान्ताकृति-
र्लीलाविक्रमवल्गितस्तनभरो भास्वद्विभूषावलिः ।



28262

सान्तर्हासवचःप्रपञ्चचतुरस्निग्धालसालोकनैः
पश्यन्नासववञ्चितासुरगणो नारायणः पातु नः ॥

नान्द्यन्ते सूत्रधारः (समन्तादवलोक्य, सानन्दम्)—अहो निरङ्कुशा खलु वसन्तलक्ष्मीः—

मधुकरमधुरारावैः मदकलकलकण्ठमञ्जुलारावैः ।
प्रविकचरसालपाली(गलत्)परिमलैश्च पूरितं भुवनम् ॥

* * * *

सू—आर्ये राजशेखरनगरललामभूतस्य भगवतो गोपिकारमणस्य वसन्तोत्सवदर्शनागतया विद्वन्मत्या परिषदा बोम्मकण्ठिगङ्गाधरसुधीतनयस्य अय्यलुनाथस्य कृतिं कुहनाभैक्षवं नाम प्रहसनमभिनेतुमादिष्टोऽस्मि ।

* * * *

नटी—अलं परिहासेन । कथ्यतां तावत् । तस्यास्तपस्विन्याः तस्य च व्रतिनः कथमिव सङ्घटनं भविष्यति ।

सू—आर्ये किमन्यत् । चिरमत्तोऽयं वसन्तकाल एव सङ्घटयिष्यति ।

* * * *

दामोदरः—मधुरोऽयं मधुमास इति पठित्वा सत्यमेतत् ।

यतः—पूर्वेद्युरस्मद्गुरुर्भगवतो गोपिकारमणस्य नमस्कारार्थं गतः । तत्र ललितसुकुमारलास्यचतुरां चन्द्ररेखामवलोकयन् रन्ध्रान्वेषिणा मन्मथेन नीरन्ध्रमुक्तशरनिकरजर्जरितहृदयः तदारभ्य सात्त्विकोदयपारम्पर्यवशादुज्झितलज्जमुन्मत्तो वर्तते ।

End:

षण्डः—भो भो गृहान्तरालस्थिताः चन्द्ररेखा कुपितेति गृहान्निर्गतोऽहम्मधुस्नानः । तदद्य भवद्भिरवहितैः स्थातव्यम् ।

भिक्षुः—(सभयम्) वत्स कोऽयमनुरणनमिवाहम्मधुस्नानघण्टायाः ।

दामोदरः—(अपवार्य) भगवन्नेहि तावत् । तथेति स्थिताः । वृश्चिकदंशं सूचयित्वा महावृश्चिकदष्टोऽस्मीति क्रन्दति भिक्षुः ।

---

R. No. 2362.

Paper. 10¼ × 9¼ inches. Foll. 28. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Reḍḍi Veṅkannagāru of Pannangipalli, Gōdāvari district.

(a) सर्वतोभद्रचक्रम्, आन्ध्रटीकासहितम्.

**SARVATOBHADRACAKRAM WITH TELUGU MEANING.**

Foll. 1a—21b.

Incomplete.

Same text as that described under No. 14001 of the D.C.S. MSS., Vol. XXIV.

---

(b) सर्वतोभद्रचक्रश्लोकाः, आन्ध्रटीकासहिताः.

**SARVATOBHADRACAKRAŚLOKĀḤ WITH TELUGU-MEANING.**

Foll. 21a—26b. Foll. 27—28 are left blank.

Same work as that described under No. 14002 of the D.C.S. MSS. Vol. XXIV, but Telugu meaning is also given.

Complete.

**End:**

अस्वरं मेषसिंहादि इ कन्याद्वन्द्वकर्किणौ ।
अस्वरे चापमीने च ए स्वरे च तुला वृषौ ॥
ओ स्वरे मृगकुम्भौ च राशीराश्च ग्रहाः शुभाः ।
स्वरानवस्था ये खेटा राशयो यस्य नामकाः ॥

* * * *

कन्यायाः पाण्डुरं चैव तुलायां चित्रवर्णकम् ।
वृश्चिकं नीलवर्णं च धनुस्स्वर्णं च वर्णकम् ।
मकरं पिङ्गलं वर्णं कुम्भं कर्बुरवर्णकम् ॥
मीने पाटलवर्णं च राशिवर्णं यथाक्रमम् ॥

**Colophon:**

सर्वतोभद्रं संपूर्णम् ॥

The scribe of the original MS. adds—

विक्रमाब्दे धनुर्मासे द्वादश्यां भौमवासरे ।
सर्वतोभद्रग्रन्थं च मातृका लिखिता क्रमात् ॥
श्रीकौण्डन्यसगोत्रस्य सूर्यनारायणाह्वयः ॥

---

## R. No. 2363.

Paper. 10¾ × 9½ inches. Foll. 100. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

(a) प्रस्तावकदम्बरत्नाकरः.

**PRASTĀVAKADAMBARATNĀKARAḤ.**

Foll. 1a—95b.

This work deals with the life history and greatness of Yājñavalkya, the great sage, who propogated the Vājasanēya Samhitā of the White Yajurvēda. It consists of three parts, each part containing six Adhyāyas. It is purported to have been taken from the Skāndapurāṇa. The topics dealt with in them are given below. The MS. is said to have been corrected in Kali 4999, Vilambi year, in the village of Kañjanapalli situated in the country between the Kistna and the Gōdāvari.

Contains the following Adhyāyas :—

प्रथमभाग.

१. संक्षेपचरितकथनम्.
२. योगीश्वरावताराय विष्णुं प्रति ब्रह्मरातोक्तिः.
३. योगीश्वरप्रादुर्भावजातकर्मोपनयनवेदाभ्यासादिकथनम्.
४. योगीश्वरकृतमिथिलापुरप्रस्थानकथनम्.
५. वाजिवैशम्पायनवाग्विशेषकथनम्.
६. कृष्णयाजुषवमनतैत्तिरीयशाखोत्पत्त्यादिकथनम्.

मध्यमभाग.

१. वाजसनेयसंवादकथनम्.
२. छायादेवीप्रादुर्भावकथनं, सूर्यभार्याश्वरूपप्रस्तावकथनं च.
३. अश्विनीदेवोत्पत्तिः । अश्वानयनद्वादशादित्यलोकगमनशिष्योपदेशनार्थं द्वितीयसमरथनिर्माणशिष्यबुद्धिपरीक्षाकथनम्.
४. वाजिमुनेस्सूर्योपदेशानन्तरं भूलोकागमनम् । मार्गमध्ये चित्ररथगन्धर्वशिष्यलाभः । ततः स्वाश्रमगमनम् । तत्र स्वनाम्ना पट्टणनिर्माणम् । तदनु कात्यायनीकल्याणम् । सर्वशिष्याणां साङ्गवेदाध्यापनम् । निमिचक्रवर्तिकृतयज्ञाध्वरदक्षिणास्वीकारभारतकथनम्.
५. स्वर्णधेनुदानप्रतिग्रहयमनारदसंवादकथनम्.
६. स्वर्णगोगणोज्जीवनकथनम्.

अन्त्यभाग.

१. याज्ञवल्क्याश्रमं प्रति मुनिभिस्सह गार्ग्यागमनम्.
२. गार्गीयाज्ञवल्क्यसम्भाषणकथनम्.
३. गार्गीकल्याणोत्सवोद्दालकमन्वागमनम्.
४. उद्दालकवाजसनेयसंवादभूभारनिवृत्त्युपायकथनपूर्वकब्रह्मशिवसंभाषणकथनम्.

५. शाकल्ययाज्ञवल्क्यसंवादशाकल्यशिरःपतनहेतुभूतदर्भकूर्चस्थापनशाकल्यसुतिमहर्षिप्रार्थनया शाकल्यप्राणदानादिकथनम्.

६. महर्षिकृतमङ्गलाशासनकथनम्.

**Beginning :**

श्रीमद्वाजसनेयस्य चरित्रसहितं मया ।
तत्प्रस्तावकदम्बाख्यरत्नाकरमिहोच्यते ॥
वाजिवक्त्रं महाविष्णुं श्रीसूर्यंचाश्वरूपिणम् ।
हयाननं कल्किदेवं प्रणतोऽस्मि सुरत्रयम् ॥

इति देवतानमस्कारः ।
अथ गुरुनमस्कारः—

श्रीमद्वाजसनेः पुत्रं सुनन्दानन्दवर्धनम् ।
ज्ञानाब्धिकं याज्ञवल्क्यमज्ञानध्वान्तभास्करम् ॥
प्रणम्यादौ महात्मानं स्कान्दोक्तचरितं (च) यत् ।

* * * *

विशाम्यत्र प्रथमतः सङ्क्षेपेण ततः परम् ।
आविर्भूतादिचारित्रं प्रायः पञ्चात्मकं यथा ॥
तद्विस्तरं लिखाम्यत्र स्कान्दोक्तं मुनिभाषितम् ।
तच्छ्रोतव्यं प्रयत्नेन स्त्रीभिश्च पुरुषैस्सदा ॥
वक्ष्ये वाजसनेयस्य चरित्रं शृणुतर्षयः ।
इति सूतः पुराणज्ञो मुनीन् प्राह च सादरम् ॥

श्रीसूत उवाच—

श्रीमन्नारायणस्यैव नाभीकमलतः पुरा ।
जज्ञे ब्रह्मा स एवाभूत् ब्रह्मरात इति स्फुटम् ॥
स चासौ मानसब्रह्मा प्रथमस्सर्वपूजितः ।
सप्तमः पद्मजो ब्रह्मेत्येवं भारतभाषितम् ॥
गाल्वीये शतपथे छर्दिब्राह्मणके तथा ।
सप्तानां ब्रह्मकल्पानां ब्रह्मरातस्तथाग्रजः ॥
तत्तेजसा सुनन्दाख्यदेव्यां गर्भे महाद्युतिः ।
पञ्चसंवत्सरमयो जायमानोऽर्भकाकृतिः ॥
तस्थौ योगीश्वरस्तत्र मातृगर्भे . . ङ्कितम् ।
ततो विष्णुरसमागत्य गर्भस्थोऽर्भकमब्रवीत् ॥

ब्रह्मोपदेशं कृतवाननन्तस्तदनन्तरम् ।
प्रादुर्भूतो मातृगर्भाद्दत्तात्रेय इवापरः ॥
त्रिमूर्त्यात्मा याज्ञवल्क्ययोगीश्वर इति स्वयम् ॥

* * * *

**Colophon:**

इति श्रीस्कान्दोक्तवाजसनेयोपाख्याने सारोद्धारे प्रथमभागे सङ्क्षेपचरित्रकथनं नाम प्रथमोऽध्यायः ॥

**End:**

लोकाक्षिपारस्करादिसूत्रानुष्ठानतत्पराः ।
वेदान्तशास्त्रनिरतास्तथान्ये चास्तिकोत्तमाः ॥
भक्तिश्रद्धासमायुक्ता ये च शृण्वन्ति सादरम् ।
ते सर्वे प्राप्नुवन्त्याशु चतुर्वर्गफलं महत् ॥
श्रीमद्वाजसनेयस्य चरित्रं सकलेप्सितम् ।
ये लिखित्वा प्रदास्यन्ति तेषामिष्टप्रदं भवेत् ॥
नास्तिकाय न दातव्यमास्तिकाय विशेषतः ।
दातव्यं हि प्रयत्नेन श्रीहरिः प्रीयतामिति ॥

**Colophon:**

इति श्रीमद्वेदाचार्यप्रस्तावकदम्बरत्नाकरे स्कान्दोक्तवाजसनेयचरित्रसारोद्धारे महर्षिकृतमङ्गलाशासनकथनं नाम षष्ठोऽध्यायः ॥

प्रायः स्कान्दपुराणोक्तं श्रीयाज्ञवल्क्यमहिमानम् ।
सङ्गृह्य पद्यकाव्यं चान्ध्रो मन्नारुकोविदश्चक्रे ॥
ग्रन्थोऽयं गर्हितोऽप्यज्ञैर्जैनैस्सर्वज्ञशेखरः ।

* * * *

श्रीमद्वाजसनेयस्य चरित्रसहितं मया ।
तत्प्रस्तावकदम्बाख्यरत्नाकरमिहोदितम् ॥
कलौ च प्रथमे पादे पञ्चवर्षसहस्रके ।
न्यूनैके च विलम्ब्याख्यवत्सरे ज्येष्ठमासके ॥
द्वादश्यामसिते पक्षे बुधवारे गुरोः कृपात् ।
श्रीमद्वाजसनेयस्य चरित्रं शोधितं त्वभूत् ॥
ग्रामे कुञ्जनपल्याख्ये कल्किदेवस्य सन्निधौ ।
कृष्णागोदामध्यदेशे सप्तगोदावरस्य वै ॥

भागे पश्चिमतस्तत्र गोदावर्यास्समीपतः ।
पञ्चक्रोशात्मके देशे यजुर्द्वयविराजिते ॥

---

(b) कण्वमाहात्म्यम्.

KAṆVAMĀHĀTMYAM.

Foll. 96a – 98a. Foll. 98b and 99a give the contents of the work. Foll. 99b—100 are left blank.

This work gives the life history of Kaṇva, one of the disciples of Yājñavalkya, who gave his name to a recension of the Śukla Yajurvēda. The work is purported to have been taken from the Bhaviṣya Purāṇa.

Contains the 66th Adhyāya of the Bhaviṣya Purāṇa.

**Beginning:**

सूत उवाच—

इति श्रुत्वा वचस्तस्य जगन्नाथस्य धीमतः ।
कृष्णचैतन्य एवापि तमुवाच प्रसन्नधीः ॥
भगवन् प्राणिनां श्रेयो यदुक्तं भवता मुने ।
विस्तरात् तत्कथां ब्रूहि यथा बौद्धसमुद्भवः ॥

श्रीजगन्नाथ उवाच—

सहस्राब्दे कलौ प्राप्ते कर्मभूम्यां च भारत ।
कण्वो नाम मुनिश्रेष्ठस्सम्प्राप्तः कश्यपात्मजः ॥
आर्यावती देवकन्या कण्वस्य दयिता प्रिया ।
शक्राज्ञया च संप्राप्ता दम्पती शारदातटे ॥

**End:**

योगी उवाच—

भगवन् श्रोतुमिच्छामि किंचिदात्ममनोगतम् ।
समाराध्य विभो देवं नरो मुच्येत वै भयात् ॥
गृहस्थो ब्रह्मचारी वा वानप्रस्थोऽथ भिक्षुकः ।
य इच्छेन्मोक्षमास्थातुं देवतां कां यजेत सः ॥
तुष्टेन हि पुरा मह्यं कथितं भास्करेण तु ॥

**Colophon:**

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि याज्ञवल्क्यब्रह्मसंवादे आदित्यमाहात्म्ये षट्षष्टितमोऽध्यायः ॥

## R. No. 2364.

Paper. 10⅜ × 8¼ inches. Foll. 36. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

**इष्टकापूरणसूत्रम्, सभाष्यम्.**

**ISṬAKĀPŪRAṆASŪTRAM WITH COMMENTARY.**

Foll. 1*a*—34*b*. Fol. 35*a* gives particulars of transcription. Foll. 35*b*—36*b* are left blank.

The Sūtras relating to the size and arrangement of the bricks for the construction of sacrificial altars. They are said to form the supplement to the Katiyasutras. The commentary is by Dēvadatta, son of Prajāpati. The following topics are dealt with in the ten Khaṇḍikās of the work:—

१. इष्टकाप्रमाणादिकथनम्.
२. यजुष्मतीविवेककथनम्.
३. लोकंपृणादिविवेककथनम्.
४. दशकोणेष्टकाप्रमाणकथनम्.
५. तृतीयचितिपूरणकथनम्.
६. चतुर्थचितिपूरणकथनम्.
७. पञ्चमीचितिमध्यविराट्पूरण-कथनम्.
८. धिष्ण्यपूरणकथनम्.
९. पक्वेष्टकासंख्याप्रमाणसंक्षेप-कथनम्.
१०. यजुष्मतीप्रथमादिचितिसंख्या-कथनम्.

Complete.

**Beginning:**

द्वैमातुरं नमस्कृत्य सर्वाभीप्सितदायकम् ।
इष्टकापूरणस्याहं कुर्वे विवृतिमुज्ज्वलाम् ॥

अथातस्सुपर्णचित्यस्याग्नेः कातीयसूत्रशेषमृजुपक्षस्यानुव्याख्यास्यामः—

अथशब्दोऽयं मङ्गलार्थः आनन्तर्यार्थो वा, अथ वा कात्यायनसूत्रोपबन्धनानन्तरम् । अतश्शब्दो हेत्वर्थः, यस्मात्कात्यायनसूत्रे अग्निः कार्त्स्न्येनोक्तो नास्ति, किञ्चिद्वक्तव्यमस्ति, अतो हेतोरग्नेश्श्यना . . . . सम्बन्धिकातीयसूत्रशेषं वयमनुव्याख्यास्यामः । ननु द्रोणचिद्रथचक्रचित्कङ्कचित्प्रउगउभयतःप्रउगसमूह्यपुरीष इत्येतत्संज्ञकाप्यडग्नयस्सन्ति । तेषां च वक्तव्यमपि बहु विद्यते, श्रुतौ सूत्रे च तेषां नाममात्रेणैव सङ्कीर्तनात् । अतो विशेषो न ज्ञायते ।

• • • •

**Colophon :**

इति पूरणभाष्ये याज्ञिकदेवदत्तकृतौ प्रथमा खण्डिका ॥

**End :**

यथा उदग्लक्षणा इष्टका उपधीयन्ते एवमत्रापीत्यर्थः ॥

अथ शास्त्रान्ते मङ्गलमाचरति —

अयुतं च सहस्रं च शतं च सप्तति तथा ।
सङ्ख्यैषा शाण्डिलस्याग्नेः तस्मै च मुनये नमः ॥

**Colophon :**

इति सम्राट्स्थपतित्रिरग्निचिद्याज्ञिकश्रीप्रजापतिसुतयाज्ञिकदेवदत्तकृतायां पूरणभाष्यं समाप्तम् ॥

---

R. No. 2365.

Paper. 10¼ × 9¼ inches. Foll. 22. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Vetturi Sundara Śāstrigāru of Pedakallapalli, Kistna district.

Fol. 1 gives the contents of this work.

कुण्डदर्पणोद्धारः.

KUṆḌADARPAṆODDHĀRAḤ.

Foll. 1*a*—21*a*. Foll. 21*b* and 22 are left blank.

Similar to the work described under R. No. 349 ante. The author's name is not given.

Complete.

**Beginning :**

चतुरश्रमध्यतिर्यग्गतमध्यसूत्राग्रद्वयात् सूत्रद्वयं वर्धितपश्चभागाग्रे प्रदद्यात् । एवं कृते सति त्र्यश्रं भवति । चतुरश्रपश्चिमभागे समचतुरश्रद्वयं भवति । दक्षिणस्थितचतुरश्रस्य कर्णसूत्रार्धचिह्नं कृत्वा तस्मान्नैरृतिकोणे अर्धचन्द्रं विलिखेत् ।

**End :**

चतुर्दशहस्तव्यासवर्गाङ्गुलाः ८०.६८, मूलम् ७९.२९ ; पञ्चदशहस्तव्यासवर्गाङ्गुलाः ९६.४०, मूलम् ७२.१२ ; षोडशहस्तव्यासवर्गाङ्गुलाः ९२.१६, मूलम् ९६.०. सर्वत्र खातं हस्तमात्रमेव ॥

**Colophon :**

इति कुण्डदर्पणोद्धारग्रन्थस्समाप्तः ॥

R. No. 2366.

Paper. 10¾ × 9¼ inches. Foll. 16. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Gōdāvari district.

नित्याग्निहोत्रपद्धतिः.

NITYĀGNIHŌTRAPADDHATIḤ.

Foll. 1a—15a. Foll. 15b and 16 are left blank.

Ritualistic procedure relating to the Agnihōtra performed on the newmoon day of every month.

Complete, but apparently wants the beginning.

**Beginning:**

सान्नाय्यवति दर्शे चतुर्दश्यां दध्याग्निहोत्रं हुत्वा, प्रातः कृतशेषस्य स्थापनम् । पूर्वाह्णे गार्हपत्यादाहवनीयदक्षिणाग्न्योरुद्धरणम् । अग्न्यन्वाधानमग्निमष्टाकपालेन पुरोडाशेन, विष्णुमन्तराज्येन, इन्द्रं सान्नाय्येन श्वोऽहं यक्ष्ये ।

**End:**

ततस्सर्वाग्निभ्यो भस्मोद्धृत्य यत्र राशिः कृतो भवति तत्समीपं गच्छेत् । असते पांसवाय भस्मोद्वापाय नम इति वदेत् । तत आवसथ्याग्नौ होमः । एवं यावज्जीवं स्वयमग्निहोत्रं होतव्यम् । उपवसथे स्वयं नियमेन होमः ॥

**Colophon:**

नित्याग्निहोत्रपद्धतिस्समाप्तिमगात् ॥

---

R. No. 2367.

Paper. 10¾ × 9¾ inches. Foll. 18. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

प्रयोगरत्नम्.

PRAYŌGARATNAM.

Foll. 1a—17b. Fol. 18a gives the contents of this work. Fol. 18b is left blank.

Same work as that described under No. 43 of M. Seshagiri Sastri's Report No. 1 but with slight differences in reading.

Incomplete.

Contains the following subjects :—

१. संस्कारनिर्णयः.
२. स्वस्तिवाचनम्.
३. पुण्याहवाचननिर्णयः.
४. आभ्युदयिकश्राद्धम्.
५. गर्भाधानम्.
६. पुंसवनविधिः.
७. सीमन्तविधिः.
८. जातकर्मप्रयोगः.
९. षष्ठीपूजाविधिः.
१०. नामकरणपद्धतिः.
११. पर्यङ्कारोहणम्.
१२. दुग्धपानम्.
१३. निष्क्रमणम्.
१४. उपवेशनम्.
१५. अन्नप्राशनम्.

**Beginning:**

श्रीमत्परशुहस्ताभोगेभोधाङ्कषाय च । !
अच्छसिन्दूरवर्ण . . . . . . . नमः ॥

अथ संस्काराः—

ते चाष्टाचत्वारिंशत् । तथाच गौतमः—

गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनम् । चत्वारि वेदव्रतानि । स्नानं सहधर्मचारिणीसंयोगः । पञ्चानां यज्ञानामनुष्ठानमष्टकापार्वणश्राद्धम ।

• • • •

हरदत्तो व्याचख्ये—आङ्गिरसात् पञ्चविंशतिसंस्कारादय उक्ताः ।

पञ्चविंशतिसंस्कारैस्संस्कृता ये द्विजातयः ।
ते पवित्राश्च योग्यास्स्युः श्राद्धादिषु सुयन्त्रिताः ॥
आदिशब्दाध्यजन्मादौ ।
गर्भाधानं पुंसवनं सीमन्तो बलिरेव च ॥

• • • •

अत्र गर्भाधानाद्य उपनयनान्ता एव सर्वेषां नियताः । नतु स्नानाद्याः । तेन ब्रह्मचर्यादेव प्रव्रजेदित्यादि ना(न)विरुध्यते । एते च द्विजन्मनामेव समन्त्रकाः ।

• • • •

**Colophon:**

गर्भाधानविधिः ।

**End:**

स यदि कामयेत कुमारोऽन्नाद्यस्स्यात्तदा कपिञ्जलमांसं प्राशयेत् । जवनकामो मत्स्यमांसमायुष्कामः . . . . . . आद्यमांसं ब्रह्मवर्चसकामः । सर्वकामः सर्वमांसानि प्रत्येकं प्राशयेत् ।

---

R. No. **2368.**

Paper. 10⅜ × 9⅜ inches. Foll. 74. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

कात्यायनसूत्रपद्धतिः.

**KĀTYĀYANASŪTRAPADDHATIḤ.**

Foll. 1*a*—73*b*. Fol. 74*a* contains the name of the owner of the MS. from which this was copied. Fol. 74*b* is left blank.

By Yājñikadēva, son of Prajāpati. Same work as that described under R. No. 2357 ante.

Contains the Adhyāyas 16 to 18 complete.

**Beginning:**

अथ सोमाङ्गभूतस्याग्निचयनस्य पद्धतिर्लिख्यते—

तदग्निचयनं सोमयागमात्रे विकल्पेन भवति । स महाव्रते च नित्यं नित्याग्निष्टोमस्य प्रथमप्रयोगेन भवति । द्वितीयादिप्रयोगे तु तत्रापि भवत्येव । षोडशिनि तु ग्रावान्ते प्रतिषेधात् साद्यस्केषु सारस्वतेषु चासंभवादन्यभावः । तत्र चयनं करिष्यमाणस्य फाल्गुनकृष्णप्रतिपदि पौर्णमासयागानन्तरं माघ्यमावास्याया वा इष्टेष्टका पशुर्भवति । तत्र त्रयः पक्षाः—एकस्मिन् पक्षे पुरुषाश्वगोन्य(व्य)जाः पञ्च पशवो भवन्ति । द्वितीये पक्षे प्राजापत्यः पशुः, तृतीये वायव्य इति । तत्र पूर्वं पञ्चपशुयज्ञो लिख्यते—तत्र वरणे पञ्चपशुनेति ततो भूसंस्कारादि ।

* * * *

**Colophon:**

इति श्रीत्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतेन याज्ञिकदेवेन कृतायां कात्यायनसूत्रपद्धतौ षोडशोऽध्यायः ॥

**End:**

इत्थमिष्टीनामेव त्वं सं पं ते ढीतादिपरिमाणे हविषां यागक्रमे देवैतशब्दे गुणनिर्गुणैरुच्चैरुपांशुतां चर्म दादेः शब्दस्यैतेष्वध्वर्युमनुविदधीत तदुक्तं कुर्यात् ।

आत्मीयमुपतिष्ठमप्यपेक्षेत यजमानः आध्वर्यवत्वादास्येति शाङ्खायनभाष्ये जेत-मत्रावरुण्याय वश्ययोपांशुत्वं देवसु हविषां क्रमश्चाध्वर्युसूत्रादवगन्तव्यः ॥

Colophon:

इति श्रीत्रिरमिचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतेन याज्ञिकदेवेन कृतायां कात्यायनसूत्रपद्धतौ अष्टादशोऽध्यायः ॥

---

## R. No. 2369.

Paper. 10⅜ × 9⅜ inches. Foll. 82. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

कण्वकारिका.

KAṆVAKĀRIKĀ.

Foll. 1*a*—81*a*. Fol. 81*b* gives the contents of the work. Fol. 82 is left blank.

A treatise in the form of verses describing the ritualistic procedure relating to sacraments and funeral ceremonies as observed by the followers of the White Yajurvēda. The author is said to be Kaṇva.

Deals with the following subjects:—

पूर्वकारिका—

१. अग्निमुखम्.
२. अङ्कुरार्पणम्.
३. अष्टविवाहाः.
४. बहुपत्नीग्रहणम्.
५. मथनाग्निविधानम्.
६. मण्टपस्थापनम्.
७. मातृपूजाक्रमः.
८. मधुपर्कविधिः.
९. विवाहविधिः.
१०. लाजहोमविधिः.
११. गृहप्रवेशविधिः.
१२. शेषहोमः.
१३. आधानाग्निविधिः.
१४. भातरौपासनम्.
१५. विधुरौपासनम्.
१६. गर्भाधानम्.
१७. प्रवरनिर्णयः.
१८. आधानप्रकरणम्.
१९. सङ्क्रान्तिनिर्णयः.
२०. उपनयनवेदिकादि.

उत्तरकारिका—

२१. और्ध्वदेहिक.
२२. अस्थिसंचयन.
२३. दशाहादिसपिण्डीकरणानि.
२४. मार्योद्वयविषयम्.
२५. उत्पन्नाग्निप्रायश्चित्तम्.

Incomplete.

**Beginning:**

विष्णुं प्रणम्य देवेशं वाग्देवीं गणनायकम् ।
कण्वोऽहं संप्रवक्ष्यामि सर्वं वाजसनेयिनाम् ॥
श्रौतमुक्तं मया पूर्वं स्मार्तं कर्मेदमुच्यते ।
स्थालीपाकादिकं सर्वं मन्त्रतन्त्रैर्विशेषतः ॥
ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
गण्डौ भित्वा विनिष्क्रान्तौ तेनादौ मङ्गलात्मकौ ॥
यत्राग्निस्थापनं कुर्यात्तत्र संमार्जनं कुशैः ।
गोमयेनोपलिप्याथ स्थण्डिलं तत्र कारयेत् ॥
इषुमात्रं तदर्धं वा शालिभिः श्वेततण्डुलैः ।
तच्चूर्णेनाथवा कुर्यात् गोधूमरजसापि वा ॥
तदभावेऽश्मचूर्णेन कुर्याद्गौरमृदापि वा ।
पश्चोदग्रा लिखेद्रेखाः प्रागग्राश्च तथोपरि ॥

• • • •

**Colophon:**

इत्यग्निमुखं समाप्तम् ॥

**End:**

प्रेतस्य संस्कारार्थं श्मशानाग्निग्रहणविधानमाह—

पित्रोर्दशाहमध्ये तु जननैरौरसस्य च ।
स्मृ . . . शौचा शुद्धिस्स्यान्नान्यकालतः ॥
वायसैस्सेविते पिण्डे शुना शूद्रेण दूषिते ।
पुनः कर्म प्रकुर्वीत व्यावृत्तिश्च विपर्यये ॥
व्युत्क्रमाच्च सापिण्ड्यं वियोगाच्च कारितम् ।
द्वितयं तु पुनः कुर्यात् क्रमप्राप्ते स्वयं सुतः ॥

---

R. No. 2370.

Paper. 10¼ × 9¼ inches. Foll. 188. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. acquired through the Sub-Magistrate of Kovvûru, Kistna district.

चिदम्बरगुरुमाहात्म्यम्.

CIDAMBARAGURUMÂHÂTMYAM.

Foll. 1*a*—184*b*. Foll. 185*a*—188*a* give the contents of the Adhyâyas. Fol. 188*b* is left blank.

An account of the life history of Cidambaraguru who was the son of Śaṅkarayōgin and Satī. He belonged to the Śrīvatsagōtra and was a follower of the Śuklayajus. He is said to have resided in the Jālanthara hill on the banks of the Malāpahārin in the Daṇḍakāraṇya. The date of his birth is given as Śālivāhana Śaka 1600 (?). The author of the work is Rāmacandra, son of Śaṅkara and grandson of the hero of the work.

Complete in 49 Adhyāyas dealing with the following subjects:—

१. . . . . . . .
२. चिदम्बरावतारोत्सवप्रशंसा.
३. मौञ्जीव्रतकथनम्.
४. बालचरित्रम्.
५. पूर्वकालीनधनप्रदर्शनम्.
६. यवननयनान्ध्यपरिहारादिकथनम्.
७. रिक्तब्राह्मणाय स्वर्णमुद्राप्रदानम्.
८. विजयपुरब्राह्मणदम्पतिपुत्रवरप्रदानादिकथनं, पूर्वजन्मनिक्षिप्तधनदर्शनकथनं च.
९. व्याघ्ररूपेण शिशुरक्षणम्.
१०. मृतसंजीवनादिप्रदर्शनम्.
११. वापीगङ्गाप्रवेशः.
१२. वैष्णवाय माध्वमतविशिष्टाय विष्णुरूपप्रदर्शनम्.
१३. ब्राह्मणमनोऽभीष्टदर्शनब्राह्मणमदभङ्गादिकथनम्.
१४. रिक्तस्य धनप्रदानद्विजव्रणपीडापरिहारः.
१५. दुर्भिक्षे अग्निष्टोमारम्भप्रकरणे नानादेशराजादिकथम्.
१६. वेदिकाशालाविहरणादिकथनम्.
१७. द्वितीयदिनकृत्यम्.
१८. प्रवर्ग्यप्रकरणादिकथनम्.
१९. गङ्गादर्शनशिशुजीवदानविप्रजिह्वाप्रदानमङ्गलाचरणादिकथनम्.
२०. श्रीमन्तस्यातिथ्यकरणम्.
२१. गुरुनवपुरप्रवेशादिकथनम्.
२२. विधवस्त्रीसौभाग्यप्रदानम्.
२३. महाध्वरः.
२४. मृतवृषभसंजीवनम्.
२५. यावनालखातपूरणविचित्रकथनम्.
२६. गणिकाकुष्ठपरिहारः.
२७. माध्वमतब्राह्मणजिह्वाप्रदानम्.
२८. दरिद्रसम्पूर्णधनप्रदानम्.
२९. शुष्कपूगीफलाङ्कुरितचित्रं दरिद्रच्छेदनमृणनाशनं तेजःप्रभावादिकथनम्.
३०. आचार्यकुष्ठनाशनमहच्चित्रकथनम्.
३१. संसारचन्दमहारोगपरिहरणतदुज्जीवनसदाशिवनामकब्राह्मणोज्जीवनचिदम्बरनामस्मरणादिमहिमानुवर्णनम्.

३२. नारायणयतेर्देवत्वप्राप्तिनाथनकथनचित्रम्.

३३. नासिकात्र्यम्बकमहत्स्थले भक्तानां निजरूपदर्शनम्.

३४. शार्दूलकण्ठगतकण्टकनिवारणकथनचित्रम्.

३५. विषपानचित्रशिष्यान् प्रति शतपथब्राह्मणोपदेशः.

३६. स्वगृहे गुप्तस्य बहिःप्रकाशनम्.

३७. गायत्रीपुरश्चरणविधानजापकान् प्रति श्रीचिदम्बरदेवेनेदमित्थंकर्तव्यमित्युपदेशकथनम्.

३८. चिदम्बरगुरुणा ऋत्विजः प्रति गायत्रीपुरश्चर्योपदेशः.

३९. गायत्रीपुरश्चरणावभृथस्नानलक्षब्राह्मणभोजनसङ्कल्पवृद्धब्राह्मणगङ्गास्नानवैभवम्.

४०. वृद्धब्राह्मणस्य वरदानेन पुत्रप्राप्तिः.

४१. वैश्वानरेष्टिप्रारम्भदुष्टब्राह्मणगर्वभङ्गार्थमौदुम्बरवृक्षकोटरात्स्वर्णमुद्राग्रहणसर्वब्राह्मणसन्तुष्ट्यर्थं स्वर्णदानं ब्राह्मणाभयप्रदानकोटिभास्करविद्यापरीक्षणं तस्मै धनप्रदानम्.

४२. काशीयात्रागतब्राह्मणस्योङ्कारेश्वरप्रेरणया वाराणसीगमनप्रशंसापूर्वकचिदम्बरगुरुं प्रति गन्तव्यमिति तेनैवेश्वरोक्तकथनम्.

४३. गौडब्राह्मणप्रत्यक्षनिजलिङ्गरूपप्रदर्शनपूर्वकातिरुद्रमहारुद्रसहितगङ्गास्नानमहावैभवः.

४४. गोकुलेशसेनानायकागमनतद्भोजनसमये सहस्रत्रयब्राह्मणानामेकपात्रस्थपायसेन पूर्णं यथा तथा यावत् क्षीरवृद्धिः नानादेशागतविद्यार्थिसन्मानपूर्वकचतुर्वेदपाठशालानिर्माणस्वयङ्कृतजनकौदुम्बरस्तोत्ररूपम् ।

४५. पूगीफलं बाणलिङ्गं शिलारूपं जातम्, पाण्ड्यस्य सन्तानप्राप्तिः, अप्पणनामकवृद्धदम्पत्योः पुत्रद्वयप्राप्त्या वंशवृद्धिकथनम्.

४६. तत्स्वानन्दगमनप्रत्यब्दरथोत्सवादिकथनम्

४७. चिदम्बरदेवस्यानुजचरित्रम्.

४८. दिवाकरशापविमोचनश्रीचिदम्बरगुरुस्तोत्रदिवाकरदीक्षितसन्मानगरुडचयनविधानश्रीगुरोः प्रतिसंवत्सररथोत्सवादिकथनम्.

४९. पुत्रपौत्रादिवंशानुचरितम्.

Beginning :

पुरा जालन्धरे रम्ये नानाशाखिविराजिते ।
अदृष्टमुनिशार्दूलनिषेवितमहाश्रमे ॥
चूतवृक्षवने कान्ते देवखातजलाशये ।
चम्पकाशोकपुन्नागमालतीकुसुमाकुले ॥
मृगपक्षिगणव्रातजुष्टे तन्नादनादिते ।
मधुपुष्परसास्वादमत्तषट्पदझङ्कृते ॥
तत्र चिदम्बरक्षेत्रं रमणीयं महाशुचि ।
द्विजालयसमाकीर्णं विद्वज्जनसभान्वितम् ॥

* * * *

तस्मिन् मार्ताण्डलिङ्गस्य पश्चायतनसन्निधेः ॥
कृष्णोदुम्बरतरुस्तव्ये चतुष्कक्षान्तसुस्थले ।
मार्ताण्डदीक्षितमहदौदुम्बरयुगोत्तरे ।
श्रीचिदम्बरदेवस्य निलयं यन्त्रमुद्धृतम् ।
चिदम्बरस्स्वयं तस्मिन्नाविर्भूतश्शिवो हरः ॥
तस्योर्नोत्सवबाहुल्यश्रुत्वा वीक्षणकौतुकाः ।
नरा नार्यस्समायान्त्यूर्जशुक्लप्रतिपत्तिथौ ॥
तदारभ्योत्सवं नित्यं याननिष्क्रमणादिभिः ।
नृपास्सर्वेऽपि राजानो गजाश्वरथपत्तिभिः ॥
अलङ्कारमिदारैस्ते श्रीप्रसादान्नभोजनाः ।
मिलिता ब्राह्मणास्तत्र ददृशुस्तन्महोत्सवम् ॥
विस्मिता निखिलास्तस्य माहात्म्यश्रवणेच्छवः ।
औत्कण्ठ्याच्चिन्तयाविष्टास्तत्काले भगवान् हरः ॥
वृद्धो मुनिर्दीक्षितोऽसावाहिताग्निः प्रियंवदः ।
बहुश्रुतः शास्त्रविच्च वेदवेदाङ्गपारगः ॥

* * * *

द्विजा ऊचुः—

भो स्वामिन् त्वं दयासिन्धो श्रवणेऽस्य महात्मनः ।
कथायाः श्रीचिदंशस्य महेशस्य गुरो वयम् ॥

तृषितान् प्राशय सुधां चिदम्बरकथाब्धिजाम् ।
ब्राह्मणानां वचः श्रुत्वा मुनिः परमहर्षवान् ॥
द्विजान् प्रत्यब्रवीद्देवः प्रेमगद्गदया गिरा ।

मुनिरुवाच—

* * * *

अहो द्विजाः शृणुध्वं तन्माहात्म्यं स्वस्थमानसाः ।
सङ्क्षेपास्ये श्रीचिदंशस्य पवित्रं श्रीकरं बुधाः ॥

**Colophon:**

इति श्रीचिदम्बरमाहात्म्ये मुनिब्राह्मणसंवादे प्रथमोऽध्यायः ।

द्विजा ऊचुः—

मुने सर्वज्ञ नः कामान् माहात्म्यश्रवणादरात् ।
संश्रावयित्वा सम्पूर्यानन्दाब्धौ प्लावयाधुना ॥
वयं तु तृषिता नूनं यथा चातकपक्षिणः ।
घनमिच्छन्ति ये शम्भोश्चरित्रामृतमिच्छवः ॥
नामपीयूषपानाय संलिहद्रसना वयम् ।
पाययस्व मुने योगिन् भवान् लब्धो हि दैवतः ॥
कोऽसौ चिदम्बरो नाम किमु स्यात्तत्र तन्मतिः ।
किं वेदसूत्रं माहात्म्यं तद्ब्रूहि भगवन् मुने ॥

श्रीमुनिरुवाच—

अस्मिन् कलौ पूर्वयुगाद्धर्मविच्छित्तिसंभवः ।
भवेदिति भविष्यं च व्यासाः प्रोचुस्ततो हरेः ॥
अवतारा भविष्यन्ति धर्मसंस्थापनाय हि ।
तस्मादस्मिन् युगे भूता अवतारास्सुगोचराः ॥
युधिष्ठिरयुगादर्वाक् गौडपादप्रतिष्ठितः ।
धर्मे वेदान्तविमतान् वादैर्जित्वा स्वदर्शनात् ॥
ततो बौद्धान् प्रमत्तान् सुदूषकान् धर्मनाशकान् ।
विजित्यान्यमतान् भ्रष्टान् शङ्कराचार्यरूपधृत् ॥
विद्यारण्योऽपि निगमभाष्यस्मृतिसुसङ्ग्रहान् ।
धर्मान् संस्थापयद्धीमान् स्वर्णवृष्टिमथाकरोत् ॥

पम्पायां श्रीविरूपाक्षसन्निधौ सुमहत्तपः ।
चरितं तेन सावित्री प्रसन्ना स्वर्णवृष्टिका ॥
चतुर्विंशत्पुरश्चर्यो गायत्र्या वेदसंमताः ।
कृता गृहस्थावस्थायां मन्त्रासिस्तेन विद्यते ॥
देव्युक्तिश्रवणात्तस्य जिहासा विषयेऽभवत् ।
सन्न्यस्य हंसाश्रमणे जन्मान्तरगतेरियम् ॥
साक्षादागत्य श्रीदेवी वरं वरय सुव्रत ।
आश्रमेऽस्मिन् कुतो योगो विषयस्य ममान्तिकः ॥
उपकृत्यै परेषां तद्विषयज्ञानमुत्तमम् ।
देहीति याचमानोऽसौ धनवृष्टिं समातनोत् ॥
विज्ञानलब्ध्या वेदस्य भाष्यं तत्स्मृतिसङ्ग्रहान् ।
ज्योतिर्ग्रन्थान् विरच्याथ निजानन्दपदं स्वयम् ॥
ततो विद्यानान्ध्रदेशे आन्ध्रविप्रोऽथ याजुषी ।
प्रभाकरे सुनिष्णातः सर्वशास्त्रविशारदः ॥
क्रतवो बहवस्तेन कृत्वा(ता)धर्मप्रतिष्ठिताः ।
अमानुषाणि कृत्यानि कृत्वा प्रत्यक्षतश्शिवः ॥
चिदम्बरे विलीनोऽभूत्सशरीरे वियन्मये ।
क्षेत्रे चैदम्बरे सर्वं चरितं चन्द्रमौलिना ॥
कृतं विस्मयमापन्ना मेनिरे भूमिगोलके ।
तदूर्ध्वं योगवर्यश्रीपादः श्रीवल्लभो हरः ॥
अद्भुतानि चरित्राणि कृतानि यमिना बहु ।
ततो नृसिंहयतिराट् चचार पृथिवीतले ॥
दत्तात्रेय इति ख्यातस्त्रिगुणात्मा हरिर्हरः ।
ततः पम्पासरःक्षेत्रे विष्णुनामा द्विजोत्तमः ॥
तेनापि महदाश्चर्यं कृतं लोकोत्तरं वरम् ।
गोपुराणि विचित्राणि रचितानि महात्मना ॥
अन्तेऽदृश्योऽभूत्तुङ्गायां शिलालिङ्गमयोऽभवत् ।
अधुना परमेशानोऽवातरत् श्रीचिदम्बरः ॥
वर्षे भारतविख्याते बौद्धे रामाश्रमे परे ।

अवतारो दण्डकाख्येऽरण्ये देशे मनोरमे ॥
मलापहार्यास्तीरस्य वामे जालन्धरे गिरौ ।
श्रीमद्यजुश्शुद्धशुक्लकण्वाचार्यविभूषणे ॥
भृगोर्गणस्य श्रीवत्से गोत्रे कात्यायने द्विजे ।
सूक्ते शाखोक्तके दिव्ये शुचिष्मति वरस्तुते
विजयाख्यपुरप्रान्तगोस्थानस्य सुशाश्वतम् ।
ज्योतिष्मद्यक्तिमाश्रित्यावासवस्तुविराजितः ॥
होराशास्त्रविशेषज्ञो नागेशो मूलपूरुषः ।
तस्माच्छङ्करयोगी स्यात्तद्भार्या तपसा शुचिः ॥
ततोऽभूच त्र्यम्बकश्शान्तो दान्तस्तपस्विनी ।
सती कृष्णेति विख्याता तस्योदरवियत्तलात् ॥

* * * *

कलेः प्रथमपादे च दण्डकारण्यदक्षिणे ।
श्रीशालिवाहनशके स्वेखार्याब्जमिते तथा ॥
कार्तिकेऽसितपक्षद्यां सुलग्ने श्रीभगवान् हरः ।
आविर्भूतो महातेजाः कुसुमानि समाकिरन् ॥

* * * *

नामकर्म कृतं तस्य चतुरक्षरसंयुतम् ।
चिदम्बरेति देवस्य यथाशास्त्रं तदंशतः ॥

* * *

इत्यानुपूर्वचरितं मुनिना भाषितं तदा ।
चिदम्बरस्य पौत्रेण श्रीशङ्करसुतेन च ॥
श्रीचिदम्बरदेवस्य महोत्साहो मया श्रुतः ।
मार्ताण्डदीक्षितेनैव बदर्याश्रमवासिना ॥
विदुषा न्यायमीमांसापारगेण सुसाधुना ।
अधीताध्यात्मशास्त्रेण कृपयाज्ञापितोऽस्म्यहम् ॥
भोजपुत्रो देशपाण्ड्यो मार्कण्डेयीतटे वसन् ।
विश्वामित्रकुले जातः पद्मतीर्थे सुपावने ॥
स्वप्ने चिदम्बरादिष्टस्तथा वै शङ्करेण च ।

रामचन्द्र इति ख्यात अथाल्पज्ञोऽतिमूढधीः ॥
श्रीचिदम्बरमाहात्म्यं यथादृष्टं यथाश्रुतम् ।
चिदम्बरप्रेरणया तच्चरित्रं कृतोऽस्म्यहम् ॥

End:

इदं रहस्यं चरितं चिदम्बरगुरोर्विभोः ।
सकृत्पारायणं येन कामेन क्रियते सदा ॥
तं कामं पूरयित्वाशु श्रीचिदम्बर एव सः ।
एकवारं द्विवारं वा त्रिवारं सत्यमेव च ॥

* * *

पठनेन मनोऽभीष्टप्राप्तिरेव न संशयः ।
कलौ चिदम्बराख्यानं पठतां सर्वकामदम् ॥

Colophon:

इति श्रीचिदम्बरगुरुमाहात्म्ये पुत्रपौत्रादिवंशानुचरितं नामैकोनपञ्चाशोऽध्यायः ॥

The scribe adds—

शुक्लवत्सरफाल्गुनशुक्लनवमीशुक्रवासरे वाछापुरग्रामे श्रीचिदम्बरस्वामिना चतुर्थपुत्रनिकटे श्रीवररुचिबावुदीक्षितानामनुग्रहेण मन्नारुशास्त्रिणा लिखितमान्ध्राक्षरेण श्रीचिरंजीविना रामदासेन बालबन्ध्वक्षरमातृकापुस्तकं दृष्ट्वा पठितम् ।

गुरुगोड्डपुरश्रेष्ठ केङ्करीतटवासिनम् ।
औदुम्बरसमीपस्थं चिदम्बरगुरुं भजे ॥

इति ध्यानश्लोकः ॥

---

## R. No. 2371.

Paper. 10⅜ × 9⅜ inches. Foll. 290. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Pēri Nārāyaṇagāru of Pērūru, Amalāpuram taluk, Godāvari district.

Bound in two volumes.

वैद्यग्रन्थः.

VAIDYAGRANTHAḤ.

Foll. 1a—263b. Fol. 264a gives particulars of transcription. Foll. 265a—290a give the contents of the work; foll. 264b and 290b are left blank.

A treatise in medicine compiled from such works as Āyurvēdārthaprakāśikā, Siddhāntasārāvalī, Vātaskandha, Sadvaidyajīvana, etc.

**Beginning:**

वङ्गं च शृङ्गं वटरं कुटीरं तृणजीवभोजीसकाणकर्कोटशश्रृङ्गी अजामोदजा-जीफलं चूतकाशं मधूकं च तालीसपत्रं च चेव्यम्

* * * *

पुनर्नव्याश्च चूर्णेन शोफपाण्डुविनाशनम् ।
शतधौतेन गगनं क्षयरोगप्रणाशनम् ॥
एलालवङ्गचूर्णेन पुंसामस्तगदापहम् ।
अनुपानविशेषेण सर्वरोगहरं स्मृतम् ॥

**Colophon:**

इति श्रीधन्वन्तरिकृतायामायुर्वेदार्थप्रकाशिकायां चिकित्सासारसङ्ग्रहे गन्धकादिगगनभस्मान्तशुद्धिगुणकथनं नाम प्रथमः परिच्छेदः ॥

* * * *

इति श्रीपतञ्जलिकृतौ वातस्कन्धे उद्देशलक्षणपरीक्षाख्यत्रिसन्धिस्समाप्तः ॥

* * * *

इति श्रीपतञ्जलिकृतौ सिद्धान्तसाराख्यायां पैत्थ्यस्कन्धनिरूपणं समाप्तम् ।

* * * *

इति श्रीविदर्भराजमुख्यमहाराजसूनुना दिवाकराराधनसंप्राप्तसकलविद्येन लोलम्बराजेन विरचिते सद्वैद्यशास्त्रनामनि काव्ये प्रथमोल्लासः समाप्तः ॥

* * * *

इति द्रव्यरत्नमालायां फलवर्गः ॥

* * * *

इत्यायुर्वेदार्थप्रकाशिकायां प्रदरगुल्महलीमकादिनिदानचिकित्साकाण्डः समाप्तः ॥

**End:**

मण्डूरपुटक्रमाः—

वशा गुडूची निर्गुण्डी अर्कोलर्कोटरूषकम् ।
निशा पुनर्नवं शृङ्गं करञ्जं स्वरसार्द्रकम् ॥
अपामार्गं वज्रवल्ली चिरविल्वं कलिद्रुमम् ।
एषां रसेषु गोमूत्रे भावयेत्सप्तधा पृथक् ॥
मण्डूरं योजयेद्विद्वान् तत्तद्योगानुसारतः ।
वज्रवल्ल्यङ्कुरैः पिष्टैः पथ्यामरिचपादिकम् ॥

* * * *

सर्वपाण्डुक्षयहरं सर्वकामिलनाशनम् ।
सर्वपापप्रशमनं मण्डूरं शास्त्रसंमतम् ॥

---

R. No. 2372.

Paper. 10¾ × 9¾ inches. Foll. 12. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Vāḍrēvu Vīrannagāru of Pātakōṭa, Kotipalli, Godavari district.

अनेकार्थध्वनिमञ्जरी.

ANEKĀRTHADHVANIMAÑJARĪ.

A paronymous dictionary. Similar to the work described under No. 1590 of the D.C.S. MSS., No. Vol. III.

Complete in 4 Adhikāras as given below:—

१. श्लोकाधिकारः.
२. अर्धाधिकारः.
३. चरणाधिकारः.
४. एकाक्षराधिकारः.

**Beginning:**

शब्दाम्भोधिर्यतोऽनन्तः कुतोऽथ गदमदव्ययात् (?) ।
स्वानुरूप्यैकमानाय तस्मै वागात्मने नमः ॥
सरस्वत्याः प्रसादेन कविर्बध्नाति यत्पदम् ।
प्रसिद्धमप्रसिद्धं वा तत्प्रमाणं च साधु च ॥
शिवं भद्रं शिवश्शम्भुः शिवा गौरी शिवाभया ।
शिवः शिवा कोष्ठी . . . भवेदामलकी शिवा ॥
* * * *

**Colophon:**

इत्यनेकार्थध्वनिमञ्जर्यां श्लोकाधिकारः ॥

**End:**

क्षेत्रे वक्षसि क्षः प्रोक्तः क्षेत्रपाले च मोक्षतः ।
क्षः क्षेत्रे क्षेत्ररक्षे च नृसिंहे च प्रकीर्तितः ॥

**Colophon:**

इत्यनेकार्थकोशः ॥

The following stanza unconnected with the work is found.

आच्छाद्य वक्त्रकमलं वसनाञ्चलेन लज्जावशेन हसितोज्वलगण्डमूलम् ।
मय्येरतं मदनविह्वललालसाङ्ग्या यद्यस्कृतं तदहमद्य न विस्मरामि ॥

R. No. 2373.

Paper. 10¾ × 9¾ inches. Foll. 73. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. M. V. Veṅkaṭavaradācāryulugāru, Vāḍapalli, Razole taluk, Godavari district.

Bound in two volumes.

रहस्यत्रयकारिकावली, रत्नावलीव्याख्यासहिता.

RAHASYATRAYAKĀRIKĀVALĪ WITH THE COMMENTARY RATNĀVALĪ.

A treatise in verse explaining the three Rahasyas recognized by Śrī-Vaiṣṇavas: by Vādikaṇṭhīrava Sundarajāmātṛmuni, who has apparently followed the Mumukṣuppaḍi of Piḷḷailōkācārya (described under R. No. 49(a) of the Triennial Catalogue of MSS., Vol. I, Part 2). The author is stated to have written Tattvadīpa, etc. The commentary was written by Varadārya, son and disciple of Vādimattebhakaṇṭhīrava Vēṅkaṭācārya who was himself the younger brother of Abhinavarāmānuja alias Vādimadagajakaṇṭhīrava of Naidhruvakāśyapagōtra.

Complete in three Prakaraṇas, viz., Mūlamantra, Dvaya and Caramaślōkārtha.

**Beginning:**

श्रीश्रीनिवासं करुणामृतोदधि(तांब्धि)वादीभकण्ठीरवयोगिवर्यम् ।
मत्पूर्वजानां पतिशब्दभाजौ यौ सन्निधौ तावहमाश्रयामि ॥
नैध्रुवकाश्यपवंश्योऽभिनवरामानुज इति प्रथितः ।
वादिमदगजकण्ठीरवोऽजयदिनचन्द्रो यावदिला(यां) ॥
श्रीमद्वादिगजेन्द्रसिंहसहजं तल्लब्धवेदाबलं
श्रीमद्वेङ्कटदेशिकेन्द्रचरणाम्भोजद्विरेफायितम् ।
श्रीमन्नैध्रुवकाश्यपान्वयमुवं वेदान्त . . . . .
वन्दे . . . देशिकं गुरुवर वेदान्तविद्यानिधिम् ॥
कारिकापङ्क्तिमथाहं रहस्यत्रयजीविकाम् ।
वादिकेसरिणा स्वप्ने नियुक्तो व्याकरोम्यहम् ॥

श्रियः पतिरखिलहेयप्रत्यनीकानन्तकल्याणगुणकः स्वेतरसमस्तवस्तुविलक्षणः आश्रितवात्सल्यैकजलधिः

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

*  *  *  *

श्रीवैकुण्ठे लक्ष्म्या द्वयमन्त्रमुपदिष्टवान् । अनन्तरं चरमश्लोकं स्वाश्रितायार्जुनायोपदिष्टवान् । तदिदं रहस्यत्रयं भगवान् वादिकण्ठीरवमुनिः पूर्वं तत्त्वदीपादिमुखेन प्रकटीकृत्येदानीं बालानां सहृदयप्रतिपत्त्यर्थं श्लोकरूपेण व्याचिख्यासुः आदावविघ्नपरिसमाप्त्यर्थं प्रचयगमनार्थं च गुरुपरम्परां करणत्रयसम्बन्धप्रतिबन्धप्रशान्तये निबध्नं मङ्गलाचार इति केचिदुपचचक्षिरे ।

*  *  *  *

आभगवत्तः प्रथितामाचार्यसन्ततिं वन्द इत्यादिवचनजातं मनसि निधाय आरोहणपूर्वकं स्तोतुमारभते—अस्मद्गुरूनिति ।

अस्मद्गुरूंस्तदाचार्यान्परमानखिलानपि ।
रामानुजार्यं करुणावात्सल्यवरुणालयम् ॥
श्रीशाङ्खिकामव्यामोहाचूर्णीकृततदन्यकम् ।

सार्धश्लोकमेकान्वयम् । अस्मद्गुरून् अस्मदाचार्यान् ॥

*  *  *  *

रहस्यत्रितयार्थोऽयं चिन्त्यते हृदतासये ।
रहस्यत्रितयं ज्ञेयं चेतनेन मुमुक्षुणा ॥

*  *  *  *

**Colophon:**

इति श्रीमन्मायावादिमत्तेभकण्ठीरववेङ्कटाचार्यसूनोः तच्चरणचञ्चरीकस्य वरदार्यस्य कृतिषु श्रीरहस्यत्रयकारिकावलीव्याख्यायां प्रथमं तिरुमन्त्रप्रकरणं समाप्तम् ॥

**End:**

निगमयति—इतीति । इति एवंप्रकारेण पक्षद्वयाकूतं संस्कृतद्रमिडाचार्ययोराकूतं यथाश्रुतं येन प्रकारेण श्रुतं तथा दर्शितमित्यर्थः । मत्प्राप्तीति । मत्प्राप्त्यर्थतया मत्प्राप्तिसाधनत्वेन उक्तेषु कर्मज्ञानभक्तिप्रपत्तिषु साधनतां साधनत्वबुद्धिं त्यक्त्वा मम निवेशय मयि निवेशं कुर्वित्यर्थः । त्वां निष्पापं कुर्यां करिष्यामि । अहमिति शेषः । शुच दुःखं मा कृथाः मा कार्षीः । इतीति इति एवंप्रकारेण चरमश्लोकसद्वृत्तार्थः विचिन्तितः विचारितः ॥

**Colophon:**

श्रीमद्वादिमत्तेभकण्ठीरववरदरामानुजदासविरचितं तिरुमन्त्र(चरमश्लोका)दिकारिकावलीव्याख्यानं रत्नावली सम्पूर्णा ॥

R. No. 2374.

Paper. 10¾ × 9¼ inches. Foll. 8. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. C. Śēṣagiri Rao of Kotipalli, Godavari district.

(a) तत्त्वप्रकाशिकाव्याख्याटीका—मन्दारमञ्जरी.

TATTVAPRAKĀŚIKĀVYĀKHYĀṬĪKĀ : MANDĀRA-MAÑJARĪ.

Foll. 1a—4b.

A gloss on Jayadēva's commentary on Ānandatīrtha's Upādhi-khaṇḍana or Tattvaprakāśikā. These latter are described under Nos. 4781 and 4782 of the D.C.S. MSS., Vol. X. The gloss is by Vyāsa-yati, who was a disciple of Subrahmaṇyatīrtha and who studied the Madhva literature under Lakṣmīnārāyaṇa.

Wants the beginning; otherwise complete.

**Beginning:**

आक्षिपति—स्यादेवमिति । परिहरति—मैवमिति । स्वाभाविकत्वं हि किं सत्यत्वं किं वा सोपाधिकत्वमिति विकल्पं हृदि निधायाद्यमनूद्य दूषयति—स्वाभाविकत्वं हीति । द्वितीयं दूषयति—सत्योपाधिकृतत्वं त्विति । मिथ्योपाधिकृतत्वं तु सत्यत्वसाधनेनैव निरस्तमिति भावः ।

**End:**

आनन्दस्वरूपस्य परमेश्वरस्य सादृश्येनाधिकारिणः किं प्रयोजनमानन्दानुभवाभावादित्यत आह—नित्यानन्देति । एवं समापिततत्त्वप्रकाशिकाव्याख्यो भगवान् टीकाकारः एतट्टीकाकरणस्यान्ततो नारायणप्राप्तिः प्रयोजनमिति ज्ञापयन् तत्प्रीतिं प्रार्थयति—सदासुरेति ।

हयग्रीवपदाम्भोजनखदीधितिचन्द्रिकाम् ।
मनश्चकोर संसारसन्तप्त सततं पिब ॥

**Colophon:**

इति श्रीसमस्तदेवमस्तकमणिकिरणारुणितपादारविन्दस्यारविन्दनेत्रस्येन्दिरारमणस्य श्रीमुख्यप्राणहृदयारविन्दराजहंसस्य श्रीहयग्रीवस्य किङ्करेण श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीमद्ब्रह्मण्यतीर्थपूज्यपादानां शिष्येण लक्ष्मीनारायणाख्याद्वैतिकुलतिलकादधीतमध्वशास्त्रामृतेन व्यासयतिना विरचिता मन्दारमञ्जरीसमाख्या तत्त्वप्रकाशिकाव्याख्या(टीका)समाप्ता ॥

(6) दुर्घटपदार्थवर्णनम्.

DURGHAṬAPADĀRTHAVARṆANAM.

Foll. 5*a*—6*a*. Fol 6*b* is left blank.

An explanatory note on certain difficult expressions occurring in some Smṛti work.

Contains portions of the sixth and the seventh Adhyāyas.

**Beginning:**

. . . . मोदव्यक्तिसाधनेन सहास्ति . रोमसङ्ख्या तु "तिस्रः कोट्यर्धकोट्यश्च यानि लोमानि मानुषे" इत्यनेन ज्ञेया । तेन तत्पितॄणां कोटिवारं गयाश्राद्धं कृतं स्यात् गयाश्राद्धकरणजन्यपुण्यप्राप्तिस्स्यात् । पितॄनुद्दिश्य माघ्यां स्नानात् तानुद्दिश्य हरेः कथायाः श्रवणात् तानुद्दिश्य हरेः पूजनात् पित्रोः जीवतोर्वा करणादिति पञ्चभिः कर्मभिः पुत्रः पुत्रतां पुन्नामनरकत्राणकर्तृत्वरूपपुत्रशब्दवाच्यतामिति यावत् ।

**End:**

तुविशिष्टो यः गुप्तस्य परमात्मादौ निक्षिप्तस्य द्रव्यस्य दानं स्वकं स्वमेव स्वदानादिकं दातुं जागरूकः त्वरावान् भवति । यः को वा ज्ञान्यज्ञानी वा जातस्तु जातमात्र एव तुविशिष्टो यत् द्विजातयेऽन्नं दद्यादिति वाञ्छां कुर्वन्तीत्यन्वयः ।

**Colophon:**

इति दुर्घटपदार्थवर्णने षष्ठोऽध्यायः ॥

स्थलानि कानि शस्तानीत्यस्योत्तरं वक्तुं माघे तत्तत्स्थानविशेषेषु

* * * *

माघस्नानं कर्तव्यमिति मनीषिणः ज्ञानिनः प्रवदन्ति तुविशिष्टफल.

---

R. No. **2375.**

Paper. 10¾ × 9¾ inches. Foll. 40. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Vadrēvu Vīrannagāru of Pātakōṭa, Godavari district.

विदग्धमुखमण्डनम्, सव्याख्यानम्.

VIDAGDHAMUKHAMAṆḌANAM WITH COMMENTARY.

Foll. 1*a*—39*a*. Foll. 39*b* and 40 are left blank.

A collection of enigmatical stanzas composed by Dharmadāsa. A commentary on the work called Vidvanmanōhara was added by Tāra-

candra of Śivarājadhānī. The author of the text is stated by the commentator to be a Jaina—vide the first stanza and its commentary.

Contains the Paricchēdas one (incomplete), three (without beginning) and four.

**Beginning:**

(मू)—

सिद्धौषधानि भवदुःखमहागदानां पुण्यात्मनां परमकर्णरसायनानि ।
प्रक्षालनैकसलिलानि मनोमलानां शौद्धोदनेः प्रवचनानि चिरं जयन्ति ॥

(व्या)—

श्रीगोकुलेशपदपद्ममधुव्रतेन तारामिषेन कविना शिवराजधान्याम् ।
विद्वत्कुलोपकृतये क्रियते स्फुटार्था टीका विदग्धमुखमण्डनसंज्ञकस्य ॥

विमत्सराणां विदुषां चित्ते टीका मया कृता ।
मुदचित्त(मात)नुतां नित्यमेषा विद्वन्मनोरमा ॥
जैनकृतेऽस्मिन् ग्रन्थे सम्यक् ज्ञातुं मनो यदा विज्ञाः ।
विद्वन्मनोहरां द्रष्टुं यत्नं तदा कुरुत . . . . ॥

इह ग्रन्थेऽस्य कर्ता निर्विघ्नपरिसमाप्त्यर्थं कायिकवाचिकमानसिकपापहारिस्वरूपं स्वेष्टदेवताप्रशंसात्मकं मङ्गलमाचरति—सिद्धौषधानामिति । शौद्धोदनेः शाक्यमुनेः प्रवचनानि प्रकृष्टानि च तानि वचनानि जैनसूक्तानीति यावत् । चिरं चिरकालं जयन्ति सर्वोत्कर्षेण वर्तन्त इत्यन्वयः । "शाक्यमुनिस्तु यः । स शाक्यसिंहस्सर्वार्थसिद्धश्शौद्धोदनिश्च सः" इत्यमरः । कीदृशानि प्रवचनानि भवदुःखमहागदानां सिद्धौषधानि । भवस्य संसारस्य जन्मनो वा दुःखान्येव महागदा महारोगास्तेषां सिद्धौषधानि औषधान्तरसंयोगापेक्षारहितानीत्यर्थः ।

* * * *

प्रीत्यै सतां तदनुभावगताप्रसादः सन्त्यज्य गूढरचनां प्रतिभानुरूपम् ।
क्षिप्रावबोधकरणक्षममीप्सितार्थं वक्ष्ये विदग्धमुखमण्डनमप्रपञ्चम् ॥
यद्यस्ति सभामध्ये स्थातुं वक्तुं मनस्तथा सुधियः ।
ताम्बूलमिव गृहीत्वा विदग्धमुखमण्डनं विशत ॥

(व्या) प्रीत्यै सतामिति । प्रतिभानुरूपं प्रतिभाया बुद्धे . . . . . स्तस्यानुरूपं यथा स्यात्तथा अहं विदग्धमुखमण्डनं नाम काव्यं वक्ष्ये । किं कृत्वा गूढरचनां दुर्ज्ञेयभावनां संत्यज्य त्यक्त्वा किमर्थं सतां प्रीत्यै सतां साधूनां

प्रीत्यै परितोषाय, कीदृशोऽहम्, तदनुभावगतावसादः तेषां साधूनां अनुभावः अनुग्रहः तदनुभावस्तेन गतः अवसादो विषादो यस्य सः । कीदृशं विदग्धमुखमण्डनं क्षिप्रावबोधकरणक्षमं क्षिप्रं शीघ्रमवबोधयतीत्यवबोधः सम्यक् ज्ञानं तत्करणे तत्सम्पादने क्षमं समर्थम् । पुनः कीदृशम् ।

पृष्टं पदविभागेन केवलेनैव यद्भवेत् ।
विदुर्व्यस्तं समस्तं यत् समुदायेन पृच्छ्यते ॥
पूजायां किं पदं प्रोक्तमस्त्रनं को बिभर्त्युरः ।
क आयुधतया ख्यातः प्रलम्बासुरविद्विषः ॥ सुनासीरः ।

**Colophon :**

ताराचन्द्रेण टीकेयं कृता विद्वन्मनोहरा ।
व्याख्यातस्सरहस्योऽयं परिच्छेदस्तृतीयकः ॥

**End :**

कामिनीत्यत्र ककारं स्फोटयित्वा यकारे दत्ते यामिनी रात्रिः । कीदृशी यामिनी पूर्णश्चन्द्रो मुखे यस्यास्सा पौर्णमासीत्यर्थः । निर्मले निरभ्रमम्बरमाकाशं यस्यास्सा, रम्या रमणीया रन्तुं योग्या वा ।

इति च्युतदत्ताक्षरा जातिः ।

**Colophon :**

इति श्रीधर्मदासविरचिते विदग्धमुखमण्डने चतुर्थः परिच्छेदः ॥

तारचन्द्रेण कविना कृता विद्वन्मनोहरा ।
टीकेयमस्याः पूर्णोऽयं परिच्छेदश्चतुर्थकः ॥
कोशाननेकानवलोक्य टीका कायस्थचूडामणिना कृतैषा ।
ताराभिधेयेन सतां कवीनामाचन्द्रतारं रमतां मनस्सु ॥

**Colophon :**

इति टीका विद्वन्मनोरमा समाप्ता ॥

---

R. No. 2376.

Paper 10⅜ × 9⅛ inches. Foll. 224. Lines, 20 on a page. Grantha and Tamil. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. V. S. Gōpālacariyar of Villiyambakkam, Chingleput district.

जैनपूजाविधानम्.

**JAINAPŪJAVIDHĀNAM.**

Foll 1a—223a Foll 223b—224b give in Tamil a list of things required for conducting the bathing ceremony of Jina idols.

A manual of ritualistic procedure for conducting the worship of the 24 Tīrthaṅkaras of Jainism. Notes in Tamil are added here and there.

Apparently incomplete.

**Beginning:**

सकलीकरणविधानम्—

श्रीमन्महाभ्युदयमङ्गलमर्हदादिलोकोत्तमं सकलभव्यशरण्यमेतत् ।
आद्यन्तहीनपरिघातिरजोविघाति तत्त्वं रहस्यरहितं शरणं भजामि ॥
स्नात्वाचम्य धृतोत्तरीयवसनः चैत्यालयं त्रिः परी-
त्येयामार्गविशुद्धिमेत्य रचयन् स्तुत्वा नमस्कृत्य च ।
लब्ध्वा कुड्मलिताञ्जलिः गुणगुरोराज्ञां जिनेन्द्रार्चनां
कर्तुं यागभुवं विशाम्यहमिमां दौवारिकानुज्ञया ॥

ओं निःसिधियाय रत्नत्रयपुरस्सराय विद्यामण्डलनिवेशनाय समयाय निशि-धियाय स्वाहा ।

पापिष्ठेन दुरात्मना जडधिया मायाविना लोभिना
रागद्वेषमलीमसेन मयका दुष्कर्म यन्निर्मितम् ।
त्रैलोक्याधिपते जिनेन्द्र भवतः श्रीपादमूलेऽधुना
निन्दापूर्वमहं जहामि सततं निर्वृत्तिषु तत्पथे ॥

ओं ह्रीं ह्रं श्रीं सकलपापक्षयं कुरु स्वाहा ॥

**End:**

नवग्रैवेयकाहमिन्द्रदेवतास्तर्पयामि ।
नवानुदिशाहमिन्द्रदेवतास्तर्पयामि ।
पञ्चानुत्तराहमिन्द्रदेवतास्तर्पयामि ।
ओं ह्रीं असि आउसा झ्रौं झ्रौं नमः स्वाहा ।
ओं मोक्षमार्गस्य प्रमाणनयैरधिगमः
ओं भूर्भुवस्स्वाहा तत्सवितुः आपो ज्योती रसोऽमृतं ब्रह्म ।

---

R. No. 2377.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1917–18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

याज्ञवल्क्यद्वादशनामव्याख्या— नामवैभवदीपिका.

## YĀJÑAVALKYADVĀDAŚANĀMAVYĀKHYA : NĀMAVAIBHAVADĪPIKĀ

A commentary on the 12 names of the sage Yājñavalkya who was the propogator of the Śukla Yajurvēda. In the biginning and at the end there are many stanzas in praise of and explaining the greatness of the sage. The author of the work is Subrahmaṇyasūri of Āpastambasūtra, who resided in Gūdalūr (Cuddalore) on the banks of the southern Pinākini (Pennar) and near the river Garuḍa (Gaḍilam).

Complete in the four Pādas, viz, Dharma, Artha, Kāma and Mōkṣa.

**Beginning:**

आनन्दाम्भोधिचन्द्रं निरवधिकरुणापूरमानन्दसान्द्रं
पापात् त्रातामरेन्द्रं भवभयचरितं सर्वलोकैकभद्रम् ।
वेदास्तीर्थानि देवा हुतगणयशसो रामराम प्रपश्यन्
योगीशो याज्ञवल्क्यः परमकरुणया पालयत्येव लोकान् ॥

अज्ञानां ज्ञानदानाज्जनकनरपतेर्ब्रह्मविद्यागुरुत्वा-
दध्वर्युत्वाच्च पाण्डोस्तनयमखविधौ शुक्लवेदात्मकत्वात् ।
गायत्रीदेशिकत्वाच्छुकपितुररुणानुग्रहावासनत्वात्
योगीशो याज्ञवल्क्यो जयति बहुतरां सर्वलोकैकपूज्यः ॥

* * * *

प्रज्ञापञ्जरशारिका सुजनकृत्सन्देहविच्छेदिका
स्वानन्दामृतवापिका सुजनतापघ्नाटवीचन्द्रिका ।
आम्नायावनशुक्तिका मुनिपतेः स्वान्तप्रिया शाटिका
नामद्वादशदीपिकास्तु सततं विद्वन्मनोमालिका ॥

**Colophon:**

इति श्रीदक्षिणपिनाकिनीतीरस्थगारुडनदीप्रान्तगूडलूरुग्रामनिवास्तव्यश्रीमदापस्तम्बसूत्रसर्वतन्त्रस्वतन्त्रसुब्रह्मण्यसूरिविरचिता नामवैभवदीपिका समाप्ता ॥

अथ योगीशवाजसनेययाज्ञवल्क्यद्वादशनामस्तोत्रव्याख्यानप्रारम्भः ।

श्रुतिसीमन्तिनीमौलिविराजितपदद्वयम् ।
कुञ्जरास्यमहं वन्दे प्रत्यूहव्यूहशान्तये ॥
स्वपादपद्मविनतलोकमङ्गलकारिणम् ।
श्रीमन्तं मङ्गलात्मानं याज्ञवल्क्यमहं भजे ॥

मङ्गलात्मानमिति—मङ्गलं कल्याणमात्मनि चित्ते यस्य योगीशस्य स मङ्गलात्मा, यद्वा मङ्गलमेवात्मा स्वरूपं यस्य मङ्गलं भगवद्रूपं आत्मनि मनसि यस्य "पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्" इति व्यासवचनात्। मङ्गलात्मनो भगवतो वासुदेवस्य गूढावतारत्वात्। मङ्गलात्मा पवित्रं मङ्गलं परमिति सहस्रनामरीत्या भगवदवतारत्वं सिद्धमेव। मङ्गला लक्ष्मीः आत्मनि वक्षसि यस्य सः, मङ्गला पार्वती आत्मनि मनसि यस्य सः, मङ्गलात्मिका वाणी आत्मनि वचसि यस्य, आनन्दगिरिस्वामिना स्वविरचितश्रीशङ्करभाष्यटीकायां आत्मन्शब्दस्य जीवेन्द्रियपरत्वमुक्तम्, भारत्याः पुरुषावतारोऽयं याज्ञवल्क्य इति पुरातनी गाथा।

* * * *

**Colophon:**

इति वागीशद्वादशनामस्तोत्रनामवैभवदीपिकायां प्रथमनामविवरणं समाप्तम्॥

* * * *

**Colophon:**

इति नामद्वादशदीपिकायां धर्माख्यः प्रथमः पादः समाप्तः॥

* * * *

**End:**

अनेन ये याज्ञवल्क्यमुपासते ते नित्यमङ्गलशीला भवन्तीति व्यासाचार्याभिप्राय। मंदे इत्यादेर्द्विरुक्तिः। मङ्गलात्मत्वादिकल्याणगुणविशिष्टं भगवन्तं श्रीयाज्ञवल्क्यमुनीश्वरमहं वन्दे—इत्यन्वयः॥

इति श्रीनामवैभवदीपिकायां मोक्षाख्यस्तुरीयपादे द्वादशनामविवरणं समाप्तम्॥

* * * *

विप्रोत्तमं केशवरुद्ररूपं श्रीयाज्ञवल्क्यं जगतां वरिष्ठम्।
महागुणाढ्यं महनीयशीलं यशस्विनं सत्पुरुषा भजन्ति॥
श्रीयाज्ञवल्क्यस्य यशांसि नित्यं शृण्वन्ति ये सद्गुणकर्मजानि।
ते यान्ति लोकानखिलान् सुपुण्यान् न विद्यते येषु जरा मृतिश्च॥
श्रीयाज्ञवल्क्यं भजतां नराणां सम[य]प्रतीक्षा ह्यणिमादयोऽपि।
धर्मार्थकामाः स्वत एव सिद्धाः मुक्त्यङ्गना तिष्ठति पाणिपद्मे॥

**Colophon:**

इति श्रीयाज्ञवल्क्यमहिमवर्णनं समाप्तिमगमत्॥

## R. No. 2378.

Paper. 10⅜ × 9¼ inches. Foll. 188. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Raṅgarāmānuja-cakravartyācārya of Pallakacōri, South Arcot district.

अभिनवराघवनाटकम्.

### ABHINAVARĀGHAVANĀṬAKAM.

Foll. 1a—184a. Fol. 184b is left blank. Foll. 185 to 187b give the names of the dramatis personæ of this drama. Fol. 188a contains the name of the owner of the work from which this was copied. Fol. 188b is left blank.

A drama based on the story of the Rāmāyaṇa: by Sundara-Vīrarāghavadāsa, son of Kastūriraṅganātha, the author of Raghuvīravijaya (R. No. 1725), and grandson of Vīrarāghava of Vādhūlagōtra. The author lived in Sūkṣmakiṅgrhapura (Śiruvallūr in the South Arcot district) and wrote also Bhōjarājāṅka (R. No. 1702), Rambhārāvaṇīya (R. No. 1680) and Sātvatatantrasāra. The drama was intended to be staged on the occasion of the Caitra festival at Srirangam.

Complete.

**Beginning:**

जयन्ति निगमान्तार्यचरणाम्बुजरेणवः ।
स्मरणाद्विषणाविद्यायशःश्रीजयदायिनः ॥

अपि च—

जिह्वा यस्य पितामहप्रियवधूलीलानिशान्तस्थली
हृद्यस्यामृतसोदरीसहचरस्वेच्छाविहारालयः ।
गीर्यस्यामितसम्पदं वितरति क्षिप्रं पठद्भ्यस्सकृत्
सोऽयं नः प्रतिभां ददातु विमलां वल्मीकजन्मा मुनिः ॥

किञ्च—

अजस्रमनुभूय तद्रघुपतेः पदाम्भोरुह-
द्रवन्मधुवरासुतानयनकोटिसिन्ध्वाङ्कुनः ।
अखर्वमदगर्विताशरनृपालमत्ताद्रिस्वरुः
समीरणसुतोऽनघस्सकलविघ्नहा पातु वः ॥

(नान्द्यन्ते) सूत्रधारः—(समन्तादवलोक्य) अहो विरतमायेव रजनी यदिदानीम् ।

प्राचीवक्त्रं लसति तरुणाम्भोजवक्त्राभिरामं
रोचिर्व्योम्नि प्रसरति रवे रत्नरेणूत्कराभं
चन्द्रो भाति प्रसभसुरतश्रान्तकान्ताननश्रीः
अभ्रं शुभ्रं स्फुरति वितमस्सज्जनस्येव चेतः ॥

इति परिक्रम्यावलोक्य, अहो जगदानन्दकरीयं रङ्गनगरी ।

* * * *

भवत्वार्यमिश्रान् विज्ञापयामि, भो भोः श्रीरङ्गनगरीललामभूतस्य रत्नाकरसुतारत्नगर्भालङ्कृतपार्श्वभागस्य भगवतः श्रीरङ्गनायकस्य चैत्रयात्रायां सभामलङ्कुर्वाणाः समस्तविद्याविचक्षणा धरणीगीर्वाणाः किमपि रूपकमभिनेतुं नियुज्य मामनुगृह्णन्त्वत्र भवन्तो महान्तः ।

* * * *

सू—(सबहुमानं पत्रिकां गृहीत्वा वाचयति)

अभिनवराघवनाम्ना प्रथितं रघुवीरचरितमतिरुचिरम् ।
रसिकजनहर्षजनकं रूपकमद्याभिनेतव्यम् ॥

* * * *

सुन्दरवीररघूद्वहसूरिर्नाटकमिदं जगाद मुदा ।
वाधूलवीरराघवसूरिः कविराट् पिता यस्य ॥

किञ्च शृणु—

अङ्केन भोजचरितं समुदीर्य रम्भापौलस्त्यभोगमपि रूपकमद्भुतं तत् ।
ईहामृगेण विरचय्य मनो बुधानां संप्रीणयत्यपि स सात्वततन्त्रसारैः ॥

नटी—(सानुस्मरणम्) अस्य उवरि विण्णादम् ।

रहुवीरविअअरूवअकत्ता कत्थूरिरङ्गणहय्यो ।
जणिआ कक्कसतक्कावाराकूवारकुम्भहूजस्स ॥

(छा) आर्य उपरि विज्ञातम् ।

रघुवीरविजयरूपककर्ता कस्तूरिरङ्गनाथार्यः ।
जनिता कर्कशतर्कावाराकूपारकुम्भभूर्यस्य ॥

सू—(सप्रमोदम्) अयि अहो मे भागधेयम् । यतः—

श्रीरामः कृतिनाथः सुन्दरवीररघुनायकः कविराट् ।
द्रष्टारो विद्वांसो नटने निपुणा प्रिया त्वमसि ॥

* * * *

सू—(सहर्षं नेपथ्याभिमुखमवलोक्य) कथमुपक्रान्तमेव कुशलैः कुशीलवैः, यदद्य मे भागिनेयः कैकेयीवेषधारिण्या स्वगृहिण्या परिकलितदशरथनेपथ्यः महोद्यानविहरणोद्युक्त इव लक्ष्यते । तदद्यानन्तरकरणीयाय सज्जीभवाव इति निष्क्रान्तौ । प्रस्तावना ॥

**End**:

तथापीदमस्तु भरतवाक्यम्—

आचन्द्रार्कं रघुकुलमणेर्जृम्भतां दिक्षु कीर्तिः
पृथ्वीसूनोस्सुचरितमिदं श्रीषु सर्वासु चास्ताम् ।
सद्भिश्चैषा कृतिरतिमुदा लाल्यतां लब्धवर्णैः
श्रीमानस्मिन् कलयतु कृपां रामभद्रः कवीन्द्रे ॥

किञ्च—

अभिनवराघवनाटकमेतद्रञ्जयतु रसिकहृदयानि ।
सुदतीस्मितरुचिरुचिरा कुमुदवनीमिन्दुकान्तिरिव ॥

इति निष्क्रान्तास्सर्वे ।

अभिनवराघवनाटके अष्टमोऽङ्कस्समाप्तः ॥

**Colophon**:

इति श्रीसूक्ष्मकिञ्जहपुरापरनामधेय (திருவெவ்வுளூர்) अग्रहारवरवास्तव्येन वाधूलकुलजलनिधिकुमुदबन्धुश्रीवीरराघवाचार्यकटाक्षलब्धश्रीमद्हृषीकेशपरमरहस्यविद्येन श्रीकस्तूरिरङ्गाचार्यकविकुलसार्वभौमसूनुना श्रीमत्केशवभागवतगोष्ठीसेवासञ्जातहर्षक्षीराम्बुराशिनित्यसांयात्रिकेण सुन्दरवीरराघवदासेन विरचितोऽय(तमिद)मभिनवराघवनाम नाटकं समाप्तम् ॥

जातो वर्षे विलम्बिन्यजजुषि मिहिरे जाग्रतीन्दौ नवम्यां
सौम्येऽब्दे मासि मीने जनकनृपसुतां पूर्णिमायामुदूह्य ।
दुन्दुभ्यब्दे च चैत्रे विपिनमधिगतो मासि मीने युवाब्दे
हत्वा शत्रून् स धातौ खलु मधुसमये राघवो राज्यमाप ॥

---

R. No. **2379**.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Kappakantulu Rāmā Śāstri of Cocanada.

तर्कसङ्ग्रहव्याख्या.

TARKASAṄGRAHAVYĀKHYĀ.

Similar to the commentary, described under No. 4153, of Annambhaṭṭa's Tarkasaṅgraha which is described under No. 4143 of the D.C.S. MSS., Vol. VIII.

Complete.

**Beginning:**

व्यस्तयोर्धर्मयोर्धर्मिभेदकत्वं हरन्निव ।
मनुजाश्वाकृतिर्योऽभूत्स देवः श्रेयसेऽस्तु नः ॥

अन्नंभट्टो नाम कश्चिद्विपश्चिद्बालव्युत्पादनार्थं काणादसंमतं सङ्ग्रहेण वक्तुकामः प्रारिप्सितग्रन्थाविघ्नपरिसमाप्त्यर्थं मङ्गलकर्तव्यतायां तस्याशीर्नमस्क्रियावस्तुनिर्देशरूपतया तेषु नमस्क्रियां वस्तु निर्दिशन् विषयप्रयोजने च निर्दिशन् चिकीर्षितं प्रतिजानीते—निधायेति । तर्कसङ्ग्रहः क्रियत इति क्रियाकारकयोजना । तर्कशब्दः द्रव्यादिपदानामुपलक्षकः ; तेषां सङ्ग्रहः सम्यग्ग्रहः, यथार्थज्ञानमिति यावत् । तस्य करणं तत्सम्पादकग्रन्थद्वारा । अनेन वस्तुनिर्देशः कृतः ।

**End:**

तादात्म्येति । तादात्म्यावच्छिन्नप्रतियोगिताकपदं संसर्गाभावे अतिव्याप्तिवारकम् । उदाहरति यथेति । ननु प्रमाणादिषोडशपदार्थानां सूत्रकारैरुक्तत्वात्सप्तैव पदार्था इति वचनमयुक्तमित्याशङ्क्य तेषां यथायथमुक्तेष्वेव पदार्थेष्वन्तर्भावात् सप्तैव पदार्था इति वचनं युक्तमित्याह—सर्वेषामिति ॥

**Colophon:**

तर्कसङ्ग्रहव्याख्या समाप्ता ॥

---

R. No. 2380.

Paper. 10¾ × 9¼ inches. Foll. 8. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M. R. Ry. Vadrēvu-Vīrannagāru of Patakota, Gōdāvari district.

धूर्तसमागमनाटकम्.

DHŪRTASAMĀGAMANĀṬAKAM.

A drama depicting chiefly the ludicrous side of human nature and describing the love between Anaṅgasēnā and Snātaka: by Jyōtirvirēśvara,

son of Dhirēśvara and grandson of Rāmēśvara. The author was born in a place called Palli.

Breaks off in the second Sandhi.

**Beginning:**

हर्षादम्भोजजन्मप्रभृतिदिविषदां सन्निधिप्रीतिमत्याः
चामोलौ . . . पुरारेर्दुहितृपरिणये साक्षतं चुम्बमाने ।
तद्वक्त्रं मौलिचक्रे मिलितमिति भृशं वीक्ष्य चन्द्रस्सहासः
दृष्ट्वा . . . माशु स्मितसुभगमुखः पातु वश्चन्द्रचूडः ॥

अपि च—

वक्त्राम्भोरुहविस्मिताः स्तबकिता वक्षोरुहे स्फारिताः
श्रोणीसीमनि गुम्फिताश्चरणयोरक्ष्णोः पुनर्विस्मिताः ।
पार्वत्याः प्रतिगात्रचित्रगतयस्तन्वन्तु भद्राणि वो
विद्धस्वान्तिकपुष्पसायकशरैरीशस्य दृग्भङ्गयः ॥

(नान्द्यन्ते सूत्रधारः)—

अलमलमतिप्रसङ्गेन । यावदद्य,

नानायोधनिरुद्धनिर्जितसुरत्राणत्रसद्वा . . . .
. . . . भीमकबन्धमालकधरद्भूमीभ्रमद्भूधरः ।
अस्ति श्री . . . . देवनृपतिः कर्णाटचूडामणिः
हृप्यत्पार्थिवसार्थमौलिमकुटन्यस्ताङ्घ्रिपङ्केरुहः ॥
तस्योद्दण्डभुजप्रतापदहनज्वालानिरस्ता . . .
राज्ञस्सर्वगुणानुरागपदवीविद्योतनाचार्यकः ।
यो . . श्च . . . . शमौलितिलको दानावदाताशयः
तस्य श्रीकविशेखरस्य कविता सचित्तमालम्बते ॥

तदनेन सकलसङ्गीतविद्याशेषविशेषविद्योतमानाभिनवभरतेन पुरमथनपादारविन्दवन्दारुकरपल्लवेन निखिलभाषोपभाषासुभगंभावुकसरस्वतीकण्ठाभरणेन . . . . . . सोमरसास्वादकषायकण्ठकन्दलीनरीनृत्यमानमीमांसामहोत्सवस्य रामेश्वरस्य पौत्रेण तत्रभवतः पवित्रकीर्तेः धीरेश्वरस्यात्मजेन महाशासनश्रेणीशेखरश्रीमत्पल्लीजन्मभूमिना कविशेखराचार्यश्रीज्योतिरीश्वरेण निजकुतूहलविरचितं धूर्तसमागमं नाम नाटकं प्रहसनमभिनेतुमादिष्टोऽस्मि । अस्मुरादिष्टम . . . . . ष्टमालतीमालेव शिरसि धारणीयम् ।

कर्पूरन्ति सुधाद्रवन्ति कमला . . .

. . . . . ।

. . . . .

. . . . . ॥

भो नाअरकस्स (इति पठति)। (पुनर्नेतथ्ये) आः कृ तन्नामग्रहणे भवतो निर्बन्धः । अथवा यद्वा तद्वास्तु, श्रूयताम् । मृताङ्गारठकुरस्याश्रमोऽयम् ।

* * * *

मृताङ्गारः—भगवत्प्रसदावासोच्चरे सुरतप्रिया नाम मासोपवासिनी प्रतिवसति । तत्र गम्यताम् (इत्यभिधाय सत्वरं निष्क्रान्तः) ।

* * * *

**Colophon:**

इति प्रथमसन्धिः ।

(ततः प्रतिशल्यसम्भ्रान्तिमिश्रो विदूषकश्च)

अस—(सप्रमोदम्)

त्रैलोक्ये भोजनं श्रेष्ठं ततोऽपि सुरतोत्सवः ।
भोजनं वास्तु मावास्तु जीवनं न रतं विना ॥

* * * *

**End:**

मूलनाशकः—अळेळे अणंगसेणिए जाणिदे तुज्झ चरिदे । जंबालं बालं मअणमन्दिलक्खउलवेअणं पत्तन्ते बहुबाळहक्खे तए पआलिदे । ता संपदं जेव्व पअच्छ । अण्णहा लाअदोहा ॥

---

R. No. 2381.

Paper. 10¾ × 9½ inches. Foll. 310. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. of M. R. Ry. Sūri Subrahmaṇya Śāstrigāru, Sanskrit Pandit, Mission High School, Bezvada, Kistna district.

Bound in two volumes.

अध्यात्मरामायणव्याख्या—प्रतिपदार्थप्रकाशिका.

ADHYĀTMARĀMĀYAṆAVYĀKHYĀ — PRATIPADĀRTHA PRAKĀŚIKĀ.

A copious commentary called Pratipadārthaprakāśikā on the Adhyātmarāmāyaṇa described under No. 2153 of the D.C.S. MSS.,

Vol. IV, Part. 1. The commentator is Sōbhanādri. The date of the completion of the transcription of each Kāṇḍa is given: The first date is Saturday, the 4th of Jyeṣṭha Bahula of Vikrama year, and the last date is Monday, the 15th of Śrāvaṇa Śuddha of Citrabhānu year.

Complete.

**Beginning:**

विनायकं नायकमौक्तिकत्रयीहारावलेरावलितं भुजङ्गमैः ।
पिनाकिजं नाकिजनेड्यमंहसां निवारणं वारणवक्त्रमाश्रये ॥

आदौ सर्वविघ्नशान्तये विनायकं स्तौति—विनायकमिति । त्रयीहारावलेः वेदत्रयमुपहारफलकः नायकमौक्तिकमणिवत्प्रबालकं भुजङ्गमैः सर्पैः आवलितं कृतयज्ञोपवीतं च ।

* * * *

ब्रह्मोवाच—साध्विति । हे साधो नारद त्वया साधु सम्यक् पृष्टं तत भवत्पृष्टमहं वच्मि । सादरं त्वं शृणु । तत्कथां प्रस्तौति—पुरेत्यादिना । पुरा पूर्वकाले पार्वती भक्तवत्सलं भक्तेषु वात्सल्ययुक्तं त्रिपुरहन्तारमीश्वरं प्रति श्रीरामतत्त्वं श्रीराममाहात्म्यं जिज्ञासुः ज्ञातुमिच्छन्ती सती विनयान्विता विनययुक्ता सती पप्रच्छ पृष्टवती । गिरीशः ईश्वरः तस्यै प्रियायै पार्वत्यै गुह्यं रहस्यं यथातथा स्वयं व्याख्यातवान् विशेषेणाचख्यौ ।

किं तद्रहस्यमित्यत आह—पुराणोत्तममिति । अध्यात्मरामायणं नाम पुराणोत्तमं पुराणराजमिदमिति स्मृतम् । तदध्यात्मरामायणं जगद्धात्री जगदम्बा पार्वती दिवानिशं पूजयित्वा ।

**End:**

आलोड्येति । अखिलवेदराशिं वेदसमूहमसकृदनेकवारमालोड्य विचार्य यत् तारकं ब्रह्म तद् ब्रह्म राम एव विष्णुरहस्यमूर्तिः साक्षाद्विष्णुमूर्तिरेवेति विज्ञाय यः भूतेश्वरः सदाशिवः सः भवः अखिलसारसङ्ग्रहमुद्धृत्य निष्कृष्येदं श्रीरामस्य निगूढतत्त्वमखिलमध्यात्मरामायणमेव प्रियायै पार्वत्यै प्रस्फुटं यथातथा सङ्क्षेपतः प्राह उपदिष्टवान् ॥

**Colophon:**

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे विश्वामित्रप्रोक्ते श्रीमद्युद्धकाण्डव्याख्याने शोभनाद्रिविरचितायां षोडशस्सर्गः ॥

R. No. 2382.

Paper. 10¾ × 8½ inches. Foll. 16. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Kṛṣṇacakravartyācārya of Ketandapatti, North Arcot district.

श्रीविभुत्वसमर्थनम्.

ŚRĪVIBHUTVASAMARTHANAM.

Foll. 1a—15a. Foll. 15b and 16 are left blank.

A treatise establishing the all-pervasive nature of Goddess Lakṣmī, by Raghunāthasūri, son of Vēdāntācārya, elder brother of Rāmānujācārya of Nallāncakravarti family. He was the disciple of Raghunāthadēsika.

Complete.

**Beginning:**

शीर्षाक्षिपक्ष्मवान् वेदैः त्रिवृद्गायत्रसामभिः ।
यः स्यातस्सोऽवतादस्मान् स्तोमात्मा विहगेश्वरः ॥
सद्वंशजस्सुवृत्तश्शुभगुणशाली सदा विशुद्धात्मा ।
रघुनाथदेशिकमणिर्विलसतु हृदि मे महागुरुश्लाघ्यः ॥
जयति निगमचूडादेशिकस्तातपादो
जयति तदनुजन्मा सोऽपि रामानुजार्यः ।
यदुभयगुरुपादाम्भोजसेवामहिम्ना
निगमविवृतितन्त्रे सारमादिप्स्व(सास्व)दीमि ॥
ओं नमो भक्तिसाराय हरेर्वेदान्तसूरये ।
बौद्धान् प्रच्छन्नबौद्धान्वा पदैर्वादैर्विधून्वते ॥
श्रीमन्नल्लार्यवंशोदयधरणिधरोत्तुङ्गशृङ्गाधिरूढे
वेदान्ताचार्यपुण्यप्रचयपरिणतौ चक्रवर्त्यार्यसूर्ये ।
लोकालोकप्रवृत्ते विघटिततमसि व्यस्तशब्दव्यपाये
पश्यन्त्यन्ये पिशाचन्त्यपर इह दिवान्धन्ति केचिद्गुहायाम् ॥
कालिन्दीकमनीयपूरविलसत्कल्लोलकान्तिच्छटा-
केशाकेशिधुरीणदिव्यसुषमाभूमातिशायिन्यसौ ।
लक्ष्मीलोचननीलनीरजरुचिश्रेणीमनोहारिणी
वेणी कृष्णतनुत्विषं दिशतु नस्तादकाद्रियां घोरणीम् ॥

चुलकीकृतसर्वस्वसर्वशास्त्रामृतार्णवः ।
कुम्भभूरिव वेदान्तगुरुर्विजयतेतराम् ॥
श्रीमद्यतीन्द्रसिद्धान्तघण्टापथमकण्टकम् ।
सर्वतन्त्रस्वतन्त्रः श्रीवेदान्तार्योऽप्याशिश्रयत् ॥
तत्राद्य केचिदर्वाचः स्वबुद्धिख्यापनोत्सुकाः ।
दोषान् कांश्चिदुपन्यास्थन् तान्निराचक्ष्महे वयम् ॥

इह खलु भगवद्भाष्यकाराः विशेष्यपदसमभिव्याहृतोपपदार्थस्यासति बाधके कुण्डली सुन्दरो घोटी गच्छतीत्यादाविव धर्मिधर्मितावच्छेदकोभयान्वितत्वमभिप्रयन्तः ब्रह्मणि श्रीनिवास इति प्रयुञ्जानाः श्रीनिवासपदेन धर्मिद्वयोपस्थापितस्य हरेरिव श्रीपदेन तदवच्छेदकविधया तत्र विशेषणतया उपस्थापितायाः श्रियोऽपि समभिव्याहृतब्रह्मपदोपस्थापितनिरतिशयबृहत्त्वरूपविशेषरणान्वयित्वं प्रयोगशैलीमहिम्ना प्राचीकटन् । अनुगृह्णन्ति चैतत्प्रमाणानि—
राडसि बृहती श्रीरसि, लक्ष्मीर्ब्रह्म सनातनम् ॥

यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तमाः ।
त्वया च विष्णुना चाम्ब जगद्व्याप्तं चराचरम् ॥

* * * *

तस्माच्छ्रीशस्येव श्रियोऽपि विभुत्वं प्रामाणिकमिति निष्कण्टकोऽयं घण्टापथः ।

End:

बृहति ब्रह्मयति तस्मादुच्यते परं ब्रह्म 'बृहत्त्वात् ब्रह्मणत्वाच्च तद्ब्रह्मेत्यभिधीयते' इति वचनं स्वरूपेण स्वभावत इत्यादिप्रागुदाहृतविशेषवचनानि चेति सामान्यविशेषवचनवर्गद्वयस्वारस्यमस्मिन्नेव पद्ये इति साधु विवेचनीयम् ॥

त्रिभुवनजनयित्रीवैभवख्यापकोऽयं
सहृदयरघुनाथभिख्यसूरीन्द्रक्लृप्तः ।
जयतु विलिखितः श्रीवेङ्कटेशेन भक्त्या
निगमशिखरसारो वाक्सरूपः प्रबन्धः ॥

माधवीये—

न स्वल्पदक्षिणैर्यज्ञैः यजेतात्र कथञ्चन ।
त्रैवार्षिकाद्विकान्नो यः स हि सोमं पिबेद्द्विजः ॥

इन्द्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजां पशून् ।
हन्त्यल्पदक्षिणो यज्ञस्तस्मान्नाल्पधनो भवेत् ॥
अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनस्त्वथर्त्विजः ।
आत्मानं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः ॥

---

R. No. 2383.

Paper. 10¾ × 9¾ inches. Foll. 22. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

Foll. 1*a*—2*b* contain eulogistic names of Gaṇapati, Sarasvatī, Yājñajavalkya and Sūrya.

(*a*) आवसथ्यप्रयोगः.

ĀVASATHYAPRAYŌGAḤ.

Foll. 3*a*—12*a*. Fol. 12*b* is left blank.

Deals with the ritualistic procedure for maintaining the sacred domestic fire after it ceased to be maintained for any length of time together with the expiatory ceremonies for such cessation.

Complete.

**Beginning :**

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
वेदान्तवेद्यं सकलागमाद्यं सदा दयासिन्धुमनन्तरूपम् ।
श्रीयाज्ञवल्क्यं परिपूर्णचन्द्रं श्रीमद्गुरुं नित्यमहं नमामि ॥
शान्तं गुरुं विबुधसंस्तुतसाधुभावं वेदान्तशास्त्रमननेन विशुद्धचित्तम् ।
वेदज्ञमक्षतलवंशसमुद्रचन्द्रं पापघ्नशालिणमहं शिरसा नमामि ॥

---

ओम् । शुभतिथौ श्रीमान् गोत्रः नामधेयोऽहं श्रीमतः गोत्रस्य नामधेयस्य धर्मपत्नीसमेतस्य मम स्मार्तकर्मानुष्ठानयोग्यताफलसिद्ध्यर्थमालस्यनिमित्तमौपासनान्तरितपुनस्सन्धानहोमं करिष्यमाणस्तदादौ शुद्ध्यर्थं वृद्ध्यर्थं शान्त्यर्थमभ्युदयार्थं च महाजनैस्सह स्वस्तिपुण्याहवाचनं करिष्ये । आदौ निर्विघ्नेन कर्मपरिसमाप्त्यर्थमादौ विनायकपूजां करिष्ये । पुण्याहं वाचयित्वा, पुण्याहं परिसमाप्य, पुनस्सङ्कल्प्य,

* * * *

अस्मिन्नावसथ्यपुनस्सन्धानहोमे वर्तमाने यत्र कुत्रचिदुपपातकशङ्कया तत्तद्दोषपरिहारार्थमिदानीं ब्रह्मप्रायश्चित्तहोमं करिष्ये ।

**End:**

अग्न्युत्पत्तिर्निधिं ज्ञेयं सन्धानं सायमेव तत् ।
प्रातःकाले तु सन्धानं सायमेवाहुतिर्भवेत् ॥
विच्छिन्नं वह्निं सन्धाय विधाय विधिवत्पुनः ।
सायमारभ्य जुहुयादाहुतीनां चतुष्टयम् ॥

**Colophon:**

आवसथ्यपुनस्सन्धानहोमस्संपूर्णः ॥

---

(*b*) चिदम्बरसहस्रनामस्तोत्रम्.

CIDAMBARASAHASRANĀMASTŌTRAM.

Foll. 13*a*—21*a*. Foll. 21*b* and 22 are left blank.

A eulogy containing about 1,000 significant names of God Naṭarāja, a form of Śiva, worshipped in Cidambaram. By Śivārya.

Complete.

**Beginning:**

अस्य श्रीचिदम्बरसहस्रनामस्तोत्रमहामन्त्रस्य दत्तात्रेय ऋषिः, श्रीचिदम्बरेश्वरो देवता, अनुष्टुप्छन्दः, सर्वकामनासिध्यर्थे चिदम्बरसहस्रनामस्तोत्रजपे विनियोगः ।

* * * *

अथ ध्यानम् ।
श्रीमद्गुरुं सकलभूषणभूषिताङ्गं दिव्याम्बरं स्मितविकासमुखारविन्दम् ।
चिन्मुद्रयाञ्चितकरं महनीयमूर्तिं ध्यायेत्सदा हृदि चिदम्बरमादिदेवम् ॥

* * * *

शङ्करः स्वामिजनकः सेव्यस्सर्वत्रगोचरः ।
सत्यवाच्यानिताकारः सावित्रीप्राणवल्लभः ॥
निस्तर्हि(स्तारि)तावस्सङ्कीर्त्यो नित्यपूर्णो विचक्षणः ।
निराशो दर्शनीयाङ्गो निर्लेपस्सत्यविक्रमः ॥

**End:**

सहस्रनामभिर्बिल्वपत्रैस्सहितमर्चयन् ।
यं यं कामयते कामं तं तमेवैति निश्चयः ॥
श्रीमद्वेदश्च(च)तुस्तन्त्रमहाविद्याविशारदाः ।
श्रीमन्तस्सत्त्वसंपन्ना भवतामस्तु मे मतिः ॥
श्रीचिदम्बरदेवस्य सर्वदेवस्वरूपिणः ।

श्रीमन्नामानि दिव्यानि सहस्रं भक्तितो मया ॥
रचितानि शिवार्येण तत्पादगतचेतसा ।
अनुग्राह्य मया कार्या महापण्डितसत्तमाः ॥

**Colophon:**

इति श्रीचिदम्बरदिव्यसहस्रनामस्तोत्रं संपूर्णम् ॥

---

R. No. **2384**.

Paper. 10⅜ × 9⅜ inches. Foll. 42. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Vempati Ammanna Śāstrigāru, Masulipatam.

सर्वप्रायश्चित्तप्रयोगः.

SARVAPRĀYAŚCITTAPRAYŌGAḤ.

Similar to the work described under R. No. 498 (*b*) ante.

Complete.

**Beginning:**

प्राणानायम्य, मम जन्माभ्यासादिसकलपापक्षयार्थं सर्वप्रायश्चित्ताख्यं करिष्यमाणः तदङ्गत्वेन स्वस्तिपुण्याहवाचनाख्यं करिष्ये । आदौ गणपतिमर्चयित्वा पुण्याहं वाचयित्वा एवं— तिथौ अमुकगोत्रस्यामुकनामधेयस्य मम जन्माभ्यासात् जन्मप्रभृत्येतत्क्षणपर्यन्तं बाल्ययौवनकौमारवार्धकेषु

* * * *

सर्वप्रायश्चित्तं परिषदुपस्थानपुरस्सरं प्राच्योदीच्याङ्गकलापसहितं सर्वप्रायश्चित्तं शक्त्या प्रत्याम्नायरूपेणाचरिष्ये ।

**End:**

एवं विधिना यः पावमानहोमं जुहोति स ब्रह्महत्यादिमहापातकैर्विमुक्तो भवति । सकलश्रौतस्मार्तकर्माधिकारी भवति । ब्रह्मसायुज्यमवाप्नोति न स पुनरावर्तते न स पुनरावर्तते इत्याह भगवान् शौनकः । ओं तत्सत् ॥

---

R. No. **2385**.

Paper. 10⅜ × 9⅜ inches. Foll. 24. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Kṛṣṇacakravartyācārya of Ketandapatti, North Arcot district.

श्रुतप्रकाशिकासारसङ्ग्रहः.

ŚRUTAPRAKĀŚIKĀSĀRASAṄGRAHAḤ.

Foll. 1a—22b. Foll. 23 and 24 are left blank.

This work briefly gives the substance of Śrutaprakāśikā, the well-known commentary of Sudarśanācārya on the Śrībhāṣya.

Incomplete.

Date of copying of the original MS.: 16th Paṅguni of Viśvāvasu year.

**Beginning:**

अ इति भगवतो नारायणस्य प्रथमाभिधानं भगवतो वाचकमकारं प्रयुञ्जानेन किं नाम मङ्गलं न कृतमिति चाभ्यधायि । काममात्मानं भार्यां पुत्रं वोपरुन्ध्याम्, न त्वेव दासकर्मकरमिति चापस्तम्बः । जायमानं हि पुरुषम्, तद्विद्धि प्रणिपातेन, ददामि बुद्धियोगं तम्, देवमिवाचार्यमुपासीत, यस्य देवे परा भक्तिः, नमस्कृत्य हृषीकेशम्,

* * * *

एषां शमादीनां विनियोगः । अङ्गत्वज्ञापनं साद्गुण्यं प्रबलप्रतिबन्धे सत्यपि शीघ्रफलप्रदत्वमिति लघुसिद्धान्तः ।

अथ महापूर्वपक्षः—चिन्मात्रमित्यत्र मात्रचा ज्ञेयत्वव्यावृत्तिः । प्रत्यनीकत्वरूपधर्मव्यावृत्तिश्च । तत्कृतज्ञानभेदः ज्ञातृज्ञेयावच्छिन्नवृत्तिज्ञानभेदः ।

* * * *

श्रुतप्रकाशिकायास्तु सङ्ग्रहे सङ्ग्रहः कृतः ।
महतः पूर्वपक्षस्य वेदान्तार्यपदैषिणा ॥

**Colophon:**

महापूर्वपक्षस्समाप्तः ॥

**End:**

स्वपदमात्रस्य तेनाकारेण तद्वाचकत्वाभावात् कण्ठोद्गताः षड्भावविकाराः । चिद्गताः क्लेशकर्मविपाकाशयाश्चत्वारः चत्वारः । तेषां प्रत्यनीकात् सत्यत्वज्ञानत्वादयः स्वरूपगताः । जन्मादयो विशिष्टगताः । विशिष्टं ब्रह्मैवोपास्यम् ।

---

## R. No. 2386.

Paper. 10⅝ × 9½ inches. Foll. 42. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. C. Śēṣagiri Rao of Kotipalli, Godavari district.

**तारतम्यविवृतिः.**

**TĀRATAMYAVIVṚTIḤ.**

A treatise maintaining that there are differences in the nature of the enjoyment of the eternal bliss by delivered souls: by Prahlāda Kṛṣṇācārya, son of Tirumalācārya who was the disciple of Yadupatyācārya who is stated to have been the disciple of Vēdēśatīrtha.

Complete but wants the beginning.

**Beginning:**

यस्तु स्वार्थिकः ततश्च साधनफलयोः ज्ञानसुखयोः समपरिमाणत्वमुक्तस्मृतावभिहितम् । एवं युक्तं च साधनाधिक्यात् साध्याधिक्यं सुरादिषु नाधिक्यं यदि साध्ये स्यात्प्रयत्नसाधनेऽपीति इत्यनुव्याख्याने साधनस्योत्तमत्वेन साध्यं चोत्तममाप्नुयुरिति ब्रह्मवैवर्ते च साधनफलयोः साम्यमुक्तम् । तदेवं बहुप्रमाणेषु ज्ञानविशेषानुसारेणैव तत्फलं सुखविशेषवदित्युक्तम् । ततश्च सरस्वतीभारतीज्ञानापेक्षया ब्रह्मवायुज्ञानमनन्तगुणाधिकम् ।

**End:**

यस्माद्विष्णोर्महत्तरं तस्माज्जीवात् समा विष्णोरित्युच्यते श्रुताविति काठकभाष्यानुसारेण काठकश्रुत्यर्थो बोध्य इत्यलं पल्लवितेन ।

सुपूर्णसौख्यचिद्घनं ह्यशेषदोषवर्जितं
विशेषविद्विमोक्षदं नमामि विट्ठलं सदा ।
जयतीर्थगवीगुम्भे प्रत्यहं योऽवजागरिकम् ।
सेवे श्रीनिर्मलाचार्यतिर्मलाचार्यभास्वरम् ॥

**Colophon:**

इति श्रीमद्वेदेशतीर्थजगद्गुरुपादोपसदाविद्वद्वर्यश्रीमद्यदुपत्याचार्यपूज्यपादविनयश्रीमन्निर्मलाचार्यसूरिसूनुप्रह्लादकृष्णाचार्यविरचिततारतम्यविवृतिस्समाप्तः ॥

---

R. No. 2387.

Paper. 10¼ × 9¾ inches. Foll. 8. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Krovvi Dakṣiṇāmūrtigāru, Cintaguṇṭapālayam, Masulipatam.

(a) लघुमानसम्.

LAGHUMĀNASAM.

Foll. 1a—7a.

Same text as that described under No. 13475 of the D.C.S. MSS., Vol. XXIV.

Contains the Adhyāyas one to three.

१. मध्याधिकारः, २. चन्द्रग्रहणाध्यायः, ३. सूर्यग्रहणाध्यायः.

Copyist: Krōpi Lakṣmīnārāyaṇan. Date of copying: Friday, the 13th of the bright fortnight of the Kārttika month in the year Kālayukti.

**Beginning:**

प्रकाशादित्यवत्स्यातो भारद्वाजो द्विजोत्तमम् (:) ।
लघुपूर्वं स्फुटोपायं वक्ष्यामि लघुमानसम् ॥
शाकाश्वतेन्दु १,१०० संशुद्धा मानसाब्दाः प्रकीर्तिताः ।
. . . . ब्दगणा विघ्न १० स्वकीयाष्टांशसयुतः ॥
सङ्क्रान्तितिथियुक्तो ६ ष १ स्व १ षष्ठयंश ६० विवर्जितः ।
त्रिंश ३० छिन्नांशेषोनचैत्रादितिथिभिर्युतः ॥

* * * *

**Colophon:**

इति मञ्जुलाचार्यकृते लघुमानसे मध्याधिकारः ॥

**End:**

रविभाग्यादल्पकालो यदिष्टं स्यात्स्वबह्निभिः ।
हत्वोदयस्तभागादियुक्तस्सूर्यतनुर्भवेत् ॥
पूर्ववत्सरचैत्रादौ द्युगणेऽर्कादिसाधने ।
व्येकश्शाकः कुजादीनां यावन्मेषं व्रजेद्रविः ॥

**Colophon:**

इति मञ्जुलाचार्यकृते लघुमानसे सूर्यग्रहणाध्यायस्तृतीयः ॥

---

(b) नक्षत्रपाताध्यायः.

NAKṢATRAPĀTĀDHYĀYAḤ.

Foll. 7a—8b.

An astronomical treatise containing certain calculations relating to the movements of the planets through the 27 constellations.

Name of the scribe: Krōpi Lakṣmīnārāyaṇan. Date of transcription: 12th day of the bright fortnight of the Kārttika month in the year Kālayukti.

**Beginning:**

रामग्राधुगणाद्राशं गणेष्वद्रिभि १५५ मादिकम् ।
राहुः स्यात्करणाब्दाशं शून्याग्नींदुभि १३० नाडियुक् ॥
स्वकीयपूर्वध्रुवके राहुमेतं विशोधयेत् ।
राहोः पूर्वध्रुवः सूर्यः तर्काग्निगुणसिन्धवः ॥ १२, ३६, ४२.

**End:**

पातप्रवेशकालस्य स्थित्यर्धपरिवर्जितः ।
मध्यकालस्तु संयुक्तो निर्गमः परिकीर्तितः ॥
प्रवेशान्निर्गमौ यावत् तावत्प्रज्वलिनाग्निवित् ।
प्राप्नोत्यत्र नरः श्रेयः स्नानदानादिकर्मभिः ॥

**Colophon:**

इति श्रीकोलचलमल्लिनाथविरचितायां नक्षत्रपाताध्यायो द्वितीयः ॥

---

R. No. 2388.

Paper. 10¾ × 9½ inches. Foll. 12. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Teñjarla Veṅkaṭēśvarulugāru, B.A., B.L. Vakil, Godugupēṭa, Masulipatam.

दत्तमीमांसा.

DATTAMĪMĀṀSĀ.

Foll. 1a—11b.
A treatise on the Hindu Law of adoption.
Incomplete.

**Beginning:**

प्रणिपत्य महेशानं मातरं पितरं गुरुम् ।
पुत्रिकापुत्रविषये दत्तपुत्रादिकेषु च ॥
नानास्मृतिमतान् दृष्ट्वा निर्णयो लिख्यतेऽधुना ॥

पुत्रिकापुत्रविषये । पुत्रीकृतपुत्रिकाविषये विज्ञानेश्वरः—भ्रातृमतीपुत्रिकाकरणशङ्कानिवृत्तये, अनेनापरिभाषितापि पुत्रिका भवतीति गम्यते । विभागप्रकरणे द्वादशविधपुत्राणां स्वरूपमाह याज्ञवल्क्यः—

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः ।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥

गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः ।
कानीनः कन्यकाजातः मातामहसुतो मतः ॥
अक्षतायां क्षतायां वा जातः पौनर्भवस्सुतः ।
दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् ॥
* * * *
यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता ।
नोपयच्छेत्सुतां प्राज्ञः पुत्रिकाधर्मशङ्कया ॥

यस्याः पिता पुत्रीकरणत्वाभिप्रायो वाऽस्यां न विज्ञायेत न वेद वा नोपयच्छेत् । यत्र तु नैवाशङ्का तामभ्रातृकामप्युपयच्छेदित्यभिप्रायः ॥

End:

यथैकजाता बहवो भ्राता . . . . . ताः ।

शौनकः—

क्षत्रियाणां स्वजातौ तु . . गोत्रसमोऽपि वा ।
वैश्यानां वैश्यजातेषु शूद्राणां शूद्रजा . . ॥

**Colophon:**

दत्तमीमांसासङ्ग्रहणे नवरखण्डः ।

---

R. No. 2389.

Paper. 10¼ × 9¼ inches. Foll. 30. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

Fol. 30 is left blank.

कण्वशाखामहिमसङ्ग्रहः.

KAṆVAŚĀKHĀMAHIMASAṄGRAHAḤ.

Deals with the greatness and superiority of the White **Yajurvēda** herein represented by the Kaṇva-Śākhā. The author Nāgēśa of **Pāṇḍuraṅga** quotes a number of authoritative works in support of **his view**. Their names are underlined in the extract.

Incomplete.

**Beginning:**

श्रीमहाविमलं नत्वा याज्ञवल्क्यं महागुरुम् ।
महिम्नः कण्वशाखायाः सङ्ग्रहः क्रियतेऽधुना ॥
यं वै श्रीरङ्गविद्वज्जनबहुनिगमैः कारयामास सम्यक्
वासिष्ठः पेद्दिभट्टः शुभमिह महिमासङ्ग्रहं शाखिकायाः ।

काण्वस्थं व्यस्तपाठक्रमनतिरहितं वीक्ष्य सत्त्वं प्रचक्रे
नागेशः पाण्डुरङ्गाभिधपुरवसती नागरो विठ्ठलस्य ॥
अयं तु महिमा सर्वपुराणादिषु विश्रुतः ।
तस्मात्तस्मात्तदाख्यानमुद्धृत्यालिख्यते परम् ॥
नूतनं निर्मितं त्वेतदिति सन्दिग्धमानसः ।
यदि कश्चिद्भवेत्तं तं ग्रन्थं पश्यतु मौक्तिकम् ॥
यथा पयोधिं निर्मथ्य रत्नोद्धारः कृतः पुरा ।
तथा निर्मथ्य पौराणं रत्नमाहात्म्यमुद्धृतम् ॥
वासुदेवे मतिर्येषां मुक्तिमिच्छन्ति येऽपि वै ।
तैरयं साधु श्रोतव्यः कण्वशाखामहोदयः ॥

* * * *

इयं शुद्धयजुःशाखा प्रथमेत्यभिधीयते ।
मूलशाखेति चाप्युक्ता तथा चैकायनीति च ॥
अगातयामयजुषा तथा मोक्षैकसाधिका ।
इत्याद्यनेकनामानि सन्त्यस्यास्तत्र तत्र वै ॥
तत्तन्नामनिमित्तानि युक्तियुक्तानि भूरिशः ।
कथितानि च माहात्म्ये तत्तदाख्यासु शोभते ॥
भारते शान्तिपर्वाख्ये त्रिधा प्रोक्तोऽयमुत्तमः ।
सभाश्वमेधवाल्येषु पर्वस्वपि तथोदितः ॥
भागवतेऽथ नवमे दशमे द्वादशे द्विधा ।
वैष्णवे च त्रिधा प्रोक्ता तथा ब्रह्मा . . द्विधा ॥
हरिवंशे तथा स्कान्दे देवीपौराणिके तथा ।
मूलरामायणे शौरिकथायां रघुवंशके ॥
मुरारिनाटके वृद्धमन्वादिस्मृतिवाक्यतः ।
गोपालकृतशेषाख्ये सूत्रे विवरणेऽपि च ॥
अथर्वशिरसि प्रोक्तं पैङ्गलोपनिषद्यपि ।
पाञ्चरात्रागमे त्रेधा तथा ज्ञानार्णवेऽपि च ॥
यजुर्वेदानुक्रमणे तथा द्राविडभाषके ।
स्कन्दयामलके कात्यायनानुक्रमणेऽपि च ॥

हेमाद्रिकल्पसंप्रोक्ता मधुपर्केऽपि वर्णितः ।

एतेष्वखिलग्रन्थेषु वर्णिता महिमाद्भुतः ॥

**Colophon:**

इति काण्वशाखामहिम्नः सङ्ग्रहमाणाख्यानुवादः ।

**End:**

आदित्यपुराणे—

त्रयीसुसंवित्तविवेकनिर्मला समग्रनिश्रेयससिद्धिहेतवः

समस्तशाखार्थसुतत्त्वबोधकाः जयन्ति कात्यायनपादपांसवः ॥

आविर्भूतमभूतपूर्वविभवादादौ सरोजासना-

न्न्यस्तं न्यासतया मुनेः श्रुतितनोश्चण्डत्विषो मण्डले ।

दुष्प्रापं तमवाप तापसमुखः श्रीयाज्ञवल्क्यस्स्वयं

कीर्त्यैवाखिल . स्य शुक्लयजुषो वेदेन तेनाहृतम् ॥

---

## R. No. 2390.

Paper. 10⅜ × 9⅛ inches. Foll. 48. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Tējōmūrti Vēṅkaṭa-kṛṣṇasiddhāntigāru of Tuni, Godavari district.

**वैद्यशास्त्रम्, आन्ध्रटीकासहितम्.**

**VAIDYAŚĀSTRAM WITH TELUGU COMMENTARY.**

A treatise dealing with the preparation of medicines, etc. Complete.

**Beginning:**

మేహానకు యు(రి)పాయి చెరి ౨ కదినం ౧ కి ప ౧ ౦౦ కూర్చము చేసి అక్కడాయనా పెఫ్ఫుఁవాఁకి కలిపి రెండువేళలా యివ్వ.

* * * *

शिला तमालपत्रं च कुङ्कुमं रोचना न(ल)म् ।

चन्दनं तिलकं कृत्वा विस्त(सर्व) देहिवशीकरम् ॥

* * * *

लवङ्गजातीफलपिप्पलीनां भागत्र(प्र)गल्भ्यक्षसमानमेषां ।

पलार्धमेकं मरिचस्य दद्यात् फलानि चत्वारि महौषधस्य ॥

सीतासमं चूर्णमिदं प्रसह्य रोगादिमाश्वर्धबलं निहन्यात् ।

कासज्वरारोचकमेहशूलं श्वासाग्निमान्द्यग्रहिणीप्रदोषम् ॥

**End:**

उत्तराषाढविंशत्या श्रवणे चैकरात्रकम् ।
धनिष्ठा दशरात्रं तु शतभिषार्धमासतः ॥
पूर्वाभाद्रा च त्रिंशत् स्यादुत्तराभाद्र विंशतिः ।
रेवती नवरात्रं तु रोगोत्पत्तिर्यथाक्रमम् ॥

**Colophon:**

सम्पूर्णम् ॥

---

R. No. **2391.**

Paper. 10¾ × 9¼ inches. Foll. 36. Lines, 20 in a page. Dêvanâgari. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. M. V. Appan-Vêṅkaṭâcariyar of Vâdapalli, Godavari district.

## साहित्यकौमुदी.
## SÂHITYAKAUMUDÎ.

Foll. 1*a*—35*a*. Fol. 36 is left blank.

By Arkasûri. Same work as that described under R. No. 1166 ante. Breaks off in the third Ullâsa.

---

R. No. **2392.**

Paper. 10¾ × 9¼ inches. Foll. 32. Lines, 20 in a page. Dêvanâgari. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Sâmaya Pantula Sûrayyagâru, Relli, Godavari district.

## काव्यप्रकाशिकामूलसूत्रव्याख्या—ऋजुवृत्तिः.
## KÂVYAPRAKÂŚIKÂMÛLASÛTRAVYÂKHYÂ: ṚJU-VṚTTIḤ.

Foll. 1*a*—29*a*. Foll. 29*b*—31*b* give the name of Alaṅkâras in the work. Fol. 32 is left blank.

By Narasiṁhasûri. Same work as that described under R. No. 381 ante, wherein see for the beginning.

Contains the fourth Ullâsa only.

**End:**

एवमलङ्कारान्निरूप्य तद्गतदोषाणां यथासम्भवमुक्तदोषेष्वेवान्तर्भावमाह—एषामिति श्लोकेन । निगदेनैव व्याख्यातमेतत् । प्रसिद्ध्यभाव(वै)फल्यवृत्ति-

विरोधादयः अनुप्रासादिशब्दालङ्कारदोषाः भिन्नलिङ्गत्वभिन्नवचनत्वजातिगतपरिमाणन्यूनाधिक्यधर्माश्रितपरिमाणन्यूनाधिक्यादयः उपमाद्यर्थालङ्कारदोषाः क्रमाप्रसिद्धिविरोधापुष्टार्थप्रतिकूलवर्णत्वादिषु भग्नप्रक्रमानुचितार्थन्यूनपदत्वादिष्वन्तर्भवन्ति । एवमेवान्येषामप्यन्तर्भावस्तेषामप्युदाहरणानि च सहृदयैर्वेदितव्यानि ॥

**Colophon:**

इति श्रीनरसिंहसूरिविरचितायां काव्यप्रकाशिकामूलसूत्रव्याख्यायामृजुवृत्तौ चतुर्थ उत्साह(ल्लासः) समाप्तिमगमत् ॥

प्रावत्प्रौढसरस्वतीपरिमले प्राचां प्रबन्धे सति
प्रीतिः पेशलत्व चि मामकृतौ सङ्कुचात्रतां जायताम् ।
निर्यन्निष्ठुररावमन्दुरतर निस्साणवाद्ये सति
न्यक्कारो न हि मञ्जुवादिनि पुनर्वीणाभिधे वस्तुनि ॥

---

R. No. 2393.

Paper. 10¾ × 9¼ inches. Foll. 8. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Kappakanta Rāma Sāstrigāru of Cocanada, Godavari district.

धात्वर्थवादः.

**DHĀTVARTHAVĀDAḤ.**

Foll. 1a—7b. Fol. 8 is left blank.

A detailed investigation into the meaning of the verbal roots.

Incomplete.

**Beginning:**

भू सत्तायाम् । सत्ता त्रिकालसम्बन्धानुकूलो व्यापारः भवतीत्यस्य वर्तमानाभिन्नकालस्य सम्बन्धानुकूलव्यापार इत्यर्थः । अभूदित्यस्य भूताभिन्नकालसम्बन्धानुकूलव्यापार इत्यर्थः । अकर्मकः क्वचिदुत्पत्तिरर्थः । यागात् स्वर्गो भवतीत्यादौ ।

**End:**

अव रक्षणादौ । एकोनविंशतिरर्थाः । कान्तिः शोभा, प्रीतिः सन्तोषः, तृप्तिरिच्छानाशः, स्वाम्यर्थस्वामिवृद्धिरुपचयः । एष्वेवाकर्मकत्वमन्येषु सकर्मकत्वम् । अवगमो ज्ञानम् । श्रवणं ज्ञानविशेषः । क्रियायां करोतिना तुल्यार्थः । हिंसा आदानं चेति ।

R. No. **2394.**

**Paper.** 10¾ × 9¼ inches. Foll. 68. Lines, 20 in a page. Telugu. **Good.**

Transcribed in 1917-18 from a MS. of **M.R.Ry.** Elamañci Varāha-narasiṁha Śāstri of Puṭṭakoṇḍa, near Bikkavōlu, Godavari district.

Fol. 68*b* is left blank.

**होराप्रदीपः.**

HŌRĀPRADĪPAḤ.

By Nārāyaṇa. Similar to the work described under **No. 13916 of the D.C.S. MSS.,** Vol. XXIV.

Complete.

Deals with the following topics :—

| | |
|---|---|
| १. राशिभेदाध्यायः. | १५. प्रव्रज्यायोगाध्यायः. |
| २. ग्रहयोनिभेदाध्यायः. | १६. राशिगुणाध्यायः. |
| ३. राशिबलाध्यायः. | १७. राशिफलाध्यायः. |
| ४. वियोनिजन्माध्यायः. | १८. नक्षत्रफलाध्यायः. |
| ५. आधानाध्यायः. | १९. लग्नफलाध्यायः. |
| ६. सूतिकाध्यायः. | २०. दृष्टिफलाध्यायः. |
| ७. अरिष्टाध्यायः. | २१. भावफलाध्यायः. |
| ८. आयुर्दायाध्यायः. | २२. आश्रययोगाध्यायः. |
| ९. दशाविपाकाध्यायः. | २३. प्रकीर्णकाध्यायः. |
| १०. अष्टकवर्गाध्यायः. | २४. यवनजातकम्. |
| ११. राजयोगाध्यायः. | २५. स्त्रीजातकाध्यायः. |
| १२. नाभसयोगाध्यायः. | २६. निर्याणाध्यायः. |
| १३. चन्द्रयोगाध्यायः. | २७. नष्टजातकाध्यायः. |
| १४. द्विग्रहयोगाध्यायः. | २८. द्रेकाणाध्यायः. |

**Beginning** :

लक्ष्मीपतिः कमलसम्भवमुख्यलेखैः संसेविताङ्घ्रिकमलः कमलायताक्षः ।
श्रीवत्सकौस्तुभमणिद्युतिरञ्जिताङ्गो नारायणो मनसि नो वसतिं करोतु ॥

ब्रह्माच्युतेशनिगमागमयज्ञमूर्तिः
सृष्टिस्थितिप्रलयकृत्समयस्य हेतुः ।
तेजोनिधिस्त्रिभुवनालयमुख्यदीपो
भूयाद्दि(त्सदा दि)नकरो मम वाक्प्रसिद्ध्यै ॥

पात्रं नभोधिष्ण्यगणः प्रवृत्तिः स्नेहस्सशाङ्को रविरत्र तेजः ।
ज्वालात्वयस्यारमुखो ग्रहेन्द्रा जगन्मयं जन्मनि जातजन्तोः ॥
शुभाशुभज्ञानतमोनिहन्ता दीपोऽनिशं प्रज्वलितप्रकाशः ।
होराप्रदीपं प्रयतोऽभिधास्ये बालप्रबोधार्थमहं सुसिद्धः ॥
कर्मशेषं पुरा वृत्तिविधिर्लेखास्य जन्मनः ।
कालग्रहदशापाक . . व्यक्तीकरोति ताम् ॥
तत्फलं भोगकालानुगुण्यखेटानुवर्तनी ।
जनयत्युदये लोकार्कतन्तुचिततद्विधिः ॥
अश्विनी भरणी चैव कृत्तिकापाद एव च ।
मेषराशिः भवेद्धातुर्मूर्धा रक्तीनिभश्च सः ॥

* * * *

**Colophon:**

इति होराप्रदीपे राशिभेदाध्यायः प्रथमः ॥

**End:**

आर्यश्रितः द्विजपती कुसुमेतिकन्या (?) नीरन्ध्रयत्यनुचरे सह वारिराशे ।
वर्णेन पद्मकनिभा खलु मीनमध्ये द्रेक्काणरूपमिति तन्मुनिभिः प्रदिष्टम् ॥
वस्त्रैर्विहीनमाह . . . गर्भान्तरे काननवह्निमध्ये ।
आक्रोशयन्मीनतृतीयभागो रूपं प्रदिष्टं यवनादिसद्भिः ॥

**Colophon:**

इति होराप्रदीपे द्रेक्काणाध्यायः ॥

राशिप्रभेदो ग्रहयोनिसंज्ञा राशेर्बलं खेचरवीर्यसंज्ञः ।
वियोनिजन्मादिनिषेककालो जन्माह्वयोऽरिष्टविनिर्णयश्च ॥
आयुर्दशान्तर्दशयोश्च भेदस्तथाष्टवर्गाख्यसकर्मवृत्तिः ।
भूपालयोगाह्वयनामसाख्यचन्द्रो द्विखेटाह्वययोगसंज्ञः ॥
प्रव्रज्यराज्यर्क्षफलावलोको भावाश्रयाः कारकसंश्रयश्च ।
प्रकीर्णकस्त्रीजननाह्वयश्च निर्याणमज्ञातभवेद्द्रकेणाः ॥
अष्टाविंशतिभिः ख्यातैरध्यायैर्जातकं फलम् ।
नारायणाख्यविदुषा प्रोक्तं सम्यक् सुबोधकम् ॥

**Colophon:**

इति होराप्रदीपकोऽयं ग्रन्थस्संपूर्णः ॥

R. No. 2395.

Paper. 10¾ × 9¾ inches. Foll. 244. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Kōlacala Vēṅkaṭappagāru of Vuyyūru, Kistna district.

स्मृतिरत्नमाला.

SMṚTIRATNAMĀLĀ.

Foll. 1*a*—240*b*. Foll. 241—243*a* give the contents of the work. Foll. 243*b*–244 are left blank.

A treatise on Dharmaśāstra dealing with आह्निक, आचार, काल, आशौच, श्राद्ध, व्यवहार and प्रायश्चित्त.

The author is Lakṣmīnārāyaṇa of Kondūr, son of Lakṣmī and Viśvēśvara Sōmayājin of Gautamagōtra. The author is said to have belonged to Pusalia family.

Complete.

**Beginning :**

लक्ष्मीहिमवत्सुतेश्वरौ हरिहरौ वाणीसमेतं विधिं
विघ्नेशं शशिभास्करौ सुरगुरुं चेन्द्रादिकान् दिक्पतीन् ।
कृष्णां पुण्यजलां नदीं सुरधुनीं व्यासप्रमुख्यान् मुनीन्
कोण्डूर्याख्यपुरस्थितान् द्विजवरान् नौम्यन्वहं सादरम् ॥
श्रीविश्वेश्वरसोमयाजिजलधेर्लक्ष्मीवियद्गामिनी-
सङ्गं माधवतोऽजनिष्ट सकलः पूर्णस्सुधांशो(शु)र्यथा ।
यः श्रीगौतमनामगोत्रविलसत्पुच्छान्वये वन्दितः
कोण्डूर्याख्यपुराधिभूस्स्मृतिकृतामेकात्म्यलीलाकृतिः ॥
सोऽयं गणेशं परिपूज्य लक्ष्मीनारायणाख्यो निगमागमज्ञः ।
शब्दार्थशास्त्रप्रवणस्तदर्थं करोति सर्वस्मृतिरत्नमालाम् ॥
नानेन पद्यानि कृतानि सम्यक् न व्याकृतानीति हसन्ति ये माम् ।
ते माधवव्यासपराशरादिग्रन्थाशयज्ञास्सहि वेत्त्ययज्ञाः ॥

. . . . . . . . . . ।

विचिन्तयेऽर्थविधिना अर्थकामविरोधिनम् ॥

. . . .

पद्याङ्गं पठतो नित्यं श्रोतुमिच्छन्ति ये नराः ।
अग्निष्टोमफलं तेषां गङ्गास्नानं दिने दिने ॥

तस्मात् स्वयमालोकयेत् । यद्युदयास्तमयव्यापिन्यस्तिथयः तदा पूज्यता निश्चयोऽस्तु । यदा तु वृद्धिह्रासादिना दिनद्वयं प्राप्नोति काचित् तिथिः तदा का पूज्येति ज्ञायते तत्राह—

क्षयगायां तिथौ पूर्वा वृद्धिगायां परा स्मृता ।
समायामपि सैव स्यादेतदीश्वरभाषितम् ॥

तिथौ क्षयगायां क्षयगामिन्यां पूर्वा पूज्या स्मृता । तिथौ समायामपि सैव स्यात् । गोबिलेन—

खर्वादर्प तथा हिंस्रा त्रिविधं तिथिलक्षणम् ॥

* * *

पुच्छान्ववायाब्धिसुधांशुलक्ष्मीनारायणाख्येन विनिर्मितायाम् ।
सर्वस्मृतिप्रोक्तसुपर्वरत्नमालाभिधायां पितृकृत्यमासीत् ॥

End:

अज्ञानात् ब्राह्मणो भुङ्क्ते शूद्रस्यान्नमनातुरः ।
तस्य पापविशुद्ध्यर्थं प्राजापत्यव्रतं चरेत् ॥
ग्रामदाहे विवाहे च ग्रहणे सङ्कटे तथा ।
न हि दोषस्तथा प्रोक्तः निशीथोत्तरभोजने ॥
धिग्भोजनमशाल्यन्नं धिक् शाल्यन्नमसूपकम् ।
धिक् सूपं मुद्गसंज्ञं च तत्स्रोतन् मनुजांश्च धिक् ॥

**Colophon:**

स्मृतिरत्नमाला समाप्ता.

The scribe of the Original MS. adds.—

बहुधान्यनामसंवत्सर आश्वयुजशुद्धपौर्णमास्यासहितबुधवासरे लिखितोऽयं ग्रन्थः ।

---

R. No. 2396.

Paper. 10¾ × 9½ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

(a) शुक्लयजुस्संहिताभाष्यम्.

SUKLAYAJUSSAMHITĀBHĀṢYAM.

Foll. 1a—11b.

A commentary on the Śuklayajussaṃhitā (Kāṇvīya) which work is described under No. 192 of the D.C.S. MSS., Vol. I, Part 2; by Sāyaṇācārya.

Contains the first Anuvāka of the first Adhyāya.

**Beginning:**

वागीशाद्यास्सुमनसः (....) तं नमामि गजाननम् ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
यत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
आदिशत्सायणाचार्यं वेदार्थस्य प्रकाशने ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसङ्ग्रहात् ।
कृपालुस्सायणाचार्यः वेदार्थं व्याकरोत्खलु ॥
ऋग्यजुस्सामवेदा ये व्याख्यातास्तेषु तद्यजुः ।
कृष्णं शुक्लमिति द्वेधा तत्कृष्णं तैत्तिरीयकम् ॥
वैशम्पायनशिष्येण याज्ञवल्क्येन तद्यजुः ।
अधीत्य वान्तमाचार्यकोपमीतेन योगिना ॥
गुरुश्शिष्यमुवाचेत्थं क्रुद्धः केनापि हेतुना ।
प्रत्यर्पय मदीयां त्वं विद्यामित्यर्पय. च ॥
योगसामर्थ्यतो विद्यां मूर्तां कृत्वावमत्तदा ।
गृह्णीत तद्यजुर्वान्तमित्यन्यान् गुरुरब्रवीत् ॥
अन्ये तित्तिरयो भूत्वा किञ्चित्किञ्चिदमर्य(भक्ष)यन् ।
प्रवर्तितः खण्डशस्तैः न सम्यग्बुध्यते नृभिः ॥
आध्वर्यवं क्वचिद्धौत्रं क्वचिदित्यव्यवस्थया ।
बुद्धिमालिन्यहेतुत्वात्तद्यजुः कृष्णमीर्यते ॥
याज्ञवल्क्यस्ततः सूर्यमाराध्यास्मादधीतवान् ।
व्यवस्थितप्रकरणं यजुश्शुक्लं तदीर्यते ॥
पौराणिकीं कथामेतां वेदव्याख्या(सो)न आदरात् ।
आदिशन्मह्यमाचार्यः श्रुतावपि मया श्रुतम् ॥
काण्ववेदगतं विद्यावंशब्राह्मणमीर्यते ।
यजूंषि शुक्लान्यादित्यान्मुनिः प्राप्ये सति स्फुटम् ॥

अथ वंशः पौतिमाषीपुत्रः कात्यायनीपुत्रादित्यारभ्य परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभुब्रह्मणे नम इत्येतदन्तं काण्ववेदस्यान्तिमं वंशब्राह्मणम् ।

* * * *

एवं सति याज्ञवल्क्येन प्रवर्तिताः शुक्लयजुर्विषयाः शाखाः पञ्चदश सम्पद्यन्ते । तच्छाखाध्यायिनः चरणव्यूहादिग्रन्थे जाबालादिभिः पञ्चदशभिः नामभिरित्थं व्यवह्रियन्ते—जाबालाः, गौधेयाः, काण्वाः, माध्यन्दिनाः, श्यामाः, श्यामायनीयाः, गालवाः, पिङ्गलाः, वत्साः, आवटिकाः, परमावटिकाः, पाराशर्याः, वैणेयाः, बौधेयाः, गालवाः (वैनेयाः) चेति पञ्चदश नामानि । तत्र कण्वाभिधेन महर्षिणा लब्धो यजुर्वेदशाखाविशेषः काण्वः तच्छाभश्च स्मर्यते ।

* * * *

काण्वशिष्यास्तु सूत्रभेदं विनियोगभेदं च आश्रित्येत्थमामनन्ति इत्यादि इति काण्वाभिमत एव मन्त्रभेदपक्षे जैमिनीयैरपि—

छेदने मार्जने चैतौ विनियुक्तौ क्रियापदे ।

इ इषे त्वोर्जे त्वेत्यत्र क्रियापदाभावेनोरु, प्रथस्वेति मन्त्रवदनुस्मारकत्वाभावाददृष्टार्थत्वे सत्ये . . . . . . . नैवम्—काण्वब्राह्मणे छिनत्ति अनुमार्ष्टीति विनियोगभेदश्रवणात् ।

**End:**

कण्वेन तु मन्त्र एवं व्याख्यातः इत्यादि । यज्ञो वसुर्यज्ञस्य पवित्रमसीत्येवैतदाहेति । पलाशशाखाया एव सम्बन्धिपत्रशब्देन तदीयहविर्हेयरूपक्षीरं लभ्यत इत्यवगन्तव्यम् ॥

**Colophon:**

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे काण्वसंहितायां प्रथमाध्याये प्रथमोऽनुवाकः समाप्तः ॥

---

(*b*) शतपथब्राह्मणभाष्यम्.

ŚATAPATHABRĀHMAṆABHĀṢYAM.

Foll. 11*b* – 16*a*. Fol. 16*b* is left blank.

A commentary on the Śatapathabrāhmaṇa which work has been described under No. 195 of the D.C.S. MSS., Vol. I. Part 2; by Anantacārya, son of Nāgadēvabhaṭṭa and Bhāgirathi and grandson of Yallambhaṭṭa. The author says that he came to write this commentary because Mādhavācārya has not attempted to write a commentary on the Kāṇvaśākhā.

Contains the 13th Kāṇḍa (called Aṣṭādhyāyi-Kāṇḍa).

**Beginning :**

वन्दे श्रीमदनन्तसंज्ञगिरिपं लक्ष्मीनिवासं हरिं
विघ्नध्वान्तदिवाकरं सुरगुरुं सर्वार्थसिद्धिप्रदम् ।
वे(धा)स्सर्वसुरेन्द्रपूर्वकसुरा यस्य प्रसादात् सदा
सर्वारम्भसमाप्तिमीयुरमलं(स)द्वंशदेवं परम् ॥
नत्वा क्षीराब्धिजाजानिं तथा ब्रह्मादिकान् सुरान् ।
गणेशं विघ्नहर्तारं वन्दे हैमवतीसुतम् ॥
चतुर्दशसु विद्यासु निष्णाताः शुद्धचक्षुषः ।
अपरोक्षब्रह्मतत्त्वाजयन्ति गुरवो मम ॥
श्रुतिसकलरहस्यं बिम्बितं यस्य चित्ते
मुकुर इव मुखाब्जं दोषमालिन्यशून्ये ।
स्वपदविमलभक्त्या यस्य तुष्टो रमेशो
जनकजनकपल्लम्भट्टमेनं नतोऽस्मि ॥
वन्दे श्रीपितृचरणान् भट्टनागेशसंज्ञितान् ।
यत्प्रसादादहं प्राज्ञस्सञ्जातो जडधीरपि ॥
वन्दे भागीरथीमम्बामम्बेव गुणशालिनीम् ।
यत्कृपाप्लवमासाद्य विद्यापारङ्गतोऽस्म्यहम् ॥
समस्तकाण्वशाखिभ्यो मूर्धन्येभ्योऽञ्जलिर्मया ।
बध्यते. श्रमं दृष्ट्वा कृपां कुर्वन्तु ते मयि ॥
माधवाचार्यवर्येण व्याख्यातं ब्राह्मणं परम् ।
न व्याख्यातं काण्वगं हि तस्मात् व्याक्रियते मया ॥
अनेकग्रन्थमालोक्य श्रीगुरूणां प्रसादतः ।
परेषामुपकाराय ब्राह्मणं व्याकरोम्यहम् ॥
यत्किञ्चिन्मम चापल्यं क्षम्यतां तद्विचक्षणाः ।
गुणगृह्यास्सदा सन्तो बालस्य पितराविव ॥
न पाण्डित्याभिमानेन न च वित्तस्य लिप्सया ।
ग्रन्थोऽयं रच्यते किन्तु लक्ष्मीकान्तस्य तुष्टये ॥
शुक्लं कृष्णमिति द्वेधा यजुषी समुदाहृते ।
कृष्णं तु तैत्तिरीयादि शुक्लं वाजसनेयकम् ॥

याज्ञवल्क्येन सूर्याद्वाप्तं वाजसनेयकम् ।
अयातयामं शुक्लं चेत्युक्तं विष्णुपुराणके ॥
वेदस्याध्ययनात् पुण्यमर्थज्ञानात्ततोऽधिकम् ।
अनुष्ठानाद्यथाधिक्यं तस्मादर्थः प्रकथ्यते ॥

अत्र तावत् स वै संभारान् संभरतीत्यारभ्य ब्रह्मणो ब्रह्मा स्वयम्भुब्रह्मणे नम इत्यन्तं सप्तदशकाण्डात्मकं काण्वीयं शतपथब्राह्मणं चतुरुत्तरशताध्यायात्मकम् । तत्र प्रथमद्वितीयतृतीयैः काण्डैराधानाग्निहोत्रतदुपस्थानचातुर्मास्यदर्शपौर्णमासादीनि साकल्येन प्रतिपादितानि । चतुर्थपञ्चमाभ्यां सत्रात्मकसकलसोमयागप्रकृतिभूतः चतुस्संस्थो ज्योतिष्टोमः प्रतिपादितः । षष्ठसप्तमाभ्यां वाजपेयराजसूये प्रतिपादिते । ततोऽष्टमादिकाण्डचतुष्टयेन प्रकृतिविकृतिसोमयागाश्रितमग्निचयनाख्यं कर्म विस्तारेण प्रतिपादितम् । तत्प्रशंसार्थमुखेन तदाश्रितान्युपशमानि विहितानि । ततोऽष्टाध्यायीसौत्रामण्यश्वमेधप्रवर्ग्याख्यास्त्रयोदशचतुर्दशपञ्चदशषोडशकाण्डाः । अन्त्यस्तु ब्रह्मप्रतिपादकः सप्तदशकाण्डः । अत्राष्टाध्यायीकाण्डे पूर्वोक्तमाधानादिकमनूद्य प्राग्विहितवसन्तकालाद्यवशिष्टाङ्गकलापविधितत्प्रशंसा च क्रियते । तत्र तावदग्निहोत्रदर्शपूर्णमासाग्निष्टोमानां मूलप्रकृतीनां तद्विकृतीनां मासाग्निहोत्रसौर्ययागविश्वजिदादीनां सर्वेषां श्रौतकर्मणां गार्हपत्याद्यग्निसाध्यत्वात्तेषां चाधानपवमानेष्टिभ्यां सिद्धिरित्याधाननिष्ठाद्यत्वादाधानमेवादौ वक्तव्यम् । तस्य च स्वाभिमतकालं विधित्सन् यज्ञादीन् संवत्सराद्यात्मना निरूपयति—संवत्सरो वै यज्ञ इत्यादिना । योऽयं दर्शपूर्णमासादिया(गा)त्मकः प्रजापतिः संवत्सरो वै संवत्सरात्मकः खलु तत्साध्यत्वात् । ओं श्रावयेत्यादिसप्तदशाक्षरसाध्यत्वाद्यज्ञस्य प्रजापतित्वं युक्तम् । तथाच ओं ता वा एताः पञ्चव्याहृतयः ओं श्रावयास्तु श्रौषट् यज ये यजामहे वौषडिति तासां पञ्चानां व्याहृतीनां सप्तदशाक्षराणि सम्पद्यन्ते ।

* * * *

Colophon:

इति काण्वीयशतपथब्राह्मणवेदार्थप्रकाशे अष्टाध्यायीकाण्डे इत्यनन्ताचार्येण विरचिते काण्वशतपथब्राह्मणभाष्ये इति श्रीमन्नागदेवभट्टात्मजेन अनन्ताचार्येण काण्वीयशाखिना विरचिते काण्वीयशतपथब्राह्मणार्थप्रकाशे अष्टाध्यायीकाण्डे इति चतुर्थं ब्राह्मणम् । इति श्रीमदनन्ताचार्येण प्रथमशाखिना विरचितायां वेदार्थदीपिकायां अष्टाध्यायीकाण्डव्याख्यानं समाप्तम् ॥

अनेन वेददीपेन मया नीराजितो हरिः ।
मच्छ्रमं सार्थकीकृत्य मद्वंशं परिरक्षतु ॥

इत्यष्टाध्यायीकाण्डभाष्यं संपूर्णम् ॥

---

(c) शुक्लयजुस्संहिताभाष्यम्.

ŚUKLAYAJUSSAṀHITĀBHĀṢYAM.

Foll. 17a—58a. Foll. 53b and 54 are left blank.
Same work as that described under (a) ante of this number.
Contains the Adhyāyas 17 to 19.
Complete.

**Beginning:**

मात्रे परिश्रिति स्वाहाकारः नमोऽस्तु रुद्रेभ्यइति प्रत्यवरोहमन्त्राः तेभ्यः प्राञ्मुखमात्रपरिश्रितिस्वाहाकारः नमोऽस्त्विति त्रि ऋग्भिः प्रतिलोमं होमः । ये दिवीति मुखमात्र । येऽन्तरिक्ष इति नाभिमात्रे । ये पृथिव्यामिति जानुमात्र इति सूत्रार्थः । पाठस्तु—

ओं नमस्ते रुद्र मन्यव उतो त इषवे नमः ।
नमस्तेऽस्तु धन्वने बाहुभ्यामुत ते नमः ॥ इति ।

* * * *

**Colophon:**

इति सप्तदशाध्याये प्रथमोऽनुवाकः ॥

**End:**

हिरण्यगर्भस्य प्रजा अमुम भवेमेति प्रार्थना । वेद् स्वाहेति होमार्थः । वेद् स्वाहेति वषट्कारो हैव परोक्षं वेट्कारो वषट्कारेण वा वै स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयत इति श्रुतेः ।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

**Colophon:**

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहिताभाष्ये एकोनविंशोऽध्यायस्समाप्तः ॥

## R. No. 2397.

Paper. 10¾ × 9¼ inches. Foll. 64. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Uppulūri Kṛṣṇamūrti Śāstrigāru of Dangēru, Godavari district.

**आपस्तम्बसूत्रध्वनितार्थकारिका.**

ĀPASTAMBASŪTRADHVANITĀRTHAKĀRIKĀ.

Foll. 1a—63b. Fol. 64a gives the contents of the work. Fol. 64b is left blank.

Same work as that described under No. 1065 of the D.C.S. MSS., Vol. II, which wants the beginning and the end. By Bhāskarasōmayājin.

Deals with the following subjects:—

| | |
|---|---|
| दर्शपौर्णमासिकपर्वनिर्णयः. | अधिकारिनिरूपणम्. |
| इष्टिविकारपर्व. | प्रतिनिधिप्रकरणम्. |
| पितृयज्ञपर्व. | पुनराधेयम्. |
| सोमपर्व. | पुनराधेयनिमित्तानि. |
| ऋतुनिर्णयः. | आग्रयणम्. |

**Beginning:**

कालप्रसङ्गात् पर्वाणि निर्णेष्यामीह कृत्स्नशः ।
आधानसोमनित्येष्टितद्विकारेषु यत्नतः ॥
नित्येष्टिज्ञानपूर्वस्स्यात्प्रायेणान्येषु कर्मसु ।
प्रयोगस्तेन नित्येष्टिरादौ पर्व निरूप्यते ॥
यद्यकालकृतं कर्म तद्वृथाकृतमिष्यते ।
कर्तव्यं यस्मात् . . . यस्मात्कालः परीक्ष्यते ॥
तत्रादौ पर्वशब्दादिवाच्यकालो निरूप्यते ।
ततस्तल्लक्षितः कालोऽध्येनावानिति कथ्यते ॥
चन्द्रार्कयोर्यदान्योन्यं यदि दूरातिसन्निधिः ।
ते पौर्णमास्यमावास्ये गोभिलेन निरूपिते ॥
चन्द्रस्यात्यन्तपूर्णत्वं क्षयो वात्यन्तमो यथा ।
सन्निधिः पौर्णमासी स्यादमावास्या यथाक्रमम् ॥

* * * *

अग्निः पथिकृदष्टाकपालस्त्वैन्द्रस्तु वृत्रहा ।
एकादशकपालस्य पुनरष्टाकपालके ॥
अग्निर्वैश्वानरो देवो दक्षिणा त्रिशरं धनुः ।
एषा त्रिहा . . . ष्टिः श्रुता वाजसनेयके ॥
* * * *

**Colophon:**

इति त्रिकाण्डिमण्डनभास्करसोमयाजिकृतौ दर्शपौर्णमासिकपर्वनिर्णयः ।

**End:**

**Colophon:**

इति श्रीप्रतिवादिघटमुद्गर श्रीमत्कुमारस्वामिसूरिसूनुत्रिकाण्डिमण्डनभास्करसोमयाजिनिश्रकृतावापस्तम्बसूत्रध्वनितार्थकारिकासु प्रतिनिधिप्रकरणम् ॥
* * * *

निरूप्य सर्वनित्यानि वैकृतान्यथ निर्वपेत् ।
न वैश्वाग्रेयमस्मिन् न वै शूर्पेऽपि विनिर्वपेत् ॥
निर्वपेन्नूतने धान्ये शूर्पयोरन्ययोः क्रमात् ।
आग्रयणीयमाग्नेयं धृतं . . प्राकृताकृतम् ॥
अस्ति चेदग्रमाग्नेयः प्रधानाग्नेयतः पृथक् ।
अतः परं समाने स्यात्सर्वमाविप्रभोजनात् ॥

**Colophon:**

इत्याग्रयणं समाप्तम् ॥

---

R. No. **2398.**

Paper. 10⅜ × 9⅜ inches. Foll. 60. Lines, 20 in a page. Telugu. Good.
Transcribed in 1917–18 from a MS. of M.R.Ry. Jayanti Jōganna gāru of Hamsavaram, Tuni, Godavari district.

नरपतिजयचर्या—आन्ध्रटीकासहिता.

NARAPATIJAYACARYA WITH TELUGU MEANING.

Foll. 1a—57a. On fol. 57b it is stated that the work has been compared with the original. Foll. 58a—60 give the contents of this work.

Same work as that described under No. 1393 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

The MS. under notice is irregularly written and wants the beginning.

---

R. No. **2399.**

Paper. 10⅜ × 9⅜ inches. Foll. 6. Lines, 20 in a page. Telugu. Good.
Transcribed in 1917–18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

(a) కూచివారివంశావళి.

**KUCIVĀRIVAMŚAVALIḤ.**

Foll. 1a—2a. Fol. 2b is left blank.

Complete.

See the Telugu part for the description.

---

(b) वाजसनेयामावास्यानिर्णयः.

**VĀJASANĒYĀMĀVĀSYĀNIRṆAYAḤ.**

Foll. 3a—5a. Foll. 5b—6b are left blank.

On the determination of the new moon-day for the followers of the Vājasanēyasaṁhitā of the White Yajurvēda.

Incomplete.

**Beginning:**

दैवज्ञविलासे—

चतुर्दशी दिनान्ते तु चतुस्त्रिर्घटिका यदि ।
अमा च विद्यते तत्र श्राद्धं वाजसनेयिनाम् ॥
इन्दूदयेऽप्यमावास्या वेदे वाजसनेयके ।
भवेदर्वाक् तृतीयेऽह्नि सा क्षीणेन्दौ भ्रमोऽत्र कः ॥

अत्र प्रतिपदि चन्द्रदर्शनयोग्यतासंभवे तृतीयेऽह्नि केवलचतुर्दश्यामपि दर्शश्राद्धं कार्यमिति वाजसनेयेनोक्तत्वाच्च । चतुर्दश्यामहन्यमावास्यासंस्पर्शे तत्रैव दर्शश्राद्धं कर्तव्यमिति कैमुतिकन्यायेन सिद्धान्तत्वादत्र भ्रमो निर्हेतुः इत्यर्थः । तदुक्तं कात्यायनस्मृतौ—

चतुर्दशी तु संपूर्णा द्वितीया क्षयगा . . . ।

**End:**

चन्द्रदर्शनराहित्ये—

पर्वप्रतिपदोस्सन्धिर्मध्याह्नात्पूर्वतो यदि ।
अन्वाधानं पूर्वदिने यागस्तस्मिन् दिने भवेत् ॥
मध्यं . . . . . हनीय यस्मिन् प्राक्पर्वणस्सन्धिरियं तृतीया ।
सा खर्विका वाजसनेयमर्त्यैः तस्यामुपोष्यादपरेद्युरिष्टिः ॥

---

**R. No. 2400.**

Paper. 10⅜ × 9⅛ inches. Foll. 48. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. obtained through the Sub-Magistrate of Kovvūru, Kistna district.

(a) कात्यायनपूर्वप्रयोगः.

KĀTYĀYANAPŪRVAPRAYŌGAḤ.

Foll. 1a—14b. Fol. 15a gives the contents of the work. Fol. 15b is left blank.

On the procedure relating to the performance of various domestic religious rites and ceremonies from the time of conception to marriage in accordance with the Vēdic school of Kātyāyana.

Contains up to the portion dealing with the end of Caula ceremony.

**Beginning:**

शुभतिथौ मम धर्मपत्न्याः प्रथमगर्भे सर्वगर्भसंस्कारार्थं गर्भाधानाख्यं कर्म करिष्यमाणस्तदादौ शुद्ध्यर्थं वृद्ध्यर्थं शान्त्यर्थमभ्युदयार्थं च महाजनैस्सह स्वस्ति पुण्याहवाचनं करिष्ये । आदौ निर्विघ्नेन कर्मपरिसमाप्त्यर्थं गणाधिपतिपूजां करिष्ये । पुण्याहं वाचयित्वा, पुण्याहं परिसमाप्य, पुनस्सङ्कल्प्य शुभतिथौ मम धर्मपत्न्याः प्रथमगर्भे सर्वगर्भसंस्कारार्थं गर्भाधानाख्यं कर्म करिष्ये । पत्नी दक्षिणत उपवेश्य ।

**End:**

ब्रह्मणे वरदानम् । द्यौस्त्वा ददातु । पृथिवी त्वा प्रतिगृह्णातु । पवित्राभ्यां मुखमार्जनम्, पवित्रस्याग्निप्रतिपत्तिः । प्रणीताविमोकः, द्यौश्शान्तिरिति शान्तिवचनम् । प्रमादात्, मन्त्रहीनमित्यनेन चौलकर्महोमेन भगवान् . भवतु ।

**Colophon:**

चौलं समाप्तम् ॥

(b) चिदम्बरमन्त्रयन्त्रव्याख्या—चक्रप्रकाशिका.

CIDAMBARAMANTRAYANTRAVYĀKHYĀ: CAKRAPRAKĀŚIKĀ.

Foll. 16a—43a. Fol. 43b is left blank.

A commentary on a treatise which deals with the drawing of a mystic diagram containing the fifteen letters of the Śrīvidyāmantra relating to Goddess Pārvatī as well as the five letters of Pañcākṣarīmantra relating to God Śiva. The commentator is probably a disciple of Paramānandayōgin.

Incomplete.

**Beginning:**

पाशाङ्कुशौ च दधतं करिदन्तहस्त-

मन्येन दाडिमफलं रुचिरं त्रिनेत्रम् ।

वन्दे महेशतनयं गुहपूर्वजात
मद्रीन्द्रजाप्रियशिशुं ध्रुवविघ्नराजम् ॥
महीरथं रथाङ्गभूतवारिजेशवारिजं
भुजङ्गराजमौर्विकं तुरङ्गभूतवेदकम् ।
सुवर्णगोत्रकार्मुकं सुरारिवैरिमार्गणं
नरङ्गमालिवाणधिं नटेश्वरं भजाम्यहम् ॥
परमानन्दयोगीन्द्रसंततदीशप्रसादतः ।
कुर्वे मेलनचक्रस्य व्याख्यां चक्रप्रकाशिकाम् ॥

कैलासे तावत् परमशिवपर्यङ्कनिलया पार्वती सर्वप्राणिनां दर्शनाद्भुक्तिमुक्तिसिद्ध्यर्थं स्वस्याः परमेश्वरस्य च मन्त्रयन्त्रमेलनं विस्तरात् जिज्ञासमाना स्वयं परमेश्वरमेकान्ते पृच्छति —

श्रीपार्वत्युवाच —

पर्वतस्य हिमवतः अपत्यं स्त्री पार्वती ; तस्यापत्यमित्यणि कृते टिड्ढाणञिति ङीप् । श्रीः सा च पार्वती च श्रीपार्वती श्रीविद्यारूपिणी नटत्रिपुरसुन्दरी । ह्रीश्च ते श्रीश्च पत्न्याविति श्रुतेः । उवाच पृष्टवती । स्वेप्सितप्रश्नप्रकारं मनसिकृत्य परमेश्वरं सम्बोधयति ।

* * * *

रहस्यानामनेककोटिमन्त्रयन्त्राणां मध्ये रहस्यमतिरहस्यम् । हिशब्दः हेतौ यस्मादतिरहस्यं तस्मात् पञ्चाक्षरस्य शतरुद्रीयमध्यगतस्य नमःशिवायेति मन्त्रस्य चक्रयन्त्रं हे प्रभो स्वामिन् मम हैमवत्याः ब्रूहीत्युत्तरेणान्वयः । सम्बन्धे षष्ठी। पञ्चाक्षरसम्बन्धि चक्रमेवेत्यर्थः । तुशब्दः अवधारणे । न केवलं पञ्चाक्षरयन्त्रं किन्तु आवयोः युष्मदस्मदोश्चक्रसंयोगः चक्रसंयोगः । तं श्रीचक्रपञ्चाक्षरचक्रयोः संयोगं मेलनम् ।

End :

गं च मं च शिवान्तं च नयवामशिकं तथा ।
शिवाय नम इत्याहुः पशिनाश्च थवौ ततः ॥
वकारं च नकारं च मशिपञ्चेष्वनुक्रमात् ।
नैऋतदलमित्येवं . . गुरोस्सम्प्रदायः ।

अस्यार्थः— अथाग्नेयकोणकोष्ठपञ्चाक्षरलेखनानन्तरं विधिना विशेषेणेति ।

R. No. 2401.

Paper. 10⅛×9⅛ inches. Foll. 84. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Mānavikraman Anujan Kunjunni Rāja of Calicut.

प्रबोधचन्द्रोदयव्याख्यानम्—नाटकाभरणम्.

PRABŌDHACANDRŌDAYAVYĀKHYĀNAM: NĀṬAKĀBHARAṆAM.

Foll. 1a—82b. Fol. 83a contains the name of the owner of the MS. from which this was copied. Foll. 83b—84b are left blank.

A commentary on the well-known drama Prabōdhacandrōdaya of Kṛṣṇamiśra. The commentator is Gōvindāmṛta, disciple of Prakāśatīrtha.

Complete.

**Beginning:**

या कण्ठनालकबलीकृतकालकूट-
च्छायेव विस्फुरति वक्षसि चन्द्रमौलेः ।
सा मे समस्तदुरितानि कटाक्षमाला
तुच्छीकरोतु तुहिनाचलकन्यकायाः ॥
यदज्ञानाद्विश्वं भवति फणिवद्रज्जुशकले
निर्लीनं यज्ज्ञानाज्झटिति सनिदानं त्रिभुवनम् ।
यदुच्चैराम्नायैर्विशदमवगम्यं मुनिजनैः
तदेतद्ब्रह्माहं सहजपरमानन्दमधुरम् ॥
नत्वा गौरीगुरुं गौरीं माधवं मां गुरुं तथा ।
नाटकाभरणं नाम टिप्पणं क्रियते मया ॥

इह खलु निखिलमलनिचयनिकेतनविपुलपूतीकुलायदुस्सहगर्भभूमिपरिभ्रमणपरिभूयमानदेहानां पटुतरक्रकचनिष्ठुरमातृपार्श्वास्थिपरिपीडितानामत्यन्तं सङ्कटकरस्थपुटयोनिद्वारनिस्सरणमसृष्टपूर्वस्मृतीनां

* * * * *

संसारसागरात्कथं नाम दुस्तरान्निस्तारः स्यादिति परमकृपाविधेयैस्तत्रभवद्भिः श्रीकृष्णमिश्राचार्यैस्तत्साधनसम्यक्प्रकाशनायापरोक्षीकृताखिलागमार्थैर्निखिलनिगमावसानसारसङ्ग्रहरूपं प्रबोधचन्द्रोदयं नाम नाटकं निरमायि । तदिदं यथाशक्ति श्रद्धादिप्रेरितेन मया यथाश्रवणं सङ्क्षेपतो व्याख्यायते—

तत्रादौ तावत् भरतादिनाट्यशास्त्रानुसारेण नाटकारम्भापेक्षितनान्दीसपर्यां सम्पादयन् नाटकव्याजेन प्रतिपाद्याखण्डैकरसानन्दब्रह्मात्मैकत्वं च सङ्क्षेपतः प्रदर्शयन् "स्मृते सकलकल्याणभाजनं यत्र जायते । पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥" इत्यादिवचनानुसारेण स्वरूपतटस्थलक्षणोक्तिद्वारा तत्त्वानुस्मरणलक्षणं मङ्गलं सम्पादयति—मध्याह्नेति । ननु किमिति नाटकव्याजेन वेदान्तार्थः प्रदर्श्यते । सन्ति खलु बहूनि शास्त्राणि निःश्रेयसप्रतिपादकानि । किंच नाटकस्य शृङ्गारादिरसप्रधानत्वात्तद्विरक्तस्य च निःश्रेयसाधिकाराद्वाग्नोऽसौ ब्राह्मणेत्यादिना च शास्त्रे बहिर्मुखानामत्राधिकारत्वप्रतिषेधाच्च ।

* * * *

**Colophon:**

इति प्रकाशतीर्थभगवत्पूज्यपादशिष्येण गोविन्दामृतभगवता कृते नाटकाभरणे प्रथमोऽङ्कः ।

**End:**

इदानीं प्रार्थनाप्रकारदर्शनेन नाटकार्थमुपसंहरन् आशीर्वादलक्षणं मङ्गलं सम्पादयति—पर्जन्येऽस्मिन्नित्यादिना । इष्टा . . . . . गलितविविधोपप्लवां प्रहृष्टाशेषानर्थास्त्वत्प्रसादात्तत्रभवत्याः . . . . . . महान्तः सज्जनाः तत्त्वापरोक्ष्येणापहततमस्तोमावलीकाः दुरुच्छिद्याहंममाभिमानव्याधिजं बहुनिकुरम्बकूलं संसाराब्धिं तरन्तु देव्याः प्रसादादित्यर्थः । नाट्यपरिसमाप्तिं दर्शयति— निष्क्रान्ताः सर्वे इति ।

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकश्रीमत्प्रकाशतीर्थभगवत्पूज्यपादशिष्येण गोविन्दामृतभगवता कृते प्रबोधचन्द्रोदयनाटकाभरणे षष्ठोऽङ्कः ॥

समाप्तमिदं नाटकाभरणम् ॥

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्यनिर्णयः ।
तात्पर्यपञ्चमचे(वर्णनं चे)ति व्याख्यानं पञ्चलक्षणम् ॥

---

R. No. 2402.

Paper. 11 × 9¾ inches. Foll. 74. Lines, 20 on a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of Kāñcibhaṭṭa Umāmahēśvaraśāstrigaru of Piṭhāpuram, Gōdāvari district.

महाव्रतप्रयोग:

MAHĀVRATAPRAYŌGAḤ.

On the duties to be performed by the Hōtṛ priests in the course of the performance of the sacrifice called Mahāvrata.

Complete.

**Beginning:**

एकाहमहाव्रतप्रयोग उच्यते— वरणादिमहारात्रिपर्यन्तं सर्वमग्निष्टामवत् । विश्वरूपाज्योतिर्गानानि न सन्ति । भूर्गानानि च । अथ महारात्रे बुद्धेत्यादि ऋतस्य सदने सीदामीत्यन्तं प्रकृतिवत् । बहिष्पवमानार्थमृत्जपं कुर्यु । चातुस्स्वरेण उपास्मै गायता नरः पवमानायेन्दवे । ओषधीभ्यः । उपांशु जातमपुरं गोभिर्भंगं परिष्कृतम् । इन्दुं देवा अयासिषुः । तमिद्वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव । य इन्द्रस्य हृदसनिः । अर्षाणस्सोमशङ्गवे । धुक्षस्व पिप्युषीमिषम् ।

* * * *

अभिषुते सोमे ऋतुपात्रमसीत्यादि प्रकृतिवत् । दशापवित्रं निष्पीड्य, हविर्धानद्वारेण प्रकृतहोमार्थं निस्सरन्तमध्वर्युं प्रस्तोतान्वारभत इत्यादि सामानि प्रति मा माहीत्यन्तं प्रकृतिवत् ।

**End:**

सों त्वे धर्माण सों यमग्ने सोमग्निर्जातो काव्या । भुव—सों, त्वां यज्ञेषु—रे । त्वं वसानि विवक्षसों, शों सावों यज्ञा यज्ञावो अग्नय इत्यादि शस्त्रशेषं । पूर्ववत् । ततोऽनुगजाद्युदवसायान्तं समानमग्निष्टोमेन सन्तिष्ठते ।

**Colophon:**

महाव्रतस्य हौत्रप्रयोगः ॥

The scribe of the original MS. adds—

काशीभट्टान्वये जातः अलिखद्धौत्रपद्धतिम् ॥

---

R. No. 2403.

Paper. 11 × 9½ inches. Foll. 126. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Ampalakot Karunākara Menon, B.A., B.L., of Chalapuram, Calicut.

अर्थशास्त्रव्याख्या— नयचन्द्रिका.

ARTHAŚĀSTRAVYĀKHYĀ: NAYACANDRIKĀ.

Foll. 1a—125b. Fol. 126a contains the name of the owner of the MS. from which this was copied. Fol. 126b is left blank.

A commentary by Mādhavayajvamiśra on the Arthaśāstra of Kauṭilya. Another commentary on it has been described under No. 3873 of the D.C.S. MSS., Vol. VIII.

Begins from the seventh Adhyāya of the seventh Adhikaraṇa and breaks off in the 11th Adhyāya and again begins in the course of the 15th Adhyāya of the same Adhikaraṇa and breaks off in the fourth Adhyāya of the 12th Adhikaraṇa.

**Beginning:**

द्वैधीभाविकास्सन्धिविक्रमाः ॥

तदेवं परिपणितादिभेदसन्धिमुक्त्वा सम्प्रति तेषामेव द्वैधीभावितानां समहीनांशलाभदे(नै)रपेक्षाभ्युपगमादि कारणप्रदर्शनार्थं सूत्रम्—

द्वैधीभाविकास्सन्धिविक्रमाः ॥

इति । सन्धिविग्रहोपादानं हि द्वैधीभावः । तन्निविष्टाः सन्धिविग्रहभेदाः कारणादिभेद्ये(दा उ)च्यन्त इत्यर्थः । तत्र सन्धिविग्रहयोरन्विष्टत्वात् प्रतियोगिद्वयं तावदाह—विजिगीषुरित्यादि । द्वितीयात् प्रकृतिमिति । भूम्यनन्तरं शत्रुमुपगृह्णीयादिति ; सहकारितया स्वीकुर्यादित्यर्थः । अत्र साह्याय्यार्थमित्यत्राह—सामन्तं सामन्तेनेति ।

* * * *

**Colophon:**

इति वादिकविचूडामणिमहोपाध्यायश्रीमन्माधवयज्वमिश्रविरचितायां कौटिलीयटीकायां नयचन्द्रिकायां षाड्गुण्ये सप्तमेऽधिकरणे सप्तमोऽध्यायः समाप्तः ।

**End:**

मध्यमस्येत्यादि । मध्यमोदासीनयोर्य आसीदन(न्तर)स्तदर्पणं तस्मिन्नात्मार्पणमध्यमोदासीनयोः प्रेषयेदित्यर्थः ।

**Colophon:**

इति वादिकविचूडामणिमहोपाध्यायश्रीमन्माधवयज्वमिश्रविरचितायां कौटिलीयटीकायां नयचन्द्रिकायां आबलीयसे द्वादशेऽधिकरणे तृतीयोऽध्यायस्समाप्तः ॥

(सू) शस्त्राग्निरसप्रणिधयः, वीवधासारप्रसारवधश्च ॥

एवं पराभियोगनिवर्तनार्थं मण्डलप्रोत्साहनमुक्त्वा मण्डलानुत्थानविलम्बनयोः कर्तव्याभिधानार्थं सूत्रम्– शस्त्राग्निरसप्रणिधय इति । शस्त्रादीनां गूढप्रयोगा उच्यन्त इत्यर्थः । तत्र शस्त्रप्रणिधानमाह––ये चास्येत्यादिना ।

* * * *

पक्षान्तरमाह—एतान्येवेति । सुराक्षीरादीन्येव पण्यतया विक्रयं व्यवहरन्तो वैदेहकव्यञ्जना रसेनापचरेयुरित्यर्थः । विशुद्धस्थापना च बलस्येति प्रतिबलावकाशकान् दूष्यबलमन्तरसञ्छाद्य आपत्त.

---

R. No. 2404.

Paper. 10¼ × 9¾ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS of M.R.Ry. Kṛṣṇacakravartyācar of Ketandipatti, North Arcot district.

शतदूषणीव्याख्यानम्— चण्डमारुतः.

ŚATADŪṢAṆĪVYĀKHYĀNAM: CAṆḌAMĀRUTAḤ.

Foll. 1a—35b. Fol. 36a contains the name of the owner of the MS. from which this was copied. Fol. 36b is left blank.

By Rāmānujadāsa. Same work as that described under R. No. 435 ante wherein see for the beginning:

Contains Skandhas 55 to 64.

**End:**

तत्र लाभे आपञ्चमी मुण्डयेतेति वक्तव्ये वापयेदिति प्रयोगः । अत्र मुण्डनशब्दो वपनशब्दसमानार्थं इति दर्शयितुं पर्यायत्वं समानार्थत्वमत्र मुण्डनशब्दो वपनार्थक इत्यर्थः । स्वारसिकेति । वाशब्दस्य विकल्प स्वरसत्वात् मुण्डः शिखी वेत्यादिषु तदङ्गीकारे मुण्डत्वस्यामुख्यत्वं दर्शितमित्यर्थः ।

**Colophon:**

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां यतिलिङ्गभेदभङ्गश्चतुःषष्टितमः स्कन्धः ॥

वाधूलश्रीनिवासार्यतनयं विनयाधिकम् ।
प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम् ॥

कृष्णः करोतु कल्याणं कंसकुञ्जरकेसरी ।
कालिन्दीजलकल्लोलकोलाहलकुतूहली ॥
प्रतिचण्डवादितरुषण्डखण्डने भुवि पण्डितो जयति चण्डमारुतः ।
अतिसंभ्रमेण स तु जृम्भते यतः स महागुरुश्च्युचितया विराजते ॥

---

R. No. 2405.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 8. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1917–18 from a MS. obtained through the Sub-Magistrate of Kovvûru, Kistna district.

(*a*) प्रेताधानपद्धतिः.

PRĒTĀDHĀNAPADDHATIḤ.

Foll. 1*a*—3*b*.

On the ceremonials to be observed for kindling the fire to be used in burning a dead person who performed sacrifices in his life-time.

Complete.

**Beginning:**

कर्ता स्नात्वाचम्य एवं . . पुण्यतिथौ यजमानस्य पितुः गोत्रस्य शर्मणः प्रेताधानविधिना अग्नीनाधास्ये । कर्ता प्रेत . . . . स्पृष्ट्वा . . . . . उपविश्य जपति । देवाः पितरः पितरः . . स्तु । इति मन्त्रं जपेत् । ततः अ . . गारु प्रविशति । वेदेः पश्चादुपविशति । प्रेतस्य पत्नी अरणिं गृहीत्वा कुमाराय दद्यात् । ततोऽग्निमन्थनम् । गार्हपत्याहवनीयदक्षिणाग्निस्थानेषु परिसमूहनादिकं कृत्वा भूर्भुवः आदित्यानां त्वदेवानां व्रतपते व्रतेनादधे इति मन्त्रेण गार्हपत्ये अग्निं स्थापयति ।

**End:**

तिथौ सर्वन्तरे देशान्तरे मृते तत्प्रायश्चित्तं साक्षाद्विष्णुलोकप्राप्त्यर्थं वैष्णवेष्टिस्थाने पूर्णाहुतिं होष्ये । समित्पूर्वकं चतुर्गृहीतं गृहीतं (गृहीत्वा) इदं विष्णु . . सुरे विष्णु त्रिर्देवः नाना स्वाहा इदं भूरादि . . त् । ततः अन्त्येष्टिप्रकारेण कुर्यात् ॥

**Colophon:**

प्रेताधानपद्धतिस्समाप्ता ॥

---

(*b*) अन्त्येष्टिप्रयोगः.

ANTYĒSTIPRAYŌGAḤ.

Foll. 3*b*—8*a*. Fol. 8*b* is left blank.

Contains Prathamadinavidhi only.

Same work as that described under R. No. 2360 ante wherein see for the beginning.

**End:**

ततः उदकादुत्तीर्य शुचौ देशे शाड्वलदेशे शाड्वलवत्युपतिष्ठेत् । सपिण्डादन्ये सुहृदः इतिहासपुराणादिभिर्विदग्धकथाभिः संसारानित्यतां दर्शयन्तः एवं वदेयुः । अत्र प्रथमदिनविधिस्समाप्तः ॥

**Colophon:**

इत्यन्त्येष्टिप्रयोगे प्रथमदिनविधिस्समाप्तः ॥

---

## R. No. 2406.

Paper. 10¾ × 9¼ inches. Foll. 8. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Kāsinātha Bhairavamūrti Ayyagāru of Elakurru, Kistna district.

### देवीस्तोत्रम्.

### DĒVĪSTŌTRAM.

Foll, 1*a*—6*a*. Foll. 7 and 8 are left blank.

A eulogy on the goddess Dēvi who is a manifestation of Pārvatī. Complete.

**Beginning:**

पूर्वोक्तसङ्ख्ययोजनदूरे पूषांशु(क)पटकस्य ।
विद्रावयतु मदार्तिं विद्रुमसालो विशङ्कु(ट)द्वारः ॥

* * * *

प्राकाराद्वृतयान्तरकक्ष्यां पृथुरत्ननिकरसङ्कीर्णाम् ।
नमत सहस्रस्तम्भ(ा) मण्टपनाम्नातिविश्रुतां भुवने ॥
प्रणुमस्तत्र भवानीसहचरमीशानमिन्दुखण्डधरम् ।
शृङ्गारनाटिकामनुशीलनभाजोऽपि नन्दिभृङ्गिमुखान् ॥

**End:**

भृङ्गरुचिसङ्गरकरापाङ्गं शृङ्गारतुङ्गमरुणाङ्गम् ।
मङ्गलममयं कुरु मे घटयतु गङ्गाधराङ्गसङ्गि महः ॥
प्रपद्गणितकूर्ममूर्तिं सकरुणं भर्मरुचिनिर्मथनदेहम् ।
श्रुतिमर्म नर्म शम्भोः किञ्चन मन्मर्मशर्म निर्मातु ॥

कालकुटिलालकालि कन्दलविजितालि विधृतमणिपालि ।
मिलितहृदि पुलिनजघनं बहुलितगरगलकेलि किमपि महः ॥

**Colophon:**

इति देवीस्तोत्रम् ॥

---

## R. No. 2407.

Paper. 10½ × 9⅜ and 13½ × 8½ inches. Foll. 146. Lines, 20, 24 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. obtained through the Sub-Magistrate of Kovvūru, Kistna district.

Fol. 64*b* contains the genealogy of the scribe of the original MS. with the copying date. Bound in two volumes.

### कात्यायनगृह्यसूत्रभाष्यम्.
### KĀTYĀYANAGṚHYASŪTRABHĀṢYAM.

A commentary by Gadadhara, son of Vāmana, on the Katyayanagṛhyasūtra which deals with the domestic religious rites and duties performed in accordance with the Vedic school of Kātyāyana.

Begins in the course of the 11th Khaṇḍa of the 1st Kāṇḍa to the end of the 2nd Kāṇḍa.

Name of the scribe of the original MS.—Kūci Pañcagni Mannaru Kṛṣṇāvadhāni of Kancinapalli. Copying date of the original MS.—Wednesday, the 10th of the bright fortnight of the Bhādrapada month in the year Akṣaya.

**Beginning:**

ज्ञेयः । तेन प(य)दस्याः पतिनाशकमङ्गलक्षणं हस्तरेखादि सामुद्रिकोक्तं तदपाकृत्य शोभनमङ्गं विधेहीति वाक्यार्थः । एवमुपर्यपि व्याख्येयम् । तनुविशेषणं देवतावभिद्यते । तद्यथा । हे वायो पवन । प्रजाघ्नी अपत्यनाशिनी । एवमुत्तरत्रापि योज्यम् । स्थालीपाकस्य जुहोति प्रजापतये स्वाहेति । आज्याहुत्यनन्तरं स्थालीपाकस्य चरोः प्रजापतये स्वाहेति मन्त्रेणोपांशुपठितेनैकामाहुतिं जुहोति ।

* * * *

**Colophon:**

इति गृह्यभाष्ये प्रथमकाण्डे एकादशः खण्डः ।

**End:**

इदं मनीषिभ्यो वर्मिभ्यः । इदं व . . . . भ्यः पशुभ्यो . . .
. . . येन कुर्यं इदमभिमाभ्यो . . . ग समजवेभो . . न मम . च-
र्वाज्यमिश्रस्यान्ते लाङ्गलयोजनदेवताभ्यः इन्द्रादिभ्यः स्त्री . . . . . .
. . श्र . . . . . . . ब्राह्मणभोजनम् ।

**Colophon:**

इति त्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृ-
ह्यसूत्रभाष्ये सीतायज्ञे पदार्थक्रमः ॥

द्वितीयकाण्डं समाप्तम् ॥

---

## R. No. 2408.

Paper. 10¾ × 9½ inches. Foll. 106. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Pullaya Vīrarāma Śāstrigaru of Mungonda Agrahāram, Razole taluk.

### किरणावलीप्रकाशविवरणम्.
### KIRAṆĀVALĪPRAKĀŚAVIVARAṆAM.

Same work as that described under R. No. 1541 ante by Rucidatta. Contains up to the end of Dravyanirūpaṇa.

---

## R. No. 2409.

Paper. 10¾ × 9¾ inches. Foll. 50. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Umamahēśvara Śāstrilugāru of Pithapuram, Gōdāvari district.

### (a) विशिष्टाद्वैतसङ्ग्रहः.
### VIŚIṢṬĀDVAITASAṄGRAHAḤ

Foll. 1a—16a.

A treatise explaining briefly in 4 Paricchēdās the Viśiṣṭādvaita-vēdānta as made out from the Brahmasūtras. By Rāmakṛṣṇa.

Complete.

**Beginning:**

शिवं विष्णुं गणपतिं तातपादं गुरुमपि ।
रामकृष्णो वितनुते विशिष्टाद्वैतसंग्रहम् ॥

तत्राक्षरग्रहणपर्यन्ताध्ययनविधिविहितताङ्गाध्ययनसंस्कृताद्वैतरूपाक्षर-
राशेः शब्दस्वभावात् व्याख्यानचिकीर्षायां वेदव्याख्यानरूपमेव विंशत्य-
ध्यायशास्त्रं प्रवृत्तम् । तत्र कर्मकाण्डव्याख्या जैमिनिना द्वादशलक्षणी
पूर्वोत्तरषट्कवती कृता । व्यासेन देवताव्याख्यानं सङ्कर्षणाख्यं चतुर्लक्षण्या
कृतम् । ब्रह्मकाण्डं चतुर्लक्षण्या कृतम् । तस्य शास्त्रस्य सिद्धोपायोपेयात्मकं
ब्रह्म विषयम् । तस्य पूर्वद्विकेन जगत्कारणत्वं मुक्तिप्रदत्वौपायिकपरत्वमु-
च्यते । उत्तरद्विकेन विषयरूपभक्त्या साध्योपायपरं मुमुक्षौपयिकं सौलभ्यं
तस्योच्यते । तस्येदमाद्यं सूत्रम्—

अथातो ब्रह्मजिज्ञासा ॥

अत्र अथ कर्ममीमांसानन्तरम् । यतः प्राक्तन्त्रेण कर्मस्वरूपज्ञानं केवल-
कर्मणामल्पास्थिरफलत्वज्ञानं च पर्यवसन्नम् तम(द)नन्तस्थिरफलरूपब्रह्मा-
पातज्ञानं च वेदान्ताध्ययनाज्ञातम्. अतो ब्रह्मजिज्ञासा ।

* * * *

**Colophon:**

इति प्रथमसमन्वयपरिच्छेदः ।

**End:**

ततस्तल्लीलोपकरणभूतब्रह्मलोकादीनप्यनुभवति । निर्विकारब्रह्माप्यनु-
चरन्निवृत्तकर्मबन्धत्वान्न पुनरावर्तते । नहि भगवान् वा तं पुनरावर्तयति ॥

**Colophon:**

इति फलपरिच्छेदश्चतुर्थः ॥

---

(b) विशिष्टाद्वैतभञ्जनम्.

VIŚIṢṬĀDVAITABHAÑJANAM.

Foll. 16a—50b.

A treatise condemning the Viśiṣṭādvaita school of Vedānta as propounded by Yāmunācārya, Rāmānuja, Vedāntadeśika, Varadarāja and others. By Rāmakṛṣṇa.

Incomplete.

**Beginning:**

गौरीं रमापतिं ध्यात्वा पुरुषं कृष्णपिङ्गलम् ।
रामकृष्णो वितनुते विशिष्टाद्वैतभञ्जनम् ॥

ब्रह्म स्वप्रतिबिम्बमज्ञमुपाधिप्रासेन संपाद्य-
इत्वा कर्मफलं निजाद्वयधिया मुक्तिं ददाति स्वयम् ।

श्रौतन्यायमिदं द्विषंस्सवशादादुःखो(?) विहेथान्वयं-
विष्णोस्तपश्च सत्यमुशतस्तान् भिकुरुध्वं बुधाः ॥

इहखलु नित्यनिरतिशयसत्यज्ञानानन्दरूपं ब्रह्म स्वसम्बन्धादेव सत्यां स्वशक्तिरूपां मायां प्रकृत्यविद्यातमःप्रधानादिशब्दवाच्यां नामरूपादि-जगदाकारेण परिणमय्य तदधिष्ठानरूपवतोरुपादानतया सत्तावान् कृति-प्रियत्वाकारेण स्वयमप्यनुप्रविश्य नामरूपयोस्सद्बुद्धियोग्यतां स्वसम्बन्धेनैव सम्पाद्य

* * * *

वेदान्तानां विशिष्टाद्वैतपरत्वं ब्रुवाणानां यामुनलक्ष्मणप्रभृतीनां तद्विप्र-लम्भप्रदुष्टविवेकानां वेङ्कटनाथवरदराजादीनां च ग्रन्थानालोच्य तदुदी-रितप्रमाणतदनुकूलन्यायानां पूर्वापरविरोधान् प्रमाणान्तरविरोधांश्चोद्भाव्य तदभिमतविशिष्टाद्वैतभञ्जनाय प्रयतामहे ।

ननु तन्मतस्यापि ब्रह्म । नैः प्रवर्तितन्यत्वाद्वेदानुसारित्वात्तत्कृतसिद्ध-सगुणब्रह्मोपासनस्य त्वयाप्यभ्युपगतत्वात्तन्मतखण्डनं न युक्तमित्यत आह ।

नीचैरैक्यं गुरूणामपि विषयसुखं पूर्णकामस्य विष्णोः
संस्कारं वेदबाह्यं विबुधपरिभवं म्लेच्छभावोक्तवेदम् ।
श्रोत्राध्येत्रा तत्त्वन कृतिमवरजनोष्णमिशस्त्यश्रुतीना-
मङ्गीकुर्वन्ति ये तानपि हितवचनान् विप्रवेषान् धुनोमि ॥

* * * *

अत्र तूपनिषत्प्रसिद्धत्रिवृत्करणपञ्चीकरणनतिनिधिन्यायभेदाग्रहानुपजीव्य निर्वाहः क्रियते । तथाहि ।

End :

नहि चैतन्यातिरिक्तस्य सुखरूपत्वं तवानुमतम् । अनुकूलज्ञानन्यूनं सुखमस्तीति रीत्या भूमातिरिक्तस्य सुखत्वनिषेधात्. मुक्तिब्रह्मणोः कर्मभा-वात् यथा ब्रह्मातिरिक्तानां न दुःखत्वं तथा कर्माभावादिव सुखं त्व ॥

---

R. No. **2410.**

Paper. 18 × 4½ inches. Foll. 44. Lines, 24 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Śiṣṭla Vēṅkata-śastrulu Gāru, Betavolu, Gudivāḍa taluk, Kistna district.

(a) कर्मविपाकः.

KARMAVIPĀKAḤ.

Foll. 1a—30b.

A treatise explaining the various expiatory ceremonies to be performed for curing certain kinds of ailments which are considered to be the result of particular acts of sin commited in the previous births.

Incomplete.

Date of transcription of the original MS. Sunday the 11th day of the bright fortnight of the Āṣāḍha month in the year Virōdhikṛt. Name of the scribe: Siṣṭa Veṅgayya.

**Beginning:**

नैमिशाख्ये महारण्ये सुरसिद्धनिषेविते ।
संभूय परमं सर्वे ऋषयस्सनकादयः ॥
तपोभिर्विविधैर्होमैः पुराणपुरुषं हरिम् ।
यज्ञे . . . . . . . . . . . . . पैया ॥
एकदा तु सुखासीनाः प्रातःकालोचितान् विधीन् ।
स . ' ज्ञ हृष्टास्ते सूत . . . . रोमहर्षिणः ॥
* * * *
संसारेऽस्मिन्नसाध्यं ते नानारोगैः प्रपीडिताः ।
धर्मार्थकामरहित . . . . . शर्वरीनराः ॥
परित्यजन्त्यज्ञान् प्राणान् लोके भवन्ति दुःखिताः ।
पापानां पापकर्माणां विपाकं कीदृशं स्मृतम् ॥
तस्य कर्मविपाकेन प्रायश्चित्तं च किं भवेत् ।
यत्कृत्वा रोगिणो मर्त्या नीरोगास्सुखमाप्नुयुः ॥
सर्वमाचक्ष्व सूत त्वं विजानाति यथातथम् ।
मुनीनां वचनं सूतः श्रुत्वा तान् प्रत्यभाषत ॥

सूतः—

साधु पृष्टोऽस्मि युष्माभिर्मुनीन्द्राः श्रूयतां तथा ।
आयुरल्पावशिष्टानां पूर्वजन्मोपभोगतः ॥
विपाकजेषु पापानां त्रिवेदोक्ता महर्षिभिः ।
अशेषान् संप्रवक्ष्यामि शृण्वन्तु मुनिसत्तमाः ॥
व्याधिजातेष्वमानाय चिकित्साया नृशंसया ।
भूयो रोगाः प्रवर्तन्ते प्रायश्चित्तमकुर्वताम् ॥

भगवानिममेवार्थं मुनिं बोधायनोऽब्रवीत् ।
विपाकजेषु रोगेषु पापानां कर्मणामिह ॥
आत्मनस्सुख . . . . . . . . मानरः ।
प्रायश्चित्तमकृत्वा तु न कुर्यात्कर्म किंचन ॥
* * * *
मातृहन्ता स्थावरतां कैवर्तो जलनाशनः ।
मित्राणां हिंसको मर्त्यः चर्मकारः प्रजायते ।
* * * *

**Colophon**

इत्यपस्मारकर्मविपाके मृत्युञ्जयदानविधिः ॥

**End:**

व्रतान्ते पुस्तकं दद्यात् सुवर्णं पलसंयुतम् ।
ब्राह्मणाय स . . . . . . वस्त्रेण संयुतम् ॥
इम मन्त्रं समुच्चार्य ब्राह्मणाय निवेदयेत् ।
इदं मन्त्रं समुच्चार्य पुस्तकं दद्याद्विचक्षणः । तमेव दानमन्त्रमाह—
सरस्वति जगन्मातः शब्दब्रह्माधिदेवते ।
दुष्कर्मकारिणं पापं रक्ष मां परमेश्वरि ॥

---

(b) कर्मविपाकसुधानिधिः.

KARMAVIPĀKASUDHĀNIDHIḤ.

Foll. 31a—42a. Foll. 43—44 give the contents of the work.

By Sāyanacārya. Same work as that described under Nos. 3490 and 3491, but with different readings.

Contains the Prakaraṇas 1 to 3 complete and the 4th incomplete.

**Beginning:**

लक्ष्मीपतिं देवमनन्तरूपं जगद्धितार्थं प्रतिगृह्य मूर्ध्ना ।
वक्ष्याम्यमन्दार्थविधानमेतद्रोगप्रशान्त्यर्थमिदं निदानम् ॥

श्रुतिस्मृतीतिहासपुराणकात्यायनभारतादिशास्त्रेषु लोकनिदानभूतपूर्वाघं मुक्त्वा वसिष्ठः पूर्वजन्मकर्मप्रशमनार्थं चिकित्साङ्गभूतं कर्मविपाकं तावदाह—

कृच्छ्रातिकृच्छ्रचान्द्रायणजपहोमादि कथ्यते—अन्यथा भूयसी . . . . वर्धन्ते चिकित्सायां क्रियमाणायाम्—

प्रायश्चित्तमकृत्वा तु न कुर्यात् कर्म किंचन ।
अनिस्तीर्य(र्ण)मघं नित्यं वर्धते द्विगुणं पुनः ॥

इति स्मरणात् । तथाच स्मृत्यन्तरे—

जन्मान्तरकृतं पापं व्याधिरूपेण बाधते ।
तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः ॥

* * * *

**Colophon:**

इति श्रीभो(गनाथ)माधवसहोदरस्य [श्र] मा(य)ण(न)न्दनस्य (सायणाचार्यस्य कृतौ) कर्मविपाकप्रायश्चित्तसुधानिधौ शास्त्रस्थापनं नाम प्रथमप्रकरणम् ।

* * * *

**End:**
**Colophon:**

इति माधवभोगनाथसहोदरस्य मायणनन्दनस्य सायणाचार्यस्य कृतौ कर्मविपाकसुधानिधौ तृतीयप्रकरणम् ।

अयथागमनं पूर्वे परि . देशावशापरा ! ।
वर्षदर्धं नियोजयेत् ॥
ऋग्वेदविद्यऋग्वे(जुर्वे)दसामवेदविदोऽथवा ।
परावर्षवयोधर्मज्ञा धर्मसंशयनिर्णयः ॥
पातकेषु शतं वर्षं सहस्रं महदादिषु ।
उपपातेषु पश्चाक सर्वेष्वल्पा तथा भवेत् ॥

* * * *

एतद्दानसाद्गुण्यार्थं दक्षिणादानं करिष्ये। हिरण्य+अतश्शान्तिं प्रयच्छ मे । इमां दानसाद्गुण्यार्थं दक्षिणादानं संप्रददे न मम । तदनन्तरं दाता पुनः स्नात्वा शुभ्रवस्त्राणि धृत्वा, पुण्याहवाचनं कृत्वा आज्यावलोकनं कृत्वा गोदानादि दशदानं कुर्यात् ।

इति प्रत्यक्षगजदानपद्धतिः ॥

---

## R. No. 2411.

Paper. 10¼ × 9¼ inches. Foll. 70. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1917-18 from a MS. of Raja Manavikraman Anujaññ Kuññunni Raja of Padiññârakko vilagam, Calicut.

## वाक्यपदीयव्याख्यानम्—हेलाराजीयम्.

## VĀKYAPADĪYAVYĀKHYĀNAM : HĒLĀRĀJĪYAM.

Foll. 1a—69a. Fol. 69b contains the name of the owner of the MS. from which this was copied. Fol. 70 is left blank.

A commentary by Hēlārāja, son of Bhūrirāja, on the Vākyapadīya of Bhartṛhari which is described under No. 1483 of the D.C.S MSS., Vol. III. From a stanza found at the end of the 14th Samuddēśa contained in another MS. of the Library, the commentator is made out to be a descendant of Lākṣaṇa (Lakṣmaṇa) who is stated to have been a minister in the court of Muktāpīḍa, a king of Kāśmīra. A portion of this commentary, breaking off in the 7th Samuddēśa of the 3rd Kāṇḍa, has been printed in the Benares Sanskrit Series.

Contains the 7th Samuddēśa (from the Sampradānādhikāra) and the 8th, and the 12th Samuddēśas of the 3rd Kāṇḍa, viz., the Padakāṇḍa.

**Beginning:**

विभक्तिविधानक्रमेण साधनानां विचारे तृतीयार्थे कर्तरि निर्णीते चतुर्थ्यर्थ-सम्प्रदानं विचारयितुमाह—

अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम् ।
प्रेरणानुमतिभ्यां च लभते सम्प्रदानताम् ॥

अन्वर्थत्वात्सम्प्रदानशब्दस्य त्यागाङ्गमिति लक्षणलाभः । त्यागो दीयमानस्य स्वस्वत्वनिवृत्त्या परस्वत्वापादनम् । तत्र चाङ्गं निमित्तं पाण्यादिकमपि भवतीत्याह—कर्मणेप्सितमिति । यत्तत्त्यज्यमानं कर्म तेन करणभूतेन प्रारम्भ एव कर्त्राप्तुमिष्टमित्यर्थः । तथाच कर्मणा यमभिप्रैति इति लक्षणपरिग्रहः । तदेवंविधत्यागाङ्गं कथं कारकविशेषरूपां सम्प्रदानतां लभत इत्याशङ्क्य कारकत्वनिबन्धनव्यापारं क्रियासिद्धौ निर्दिशति अनिराकरणादित्यादिना ।

* * * *

सम्प्रदानाधिकारोऽयं हेलाराजकृतोऽधुना ।
प्रकाशे पञ्चमोऽस्माभिर्लिखितोऽनुग्रहाद्गुरोः ॥

**End:**

तथा न भावादन्यत् पचिरूपं सामान्यविशेषयोरत्यन्तभेदाभावात् सकल-विशेषपरिहारेण सामान्यरूपानुपपत्तेरिति सर्वत्र सिद्धिः ॥

**Colophon:**

इति प्रकीर्णकप्रकाशे क्रियासमुद्देशोऽष्टमः ॥

इदानीमाख्यातार्थमुपग्रहं विचारयितुं स्वरूपमस्यालौकिकत्वात् प्रदर्शयति—

य आत्मनेपदाद्भेदः क्वचिदर्थस्य गम्यते ।
अन्यतश्चापि लादेशान्मन्यन्ते तमुपग्रहम् ॥

• • • •

मतस्ततोऽत्र विभाषोपपदेन प्रतीयमाने इति प्राप्त आत्मनेपदे विभाषाकरणात्पक्षे न भवतीति कुर्वतीति साधुप्रयोगो भाष्येऽपि चास्थित इति सिद्धमिष्टम् ॥

**Colophon:**

इति भूरिराजतनयहेलाराजकृतौ प्रकीर्णकारे (प्रकाशे) उपग्रहसमुद्देशो द्वादशः ॥

---

## R. No. 2412.

Paper. 10¼ × 9¾ inches. Foll. 68. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Pulavarti Pāpayyagāru of Velampālam, Godavari district.

अष्टाङ्गहृदयव्याख्या—विज्ञेयार्थप्रकाशिका.

### AṢṬĀṄGAHṚDAYAVYĀKHYĀ : VIJÑEYĀRTHAPRAKĀŚIKĀ.

A commentary by Viśvēśvarapaṇḍita on Vāgbhaṭa's Aṣṭāṅgahṛdaya, which work has been described under No. 13072 of the D.C.S. MSS., Vol. XXIII.

Contains the Adhyāyas 1 to 6 in the Śārīrasthāna.

**Beginning:**

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

पूर्वस्मिन् स्थाने सर्वशास्त्रार्थोऽपि सङ्क्षेपोक्तः । इतः परं शास्त्रस्य का . . . . . स्थतेत्यादिना निर्दिष्टाङ्गानि क्रमेण वक्ष्यमाणः इदानीं तद्विस्तरेण शरीरस्याद्यङ्गत्वात् तं वक्तुं शारीरस्थानमारभते—अथात इत्यादिना । शरीरमधिकृत्य कृतो ग्रन्थः शारीरः गर्भस्यावक्रान्तिरवक्रमः संप्राप्तिः गर्भावक्रान्तिर्विधीयते

यस्मिन्नध्याय इति डमत्ययः । गर्भावक्रान्तीयम् । अथादिशब्दानामर्थः पूर्वमेवोक्तः । शुद्धेति । स्वकर्मक्लेशचोदितः । स्वस्य कर्माणि शुभाशुभमिश्ररूपाणि स्वजातीयव्यापाराश्च प्राणिनः क्लेशयन्तीति क्लेशशब्देनाविद्यास्मितिरागद्वेषाभिनिवेशाः पञ्च क्लेशाः ।

**End:**

इतीति—इति पूर्वोक्तप्रकारेणात्रास्मिन् स्थाने शरीरस्य जन्ममरणं गर्भावक्रान्त्यादिभिश्चतुर्भिरध्यायैः जन्म ततो द्वाभ्यां मरणं च सम्यगुदाहृतः । ततः कारणादिदं स्थानं शारीरमित्युच्यते ।

**Colophon:**

इत्यष्टाङ्गहृदयशारीरस्थानस्य विश्वेश्वरपण्डितविहितार्थप्रकाशिकायां षष्ठोऽध्यायः ।

---

## R. No. 2413.

Paper. 10¼ × 9¾ inches. Foll. 48. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. obtained through the Sub-Magistrate of Kovvūru, Kistna district.

(a) औद्गात्रप्रयोगः.

### AUDGĀTRAPRAYŌGAḤ.

*Foll. 1a—35b and 36b, 37a.* Fol. 36a contains the Viśvanāthāṣṭaka.

Similar to the work described under No. 1146 of the D.C.S. MSS., Vol. II.

Contains Prātassavana and Mādhyandinasavana complete, and Tṛtīyasavana incomplete.

Name of the copyist of the original MS: Pramidē Yagganna. Date of transcription:—Thursday, the 10th day of the dark fortnight of the Māgha month in the year Dundubhi.

**Beginning:**

अथेदानीमग्निष्टोममारभ्याप्तोर्यामपर्यन्तं क्रत्वादीनां सामप्रयोगा दृश्यन्ते । तत्र प्रथममग्निष्टोमस्य यजमानसङ्कल्पानन्तरं . . . . . णस्सोमो भविष्यति, तत्र भवतौद्गात्रं कर्तव्यमिति सोमप्रवाकेनाभ्यर्थितः आर्त्विज्याकरणे नमस्सोमाय राज्ञ इति सोमं नमस्कृत्य

• • • •

इन्द्राग्नी जरितस्सचों इन्द्रमग्निं कविच्छदों इति द्वे गायत्रं गायेत् ॥

**Colophon:**

इत्यौद्गात्रप्रयोगे प्रातस्सवनं समाप्तम् ॥

**End:**

अथोदवसानीयायामिष्टौ पूर्णाहुतौ वा गायन्ति त्वेत्युद्वंशीये तृचे गायेत। उद्वंशीयानुष्टुप् छन्दः, वायुः ऋषिः, अग्निर्देवता। उद्वंशीयम्—

गायन्ति त्वा गायत्रीणा श्वा अर्चन्त्यर्कमर्को ऽ २३ इणाः।

* * * *

उदङ्मुख उद्गाता प्रत्यङ्मुखः प्रस्तोता प्रस्तोतारं पूर्वेण गत्वा आग्नेयाभिमुखः प्रतिहर्ता। एवमुपविश्य प्रस्तोतरुपह्वयस्व, प्रतिहर्तरुपह्वयस्व इत्युद्गाता तावप्युप.

---

(b) कात्यायनगृह्यकारिका.

KĀTYĀYANAGṚHYAKĀRIKĀ.

Foll. 37b—40a.

A treatise laying down in verse the manner of conducting the household religious rites to be observed by the followers of the Kātyāyana school. By Rēṇukadīkṣita.

Complete.

Name of the copyist of the original MS: Brahmanna.

**Beginning:**

यज्वना रेणुकाख्येन कृतेयं गृह्यकारिका।

अश्वत्थलक्षणं वक्ष्ये पात्राणामानुपूर्व्यशः ॥

विलोक्य नैगमं शास्त्रमन्यानि च विशेषतः।

अश्वत्थो यश्शमीगर्भः प्रशस्तोऽपि समुद्भवः ॥

तस्य या प्राङ्मुखी शाखा उदीची चोर्ध्वगापि वा।

शाखान्तामाहरेद्विप्रः पृष्ठतो नावलोकयेत् ॥

**End:**

वैकङ्कतानि कार्याणि सूत्रान्तरमतादपि।

अभावे मुख्यवृक्षस्य यज्ञियस्य तरोरिह ॥

यत्किञ्चित्पात्रजातं तदिति भास्करसम्मतिः।

अश्वत्था धरणी ग्राह्या नान्यस्मादेव वृक्षतः ॥

एवं शाखेषु सर्वेषु दृष्टमात्रान्तरेष्वपि ।
शान्तिबुद्धिविविक्त्यादितरणीवल्लभेन च ॥
यज्वना रेणुकाख्येन कृतेयं गृह्यकारिका ।

**Colophon:**

इति रेणुकदीक्षितविरचितायां गृह्यकारिकायामाधानपात्रलक्षणं समाप्तम् ॥

Foll. 40*b* and 41*a* contain Darśapūrṇamāsavēdikārikā.

---

(*c*) पशुहौत्रप्रयोगः.

PAŚUHAUTRAPRAYŌGAḤ.

Foll. 41*b*—46*a*.

On the duties to be performed by the Hōtṛ priest in relation to the sacrifice called Paśubandha.

Complete.

**Beginning:**

अथाग्निप्रणयनम् । होता स्नानाचमने कृत्वा पश्चात् प्रकृतिवेदेरुपविश्य प्रेषितोऽग्निप्रणयनीया अन्वाह । निरसनोपवेशने कृत्वा ओं भूर्भुवस्स्वरोम् । प्रदेवं देव्या धिया भरता जातवेदसम् । हव्या नो वक्षदा(सा)नुषों(षगों)त्रिः । अयमुष्य प्रदेवयुर्होता यज्ञाय नीयते । रथोऽनयोरभीवृतो घृणीवान् चेतति त्मनोम् ।

**End:**

समिदसि मृत्योर्मा पाहि स्वाहा । आहवनीये समिध आधाय अपो अद्यान्वचारिषं रसेन समगन्महि पयस्वाऽ अग्न आगमं तं मा संसृज वर्चसा उपतिष्ठते । ओं चम इति जपन्ति ॥

**Colophon:**

इति पशुहौत्रं सम्पूर्णम् ॥

---

(*d*) आप्रिया.

ĀPRIYĀ.

Foll. 46*a*—46*b*.

Similar to the work described under No. 1153 of the D.C.S. MSS., Vol. II.

Incomplete.

**Beginning:**

विश्वामित्रगणस्य आप्रिया उच्यन्ते—ये यजामहे समित्समित् सुमना बोध्यस्मै शुचाशुचा सुमतिं रासि वस्वः । आदेवा देवान् यजि(क्षि)याय वक्षि सखा सखीन्त्सुमना यक्ष्यमा ई वौ ।

**End:**

बर्हिर्नास्तामदितिस्सुपुत्रा स्वाहा देवा अमृतामादयन्ताम्—वौ ।

**Colophon:**

आप्रियास्समाप्ताः ॥

Fol. 47 contains a portion of a Śrautaprayōga. Fol. 48 is left blank.

---

## R. No. 2414.

**Paper.** $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 80. Lines, 20 in a page. Grantha Good.

(a) जैमिनिसूत्रवृत्तिः.

**JAIMINISŪTRAVṚTTIḤ**

Foll 1a—13a. Foll. 13b and 14 are left blank

Transcribed in 1917-18 from a MS. of M.R.Ry. Pedapati Śrīrāmasiddhāntigāru of Ramachandrapuram, Godavari district.

Same work as that described under R. No. 1922 ante.

Contains the Pādas 1 without beginning and 2 complete and 3 incomplete in the second Adhyāya

Name of the scribe of the original MS: Pīdaparti Śrīrāmuḍu. Date of transcription: Thursday, the 10th day of the bright fortnight of the Māgha month in the year Virōdhikṛt.

---

(b) कात्यायनप्रयोगसरणिवचनकदम्बकम्.

**KĀTYĀYANAPRAYŌGASARAṆIVACANAKADAMBAKAM.**

Foll. 15a—41a. Foll. 41b, 43 and 44 give the contents of the work. Fol. 42 is left blank.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvūru, Kistna district.

A collection of stanzas taken from various sources and dealing with the procedure relating to the performance of various household religious rites and duties laid down for the followers of the Kātyāyana school.

**Beginning :**

गर्भाधानं पुंसवनं सीमन्तो जातकर्म च ।
नाम निष्क्रमणं पश्चादन्नप्राशनमेव च ॥
चौलमौञ्जीव्रतादेशद्वयं व्रतविसर्जनम् ।
गोदानाख्यं स्नातकं च विवाहः पैतृमेधकः ॥
गर्भाधानमृतौ पुंसस्सवनं स्पन्दनात्पुरा ।
षष्ठेऽष्टमे वा सीमन्तो मास्यते जातकर्म च ॥
अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः ।
षष्ठेऽन्नप्राशन मासि चूडा कार्या यथाकुलम् ॥
एवमेनः शमं याति बीजगर्भसमुद्भवम् ।
तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः ॥

इतोऽतिरिक्तानि । आवसथ्याधानाक्षतहोमप्रतिपद्धोमपञ्चमहायज्ञवृषोत्सर्जनलाङ्गलयोजनबीजावापनश्रवणकर्म,

* * * *

अवकीर्णिप्रायश्चित्तादिकर्माणि तत्तत्प्रायश्चित्तान्यपि वक्ष्यन्ते ।

उदक्प्रयाणे पूर्वस्मिन् पक्षे पुण्याह एव च ।
सर्वेषामेव दिव्यानां कर्मणां विधिरिष्यते ॥

इति शुभकर्मणां योग्यकालनिर्णयः ।

**End :**

शालाग्नौ तत्र चेदन्नं विधिरेवसनातनः ।
. . . स्तु हुतादन्नाच्छेषाद्भूतबलिक्रिया ॥
अन्नं भूमौ श्वचण्डा . . . . . निक्षिपेत् ।
एकपाकेन वसतां पितृदेवद्विजार्चनम् ।
एकं भवे . . . . . . . द्गृहे गृहे ॥

---

(c) कातीयेष्टिहौत्रप्रयोगः.

KĀTIYEṢṬIHAUTRAPRAYŌGAḤ.

Foll. 45*a*—77*a*. Foll. 77*b*—78 are left blank.

On the procedure relating to the performance of the various duties by the Hōtr priest in the sacrifices conducted in accordance with the Kātyāyana school.

Incomplete.

**Beginning :**

याजुषहौत्रप्रयोग उच्यते –शुत्वाचमनं कृत्वा पुरस्तात्सामिधेनीनाम् होता हृदयदे मूर्ध्नि मादे . . . . . यमाणो जपति । मयि गृह्णाम्यग्रे अग्नी . . . परागत । अन्तराहवनीयमुत्तरं च प्रतिगच्छन्नङ्ग . . . . . जवत । सत्यं प्रद्दे(पद्ये)ऋतं प्रपद्ये । द्विसः भूर्भुवस्सुवः । . . . . . ने तिष्ठामि । अव-तिष्ठतेऽन्तर्वेदिदक्षिणाः पादो भवति । बहिर्वेदि सव्योर्ध्वस्तिष्ठत् । बृहत्सामिधे-नीरनुवक्ष्यामीति ब्रह्माणमामन्त्र्य, ओमनुब्रूहीति ।

**End :**

तं वाजिनपात्रमिडामिव(त)त्प्रतिगृह्य, स्वेतरानुहूय, आमाविश्वन्त्विदव आग . . . . . धनरॉ रसेन मे रसं हणु, तस्य ते वाजिभिर्भक्षं कृतस्य वा ।

---

(*d*) ब्रह्मनामावलिः.

BRAHMANĀMĀVALIḤ.

Fol. 79. Fol. 80 is left blank.

Similar to the work described under R. No. 193(*f*) ante.

Incomplete.

**Beginning :**

सर्वेन्द्रियादिवैराग्यं यम इत्युच्यते बुधैः ।
अनुरक्तिः परे तत्त्वे नियमः परिकीर्तितः ॥
सर्ववस्तुन्युदासीनभावमासनमुच्यते ।
इदं मिथ्या जगत्सर्वं प्राणायामं प्रकीर्तितम् ।
चित्तस्यान्तर्मुखीभावः प्रत्याहारं प्रवर्तते ॥

**End :**

नित्यशुद्धविमुक्तोऽहं निराकारोऽहमच्युतः ।
स्वच्छप्रकाररूपोऽहमहमेवाहमव्ययः ॥

---

## R. No. 2415.

Paper. $10\frac{1}{4} \times 9\frac{1}{2}$ inches. Foll. 32. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1917–18 from a MS. obtained through the Sub-Magistrate of Kovvūru, Kistna district.

वाजसनेयोपाख्यानम्.
VĀJASANEYŌPĀKHYĀNAM.

Same work as that described under R. No. 2363 ante, but with certain introductory stanzas in the beginning. This is also called Prastāvakadambaratnākara.

Deals with the following topics :—

१. याज्ञवल्क्यचरित्रसङ्क्षेपकथनम्.
२. योगीश्वरावताराय ब्रह्मरातकृतमहाविष्णुप्रार्थनम्.
३. श्रीयाज्ञवल्क्यशब्दार्थवर्णनम्.
४. योगीश्वरमिथिलापुरप्रस्थानकथनम्.
५. वाजिवैशम्पायनवाग्विवादवैभवकथनम्.
६. यजुर्वेदकृष्णभागवमनं तैत्तिरीयशाखाप्रस्तावकथनम्.
७. गायत्रीप्रत्यक्षम्.

Contains the first Adhyāya only complete.

**Beginning :**

ब्रह्मदेवसमारम्भां सूर्यदेवसमध्यमाम् ।
श्रीयाज्ञवल्क्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥
श्रीमद्वाजसनेयस्य चरितं मङ्गलं सदा ।
भारतस्कन्दसौरादिपुराणेषु च यत् स्थितम् ॥
तथैव वेदवेदाङ्गवेदान्तेषु च संस्थितम् ।
तत्प्रस्तावकदम्बेन सहितं ग्रथितं मया ॥
तच्चरित्रं लिखाम्यत्र शिष्याणां हितकाम्यया ।
योगीश्वरस्य दासोऽहं मिथिलेत्युपनामकः ॥
इति नान्दीश्लोकाः । तत्रादौ गुरुनमस्कारश्लोकाः ।
ब्रह्मरातसुतमर्कसुशिष्यं ब्रह्मदत्तमुखब्रह्मबोधकम् ।
ब्रह्महन्तृगुरुपापमोचकं ब्रह्मनिष्ठमहमद्य नतोऽस्मि ॥
साङ्गवेदचतुष्टयबोधकं वान्तवेदमपि वेदविग्रहम् ।
जनकयज्ञशिष्टादिगुरुं तमब्जनीसुतसतीर्थिकं भजे ॥

* * * *

श्रीमद्वाजसनेः पुत्रं सुनन्दानन्दवर्धनम् ।
ज्ञानाधिकं याज्ञवल्क्यमज्ञानध्वान्तभास्करम् ॥

बृहदारण्यनिलयं बृहदानन्दसंयुतम् ।
बृहद्योगप्रणेतारं बृहद्योगप्रदायकम् ॥

इति महागुरुनमस्कारश्लोकाः । तद्योगीश्वरचरितप्रथमाध्यायप्रारम्भः ।

* * * *

---

## R. No. 2416.

Paper. 10¾ × 8½ inches. Foll. 32. Lines, 20 in a page. Dēvanāgarī. Good.

(a) योगसंग्रहः.

YŌGASAṄGRAHAḤ

Foll. 1a—10b. Foll. 11—12 are left blank.

Transcribed in 1917-18 from a MS. of Śrī Manavēda, Rājā of Calicut, Malabar district.

A treatise dealing with the practice of Yōga, as taught to a disciple by his Guru.

Complete.

**Beginning:**

एकान्ते गुरुमासीनं प्रत्यप्रोज्ज्वलमानसम् ।
पप्रच्छ शिष्यो मेधावी प्रणम्येदं समाहितः ॥
योगाभ्यासक्रमं सम्यक् भगवन् वक्तुमर्हसि ।
योगः किल परं विद्वन् मुक्तये सर्वदेहिनाम् ॥
शुश्रूषुणा स्वशिष्येण पृष्टो गुरुरुदारधीः ।
कृपयाश्रुकलो भूत्वा तमुवाचाभिनन्द्य च ॥
स्वाङ्गुलीभिर्मनुष्याणां षण्णवत्यङ्गुलायतम् ।
शरीरं वत्स तन्मध्यं मूलाधारं विदुर्बुधाः ॥
सुषुम्णाख्या वरा नाडी देहमध्ये प्रतिष्ठिता ।
अन्तस्सुषिरसम्पन्ना वेणुकाण्डवदुद्गता ॥

**End:**

न बाह्यकार्यनिरतो योगभ्रष्टो भवेत् क्वचित् ।
समाधिस्थः परब्रह्मण्यचिरेण स लीयते ॥
इति वाक्यं गुरोः श्रुत्वा शिष्यो विमलमानसः ।
बभूव सद्यो मतिमान् पूर्वसंस्कारगौरवात् ॥

**Colophon:**

इति योगसंग्रहः समाप्तः ॥

---

(*b*) कण्वकण्ठाभरणम्.

KAṆVAKAṆṬHĀBHARAṆAM.

Foll. 13*a*—31*b*. Fol. 32*a* gives the contents of the work. Fol. 32*b* is left blank.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvūur, Kistna district.

Deals with certain religious rites to be performed in relation to the household sacred fire by the followers of the Kāṇva recension of the White Yajurvēda. The work abounds with quotations from various Smṛtis. By Anantabhaṭṭa, son of Bhāgirathī and Nāgadēva, a follower of the White Yajurvēda.

Wants the beginning and the end.

**Beginning:**

ब्रह्मणे पूर्णपात्रदानम् । ब्रह्मन्नस्य नवान्नप्राशनकर्मणोऽङ्गतया विहितेयं पूर्णपात्रदक्षिणा प्रतिगृह्यताम्, प्रतिगृह्णामीति वदेत् । ततो ब्राह्मणभोजनम् । यदि नवान्नप्राशनं केनचित्कारणेन स्वकालेन कृतं तदा गौणकालेऽपि कुर्यात्। तथा च व्रीह्याग्रयणं शरदि चेन्न भवति तदा यवाग्रयणात् पुरा अनादिष्टं कृत्वा कुर्यात् ।

* * * *

तथाचाश्वलायनः—

अकृताग्रयणोऽश्नीयान्नवान्नं यदि साग्निकः ।
वैश्वानराय कर्तव्यः चरुः पूर्णाहुतिस्तु वा ॥
आज्यं द्वादशकृत्वस्तु गृहीत्वा पूरयेत्स्रुचम् ।
तयाचाज्याहुतिर्या स्यात् सा पूर्णाहुतिरुच्यते ॥
स्रुवपूर्णाहुतिर्वा स्यादित्येके याज्ञिका विदुः ।
पार्वणेन तु तन्त्रेण चरुर्वैश्वानरो भवेत् ॥

इति ।

* * * *

**Colophon:**

इति कण्वकण्ठाभरणे नवान्नप्राशनविधिः ।

**End:**

सूत्रभाष्यस्मृतीनां तु एकवाक्यतया मया ।
निर्णीय सङ्गृहीतोऽर्थस्सन्तस्सन्तोष्टुमर्हथ ॥
अम्बा भागीरथी यस्य नागदेवात्मजस्सुधीः ।
तेनानन्तेन रचितेयमौपासनपद्धतिः ॥
रमालालितपादाब्जयुगलस्य कलाधिपः ।
अवदं प्रेरितो येन प्रीयतां स रमापतिः ॥
अनेन ग्रन्थदीपेन स्वसन्देहात्मकं तमः ।
निरस्य कर्म कुर्वन्तु निर्भराः ज्ञानसंसदि ॥
सन्ति ग्रन्थसहस्राणि देशेदेशे विशेषतः ।
कोऽप्यस्य महिमा वेद्योऽभिज्ञैर्यजति सर्वतः ॥

**Colophon:**

इति श्रीमन्महामहिमपदवाक्यप्रमाणज्ञश्रौतस्मार्तपारङ्गतेन श्रीमद्राजसनेयिकुलाब्धिचन्द्रेण श्रीमदनन्तभट्टेन विरचिते कण्वकण्ठाभरणे औपासनपद्धतिस्समाप्तः ॥

Contains the following topics :—

१. नवान्नप्राशनविधिः.
२. पक्षहोमविधिः.
३. पक्षहोमप्रकारः.
४. पुनराधाननिमित्तानि.
५. प्रवासविधिः.
६. अपत्नीकौपासनविधिः.
७. कुशपत्नीविधानम्.
८. विधुरौपासनम्.
९. वैश्वदेवविधिः.

---

## R. No. 2417.

Paper. 10¼ × 9¼ inches. Foll. 146. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Kṛṣṇacakravartyācarya of Ketāndipatti, North Arcot district.

पाण्डवपुराणम्.

PĀṆḌAVAPURĀṆAM.

Foll. 1a—145b. Fol. 146a contains a Nāmāvali of Jina. Fol. 146b contains the name of the owner of the MS. from which this was copied.

Complete.

Same work as that described under R. No. 1388 ante. By Vādicandra, younger brother of Prabhācandra.

R. No. 2418.

Paper. 10⅝ × 9¼ inches. Foll. 198. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Śikha Pullayagāru of Visvesvara Agraharam (Pērūru), Godavari district.

भाट्टदिनकरः.

BHĀṬṬADINAKARAḤ.

A commentary on the Mīmāṁsāsūtras of Jaimini: by Dinakara, son of Rāmakṛṣṇa, grandson of Nārāyaṇa and great grandson of Rāmēśvara.

Contains from the second Pāda of the first Adhyāya to the end of the fourth Pāda of the third Adhyāya.

**Beginning:**

"आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानान्तस्मादनित्यमुच्यते" अथातो धर्मजिज्ञासेति सूत्रे को धर्मः, कथंलक्षणः, कान्यस्य साधनानि, कानि साधनाभासानि किम्परश्चेति भाष्ये चकारप्रश्लेषेण चतुर्विधं धर्माधर्मनिरूपणं प्रतिज्ञातम् ।

यत्तु—

धर्मो द्वादशलक्षण्या जिज्ञास्यस्तत्र लक्षणैः ।
प्रमाणशेषभेदत्वप्रयुक्तिक्रमसंज्ञकाः ॥
अधिकारोऽतिदेशश्च सामान्येन विशेषतः ।
ऊहो बाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात् ॥

इति द्वादशविधं धर्मनिरूपणमाचार्यैरुक्तम् । तद्भाष्योक्तचतुर्विधनिरूपणान्तर्गतमेव । तत्र प्रथमेऽध्याये धर्मप्रामाण्यं निरूप्यत इति मिश्राः । वेदप्रामाण्यमिति सोमेश्वरः । विधिप्रामाण्यमिति प्राभाकरः । तत्रोत्तरमते न युक्ते, स्मृत्याचारयोर्वैदिकविधित्वाभावेन तत्प्रामाण्यसाधनासङ्गतिप्रसक्तेः । तत्रार्थभावनातदंशत्रयशब्दभावनाप्रतिपादकस्य विधिवाक्यरूपस्य वेदावयवस्याद्यपादेन प्रामाण्ये साधिते वेदावयवत्वेनोपस्थितानामर्थवादमन्त्रनामधेयानामिह प्रामाण्य . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

. . . . . . . . . . . . . . . . . . . . . . . . . . .

यान्तरङ्गत्वाच्चार्थवादेषु पूर्वं चिन्ता क्रियते ।

* * * *

**Colophon:**

इति श्रीभाट्टदिनकरे प्रथमाध्यायस्य प्रथम (द्वितीय)पादे अर्थवादाधिकरणं समाप्तम् ।

**End:**

उभयोः हविःशेषप्रयोजकत्वे गौरवात् । नच परिक्रयोऽपि वचनाद्भविष्यतीति वाच्यम् । व्यादेशानां प्रतिपत्त्यर्थत्वेनाप्युपपत्तेः दानत्वनिर्णयात् । अतो हविश्शेषस्य भक्षणयोग्यत्वलिङ्गात् भक्षार्थत्वम् ।

रामेश्वरप्रपौत्रो नारायणशर्मणः पु(पौ)त्रः ।
श्रीरामकृष्णसूनुर्दिनकरशर्माऽकरोदमुं ग्रन्थम् ॥

इति पुरोडाशविभागस्य भक्षार्थताधिकरणम् ।

**Colophon:**

इत्युमारामकृष्णसुतदिनकरकृते तृतीयस्याध्यायस्य चतुर्थः पादः ॥

---

## R. No. 2419.

Paper. 10⅜ × 9½ inches. Foll. 212. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Sikkha Pullayagāru of Visvesvara Agraharam (Pērūru), Godavari district.

### अर्जुनाभ्युदयव्याख्या— गूढार्थदीपिका.

### ARJUNĀBHYUDAYAVYĀKHYĀ: GŪḌHĀRTHADĪPIKĀ.

Foll. 1a—211a. Foll. 211b—212 are left blank.

A commentary on the Arjunābhyudaya which is a poem in 20 Sargas dealing with the leading incidents in the life of Arjuna. By Kāvyakṛt. The commentary is called Gūḍhārthadīpikā.

Contains from the eighth Sarga of which the first two stanzas are wanting, to the end of the 20th Sarga complete.

**Beginning:**

अस्यार्जुनस्य जलनिधौ धराणां पर्वतानां पक्षाणां क्षितेः छेदकस्य कृतिः व्यापारः, "क्षितिः स्याच्छेदने महाम्" इति यादवः । किपन्ती अकिंचित्करेत्यर्थः । अहह इति इन्द्रेण । अत्रेतः मत्सन्निधेरित्यर्थः । विनयो विनियुक्तः समर्थस्यैव कार्ये नियोगादिति भावः । इत्थं वितर्केण ऊहयैव, निबिडतराणां वालीवनानां वृतिरावरणं यस्य तम् । निष्पन्नस्यावरणाभ्रतक्केरिति भावः ।

• • • •

**Colophon:**

इति श्रीगूढार्थदीपिकाख्याने व्याख्याने काव्यकुत्कृते ।
अर्जुनाभ्युदयस्यासीदष्टमस्सर्ग (उन्नतः) ॥

**End:**

पार्थः अर्जुनः पुत्रैः पौत्रैः प्रपौत्रैश्च युक्तस्सन् निजविजयकथां काव्यरूपेण कृतवद्भ्यः कविभ्यः पाठकेभ्यः कविकृतविजयकथाकाव्यपाठकेभ्यश्च राज्यं यथोचितं ग्रामान् वित्तं धनं शुभानि आन्दोलिकाश्च गजादिशुभद्रव्याणि च प्रतिदिशि कल्पयन् दिशन् सुचिरं स्वस्थं यथा तथा अस्थात् अतिष्ठत् । श्री-मध्येति विंशस्सर्गो विरतिमाप ॥

**Colophon:**

गूढार्थदीपिकाख्याने व्याख्याने काव्यकुत्कृते ।
अर्जुनाभ्युदयस्यासीत्सर्गो विंशो महोज्ज्वलः ॥

---

R. No. 2420.

Paper. 11 × 9½ inches. Foll. 108. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Vēmūri Rāmagōvinda Śāstrigāru of Narasapur, Kistna district.

**चतुर्दशलक्षणीविवेचनी.**

CATURDAŚALAKṢAṆĪVIVĒCANĪ.

A discussion based on the Caturdaśalakṣaṇī of Jagadīśa by Baladēvabhaṭṭācārya described under No. 4090 of the D.C.S. MSS., Vol. VIII.

Breaks off in the Pragalbhālakṣaṇa.

**Beginning:**

ननु समवायितया मूलोक्तसाध्याभावस्यैव प्रमेयवान् वाच्यत्वादित्यादौ लक्षणघटकतया अभावाप्रसिद्ध्यभावेन तत्कथनमसङ्गतमिति चेन्न ।

* * * *

**Colophon:**

इति श्रीयुततर्कालङ्कारवागीशजगदीशभट्टाचार्यकृतव्यधिकरणधर्मावच्छिन्नाभावोपरि श्रीमद्बलदेवभट्टाचार्यविरचिता विवेचनी प्रथमलक्षणम् ।

* * * *

**Colophon:**

इति श्रीतर्कालङ्कारबलदेवभट्टाचार्यविरचितजगदीशचतुर्दशलक्षणोपरि विवेचनायां चक्रवर्तिलक्षणविवेचना समाप्ता ।

**End:**

साध्यसामान्याभावस्य सम्बन्धसामान्येन हेत्वधिकरणावृत्तितयाव्याप्ति-विरहात् । कालः कालपरिमाणादित्यादौ अप्रसिद्धसाध्यक-

---

R. No. 2421.

Paper. 10¾ × 9½ inches. Foll. 42. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Ampalakot Karuṇākara Menon, B.A., B.L., of Chalapuram, Calicut.

दशरूपकव्याख्यालघुटीका.

DAŚARŪPAKAVYĀKHYĀLAGHUṬĪKĀ.

A short commentary on Dhanika's commentary on **Daśarūpaka** which is described under No. 12883 of the D.C.S. MSS., Vol. **XXII**: by **Bhaṭṭanṛsiṁha.**

Complete.

**Beginning:**

क्वचन घटिते भ्राम्ये मुण्डे सगद्गदवेणिका
क्वचन भुजगश्वासैरुष्णैरनुक्षणनर्तिता ।
क्वचन रुचितं(रं)रेखाचन्द्रं रयेण विधून्वती
स्मरहरशिरोगङ्गा मङ्गल्यमावहतु स्थिरम् ॥
दशरूपस्य या व्याख्या धनिकेन समीरिता ।
तस्या भट्टनृसिंहेन लघुटीका विधीयते ॥

अविघ्नेन परिसमाप्तिनमस्कारयोः फलफलीभावे सदाचारमेव प्रमाणी-कुर्वन् त्रयाणामपि गणेशविष्णुभरतानां नमस्कारप्रतिपादकतयैकार्थं श्लोकद्वयं युगपदेवोपादाय पठति—सदाचारमित्यादिना । सन्तो दम्भादिरहितानुष्ठा-यिनः तेषामाचारः सदाचारः सोऽत्र प्रमाणं स्थापितो ह्यसौ प्रमाणत्वेन सदाचाराङ्क(च)रणे अपि वा कारणाग्रहेण प्रयुक्तानि प्रतीयेरन्निति ? । अविघ्नेन परिसमाप्त्यर्थमिष्टदेवता गणेशः ।

* * *

सरस्वतीदयया तं किमपि प्रकरणादिरूपं निर्माणविषयं योजयति—येनान्योऽपि जनो व्यावृत्तदशरूपज्ञानात्मिकां वैदग्धीं भजत इति ।

**End:**

भूषणाक्षरसङ्घातश्शोभोदाहरणे तथा इत्यादिकीर्तितानि षट्त्रिंशद्भूष-

णानि एकविंशतिः सामप्रभृतीनि सन्ध्यन्तराण्येकविंशतिरुपमादयोऽलङ्काराश्च तेषु तेषु हर्षहासादिष्वन्तर्भूतत्वात् ।

* * * *

विष्णोस्सुतेनापीति । न केवलं विष्णुना तत्सुतेनापि धनञ्जयनाम्ना दशरूपमाविष्कृतमित्यर्थः ॥

**Colophon:**

इति भट्टनरसिंहकृतायां दशरूपव्याख्या(लघुटीका)यां चतुर्थः परिच्छेदः ॥

---

R. No. 2422.

Paper. 10⅜ × 9¼ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Ampalakot Karuṇākara Menon of Chalapuram, Calicut.

काव्योल्लासः.

KĀVYOLLĀSAḤ.

Foll. 1a—33a. Fol. 33b contains the name of the ower of the MS. from which this was copied. Fol. 34 is left blank.

A treatise on poetics: by Nīlakaṇṭha.

Wants the beginning and the end.

**Beginning:**

हरिण्याः कथं स्यादिति । इति मध्यमवैशिकः ।

निर्लज्जोऽपि च कर्कशः स्मरकलाकेलीषु मूर्खः पुमान्
कृत्याकृत्यविवेकधीरतिविरक्तायां प्रसक्तो दृढम् ।
मित्रैः स्वैरपि वारितोऽपि नितरां पारुष्यमेतीर्ष्यया
व्याकुष्टो वनिताजनैरपि सदा यस्सोऽधमो वैशिकः ॥

यथा वा—

कितव त्वमसीति तर्जनं मे वचसा ताडनमुत्पलादिना वा ।
स्खलितस्य विधेयमुत्तमाङ्गे यदि वा वामपदाम्बुजप्रहारः ॥

यथा वा—

दासजनसमुचितस्तु प्रभोरवज्ञा यथैव निर्देशः ।
तद्वत् प्रभुजनयोग्यः स(हि)भवति ममाद्य दासस्य ॥

* * * *

**Colophon:**

इति नीलकण्ठविरचिते काव्योल्लासे कारणात्मकविभावनायकादिस्वरूप-
प्रकरणं नाम उन्मेषः ।

**End:**

रोमोद्गमः सुखशुगादिभिरुद्गतो यो
रोमाञ्च इत्यभिहितः पुलकस्स एव ।
हर्षप्रकर्षभयरागसुखाभिभूत-
गात्रप्रकम्प इहाजानपदं जनोद्गठम् ? ॥
दौर्बल्यं श्रुतवतः सभान्तरे रोमहर्षणमभूत्पिनाकिनः ? ।

वेपथुः यथा—

मा गर्वमुद्वह कपोलतले चकास्ति का . . . . . ।
. . . . . . . . . . . . . . ॥

**Colophon:**

काव्योल्लासः ॥

---

## R. No. 2423.

Paper. 10¾ × 8¾ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Ampalakat Karuṇākara Menon of Chalapuram, Calicut.

साङ्ख्यसप्ततिटीका—जयमङ्गला.

**SĀṄKHYASAPTATIṬĪKĀ : JAYAMAṄGALĀ.**

Foll. 1a—26a. Fol. 26b is left blank.

A commentary named Jayamaṅgalā on the Sāṅkhyasaptati of Īśvarakṛṣṇa which is a treatise in 70 stanzas dealing with the Sāṅkhya system of philosophy : by Śaṅkarācārya, disciple of Gōvinda.

Complete.

**Beginning:**

अधिगततत्त्वालोकं लोकोत्तरवादिनं प्रणम्य गुरुम् ।
क्रियते सप्ततिकायाष्टीका जयमङ्गला नाम ॥

"प्रेक्षावन्तोऽनुक्ते प्रयोजने न प्रवर्तन्त" इति प्रयोजनमुच्यते । तत्त्व-
ज्ञानान्मोक्षः । तत्त्वानि पञ्चविंशतिः । तथोक्तम्—

पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे रतः ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥ इति ।

तेषु च षष्टितन्त्रादिख्यातेष्विति विस्तरत्वात् षष्टितन्त्रस्य संक्षिप्तरुचिसत्त्वानुग्रहार्थं सप्ततिकारम्भः । वक्ष्यति च एतदार्याभिस्संक्षिप्तमिति । मोक्षेण किं फलमिति चेद्दुःखनिवृत्तिः । अतत्त्वज्ञो दुःखैरभिहन्यमानस्संसरन्नास्ते । तत्त्वज्ञानात्तु कैवल्यमाप्नोति । न दुःखैरभिहन्यते । हन्यमानेन को हेतुर्जिज्ञासितव्य इत्यत्राह—दुःखत्रयाभिघाताज्जिज्ञासेत्यादि । दुःखानां त्रयं दुःखत्रयम् आध्यात्मिकमाधिभौतिकमाधिदैविकं चेति । आत्मन्यध्यात्मम् ।

**End :**

सप्तत्यामित्यादि । एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्धाख्य इत्यादिना ग्रन्थेन ये उक्ताः ते कृत्स्नस्य षष्टितन्त्रस्यापि । किन्तु आख्यायिता(का)विरहिताः परवादविवर्जिताः शुद्धा इति । आख्यायिका आख्यानम् । तद्विरहिताः परचोद्यन्तेन विवर्जिताः शुद्धाः केवलाः परं बन्धमोक्षोपयोगिनोऽर्था दर्शिताः इति तस्मात् संपूर्णेयं सप्ततिरिति ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यपादशिष्येण श्रीशङ्करभगवता कृता साङ्ख्यसप्ततिटीका समाप्ता ।

---

R. No. **2424.**

Paper. 10¾ × 8¾ inches. Foll. 48. Lines, 20 in a page. Kanarese. Good.

Transcribed in 1917-18 from the MS. of M.R.Ry. Bommarasa Pandit, Mysore.

बृहद्धरिवंशः.

BRHADDHARIVAMŚAH.

A Jaina Purāṇa, containing the myths, traditions, stories, etc., connected with that religion. The topics dealt with herein are summarized in the first Sarga and given below in the extracts. This is apparently a summary, by Jinasēnārarya, of the Ariṣṭanēminātha-purāṇa.

Breaks off in the fifth Sarga. The subject-headings of the first four chapters are—

१. संग्रहविभागवर्णनम्.
२. धर्मतीर्थप्रवर्तनम्.
३. श्रेणिकप्रश्नवर्णनम्.
४. अपोलोकसंस्थानवर्णनम्.

**Beginning:**

सिद्धं द्रव्यव्ययोत्पादलक्षणं द्रव्यसाधनम् ।
जैनेन्द्रवाद्यपेक्षातः साधनाद्यश्च शासनम् ॥
शुद्धज्ञानप्रकाशाय लोकालोकैकभानवे ।
नमः श्रीवर्धमानाय वर्द्धमानजिनेशिने ॥
नमस्सर्वविदे सर्वव्यवस्थानां विधायिने ।
कृत्वादितीर्थतीर्थाय वृषभाय स्वयम्भुवे ॥
येन तीर्थमभिव्यक्तं द्वितीयमजितायितम् ।
अजिताय नमस्तस्मै जिनेशाय जितद्विषे ॥
शम्भवे वा विमुक्तौ वा मुक्तौ यत्रैव शम्भवे ।
भेजुर्भव्या नमस्तस्मै तृतीयाय च शम्भवे ॥
तीर्थं चतुर्थमर्घ्यार्थं यश्चकाराभिनन्दनः ।
लोकाभिनन्दनस्तस्मै जिनेन्द्राय नमस्त्रिधा ॥
पञ्चमं सप्रपञ्चार्थं तीर्थं वर्तयति स्म यः ।
नमस्सुमतये तस्मै नमस्सुमतये सदा ॥
ककुभोऽभासयद्यस्य जिनपद्मप्रभा प्रभा ।
पद्मप्रभाय षष्ठाय तस्मै तीर्थकृते नमः ॥
यस्तीर्थं स्वार्थसम्पन्नः परार्थमुपपादयत् ।
सप्तमं तु नमस्तस्मै सुपार्श्वाय कृतात्मने ॥
अष्टमं सेन्द्रजुष्टस्य कर्त्रे तीर्थस्य दायिने ।
चन्द्रप्रभजिनेन्द्राय नमश्चन्द्राभकीर्तये ॥
देहदन्तप्रभाक्रान्तकुन्दपुष्पत्विषे नमः ।
पुष्पदन्ताय तीर्थस्य नवमस्य विधायिने ॥
शुचिशीतलतीर्थस्य जन्तुसन्तापनोदिनः ।
दशमस्य नमः कर्त्रे शीतलायापदाशिने ॥
तीर्थं व्युच्छिन्नमुद्भाव्य भव्यानामाजवं जवम् ।
चिच्छेदैकादशो योऽर्हस्तस्मै श्रीश्रेयसे नमः ॥
कुतीर्थध्वान्तमुद्धूय द्वादशं तीर्थमुज्ज्वलम् ।
नमस्कृतवते भर्त्रे वासुपूज्यविवस्वते ॥

विमलाय नमस्तस्मै यः कापथमलाविलम् ।
त्रयोदशेन तीर्थेन चकार विमलं जगत् ॥
तस्मै नमः कुसिद्धान्ततमोभेदनभास्वतः ।
चतुर्दशस्य तीर्थस्य यः कर्तानन्तजिज्जिनः ॥
अधर्मपथपातालपतदुद्धरणे क्षमम् ।
कर्त्रे पञ्चदशं तीर्थं धर्माय मुनये नमः ॥
प्रष्टषोडशतीर्थाय कृतनानेतिशान्तये ।
चक्रेशाय जिनेशाय नमः शान्ताय शान्तये ॥
येन सप्तदशं तीर्थं प्रावर्ति पृथुकीर्तिना ।
तस्मै कुन्दुजिनेन्द्राय नमः प्राक्चक्रवर्तिने ॥
नमोऽष्टादशतीर्थेन प्राणिनामिष्टकारिणे ।
चक्रपाणिजिनारायनिरस्तदुरितारये ॥
तीर्थेनैकोनविंशेन स्थापितस्थिरकीर्तये ।
नमो मोहमहामल्लमाथिमल्लाय मल्लये ॥
स्वं विंशतितमं तीर्थं कृतीशो मुनिसुव्रतः ।
अकारयद्भुवालोकं यस्तस्मै सततं नमः ॥
नमये मुनिमुख्याय नमितान्तर्बहिर्द्विषे ।
एकविंशस्य तीर्थस्य कृताभिव्यक्तये नमः ॥
भास्वते हरिवंशाद्रिश्रीशिखामणये नमः ।
द्वाविंशत्तीर्थसच्चक्रनेमयेऽरिष्टनेमये ॥
धर्ता धरणिनिर्धूतपर्वतोद्धरणासुरः ।
त्रयोविंशस्य तीर्थस्य पार्श्वो विजयतां विभुः ॥
इत्यस्यामवसर्पिण्यां ये तृतीयचतुर्थयोः ।
कालयोः कृततीर्थास्ते जिना नस्सन्तु सिद्धये ॥
येऽतीतापेक्षयानन्ताः सङ्ख्येया वर्तमानतः ।
अनन्तानन्तमानास्तु भाविकालव्यपेक्षया ॥
तेऽर्हन्तस्सन्तु नस्सिद्धाः सूर्युपाध्यायसाधवः ।
मङ्गलं गुरवः पञ्च सर्वे सर्वत्र सर्वदा ॥

जीवसिद्धिविधायीह कृतयुक्त्यनुशासनम् ।
वचस्समन्तभद्रस्य वीरस्येव विजृम्भते ॥
जगत्प्रसिद्धबोधस्य वृषभस्येव निस्तुषाः ।
बोधयन्ति सतां बुद्धिं सिद्धसेनस्य सूक्तयः ॥

* * * *

इत्थं साधुसहायोऽहमनातङ्कमनुद्धतम् ।
देहं काव्यमयं लोके करोमि स्थिरमात्मनः ॥
बद्धमूलं भुवि ख्यातं बहुशाखाविभूषितम् ।
पृथुपुण्यफलं पूतं कल्पवृक्षसमं परम् ॥
अरिष्टनेमिनाथस्य चरितेनोज्ज्वलीकृतम् ।
पुराणं हरिवंशाख्यं ख्यापयामि मनोहरम् ॥

* * * *

पञ्चधा प्रविभक्तार्थं क्षेत्रादिप्रविभागतः ।
प्रमाणमागमाख्यं तत्प्रमाणपुरुषोऽधिकम् ॥
तथाहि मूलमन्त्रस्य कर्ता तीर्थकरस्स्वयम् ।
ततोऽप्युत्तरतन्त्रस्य गौतमाख्यो गणाग्रणीः ।
उत्तरोत्तरतन्त्रस्य कर्तारो बहवः क्रमात् ॥

* * * *

लोकसंस्थानमत्रादौ राज्यवंशोद्भवस्ततः ।
हरिवंशावतारोऽतो वसुदेवविचेष्टितम् ॥
चरितं नेमिनाथस्य द्वारवत्या निवेशनम् ।
युद्धवर्णननिर्वाणो पुराणाष्टौ शुभा इमे ।
सङ्ग्रहादधिकारैस्स्वैः स्वगृहीतैरलङ्कृताः ।
अधिकाराः सूत्रिताः प्राक् सूरिसूत्रानुसारिभिः ॥
सङ्ग्रहेण विभागेन विस्तरेण च वस्तुनः ।
शासने देशना यस्माद्विभागः कथ्यते ततः ॥
वर्धमानजिनेन्द्रस्य धर्मतीर्थप्रवर्तनम् ।
गणभृद्गणसङ्ख्यानं भूयो राजगृहागमम् ॥
गौतमश्रेणिकप्रश्नं क्षेत्रकालनिरूपणम् ।
ततः कुलकरोत्पत्तिमुत्पत्तिर्वृषभस्य च ॥
कीर्तनं क्षत्रियादीनां हरिवंशप्रवर्तनम् ।
मुनिसुव्रतनाथस्य तत्र वंशे समुद्भवम् ॥

दक्षप्रजापतेः पूर्वं वसुवृत्तान्तमेव च ।
जननं वृष्णिपुत्राणां सुप्रतिष्ठस्य केवलम् ॥
वृष्णिदीक्षान्तथा राज्यं समुद्रविजयस्य तु ।
वसुदेवस्य सौभाग्यमुपायेन च निर्गमम् ॥
लाभं कन्यकयोस्तस्य सोमाविजयसेनयोः ।
वन्यहस्तिवशीकारं श्यामया सह सङ्गमम् ।
अङ्गारकेण हरणं चम्पायां च विमोचनम् ।
लाभं गन्धर्वसेनाया मुनेर्विष्णोर्विचेष्टितम् ॥
चरितं चारुदत्तस्य तस्यैव मुनिदर्शनम् ।
चारुनीलयशोलाभं सोमश्रीलाभमेव च ॥
वेदोत्पत्तिमुपाख्यानं सौदासस्य नृपस्य तु ।
कपिलाकन्यकालाभं पद्मावत्युपलम्भनम् ॥
सम्प्राप्तिं चारुहासिन्या रत्नावत्यास्ततोऽपि च ।
सोमदत्तसुतालाभं वेगवत्याश्च सङ्गमम् ॥
लाभं मदनवेगाया बालचन्द्रावलोकनम् ।
प्रियङ्गुसुन्दरीलाभं बन्धुमत्या समन्वितम् ॥
प्रभावत्याः परिप्राप्तिं रोहिण्याश्च स्वयंवरम् ।
सङ्गामे विजयं तस्य भ्रातृभिस्सह सङ्गमम् ॥
बलदेवसमुत्पत्तिं कंसोपाख्यानमेव च ।
जरासन्धस्य वचनात् सिंहस्यन्दनबन्धनम् ॥
यथा जीवद्यशोलाभं कंसस्य पितृबन्धनम् ।
देवक्या सह संयोगं ततोऽप्यानकदुन्दुभेः ॥
सत्यातिमुक्तकादेशं कंससंक्षोभकारणम् ।
प्रार्थनं वसुदेवस्य देवकीप्रसवं प्रति ॥
आनकेन मुनेः प्रश्नमष्टपुत्रभवान्तरम् ।
चरितं नेमिनाथस्य पापप्रमथनं कथा ॥
उत्पत्तिं वासुदेवस्य गोकुले बालचेष्टितम् ।
ग्रहणं सर्वशास्त्राणां बलदेवोपदेशतः ॥
चापरत्नसमारोपं कालिन्द्यां नागनाशनम् ।
वाजिवारणचाणूरमल्लकंसवधं ततः ॥

उग्रसेनस्य राज्यं च सत्यभामाकरग्रहम् ।
सर्वज्ञातिसमेतस्य प्रीतिं च परमां हरिः ॥
जीवद्यशोविलापं च जरासन्धरुषं ततः ।
प्रेषितस्य रणे कालयवनस्य पराभवम् ॥
तथापराजकस्यापि मारणं हरिणा रणे ।
सौरिणां परमं तोषमकुतोभयतः स्थितिः ॥
शिवदेव्यास्सुतोत्पत्तौ षोडशस्वप्नदर्शनम् ।
फलानां कथनं पत्या नेमिनाथसमुद्भवम् ॥
मेरौ जन्माभिषेकं च बालक्रीडां महोदयम् ।
जरासन्धातिसन्धानं शौरिसागरसंश्रयम् ॥
देवताकृतमायातो जरासन्धनिवर्तनम् ।
विष्णोस्साष्टमरक्तस्य दर्भशय्याधिरोहणम् ॥
गौतमेनेन्द्रवचनात्सागरस्यापसारणम् ।
कुबेरेण क्षणात्तत्र द्वारवत्या निवेशनम् ॥
रुक्मिणीहरणं भास्वद्भानुप्रद्युम्नसम्भवम् ।
रौक्मिणेयहृतिं पूर्ववैरिणो धूमकेतुना ॥
विजयार्धे स्थितिं पित्रोर्नारदेनेष्टसूचनम् ।
प्राप्तिं षोडशलाभानां प्रज्ञप्तेरुपलम्भनम् ॥
कालशम्बरसङ्ग्रामं पितृमातृसमागमम् ।
साम्बोत्पत्तिं शिशुक्रीडां प्रश्नं चापि पितुः पितुः ॥
तेन हंसं च व्याख्यानं कुमाराणां च कीर्तनम् ।
वार्तोपलम्भाद्दूतस्य प्रेषणं प्रति शत्रुणा ॥
यादवानां सभाक्षोभं सेनयोरुपसर्पणम् ।
विजयार्धे खगक्षोभे वसुदेवपराक्रमम् ॥
अक्षौहिणीप्रमाणं च रथिनोऽतिरथांस्तथा ।
महासमरथान् सर्वान् नृपानर्धरथानपि ॥
चक्रव्यूहव्यमोहार्थं गरुडव्यूहकल्पनम् ।
सिंहगारुडविद्यास्त्राद्यवाप्तिं बलकृष्णयोः ॥
नेमेस्सारथिरूपेण मातलेरुपसर्पणम् ।
नेमिना वृष्णिसार्थैश्च चक्रव्यूहस्य भेदनम् ॥

कदनं पाण्डुपुत्राणां धृतराष्ट्रसुतैस्सह ।
सेनापत्योर्महायुद्धं कृष्णमागधयोरतः ॥
चक्रोत्पत्तिं तदा विष्णोर्जरासन्धवधं ततः ।
विजयं वसुदेवस्य खेचरीभिर्निवेदितम् ॥
कृष्णकोटिशिलोत्क्षेपं वसुदेवागमं ततः ।
ततो दिग्विजयं दिव्यरत्नानां च समुद्भवम् ॥
भ्रात्रो राज्याभिषेकं च द्रौपदीहरणं सह ।
पाण्डवैर्घातकी षण्डाद्विष्णुनानयनं पुनः ॥
नेमिसामर्थ्यविज्ञानमज्जनं तदनन्तरम् ।
मारणं पाञ्चजन्यस्य विवाहारम्भसम्भ्रमम् ॥
मृगमोक्षविधानं च दीक्षणं केवलोदयम् ।
देवागमविभूतिं च समवस्थानवर्तनम् ॥
राजीमत्यास्तपःप्राप्तिं सम्यग्धर्मोपदेशनम् ।
धर्मतीर्थविहारं च षट्सहोदरसंयमम् ॥
ऊर्जयन्तनगारोहं देवकीप्रश्नसंकथाम् ।
रुक्मिणीसत्यभामादिमहादेवीभवान्तरम् ॥
कुमारस्य गजाख्यस्य संभवं तस्य दीक्षणम् ।
वसुदेवतपोद्दिम्नवभ्रातृतपस्यनम् ॥
त्रिषष्टिपुरुषोद्भूतं सजीवान्तरविस्तरम् ।
बलदेवपरिप्रश्नं ततः प्रद्युम्नदीक्षणम् ॥
रुक्मिण्यादिहरिस्त्रीणां दुहितॄणां च संयमम् ।
द्वैपायनमुनिक्रोधाद् द्वारावत्या विनाशनम् ॥
रामकेशवयोः कुटुम्बन्धुपुत्रकलत्रयोः ।
निर्गमं दुर्गमं देशं तत्री शाम्बनसेवनम् ॥
सीरिणा क्षणमुक्तस्य प्रमादाद्दैवयोगतः ।
जरत्कुमारमुक्तेन शरेण हननं हरेः ॥
ततो . . कशोकं च शोकं रामस्य दुस्तरम् ।
सिद्धार्थबोधितस्यास्य निर्विण्णस्य तपस्यनम् ॥
ब्रह्मलोकोपपादं च कौन्तेयानां तपोवनम् ।
ऊर्जयन्तगिरावन्ते नेमिनाथस्य निर्वृतिम् ॥

उपसर्गं जयं पञ्चपाण्डवानां महात्मनाम् ।
दीक्षां जरत्कुमारस्य सन्तानं तस्य चायतम् ॥

हरिवंशप्रदीपस्य जितशत्रोश्च केवलम् ।
पुरप्रवेशमन्ते च शृणु तस्य प्रयुश्रियः ॥

वर्धमानजिनेशस्य निर्वाणं गणिनां कथा ।
देवलोककृतं दत्तैः प्रदीपमहिमोदयम् ॥

हरिवंशपुराणस्य त्रिभागोऽयं ससङ्ग्रहम् ।
श्रूयतां विस्तरस्सिद्ध्यै भव्यैस्सद्भिरतः परम् ॥

एकस्यापि महानरस्य चरितं पापस्य विध्वंसनं
सर्वेषां जिनचक्रवर्तिहविनामेतत् बुधाः किं पुनः ।
वार्येतस्य महाघनस्य महतस्तापस्य विच्छेदकं
लोकव्यापिघनाघनौघनिपतद्धारासहस्रं न किम् ॥

मुक्त्वा लोकपुराणतिर्यगपथभ्रान्तिं विवेकी जनो
गृह्णातु प्रगुणं पुराणपदवीमेनाहितप्रावणीम् ।
दिग्मूढं विरहप्रमोहबहुलः संशुद्धदृष्टिः परो
विस्तीर्णे जिनभास्करप्रकटिते मार्गे भ्रमी कः पतेत् ॥

Colophon :

इत्यरिष्टनेमिनाथपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ सङ्ग्रहविभागवर्णनो नाम प्रथमस्सर्गः ॥

इति प्रथमः परिच्छेदः ।

अथ देशोऽस्ति विस्तारी जम्बूद्वीपस्य भारते ।
विदेह इति विख्यातः स्वर्गखण्डसमश्रियः ॥

* * * *

तत्राखण्डलनेत्रालिपद्मिनीषण्डमण्डनम् ।
सुखाम्भःकुण्डमाभाति नाम्ना कुण्डपुरं पुरम् ॥

* * * *

सर्वार्थश्रीमतीजन्मा तस्मिन् सर्वार्थदर्शनः ।
सिद्धार्थोऽभवदर्काभो भूपस्सिद्धार्थपौरुषः ॥

**End :**

**Colophon :**

इत्यरिष्टनेमिनाथपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ अधोलोकसंस्थानवर्णनो नाम चतुर्थस्सर्गः ।

तनुवान्तान्तपर्यन्तस्तिर्यग्लोके व्यवस्थितः ।
कल्पिताबधिरुध्वा(र्ध्वा)धो मेरुर्योजनलक्षया ॥
तत्रैतस्मिन्नसङ्ख्येयसागरद्वीपवेष्टितः ।
जम्बूद्वीपः स्थितो वृत्तो जम्बूपादपलक्षितः ॥

* * * *

पञ्चाशच्च सहस्राणां योजनानि पुरिष्यते ।
महतो धनुषस्तस्य महतो युज्यते हि सा ॥
द्वे सहस्रे शतैर्युक्ते नवभिश्चैकविंशतिः ।
साधिताष्टादशांशाश्च विदेहार्धस्य चूलिताः ॥
त्र्यशीतिश्च शतान्यष्टौ सहस्राणीह षोडश ।
त्रयोदशांशतः पादः साधितश्च धुनद्वयम् ॥

---

## R. No. 2425.

Paper. 10⅝ × 9½ inches. Foll. 64. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Ampalakat Karuṇākara Menon, B.A., B.L., of Chalapuram, Calicut.

Foll. 63b and 64 are left blank.

### किरातार्जुनीयटीका.
### KIRĀTĀRJUNĪYAṬĪKĀ.

A commentary on Bhāravi's Kirātārjunīya which is described under No. 11464 of the D.C.S. MSS., Vol. XX : by Maṅgalakavi.

Breaks off in the sixth Sarga.

**Beginning :**

श्रियः कुरूणामित्यादि । स वनेचरो युधिष्ठिरं द्वैतवने समाययौ कृतकार्यं इति सम्यक् प्राप्तवान । युधिष्ठिरमयुद्धेन न साध्यमसत्साध्यं प्रायशो भविष्यतीति चिन्तयत इत्यन्वर्थनामधेयम् । द्वैतवने काम्यकवनस्थेनैव नियुक्तः । कुरूणामधिपस्य सुयोधनस्य ।

**End :**

न ह्यत्र लक्ष्मीप्रातिपदिके तदनन्तविधिरस्तीत्यर्थः ॥

**Colophon:**

इति मङ्गलविरचितायां किरातार्जुनीयटीकायां पञ्चमः सर्गः ॥

रुचिराकृतिरित्यादि । अथोशब्द आनन्तर्ये । समासादनादनन्तरम् । स पुरुहूतसुतः इन्द्रसूनुः ।

* * * *

पवनेरिताकुलविजिह्मशिखाः पवनेरिताकुला विजिह्मशिखा येषां ते तथोक्ताः ।

---

## R. No. 2426.

Paper. $10\frac{1}{4} \times 9\frac{3}{8}$ inches. Foll. 16. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Umāmahēśvara Śāstrulugāru of Pithapuram, Godavari district.

Fol. 16*b* gives the contents of this work.

### आपस्तम्बश्रौतसूत्रव्याख्या.
### ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

A commentary on the Āpastambaśrautasūtra which is described under No. 1042 of the D.C.S. MSS., Vol. II: by Āpadēva or Anantadēva who states that he wrote the Cāturmāsyapaddhati.

Contains the fifth Praśna (Ādhānaprakaraṇa portion) in which the following topics are dealt with :—

१. आधानम्.
२. आधानकालः.
३. विहारः.
४. प्रयोगः.
५ चमसहोमः.
६. अन्वारम्भणीयकालः.
७. विच्छिन्नाधानम्.

**Beginning:**

अथाधानम्—जातपुत्रः कृष्णकेशावस्थः सभार्यः पितुर्ज्येष्ठः सर्वाकृताधानः सत्त्वप्रयुक्ताधिकारप्रतिबन्धरहितोऽपि कश्चित्कालमनाहिताग्निश्चेत् उक्तकृच्छ्राद्यनुष्ठानपूर्वककूश्माण्डहोमैरात्मानं पावयेत् । यस्तु पित्रादिपाकोपजीवी विद्याध्ययननिष्ठश्च, तस्य कश्चित्कालं तस्याधिकारेण आहिताग्नेरपि न कृच्छ्राद्यपेक्षा ।

पितृपाकोपजीवी वा भ्रातृपाकोपजीवकः ।
ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना विना ॥ इति गर्गवचनात् ।

* * *

विहारविस्तरश्च पञ्चशङ्क्वादिमत्कृतापस्तम्बीयचातुर्मास्यपद्धतौ ज्ञेयः ।

**End:**

क्षीरं जुहोतीत्यग्निमुपशमयीत । द्वादशरात्रं षड्रात्रं त्रिरात्रमिति रुद्रदत्तः ।

इत्यापस्तम्बशाखोक्ताग्न्याधानस्य निरूपणम् ।

अकार्यनन्तदेवेन देवेशस्तस्य तुष्यतु ॥

अथान्वारम्भणीयकालः ।

प्रतिनिधित्वेन नियमसम्भवेऽपूर्वविधेरन्याय्यतया अपि नैस्स्वीकारात् । अतो गवादिपदस्थाने निक्रयपदं वदन्तो मूर्खा उपेक्ष्याः ॥

अवादीच्छ(त्व)मनन्तेन दक्षिणानिर्णयेऽमुना ।

यज्ञस्तुष्यतु येनोक्तो दक्षिणाभिस्सहावतु ॥

**Colophon:**

आधानयज्ञस्यापदेवीयव्याख्या समाप्ता ॥

---

R. No. 2427.

Paper. 10¾ × 9¼ inches. Foll. 38. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. of Rājā Mānavikrama Anujan Kuññuṇṇi Rājā of Paḍiññāre Kōvilagam, Calicut.

## व्युत्पत्तिवादटिप्पणी.

## VYUTPATTIVĀDAṬIPPAṆĪ.

A short commentary on Gadādharabhaṭṭācārya's Vyutpattivāda which is described under No. 4290 of the D.C.S. MSS., Vol. VIII.

Breaks off in the first Khaṇḍa of the Dvitīyāvāda.

**Beginning:**

विशेषानुशासनाविषयत्वविशिष्टविशेष्यवाचकपदविभिन्नवचनकत्वविशिष्टविशेषणवाचकपदत्वं यत्र तत्रासाधुत्वमिति नियमः । अन्यथा विशेषानुशासनाविषयत्वविशिष्टविशेष्यवाचकपदविभिन्नवचनकत्वविशिष्टविशेषणवाचकपदत्वस्य असाधुत्वव्याप्यत्वाभावे तथा नियमावगमेनेति । विशेषानुशासनाविषयत्वविशिष्टविभिन्नवचनकत्वविशिष्ट विशेषणपदत्वस्यासाधुत्वव्याप्यमिति नियमोपगमेनेत्यर्थः । समानलिङ्गकस्थले तादृशनियमस्वीकारे काव्यप्रकाशिकाव्याख्यायां दूषणमुक्त्वा भिन्नलिङ्गस्थले तादृशनियमाभावेन साधुत्वसम्पादने तत्र दूषणमाह—एवमिति ।

**End:**

ननु द्रव्यगतद्वित्वादिकमेव परम्परया गुणादौ प्रतीयत इत्यत आह— द्रव्यगतद्वित्वादेरिति ॥

इति प्रथमाकारकम् ॥

तदन्वयासम्भवात् कर्मत्वान्वयासम्भवात् । कर्मत्वस्यैव निरूपकतासम्बन्धेनान्वयस्सम्भवति, न तु कर्मण इति भावः ।

• • • •

निरुक्तधर्मावच्छेदेनेति । अलौकिकविषयताशून्यचाक्षुषत्वाद्यवच्छेदेनेत्यर्थः ॥

---

R. No. 2428.

Paper. 10¾ × 9¼ inches. Foll. 16. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Jayanti Jōgannagāru, Hamsavaram, Tuni division, Godavari district.

(a) कालचक्रजातकम्, आन्ध्रटीकासहितम्.

KĀLACAKRAJĀTAKAM WITH TELUGU COMMENTARY.

Foll. 1a—3b.

Slightly different from the work described under No. 13641 of the D.C.S. MSS., Vol. XXIV.

Contains the Savya and the Apasavya portions only.

**Beginning:**

कालचक्रं प्रवक्ष्येऽहं सङ्क्षेपाच्छृणु हि(सुर)त ।
(शुभा) शुभं मनुष्याणां भूतभव्यं तु निश्चये (वक्ष्यते) ॥
. . . . . . . . . . . . ज्ञानं विधीयते ।
गर्भाधानं ऋतु (ने तु तत्) काले प्रसवे जननं भवेत् ॥
नवमैकादशे मासे द्वादशे वाथ निश्चयः ।
आदित्यस्योदयेराज्यं छापिश्चन्द्रोदये भवेत् ॥

**End:**

याम्येन्द्रचित्रतोयर्क्षमुत्तराभाद्रतारकाः ।
एतत्पञ्चोडुपादानां भरण्यामिव वक्ष्यते ॥

• • • •

उत्तर, ज्येष्ठ, अनूराधा, धनिष्ठ, शतभिषक्, आर्द्रा, मृगशिर, ఇవి నక్షత్రములు హీనము సव्यवाक्यानि ।

• • • •

[illegible]

**Colophon:**

इति सव्यवाक्यानि समाप्तानि ॥

* * * *

[illegible]

**Colophon:**

अपसव्यवाक्यानि समाप्तानि ॥

---

(*b*) कालचक्रम्, आन्ध्रटीकासहितम्.

KĀLACAKRAM WITH TELUGU MEANING.

Foll. 3*b*—8*b*.

Slightly different from the work described under No. 13642 of the D.C.S. MSS., Vol. XXIV

Incomplete.

**Beginning:**

वन्देऽहं गोपिकानाथं . . . . कालचक्रं पिनाकिना ॥
चक्राकारान् समुद्धृत्य लघुमात्रेण कथ्यते ।
भूते ५ क. मुनयो ७ नव ९ दिक् १० षोडशा १६ व्धयः ४ ॥
सूर्यादीनां क्रमादादौ राशीनां स्वामिनो वशात् ।
दशान्वव्दशानिघ्नं तद्राशिः परमायुषम् ॥
अवाप्तलब्धवर्षाद्य एवं सर्वत्र साधयेत् ।
महादशानवांशानामधिपा [य] परमायुषम् ॥

**End:**

मीने तु वृश्चिकं याते पुनर्गच्छन्ति सङ्कटम् ।
मकरे सङ्कटं दुःखं चापे सङ्कटमुच्यते ॥

---

(*c*) परिवेषप्रकरणम्, आन्ध्रटीकासहितम्.

PARIVĒṢAPRAKARAṆAM WITH TELUGU COMMENTARY.

Foll. 8*b*-9*b*.

Deals with the predictions based on the characteristics of the halo seen sometimes round the sun or the moon.

**Beginning:**

किरणा वायुनिहता मूर्च्छिता मण्डलस्थिताः ।
नानावर्णाश्च कृतयः परिवेषाः शशीनयोः ॥

ते रक्तनीलपाण्डूरकपोता माद्रकापिलाः ।
(अ)पेतशुक्लवर्णाश्च पूर्वादिषु सुत्रष्टिदाः ॥
मुहुर्मुहुर्विलीयन्ते या संपूर्णफलप्रदा ।
शुक्लस्त्वविकलास्त्वम्बक्षितितैलाम्बुसन्निभम् ॥
चापशृङ्गाटका . ध क्षतजाभोऽरुणोऽशुभः ।
अनेकवृत्तिवर्णोऽयं परिवेषो नृपान्तकृत् ॥

**End:**

अवनीगादमच्छिन्नं प्रतिकूलं धनुर्द्वयम् ।
नृपान्तकृद्यदि भवेत् आनुकूल्यं च त . तम् ॥
त्रिविधं सम्प्रवक्ष्यामि दुर्लभं सचराचरम् ।
वर्तमाने रणे द्वन्द्वं काले चातिविशेषतः ॥

Foll. 9b—12b contain the Cakrōddhāra, Grahāticāravakragati-śatrumitrakṣētra, etc.

---

(d) गणकवल्लभः, आन्ध्रटीकासहितः.

GAṆAKAVALLABHAH WITH TELUGU MEANING.

Foll. 12b–15b. Fol. 16 is left blank.

A treatise on astronomical calculations: by Naraharisūri, son of Nṛsiṁhasūri.

Contains the Adhikāras 1 and 2 only.

**Beginning:**

लक्ष्मीनृसिंहमखिलागमविद्वरेण्यं (दे) वं प्रणम्य जनकं च नृसिंहसूरिम् ।
मार्ताण्डतन्त्रसममल्पमनल्पसारं वक्ष्याम्यहं गणकवल्लभनामधेयम् ॥
बाराशिको निगदितोर्ध्वगुवारपूर्वपूर्वाध्वनी भवति सावनवासरस्य ।
रामाशिलीमुखशरावसुभूमयश्च ३५५. १८. रात्रश्शराररसभुवोऽग्निगुणार्क-
(त्र)दस्रा ॥

११. १६. ३२. २१.

* * * *

**Colophon:**

इति नरहरिसूरिविरचिते गणकवल्लभे मध्यग्रहाधिकारः प्रथमः ॥

**End:**

जीवारशुक्रशीघ्रः स्याद्भागत्रयविशोधनम् ।
भागत्रयान्वितं मन्दतन्त्रं दृग्गोचरं स्मृतम् ॥

**Colophon:**

इति नरहरिसूरिविरचिते गणकवल्लभे स्फुटाधिकारो द्वितीयः ॥

## R. No. 2429.

Paper 10¾ × 9⅝ inches. Foll. 50. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of Dēśamaṅgalam-manaikkal, near Shoranur, Malabar district.

**अनङ्गजीवनभाणः.**

ANAṄGAJĪVANABHĀṆAḤ.

Foll. 1*a*—49*b*. Fol. 50*a* contains the name of the owner of the MS. from which this was copied. Fol. 50*b* is left blank.

A drama in one act, technically called Bhāṇa, describing the passionate love between Śṛṅgārasāra and Māṇikyamālā. It is said to have been staged on the occasion of the festival of God Viṣṇu worshipped in Kulaśēkharapura. The author is Kuṭṭuṇṇi (Tambirān), a ruling prince in Kōṭiliṅga or Cranganore. He was the pupil of Kuññuṇṇi (Tambirān), son of Ikkāvu (Tambirāṭṭi).

Complete.

**Beginning:**

त्वन्नेत्रेण शपेति कोपवति नो गङ्गा मयाङ्गीकृता
पादान्तप्रणतोऽहमित्यवनतस्यैणाङ्कचूडामणेः ।
दृष्ट्वा शीर्षतलस्थितां सुरनदीं गौर्या विवृद्धक्रुधो
भर्तुर्मस्तकताडनोद्यततरं श्रीमत्पदं पातु वः ॥

* * *

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—(उच्चैः).

सरसतरुणलोकाकर्षणो बोधधैर्यप्रभृतिविविधभूतोच्चाटनो मङ्गलं वः ।
वितरतु वरनारीनूपुरक्वाणरम्यः सततमपि मनोभूशिञ्जिनी नादमन्त्रः ॥

किञ्च—

शृङ्गारक्षीरसिन्धोरुदितमिव शरच्चन्द्रबिम्बं सुमेषोः
मित्रं शश्वं स्फुटाम्भोरुहमिव च सदा भासते यन्नितान्तम् ।
हासज्योत्स्नामनोज्ञं चपलतरलसन्नेत्रपद्माभिरामं
वक्त्रं तत्सन्ततं वः कलयतु सकलं कामितं कामिनीनाम् ॥

पुरतो विलोक्य । अये चरणारविन्दनतवृन्दारकवृन्दस्य सान्द्रानन्दस्य सप्तलोकीलताकुन्दस्य निश्शेषदेवालयकुलशेखरपुरमाससमानस्यासमानस्य करुणामन्दिरस्य वक्षःस्थितेन्दिरस्य महासुन्दरस्य मन्दहासप्रभाविजितकुन्दस्य पालितमुचुकुन्दस्य भगवतो मुकुन्दस्य यात्रायां संमिलितमेतद्विद्वत्समन्तदर्शवान-वयया भरतकुलविचया हृद्यया सभ्यानानन्दयिष्यामि ।

• • • •

पारिपार्श्वकः—कस्य कवेः कृतिं किं वा रूपकं प्रयुज्य सामाजिकानामाज्ञां पालयितुमिच्छति भावः ।

सू—(विमृश्य)

बन्द्या कुन्दसुमोपमद्युतिधरा वाणी प्रसन्ना भृशं
यच्चित्ते विमले विभाति सततं चान्द्रीव लेखाम्बरे ।
इक्कावाख्यमहेश्वरीप्रियसुतः कुञ्जुण्णिधात्रीपतेः
शिष्येन्द्रः सुमहाकविर्विजयते कोच्चुण्णिभूपालकः ॥

• • • •

सू—श्रीकालीपदपङ्कजभक्तेन कोटिलिङ्गाधिपेनानेन कविना प्रणीतमनङ्ग जीवनाख्यं भाणं प्रयुज्याराधनीयाः सामाजिकाः ।

• • •

मत्तद्विरेफनिकरः कलकण्ठकण्ठ-
श्यामच्छविः कुसुमसन्ततिगण्डपूर्णम् ।
आराममेति सरसं विटनायकोऽयं
शृङ्गारसार इव संप्रति वेशवाटम् ॥

तदहमनन्तरकरणीयाय गच्छामि । इति निष्क्रान्तः ॥

॥ प्रस्तावनम् ॥

End :

(भरतवाक्यम्)—

वारस्त्रीजनहेमनूपुरझणत्कारैस्समं जृम्भतां
शृङ्गाराम्बुनिधेः स्मरस्य धनुषष्टङ्कारकोलाहलः ।
लोकेऽस्मिन्नखिलार्थदाननिपुणाः खेलन्तु खेलन्तु ते
काला भक्तजनार्तिनाशनकलादक्षाः कटाक्षास्सदा ॥

निष्क्रान्ताः ॥

समाप्तश्चायमनङ्गजीवनाख्यो भाणः ॥

R. No. 2430.

Paper. 10¾ × 9¾ inches. Foll. 14. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of Rājā Mānavikrama Anujan Kunjunni Rājāh of Padiññāre Kōvilagam, Calicut.

तर्कसङ्ग्रहदीपिकाविवरणम्.

TARKASAṄGRAHADĪPIKĀVIVARAṆAM.

Foll. 1a—14a. Fol. 14b is left blank.

A commentary on the Tarkasaṅgrahadīpikā of Annambhaṭṭa which work has been described under No. 4154 of the D.C.S. MSS., Vol. VIII. Contains the Anumāna portion incomplete.

**Beginning:**

उपजीव्योपजीवकभावसङ्गतिमभिप्रेत्याह—अनुमानमिति । ननु केन पदेन सङ्गतिस्सूचितेति चेदनुमानपदेनैवेत्यवेहि ।

तथाहि—अनु पश्चाल्लक्षणादिभिः प्रत्यक्षनिरूपणानन्तरं मानं प्रत्यक्षेत्यादि-विभाजकसूत्रबलेनानुमानमित्यर्थः । लक्षयतीति । लक्षणादिभिर्निरूपयतीत्यर्थः ।

**End:**

ननु कथमन्याहितत्वं कथं वा तर्कनिवर्त्यत्वमिति चेत्, न सत्यप्यर्थनिश्चये प्रामाण्यसन्देहाहितार्थसन्देह इव सत्यपि परामर्शे यथा धूमाद्वह्निमतानेन भवितव्यम् ; तथा कुतश्चिद्विरहसाधकात्तद्विरहवत्तापीति शङ्का तद.

---

R. No. 2431.

Paper. 10¾ × 9¾ inches. Foll. 44. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Śrī Mānavēda Rājā of Calicut.

वैद्यमनोरमा.

VAIDYAMANŌRAMĀ.

A treatise on medicine dealing with a number of topics including the treatment of various kinds of maladies as shown in the headings of chapters given below. The author was apparently a devotee of Śiva.

१. . . . . . . . . . .

२. रक्तपित्तासृग्गतास्थिस्त्रावसोमरोगाधिकारः.

३. कासश्वासहिक्काधिकारः.

४. अरोचकच्छर्दितृष्णाधिकारः.

५. अर्शोदावर्ताधिकारः.

६. अतीसारग्रहिणीविषूचिकाचिकित्साधिकारः.

७. मूत्रकृच्छ्रप्रमेहसोमरोगचिकित्सा.
८. विद्रधिशूलाधिकारः.
९. उदरपाण्डुचिकित्सा.
१०. कामिलाधिकारः
११. शोफविसर्पश्वित्रकुष्ठाधिकारः.
१२. वातशोणितवातव्याधिस्थूलकृशाधिकारः.
१३. गर्भिणीचिकित्सा.
१४. बालचिकित्साधिकारः.
१५. भूतग्रहाधिकारः.
१६. अक्षिकर्णव्रणग्रन्थ्यधिकारः.
१७. अपच्यर्बुदाधिकारः.
१८. गुह्यरोगाधिकारः.
१९. विषचिकित्साधिकारः.
२०. रसायनवाजीकरणाधिकारः.

Complete in 20 Adhikaras.

**Beginning:**

वन्दे मन्दक्वणद्भृङ्गवृन्दानन्दकरं मदैः ।
हन्तारमन्तरायाणामिन्दुशेखरनन्दनम् ॥
इमां मनोरमां पाणौ गृहीत्वा रोगपीडितान् ।
चिकित्सयन्तो लोकेऽस्मिन् कीर्तिमन्तो भवन्ति ते ॥
सुलभसुखभेषजानि सिद्धान्यमृतसमानि फलानि यानि यानि ।
सकलगदहराणि मानवानामिह कथितानि भवन्ति तानि तानि ॥
अत्यश्वगजभाराध्वस्त्रीभिः क्रोधादिजे ज्वरे ।
लङ्घनं निहितं तत्र पयः पथ्यं यथामृतम् ॥
भेषजेषु बलं रक्षन् लङ्घयेज्जीर्णेषु क्रमात् ।
पेयात् काथरसाद्यैः पथ्यैस्साध्यमुपक्रमेत् ॥

* * * *

**Colophon:**

इति प्रथमोऽधिकारः ॥

**End:**

कुम्भे निधाय शकलीकृतपूतपूगं तत्रैव शाल्मलिजटागलितोदकेन ।
संभावितं दिनमुखे चरणौ च खादन् वृद्धोऽप्यभूत्सुरतनाटकचक्रवर्ती ॥

**Colophon :**

इति वैद्यमनोरमायां रसायनवाजीकरणाधिकारो विंशः पटलः ॥

अधुना शिवपादशेखरेण पृथगेषा सकलागमार्थरूपा ।
रचिता भिषजां मनोरमा सा विदुषां रोगसमाप्तये समाप्ता ॥

---

R. No. 2432.

Paper 10¾ × 9¼ inches. Foll. 32. Lines, 20 in a page. Dēvanāgari Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Ampalakat Karuṇākara Menon Avargal of Chalapuram, Calicut.

साहित्यसारः.

SĀHITYASĀRAḤ.

A treatise on dramatic composition based upon Bharata's Nāṭyaśāstra, Kōhala's Nāṭyaśāstra, etc The author is Sarvēśvara, a renowned Pandit of Malayaja.

The following topics are dealt with :—

१. नाटकलक्षणम्.
२. भारतीवृत्त्यादिनिरूपणम्.
३. पात्रवाक्यादिनिरूपणम्.
४. विष्कम्भादिनिरूपणम्.
५. रसादिनिरूपणम्.
६. रूपकनायकनिरूपणम्.

Complete.

**Beginning :**

सुरासुरशिरःश्रेणीरत्नराजिविराजितम् ।
वन्देऽहं वासुदेवाङ्घ्रिवरपङ्केरुहद्वयम् ॥
सदा मृदुपदन्यासास्सालङ्कारा रसावहाः ।
प्रगल्भा इव कामिन्यो जयन्त्यादिकवेर्गिरः ॥
जयन्ति भुवने सन्तस्सदा सन्तापहारिणः ।
निजवक्त्रेन्दुनिर्गच्छदच्छवाक्यामृतद्रवैः ॥
विनापि कारणेनोच्चैर्विसरद्वैरदारुणात् ।
दुर्जनाद्भीतिरत्यर्थं कस्य वा नोपजायते ॥
अशेषख्यातसाहित्यसारनिष्णातमानसः ।
सर्वेश्वर इति ख्यातः कविर्जयति भूतले ॥
मनोमन्दरमन्थानमथिताङ्गरताम्बुधेः ।
यस्याजनि जनानन्दी ज्ञानामृतमहोदयः ॥

मनःकुवलयोल्लासकरीयं तिमिरापहा ।
पद्मकचन्द्रसंभूता भारती चन्द्रिकायते ॥
निश्शेषजगदानन्दसन्दोहमुदिताशयः ।
यस्यागस्त्येश्वराधीशो वामराशिमुनिर्गुरुः ॥
उत्तुङ्गसत्त्वगम्भीरादुत्पन्नो यास्विक्रमात् ।
सन्धध्यविलसन्मूर्तिस्सागरादिव चन्द्रमाः ॥
गङ्गातरङ्गनिर्धौतजटामकुटशोभितः ।
यस्य चेतस्यसावास्ते सदारश्चन्द्रशेखरः ॥
लसन्मृदुपदावल्या बालव्युत्पत्तिकारणम् ।
तेन साहित्यसारोऽसौ क्रियते नाट्यलक्षणम् ॥
आहृतं भरतात्किंचिदुत्तरात्किंचिदुद्धृतम् ।
कलितं कोहलात् किंचित्किंचिद्भरतविस्तरात् ॥
शास्त्रमेतदनालोच्य स्वबुद्ध्या नाटकादिषु ।
पद्यं वा पदमेकं वा यः करोति स मन्दधीः ॥
यश्शब्दशास्त्रनिशितस्वभावविशदाशयः ।
भरतादिषु निष्णातस्स हि साहित्यपण्डितः ॥
अशास्त्रज्ञः प्रयोक्ता च प्रेक्षावानपि कोविदैः ।
अस्य तन्त्रस्य तत्त्वज्ञैर्निर्लज्ज इति कथ्यते ॥

• • • •

नाट्यं दशविधैर्भेदैर्भिन्नं संज्ञासमन्वितैः ।
ताननेकपदाकारं निरुक्त्यैव वदाम्यहम् ॥
नाटकं सप्रकरणं भाणेहामृगवीथयः ।
व्यायोगस्समवाकारस्साङ्कं प्रहसनं डिमः ॥
अन्येषां प्रकृतित्वेन निःशेषैर्लक्षणैस्सह ।
तत्र नाटकमाचार्यैरादावेव विचार्यते ॥
नटानामिदमित्याहुर्नाटकं वा विचक्षणाः ।
चत्वारो ब्रह्मणः पुत्राः नटास्तु भरतादयः ॥
येषां नामभिरेवैताश्चतस्रो वृत्तयस्स्मृताः ।
सर्वविद्याविधिर्नाट्यमिति नाट्यविदो विदुः ॥

• • • •

सन्ध्यङ्गपष्टिरयमिष्टजनाभिपुष्टा विस्पष्टवाक्यमथिता च चतुष्टयेन ।
विद्वन्मनोनिकररञ्जनतत्परेण सर्वेश्वरेण रचिता कविपुङ्गवेन ॥

**Colophon:**

इति श्रीमन्मलयजमहापण्डितसर्वेश्वराचार्यविरचिते साहित्यसारे प्रथमः प्रकाशः ॥

* * * *

सर्वेश्वरस्सरसधीः मतिबुद्धशास्त्रश्रीवामराशिगुरुपादयुगप्रसादात् ।
विद्वन्मुदे नियतभाषितसर्वभावविज्ञानकृद्ग्रथित साधु निरुक्तमेतत् ॥

**End:**

रौद्रो रसोऽङ्गीकर्तव्यश्चत्वारोऽङ्गास्सविस्तराः ।
दीर्घवृत्तिविचित्रार्थो निर्विमर्शो डिमो भवेत् ॥
सन्धिसन्ध्यङ्गवृत्त्यङ्गवृत्तिनायकवस्तुभिः ।
भिद्यमानाङ्कसङ्केतभेदास्स्युर्नाटके दश ॥
सुदृढरचितबन्धस्साधु सर्वेश्वरेण प्रथितभरतशास्त्रप्राप्तभूषाविशेषः ।
मृदुतरपदशय्याशोभितश्शश्वदुच्चैरसरसमनसि भूयादेष साहित्यसारः ॥

**Colophon:**

इति श्रीमन्मलयजमहापण्डितसर्वेश्वराचार्यविरचिते साहित्यसारे षष्ठः प्रकाशः ॥

अस्य साहित्यसारस्य सङ्ख्या सर्वेशकल्पिता ।
भवेदष्टाधिकैवात्र षट्शती सुमनोहरा ॥
पदबोधादिदं भाति यद्बोधाद्विनिवर्तते ।
नमस्तस्मै परानन्दवपुषे परमात्मने ॥

---

R. No. **2433**.

**Paper.** 10⅜ × 9⅜ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Kaḍiyāla Kāmā Śāstrigāru, Kotipalli, Godavari district.

**त्रिपुरविजयव्यायोगः.**

**TRIPURAVIJAYAVYĀYŌGAḤ.**

Foll. 1*a*—14*a*. Foll. 14*b*—16 are left blank.

A drama technically called Vyāyōga celebrating the conquest of Tripura by God Śiva: by Padmanābha, son of Kāma Śāstrin and grandson of Padmanābha whose father was Yallāvadhāni of Bhāradvājagōtra.

The drama is said to have been staged on the occasion of the vernal festival of God Sōmēśvara worshipped at Kōṭipalli.

Incomplete.

**Beginning :**

देवः स्वार्थशिवानवानुनयसंस्फूत्योत्तमाङ्गायनात्
गङ्गां मुल्यपवाश्च गौतमतपस्सिद्धिच्छलादुत्सुकः ।
इत्थं बुद्धिधियेव कोटिपल्लिसंस्थाने निरुद्धस्तया
पार्श्वे दक्षिणमात्मयोभयसमस्सोमेश्वरः पातु नः ॥

नान्द्यन्ते सूत्रधारः—(सामाजिकानवलोक्य)

सोमेश्वरस्स भवतां भवतां विभूत्यै देवस्य यस्य गलफालशिरःप्रकाशैः ।
युध्यत्स्वतित्रिपुरसंस्फुरणभ्रमेण मध्ये पुरे प्रतिभटन्त्यविशन् पुराणि ॥

अपिच (स्वगतम्)

मार्दङ्गिको मधुरिपुर्भगवांश्च लक्ष्मीर्वाणी स्वराभिनयताललयाश्रयार्थे ।
तान . . श्रुतिस्सुमहानटोऽभूत् सोमेश्वरस्तदवतु प्रभुताण्डवं नः॥

* * * *

इह खलु सकलतीर्थराजविराजमानोदर्यां गोदावर्यां कोटितीर्थतासार्थक्याचरणाय नवमाजनभाजनजनव्रजस्य कोटिगुणितफलोपहारिण्यां मातृगमनाघहारिण्यां स्नाताः पूता धौताम्बराः

* * * *

पुण्यतमेयं गौतमी श्रेयस्करी नमस्कार्या ।

* * * *

अतोऽप्यहं तावदिह सकलभक्तजनमनोऽनुरञ्जनस्य ब्रह्मविष्णुजिष्णुप्रमुखमखभुक्सुमुखितैकप्रभुत्वव्यञ्जनस्य विघ्नानाथनन्दिनाथगणनाथसुरसैन्यनाथप्रमथनाथलोकनाथसकलसुरासुरमुनिकुलवन्दितपादारविन्दस्य सिद्धिजनार्दनरोटीश्वरभोगीश्वरसदानुषक्तानन्दस्य, प्राच्यवाचीप्रतीच्युदीचीचतुर्व्यूहमारसह्यागस्त्येश्वरलक्ष्मणमुक्तीश्वरनागेश्वरभीमेश्वरसंसेवितबाह्यचतुरावरणस्य, शश्वद्भक्तभक्तिरञ्जितानुमतवरणस्य, पार्वतीवदनारविन्दनयनोत्पलविकासविलाससमुल्लासकरदिनकरसुधाकरनेत्रस्य, त्रिनेत्रस्य, सकलसुरासुरविरचितस्तोत्रस्य श्रीसोमेश्वरस्य वसन्तकल्याणमहोत्सवनिरीक्षणोत्सुकास्त इमे सभासदस्सकलविद्यारहस्यविदस्संवसन्तरसन्तरसन्तोषणीया यत्किञ्चिद्रूपकाद्यभिनयेन सविनयेन मयेति सप्रदक्षिणमभितो वीक्ष्य, तत्समालक्ष्य

एषा खलु नित्यसन्तोषा असमप्रभा सोमप्रभानगरी गरीयसी ।

* * * *

सू—केनचिद्रूपकेण विनयाभिनवमभिनयेन ।

नटी—कोऽयं रूपकोऽभिनेयः ।

सू—

भारद्वाजान्वयाब्धेरमृतकिरणवत्सत्कलापूर्णवर्णो-
द्दीर्णो पद्मावधानी निखिलनिगमवित् पद्मनाभस्ततोऽभूत् ।
तत्सूनुः कामशास्त्री मकुटति विदुषां तत्सुतः पद्मनाभः
चक्रे व्यायोगरत्नं त्रिपुरविजय इत्यस्ति सोऽयं रसाढ्यः ॥

* * * *

नटी — तर्हि गङ्गाधरसुकरप्रसादप्रसारणपरिशोभितसकलकलाकलाप-सुनामपद्मनाभकृतरूपकाभिनयान केवलं धन्या वयम् । किन्तु तत्कृत-त्रिपुरविजयापदानश्रवणकौतुकेन समालदोऽपि ।

* * * *

सू —(स्मृतिमनुसृत्य सोत्कण्ठम्) सोऽयं त्रिपुरहरहरवेषमभिनयन् विष्णु-जिष्णुपरमेष्ठिनः पुरमायादुर्नयभयाविष्टान् समाश्वासयति माणिभद्रः । तथा-विधोऽयं वचनरचनाविधिः । सन्नह्यते चामुना सांयुगीनसामग्र्या ।

(सोद्वेगम्)

छन्दोहाटकघोटकप्रघटितं छन्दःशिरःप्रग्रहं
वाणीवल्लभसारथिप्रचरितं सर्वंसहास्यन्दनम् ।
चण्डाचण्डमयूखमण्डलमहाचक्रद्वयोपस्थितं
वेगानायतमद्भुतेन भगवानारुह्य निर्गच्छति ॥

तदावामप्यस्मत्करणीयाय भवाव इति निष्क्रान्तावार्यौ ॥

इति प्रस्तावना ॥

**End:**

भगवान् सोमेश्वरः — पयस्सम्पृक्ततेजोहुतवह इव सविस्फूर्जधुज्ज्वल-ज्वालाकुलमहाकुलः (सरोषम्) तर्हि भेद एव त्वया सम्पाद्यते ( विहस्य सोत्प्रासम्)

सुरास्तु यत्ने यदकुर्वतासुरास्तदेव . . पि पुरा पराभवन् ।
न . . पक्षं परपक्षमाश्रितास्ततो न यूयं . . . . पुरी ॥

(सखेदामर्षावमानम्) . . . . . . . . . नास्म.

## R. No. 2434.

Paper. 10¾ × 9¼ inches. Foll. 78. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. T. Bhujaṅgarāyudu of Irusumanda in the Godavari district.

तत्त्वचिन्तामण्यालोकदर्पणः.

**TATTVACINTĀMAṆYĀLŌKADARPAṆAḤ.**

Foll. 1a—76a. Foll. 76b—78 are left blank.

A commentary on the Tattvacintāmaṇyālōka of Jayadēvamiśra: by Mahēśa Ṭhakkura—vide No. 1548 of Vol. IV, Notices of Sanskrit MSS. by Rajendra Lal Mitra.

Contains the Pratyakṣa up to the end of the Anyathākhyātivāda.

**Beginning**:

शङ्करजगदङ्क(म्बिक)योकेपुंसे(रङ्के पङ्के)न खेलन्तम् ।
लम्बोदरमवलम्बे यं वेद न तत्त्वतो वेदः ॥

पुंसामार्तिभिदे कलानिधिकुलोत्तंसाय संसार(भी)-
विध्वंसाय मुनीन्द्रमानससरोहंसाय कंसारये ।
अर्या(श्रा)लम्बितशिक्यमुज्वलरुचिं गुञ्जावतंसादिना
यं साशङ्कमुपागमत्कमलभूः कृष्णाय तुभ्यं नमः ॥

चतुर्भिरास्यैश्चतुरोऽपि वेदानुच्चारयन्नक्रमशो विरिञ्चिः ।
पादाग्रपश्चात्पदशेषदोषसन्तोषिशिष्यश्चिरमातनोतु ॥

धत्ते नावनतिं महीधरसुतामागावरुद्धं शिरो
नैवोदञ्चितचारुसान्त्वनवचोमूकाभि(यि)ताधि(र्वे)मुखे ।
आश्लेषोऽपि यथोचितं न हि भवत्येकाकिना बाहुना
मामव्यादिति विक्लवः प्रियतमामानापनोदी शिवः ॥

* * * *

गौर्या गिरीशादिव कार्तिकेयो योधीरया चन्द्रपतेव(र)लम्बि ।
आलोकमुद्दीपयितुं नवीनं सदर्पणं व्याकुरुते महेशः ॥

अत्र श्लोकानां व्याख्या टीकाकृता सुकरत्वादुपेक्षिता। सा चैवम् । प्रारिप्सितविघ्नविघातकं पुरभिन्नमस्काररूपं मङ्गलं शिष्यशिक्षायै निबध्नाति—गुणेति । गुणान् सत्त्वरजस्तमोरूपान् अतीतः । यद्यपि नैयायिकस्य सत्त्वादयो गुणाः साङ्ख्यादेरेव नातिरिक्तास्तदापेक्षित्वादिकार्यानुगुणा अस्मदाद्यदृष्टविशेषा एव सत्त्वरजस्तमांसि ईशोऽप्रतिहतेच्छः त्रिगुणसचिवो ज्ञानेच्छाप्रयत्नरूपगुणत्रयवान् त्र्यक्षरमयः अकारउकारमकारात्मकप्रणववाच्यः त्रिमूर्तिः ब्रह्म-

विष्णुरुद्रात्मकशरीरत्रयवान् सृष्टिस्थितिविलयरूपाणि कर्माणि तनुते विस्तारयति । पुनः पुनः करोतीत्यर्थः । कर्मपदोपानं कार्यपुरस्कारेण ।

**End:**

न च मानसामग्रीसत्त्वे पराभिमतेऽपि साम्यिति वाच्यम् । विशिष्टज्ञानसामग्री हि विषयनिरूपितं संसर्गं बोधयति, न तु संसर्गमात्रमतिप्रसङ्गात् । न च यस्य संसर्गस्याभावग्रहस्तं संसर्गं सा बोधयति विकल्प्यमिति वाच्यम् । अभावस्यापि(स)प्रतियोगिकत्वादधिकसंसर्गस्य तथापि विषयत्वाभावादिति ।

**Colophon:**

अन्यथाख्यातिवादस्समाप्तः ॥

---

R. No. **2435.**

Paper. 10¾ × 9⅛ inches. Foll. 206. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Pillalamarri Lakṣmīnṛsiṁhasiddhāntigāru of Bhatlapenumarti, Vijñānavardhani Samājam, Kistna district.

**भरतार्णवः, आन्ध्रटीकासहितः.**

BHARATĀRṆAVAḤ WITH TELUGU MEANING.

Foll. 1a—205b. Fol. 206 is left blank.

A treatise on music and dancing accompanied with gesticulation. The different topics dealt with herein are briefly enumerated in the introductory stanzas. By Muḍumbai Narasiṁhācarya of Śrīvatsagōtra. He says that he has summarized herein the substance of what is contained in previous works on the subject and has explained Bharata's work on Nāṭyaśāstra.

Name of the scribe of the original MS: Muḍumbai Vēṅkaṭarāma Narasiṁhācār of Pālakoṇḍa. Date of copying: 5th day of the bright fortnight of the Ādi month in the year Dhātu.

Complete, though in disorder.

**Beginning:**

गीतवादित्रनृत्तानां त्रयं सङ्गीतमुच्यते ।
तानस्यात्र उदानत्वात्सङ्गीतमिति चेरितम् ॥
सङ्गीतं वैदिकैर्वाग्भिः बोधितं ब्राह्मणास्सदा ।
भुक्त्वैहिकं तदा मोक्षं प्राप्नुवन्ति स्वरान्विताः ॥
अग्निहोत्रं यथा कार्यं गानं कार्यं तथैव हि ।
वेदोक्तत्वात् स्मृतिप्रोक्तं कर्तव्यत्वान्मनीषिभिः ॥

स्वाश्रया मोहिनी माया या तया संवृताश्च ते ।
ब्रह्मविष्णुमहेशास्स्युस्सङ्गीतात्यसुलस्पृहाः ॥
विष्णुनामानि दिव्यानि सुस्वरैरन्वितानि चेत् ।
भवन्ति सामतुल्यानि कीर्तितानि मनीषिभिः ॥
ऐहिकामुष्मिकं त्यक्त्वा देवर्षिर्नारदस्स्वयम् ।
ब्रह्मानन्दोऽपि वीणाया वादने निरतोऽभवत् ॥
अतीतानागतज्ञानी ब्रह्मज्ञो गतकिल्बिषः ।
भरतोऽपि मुनिश्रेष्ठस्सङ्गीतनिरतोऽभवत् ॥
सङ्गीतनिरता नित्यं शिवाद्यानन्दरूपिणः ।
सदा सरस्वती वीणावादने निरताभवत् ॥

* * * * *

आदौ सङ्गीतमाहात्म्यं भरतार्णवबोधनम् ।
सङ्गीतशब्दविवरं तौर्यत्रिकसुलक्षणम् ॥
तदुत्पत्तिक्रमं चैव तदुत्पत्तिर्मतान्तरात् ।
किङ्किणीलक्षणं चैवाभिनयार्थन्ततः परम् ॥
नृत्यकालविनिर्णीतिः पात्रलक्षणमुच्यते ।
सुपात्रलक्षणं चैव अपात्रसुविनिर्णयः ॥
नटस्य लक्षणं पात्रबहिःप्राणविनिर्णयः ।
अन्तःप्राणप्रकटनं नीचनाट्यस्य लक्षणम् ॥
नाट्यक्रमं च शास्त्राशास्त्रीयनृत्यफलं ततः ।
नीचनाट्यजदं नृणां फलं नाट्यस्य लक्षणम् ॥
नृत्तस्य लक्षणं चैव नृत्यस्यापि च लक्षणम् ।
लास्यताण्डवयोश्चापि लक्षणं रङ्गलक्षणम् ॥
सभालक्षणमत्रस्थजनस्थानविनिर्णयः ।
ग्रन्थान्तरे सभासीनसभानिर्णयलक्षणम् ॥
पुनर्ग्रन्थान्तरे चैव सभासनविनिर्णयः ।
मेललक्षणमत्रस्थजनस्थानविनिर्णयः ॥
ग्रन्थान्तरे मेलजनस्थाननिर्णयमुच्यते ।
पुष्पाञ्जलिक्रमं चैवाद्यन्तपुष्पाञ्जलिः क्रमात् ॥
ग्रन्थान्तरे पुनः पुष्पाञ्जलिलक्षणमुच्यते ।

राजलक्षणमादौ च पुनर्ग्रन्थान्तरेण च ॥
दिक्पालवन्दनं चैव दिग्वन्दनमतःपरम् ।
सभायां वन्दनं चैव भूवन्दनमतःपरम् ॥
पादघातातिजननं नृत्तस्य विधिरुच्यते ।
तादित्तोत्रादिरीतिश्च हस्तदृश्यादिलक्षणम् ॥
अङ्गप्रत्यङ्गसंस्पर्शविधिरङ्गस्य लक्षणम् ।
उपाङ्गलक्षणं चापि तथाङ्गोपाङ्गयोरपि ।
प्रत्यङ्गस्य त्रयाणां च लक्षणं समुदीरितम् ॥
चतुर्विधं त्वभिनयं नन्दिकेश्वरसंमतम् ।
पञ्चधाभिनयं सारस्वतग्रन्थेऽभिधीयते ॥
अष्टौ सात्त्विकभावाश्च हस्तप्राणविनिर्णयः ॥
हस्तदृष्टिप्रकटनं दशहस्तप्रसारणम् ।
वितानादिप्रसाराश्च हस्तानां दृष्टिपञ्चकम् ॥
प्रत्यक्षाणां परोक्षाणामभिनेयादिलक्षणम् ।
हस्तानां द्वादश प्राणाः कपटैकादशं ततः ॥
हस्तानां चापि क्षेत्राणि क्षेत्राणां सप्तविंशतिः ।
उत्तमाधममध्यानां क्षेत्राणां निर्णयक्रमः ॥
चतुर्विधवल्यानां च वलयस्य च लक्षणम् ।
ब्रह्मर्षिक्षत्रवैश्यानां शूद्राणां स्थानलक्षणम् ॥
अभिनेयविधिश्चापि हस्तानां रीतयस्ततः ।
विस्तार्यलक्षणं चापि नासिकानान्ययोस्ततः ॥
नान्यनासिकयोः स्थानं पदाभिनयनृत्यकम् ।
संविधानां लक्षणं च शिरःकम्पनलक्षणम् ॥
नेत्राणां दश कम्पाश्च नारीनृत्ताष्टवीथिकम् ।
अष्टवीथीनिर्णयश्च नाट्यस्त्रीचेष्टितानि च ॥
स्त्रीपुंनपुंसका हस्ता रसानां नवकं तथा ।
ग्रन्थान्तरे मण्डलानां दशकं समुदीरितम् ॥
अष्टसङ्ख्योष्ठचलनं चतुर्ग्रीवादिलक्षणम् ।
रेचितस्यापि भ्रुकुटेर्लक्षणं परिकीर्तितम् ॥

आलीढसमवीराख्यमत्यालीढादिनिर्णयः ।
शिरोभावगुणानां च दशकं समुदीरितम् ॥
ग्रन्थान्तरे शिरोभावनवकं च ततः परम् ।
नन्दीमते शिरोभेदनवकं समुदीरितम् ॥
तन्मतेनाष्टसङ्ख्याका दृष्टिभेदाः प्रकीर्तिताः ।
पुनर्ग्रन्थान्तरे सप्त दृष्टयस्समुदीरिताः ॥
एकाशीतिर्लक्षणानि प्रोक्तानि भरतार्णवे ।

संयुतादिहस्तनिर्णयः—

संयुतासंयुताश्चेति द्विविधा हस्तरीतयः ।
षट्त्रिंशत्संयुता हस्ताः पञ्चत्रिंशदसंयुताः ॥
देशान्तरोद्भवासंयुताख्यावान्तरसंयुताः ।
नृत्तहस्तप्रकरणं चित्राभिनयमीरितम् ॥
नक्षत्राभिनयश्चैव देवहस्ताः प्रकीर्तिताः ।
बान्धवाभिनयश्चैव सर्वाङ्गाभिनयस्तथा ॥
देवदिक्पालहस्ताश्च चतुर्वर्णकरास्तथा ।
दशावतारहस्तांश्च चतुर्युगकरास्स्मृताः ॥
नवग्रहकराश्चापि करो दशरथस्य च ।
पर्वतानामृषीणां चाभिनयः परिकीर्तितः ॥
ग्रन्थान्तरे च चौसीति बन्धनादिपरार्थकम् ।
शृङ्गारनायकाष्टोपनायिकानां च लक्षणम् ॥
अष्टोपदूतिकादूतीलक्षणानां विमर्शनम् ।
सप्तचत्वारिंशदर्थाश्चित्राभिनयनिश्चिताः ॥
सर्वग्रन्थान् समालोक्य भरताचार्यसंमतान् ।
मतान् सङ्गृह्य सर्वेषां सुमहाय कृतं मया ॥
सर्वार्थसारभरतसङ्ग्रहाख्यमिदं बुधाः ।
श्रीवत्सवंशभूतेन नृसिंहार्येण धीमता ॥
विवृतं भारतं शास्त्रं सुमहं सुविनिश्चितम् ।
नटीनां च नटानां च रसिकानां च जीवनम् ॥

सर्वार्थग्रहणार्थाय तद्व्यञ्जकसमर्थकम् ।
अनुगृह्णन्तु रसिकाः पण्डितास्समदर्शिनः ॥
तालाभिनयशब्दार्थनाट्यशास्त्रविचक्षणाः ।
कृपया परया युक्तास्सर्वलक्षणदीपिकाम् ॥

* * * *

संयुतासंयुताश्चेति द्विविधा हस्तरीतयः ।
षट्त्रिंशत्संयुता हस्ताः पञ्चत्रिंशदसंयुताः ॥

एतेषां लक्षणविनियोगप्रसारादय उच्यन्ते —
आदौ असंयुतहस्तानां नामधेयानि निरूप्यन्ते ।

पताकस्त्रिपताकार्धपताकः कर्तरीमुखः ॥
मयूरश्चार्धचन्द्रश्च रेखाचन्द्रोऽप्यरालकः ।
शुकतुण्डश्च मुष्टिश्च शिखरश्च कपित्थकः ॥

* * * *

ध्रुवाणां चापि रागाणां तालानां निश्चितार्थकम् ।
तदेव भरतं शास्त्रमिति ज्ञेयं बुधोत्तमैः ॥
भकारो भावसंस्कारो रकारो राग उच्यते ।
तकारस्तालसंस्कारो भरतः परिकीर्तितः ॥

* * * *

शम्भोः कैलासशिखरे गजासुरविनाशिनः ।
बाहुभ्यामुदितो भावो रागस्तु रसनाग्रतः ॥
वादित्रादुदितस्तालस्तस्य नाट्यसुविस्तरे ।

* * * *

शास्त्रं तु भरतं विष्णोरत्यन्तप्रियवर्धनम् ।
शम्भुर्गौरी च धाता च वाणी नन्दीश्वरस्तथा ॥
दत्तिलः कोहलश्चैव याज्ञवल्क्यश्च नारदः ।
हनुमान् षण्मुखश्चैव गजवक्त्रो बृहस्पतिः ॥
अर्जुनो रावणश्चैव . . . . भरतस्तथा ।
तत्तन्मतानुसारेण प्रणीतग्रन्थविस्तरे ॥
नन्दिकेशोपदिष्टेन मार्गेण भरतस्य हि ।

उत्पत्तिक्रममाहात्म्यं वक्ष्यते भरतार्णवे ॥

नन्दिकेश्वर उवाच—

ऋग्यजुस्सामवेदेभ्यो वेदाच्चाथर्वणात् क्रमात् ।
पाद्यं चाभिनयं गीतं रसान्संगृह्य पद्मभूः ॥
व्यरीरचच्छास्त्रमिदं धर्मकामार्थसिद्धिदम् ।
दुःखार्तिशोकनिर्वेदखेदविच्छेदसाधनम् ।
अपि ब्रह्मपरानन्दादिदमप्यधिकं भवेत् ॥

* * * *

Colophon:

इति श्रीवत्सान्ववायसंजातमुड्डुम्बनृकण्ठीरवाचार्यविशदीकृतभरतशास्त्रे नन्दिकेश्वरीयनारदीयबृहस्पतीयादिभरतादिग्रन्थसम्पुटितसारस्वतभरतसारसङ्ग्रहाख्यग्रन्थे चित्राभिनयप्रकरणम् ॥

End:

साक्षात्कारे देवतानां विशेषे विष्णुभावने ।
वरदाभयहस्तस्तु कथितः पूर्वसूरिभिः ॥

* * * *

करयोर्मध्यमाङ्गुष्ठयोगे चान्यप्रसारणात् ।
मुद्राहस्तस्समाख्यातः करन्यासविचक्षणैः ॥
. . . . त्वर्थके धेनोराननै तृणभावने ।
चिन्मुद्रायां च चक्रौ च मुद्राहस्तो निरूपितः ॥

* * * *

Colophon:

इति श्रीमुड्डुम्बनृकण्ठीरवाचार्यपरिशीलितदर्पणशास्त्रे संयुतनृत्तहस्तप्रकरणं संपूर्णम् ॥

---

## R. No. 2436.

Paper. 10¼ × 9½ inches. Foll. 128. Lines, 10 in a page. Dēvanāgari. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Ampalakat Karunakara Mēnon, Chalapuram, Calicut.

शब्दरत्नाकरः.

ŚABDARATNĀKARAḤ.

Foll. 1*a*—127*b*. Fol. 128*a* contains the name of the owner of the MS. from which this was copied. Fol 128*b* is left blank.

A dictionary of synonymous terms arranged in three Kāṇḍas. The names of the Adhyāyas in each Kāṇḍa are given below. By Vamanabhaṭṭabāṇa of Vatsa family, son of Kōv(m)aṭi Yajvan and grandson of Varadāgnicit.

Complete.

**Beginning :**

सोमाङ्गमुत्तंसयते वामाङ्गमवरुन्धते ।
नमः परस्मै देवाय तेजोभिः पश्यते त्रिभिः ॥
वरदाग्निचितः पौत्रः पुत्रः कोमटियज्वनः ।
जागर्ति वामनो बाणो वत्सवंशशिखामणिः ॥
तेन जिज्ञासमानानामुपकर्त्रा विधीयते ।
शब्दरत्नाकरो नाम निघण्टुर्मान्द्यखण्डनः ॥
नामलिङ्गप्रकाशैकदर्पणे प्राज्ञतर्पणे ।
पूर्वशास्त्रकृतं लक्ष्म यत्तदत्र निबध्यते ॥
पञ्चधा वर्तते शब्दः लिङ्गस्त्रीपुंनपुंसके ।
अव्यये लिङ्गसाङ्कर्येऽप्येषामन्त्यं चतुर्विधम् ॥
न स्त्री न षण्ढः षण्ढस्त्रीत्रिलिङ्गव्यवहारतः ।
प्रायोऽत्र रूपभेदेन साहचर्येण च क्वचित् ॥
ज्ञेयास्त्रिलिङ्गीसङ्कीर्णलिङ्गव्यक्तिः पृथग्विधैः ।
भिन्नलिङ्गपदश्लेषो नात्र द्वन्द्वैकशेषयोः ॥
ना पुमानिति पुंलिङ्गे स्त्रीलिङ्गे स्त्रीति कथ्यते ।
नपुंसकं क्लीबषण्डपदं तल्लिङ्गवाचकम् ॥
लिङ्गत्रये त्रिष्विति स्यात् स्त्रीपुंसोस्स्याद्द्वयोरिति ।
निषेधे शेषलिङ्गं स्यान्न त्वन्ताथादिपूर्वभाक् ॥
ब्रह्मा विश्वसृडात्मभूः शतधृतिर्धाता विधाता विधिः
वेधा हंसरथो विरिञ्चिरमरज्येष्ठो विरिञ्चोऽब्जभूः ।

वागीशश्चतुराननस्सरसिजेवासः स्वयंभूरजः
कस्स्रष्टा द्रुहिणः प्रजापतिशतानन्दौ स्वभूर्नाभिजः ॥

* * * *

**Colophon:**

इति वत्सकुलवामनभट्टबाणविरचिते शब्दरत्नाकरे आदिदेवाध्यायः प्रथमः ॥

**End:**

तूष्णी मौने च तूष्णीकं प्रादुराविः प्रकाश्य(श)के ।
भङ्गीकृतौ स्यादथकिमप्यादिकथमित्यदः ॥
अप्यर्थे यदिवार्थे स्यात्प्रसह्य प्रसह्यार्थके ।
प्रकारे चान्यथेतरथा कथमित्थं यथा तथा ॥
उपरिष्टादुपर्यूर्ध्वे स्यादधस्तादवागधः ।
इति हि स्यात्सम्प्रदाय ऊन्द्रक्ते(?) रोषसंभवे ॥

**Colophon:**

इति वत्सकुलवामनभट्टबाणविरचिते शब्दरत्नाकरे अव्ययाध्यायस्समाप्तः ॥

Contains the following Adhyāyas:—

I काण्ड.

| | |
|---|---|
| १. आदिदेवाध्यायः. | ६. शब्दाध्यायः. |
| २. दिक्पालाध्यायः. | ७. कालाध्यायः. |
| ३. ग्रहाध्यायः. | ८. चित्ताध्यायः. |
| ४. ऋष्यध्यायः. | ९. पातालाध्यायः. |
| ५. मेघाध्यायः. | |

II काण्ड.

| | |
|---|---|
| १०. वसुन्धराध्यायः. | १४. शकुन्ताध्यायः. |
| ११. पर्वताध्यायः. | १५. पुराध्यायः. |
| १२. वनाध्यायः. | १६. उक्तिभेदाध्यायः. |
| १३. चतुष्पादध्यायः. | १७. नाट्याध्यायः. |

III काण्ड.

| | |
|---|---|
| १८. मनुष्याध्यायः. | २१. वैश्याध्यायः. |
| १९. ब्रह्माध्यायः. | २२. शूद्राध्यायः. |
| २०. क्षत्रियाध्यायः. | २३. विशेष्यनिघ्नाध्यायः. |

१४. सङ्कीर्णाध्यायः.
१५. उक्तशेषाध्यायः—
अनेकार्थाधिकारे त्र्यक्षराध्यायः.
नानार्थाधिकारे चतुरक्षराध्यायः.
अनेकार्थाक्षराधिकारे पञ्चाक्षराध्यायः.
अनेकार्थाधिकारे एकाक्षराध्यायः.
अनेकार्थाव्ययैकाक्षराध्यायः.
अनेकार्थाव्ययः.
द्व्यक्षराध्यायः.
अव्ययाध्यायः.

---

R. No. 2437.

Paper. 10¾ × 9¼ inches. Foll. 52. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of Śrī-Mānavikrama Anujan Kuññuṇṇi Rājā of Paḍiññāra Kōvilagam, Calicut.

रामायणचम्पूप्रबन्धः.

RĀMĀYAṆACAMPŪPRABANDHAḤ.

Foll. 1*a*—52*a*. Fol. 52*b* is left blank.

Similar to the work described under No. 12256 of the D.C.S. MSS., Vol. XXI.

Breaks off in the Yuddhakāṇḍa.

**Beginning:**

अस्त्यम्बोधरचुम्बसौधशिखरश्रेणी(नि)षण्णाङ्गना-
गीताकर्णनतत्पराम्बरचरप्रस्तूयमानप्रथा ।
सूर्यस्यान्वयजन्मनां क्षितिभुजां साधारणं मन्दिरं
लक्ष्मीधाम परं ललामरचना भूमेरयोध्या पुरी ॥

अस्ति किल जगत्त्रयपरित्राणलीलाविचक्षणामक्षतभुजद्रविणभूषणानामुज्ज्वलयशःप्रसरचन्द्रिकानिष्यन्दनित्यविकस्वरसुजनमनस्कारकैरवाकराणाममेयमहिमाद्भुतानाम्,

* * * *

सरय्वा परिशोभमानपरिसरमवनिवनितातिलकायमानं पुरोत्तममयोध्या नाम ।

तामावसद्दशरथस्सुरवन्दितेन सङ्क्रन्दनेन विहितासनसंविभागः ।
वृन्दारकारिविजये सुरलोकलब्धमन्दारमाल्यमधुवासितवासभूमिः ॥

* * * *

**Colophon:**

इति रामायणे चम्पुकाव्ये बालकाण्डं समाप्तम् ॥

**End:**

तौ सुग्रीवविभीषणौ रघुपतिः पार्श्वद्वये मानयन्
सौमित्रिं पुरतः प्रभञ्जनसुतं भृत्यं पुरस्कृत्य च ।
युक्तो वानरसेनया सकलया राजेन्द्रचूडामणिः
तीर्त्वाम्भोनिधिमादधौ च शिबिरं लङ्कोपरद्वारि सः ॥
तेनोत्तीर्य पथा लङ्कां रोधयामास पिङ्गलैः ।
द्वितीयहेमप्राकारं कुर्वद्भिरिव वानरैः ॥

तदनु—उत्तीर्णसागराणामुद्धतभुजवीर्यसम्पदां कपिवीराणामुत्कटहिक्कानादमेदुरैराशरवरपुटभेदननिकटनिविरोसवर्तिनां रक्षसामट्टहासमिलितैश्च सिंहनादैरितरेतरं व्यतिभवद्भिरभ्रगुणमयमिव त्रिभुवनता . . . . .

---

R. No. 2438.

Paper. 10¾ × 9¼ inches. Foll. 52. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Kappaganthula Rāmā Śāstri of Cocanada, Godāvari district.

तर्कसङ्ग्रहदीपिकाव्याख्या—प्रभा.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ : PRABHĀ.

By Nārāyaṇatīrtha, a disciple of Śrīrāmatīrtha. Same work as that described under R. No. 1044 ante.

Complete.

---

R. No. 2439.

Paper. 10¾ × 9¼ inches. Foll. 30. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of Śrī-Nilambūr Rāja, Nilambūr, Malabar district.

तर्कसङ्ग्रहव्याख्या.

TARKASAṄGRAHAVYĀKHYĀ.

Foll. 1a—28a. Foll. 28b—30 are left blank.

A commentary on the Tarkasaṅgraha of Annambhaṭṭa; by Śaṅkara. In the colophon at the end it is stated that Nyāyabōdhini

is complete. Probably Nyāyabōdhinī is the name of the commentary. There are two stanzas at the end, wherein it is stated that Harihara composed a work and that he lived at Snēhapurī, near Pāpanāsa, on the banks of the river Tāmraparṇī.

Complete.

**Beginning:**

नमो नगेन्द्राधिपकन्यकावस्फुरत्पदाम्भोजपरागभाजे ।
विघ्नाद्रिसंभेदनटङ्कराजत्कराम्बुजायादिसुपूजिताय ॥
गुरोः पदद्वन्द्वविचिन्तयाप्तप्रसाददूरीकृतमोहजालः ।
विमत्सराणां विदुषां मुदर्थं ह्यज्ञस्य लोकस्य च बोधनाय ॥
करोमि यत्नं खलु तर्कसंग्रहव्याख्यानरूपं वृषकेतुमानसः ।
प्राचीननव्योभयसिद्धयुक्तिकं समाश्रितोऽद्भुतदयावशादहम् ॥

प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिसमाप्तिकामनया शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति—निधायेति । ननु मङ्गलं न विघ्नध्वंससमाप्तिकारणं नास्तिकादिग्रन्थे तद्दर्शनाभावेऽपि कादम्बर्यादौ तद्दर्शनादन्वयव्यभिचारादिति चेन्न । शिष्टाचारानुमितश्रुत्या मङ्गलस्य समाप्तिहेतुत्वावगमात् ।

**End:**

काणादेति । काणादं कणादऋषिप्रणीतं षट्पदार्थप्रतिपादकं, न्यायं गौतमप्रणीतं षोडशपदार्थप्रतिपादकम्, एतच्छास्त्रद्वयप्रमेयाणामपि सप्तत्वेन संगृह्य निरूपणादुभयोरपि शास्त्रयोः व्युत्पत्तिरस्य प्रकरणस्य फलमिति भावः ॥

तर्कसंग्रहवृत्तिमिमां बुधशङ्करो मुदितान्तर आतनोत् ।
प्रीयतां परमेश्वर एनया सर्वलोकहृदन्तरवस्थितः ॥
हरिहर इति विद्वान् कश्चिदासादितात्मा-
रमणगुरुकृपाम्भःपूर्णनेत्रत्रिभागः ।
विगलितकलुषाणां पण्डितानां मनोज्ञं
ह्यकृत परमसूक्ष्मालोकनानां निबन्धम् ॥
शिवगिरिरमणश्रीपापनाशेशमौलि-
स्थित(व)रलसदिन्दुक्षालिताम्ब्याखिलाशे ।
शिवतरघटनाश्रीताम्रयोर्मध्यदेशे
घटजमुनिनिवासे स्नेहपुर्यां स्थितस्सन् ॥

**Colophon:**

इति न्यायबोधिनी समाप्ता ॥

## R. No. 2440.

Paper. $10\frac{1}{4} \times 9\frac{3}{4}$ inches. Foll. 250. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. of Śrī V. K. Kuṭṭi Ēṭṭan Rājā of Pudiyakōvilagam, Calicut.

Fol. 250 is left blank. Bound in two volumes.

### महाभारतसङ्ग्रहः.

### MAHĀBHĀRATASAṄGRAHAḤ.

A poem narrating chiefly the story of the Mahābhārata, in the words of the original as far as possible; by Mahēśvara.

Contains the Ādi, Sabhā and the Āraṇya Parvans.

**Beginning:**

श्रीमान् पौराणिकस्सूतः कदाचिद्रौमहर्षणिः ।
उग्रश्रवा नाम पुण्यं नैमिशारण्यमागमत् ॥
वर्तमाने शौनकस्य सत्रे द्वादशवार्षिके ।
तत्रासीनान्मुनीन् सर्वान प्रणमन् संप्रहृष्टधीः ॥
कथाश्चित्राः श्रोतुकामा मुनयस्सूतनन्दनम् ।
पर्यपृच्छंश्च तान् प्रीतान् पप्रच्छ स च कौशलम् ॥
तेऽभिनन्द्य समासीनास्तमाहुस्संश्रितासनम् ।
कुत आयासि को देशस्त्वया चरित इत्यपि ॥
विप्रान् स प्राह सुप्रीतांस्तत्रागच्छन्यदृच्छया ।
सर्पसत्रं यथा राजा चकार जनमेजयः ॥
या वैशम्पायनात्तत्र शुश्राव जनमेजयः ।
कथास्ता व्यासकथिता अश्रौषं भारताश्रिताः ॥
पराध्यानि परिक्रम्य तीर्थान्यायतनानि च ।
समन्तपञ्चकं नाम तद्देशं गतवानहम् ॥
कुरूणां पाण्डवानां च सर्वेषां च महीभुताम् ।
भवतां सवि(न्नि)धौ तस्माद्दिदृक्षुरहमागतः ॥
श्रोतुं किमिच्छथेत्युक्ता मुनयस्तु तमब्रुवन् ।
पारीक्षितेन व्यासोक्ता या वैशम्पायनाच्छ्रुताः ॥
ताः कथाः श्रोतुमिच्छामो महाभारतसंज्ञिताः ।
समन्तपञ्चकमिति यदुक्तन्तत्किमुच्यताम् ॥

अक्षौहिण्याः प्रमाणं किं पूर्वमेतच्च कथ्यताम् ।
इति तैरुदितस्सूतः मुनिभिर्मुदितात्मभिः ॥
वेदव्यासमुनिं नत्वा प्रवक्तुमुपचक्रमे ।
ब्रह्मणोऽनुज्ञया व्यासः प्रेक्ष्य ज्ञानदृशाखिलम् ॥
ध्यानारूढस्त्रिभिर्वर्षैश्चक्रे भारतसंहिताः ।
त्रेताद्वापरयोस्सन्धौ रामः क्षत्रकुलं मुहुः ॥
हत्वा पञ्च ह्रदांश्चक्रे क्षतजैः क्षत्रियाङ्गजैः ।
तर्पयित्वा पितॄंस्तत्र व्यरंसीद्विप्रयाचनात् ॥
समन्तपञ्चकाख्यस्य यो देशस्तत्समीपतः ॥

* * * *

**Colophon:**

इति श्रीमहाभारतसंग्रहे महेश्वरकृते संभवपर्वणि वेदोद्भवचरितं नाम प्रथमोऽध्यायः ॥

**End:**

मया हरिणरूपेण विप्रस्यारणिराहृता ।
आदत्स्व तामिमं यत्तत्काङ्क्षितं रूपमस्तु वः ॥
अज्ञातवासिनो युष्मान् न विज्ञास्यन्ति केचन ।
इति दत्वा वरं तस्मै धर्मस्तत्र तिरोदधे ॥
धर्मे प्रयाते सति धर्मपुत्रो विप्राय तस्मा अरणिं प्रदाय ।
सहानुजैस्तैर्मनुजेश्वरोऽसौ निकेतनं तन्निजमाजगाम ॥
धर्मस्य धर्मात्मभवस्य पुण्यं संवादमेतं सममादरेण ।
पठन्ति शृण्वन्ति लिखन्ति ये ते प्रक्षीणपापास्सुखिनो भवन्ति ॥

**Colophon:**

इति श्रीमहाभारतसंग्रहे आरण्यपर्वणि द्वात्रिंशोऽध्यायः ॥
आरण्यपर्व समाप्तम् ॥

---

R. No. 2441.

Paper. 10¾ × 9½ inches. Foll. 52. Lines, 20 in a page. Malayalam. Good.

Transcribed in 1917-18 from a MS. of Śri-Nilambūr Rāja Nilambūr, Malabar district.

(a) മുഹൂൎത്തപദവീവ്യാഖ്യാ.

MUHŪRTAPADAVĪVYĀKHYĀ.

Foll. 1a—41b.

Complete.

See the miscellaneous part of this catalogue.

---

(b) व्यवहारमालिका.

VYAVAHĀRAMĀLIKĀ.

Foll. 42a—52b.

Similar to the work described under R. No. 1850 ante.

Incomplete.

**Beginning:**

नमस्ते नरसिंहाय भक्तानुग्रहकारिणे ।
अजाय बहुरूपाय सर्गस्थित्यन्तकारिणे ॥
मनुमुख्यसरस्समुद्भवैः सुकुमारैः प्रसवैर्वचोमयैः ।
त्रिदिवासिफलैर्नृपोचितां रचयामि व्यवहारमालिकाम् ॥

श्रीनारदः—

मनुप्रजापतिर्यस्मिन् काले राज्यमबूभुजत् ।
धर्मैकतानाः पुरुषास्तदासन्सत्यवादिनः ॥
तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः ।
नष्टे धर्मे मनुष्येषु व्यवहारः प्रवर्तितः ॥
द्रष्टा च व्यवहाराणां राजा दण्डधरः कृतः ॥
व्यवहारान् दिदृक्षुस्तु ब्राह्मणैस्सह पार्थिवः ।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम् ॥

* * * *

नृपस्य व्यवहारावलोकनधर्मः—

मनुः—

यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम् ।
तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं कार्यदर्शने ॥
सोऽस्य कार्याणि संपश्यन् सभ्यैरेवं त्रिभिर्वृतः ।
सभामेव प्रविश्याग्र्यमासीनस्स्थित एव वा ॥

**End :**

बृहस्पतिः—

यन्नामगोत्रैस्तुल्यं हि लेख्यकन्तु क्वचिद्भवेत् ।

अगृहीते धने तत्र कार्यो दिव्येन निर्णयम् ॥

क्रियावादः—

सन्दिग्धेषु तु कार्येषु द्वयोर्विवदमानयोः ।

दृष्टश्रुतानुभूतत्वात् साक्षिभ्यो व्यक्तिदर्शनम् ॥

समक्षदर्शनात् साक्षी विज्ञेयः श्रोत्रचक्षुषोः ।

साक्षी द्विभेदो विज्ञेयः(सोऽ)कृत एकोऽपरैः कृतः ॥

---

R. No. 2442.

Paper. $10\frac{1}{4}\times9\frac{1}{4}$ inches. Foll. 164. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of Śri-Nilambūr Rāja, Nilmbūr, Malabar district.

(a) शिवधर्मः.

ŚIVADHARMAḤ.

Foll. 1a—73a.

Contains the following topics :—

१. भक्तिलक्षणाध्यायः.
२. लिङ्गार्चनविधिः.
३. लिङ्गोत्पत्त्यध्यायः.
४. प्रासादाध्यायः.
५. शिवार्चनपुण्याध्यायः.
६. षडक्षरशिवार्चनजपोपासन-फलप्रकरणसहितशान्त्य-ध्यायः.
७. दानधर्माध्यायः.
८. शिवप्रदानफलाध्यायः.
९. लिङ्गमहाव्रताध्यायः.
१०. उपवासविधिरुभयमुखीदान-विधिः.
११. शैववर्णाश्रमधर्मनिरूपणम्.
१२. शिवविद्याशाखोपशाखसमु-द्देशः.

Same work as that described under No. 5507 of the D.C.S. MSS., Vol. XI, wherein see for the beginning.

Complete in Adhyāyas 1 to 12.

**End :**

ईशानमीशमीश्वरो ब्रह्मा सदाशिव नमोऽस्तु ते ।

धर्मार्थ काममोक्षाय सर्वभूतानुकम्पया ॥

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वस्सुगतिमाप्नोति सर्वस्य भवतां शिवम् ॥

**Colophon:**

इति श्रीशिवधर्मशास्त्रे नन्दिप्रोक्तायां संहितायां शिवविद्याशालोपशास्त्रसमुद्देशो नाम द्वादशोऽध्यायः ॥ शिवधर्मस्समाप्तः ॥

---

(*b*) शिवधर्मोत्तरखण्डः.
ŚIVADHARMŌTTARAKHAṆḌAḤ.

Foll. 73*b*—163*b*. Fol. 164*a* gives the contents of the work.

Same work as that described under R. No. 1356 ante.

Complete in 12 Adhyāyas.

---

R. No. 2443.

Paper. 10⅝ × 9⅞ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Karuṇākara Menon of Chalapuram, Calicut.

नीतिसारपञ्चिका—जयमङ्गला.
NĪTISĀRAPAÑCIKĀ: JAYAMAṄGALĀ.

A commentary on the Nītisāra of Kāmandaka described under No. 3880 of the D.C.S. MSS., Vol. VIII. The commentary is called Jayamaṅgalā.

Breaks off in the fourth Prakaraṇa of the second Sarga.

**Beginning:**

नमः शास्त्राय महते त्रिवर्गस्यैकयोनये ।
नमस्तस्य प्रणेत्रे च कौटिल्याय महर्षये ॥
कामन्दकीये किल नीतिसारे प्रायेण नास्मिन् सुगमाः पदार्थाः ।
तस्माद्विधास्ये जयमङ्गलाख्यां तत्पञ्चिकां सर्वविदं प्रणम्य ॥

यस्य प्रभावादित्यादि । अस्य श्लोकस्यादावुपन्यासो विघ्नोपशमनार्थः । शास्त्रमारभ्यमाणं पूज्यपूजनपूर्वकमविघ्नितप्रसरं भवतीति । तत्र प्रजापालनार्थमिदं शास्त्रं तत्पालने च साक्षादधिकृतः स्थितिकर्ता जगतो विष्णुः। पालनशक्तिश्च तस्यैव । यथा(दा)हुः पौराणिकाः—

स्थितिकर्तास्य जगतो विष्णुरेव सनातनः ।
न हि पालनसामर्थ्यमृते सर्वेश्वरं हरिम् ॥

इति । तदनु तदंशभूतास्तदनुप्रवेशाप्यायितशक्तयश्च शक्रादयो देवाः स्वायंभुवादयो मनवः तद्वंशप्रसूताः स्वयं विष्णुनानुप्रविश्योपबृंहिता राजानश्च । यथोक्तम्—

शक्रादिरूपी परिपाति विश्वमर्केन्दुरूपश्च तमो हिनस्ति ।
पाकाय योऽग्नित्वमुपेत्य लोकान् बिभर्ति पृथ्वीवपुरव्ययात्मा ॥

* * * *

राजविद्याप्रियतयेति किंचिदेव शास्त्रं कस्यचित्प्रियम् । वयमर्थशास्त्रप्रियत्वाद्राजविद्याविदामृतमुपदेक्ष्यामः । नान्यशास्त्रविदां संक्षिप्तग्रन्थं कौटिल्यशास्त्रात् । तद्धि साशीतिप्रकरणशतम्, षट् श्लोकसहस्राणि । इदं च षट्त्रिंशत्प्रकरणं सपादं च श्लोकसहस्रं पुनरारम्भप्रयोजनमेतत् । एवं च मन्दबुद्धीनां सुखोपलब्धिज्ञापनार्थं काव्यचिह्नमूतं सर्गोपनिबन्धनमस्योपपन्नम् ।

* * * *

**Colophon:**

विद्यावृद्धसंयोगो द्वितीयः प्रकरणम् ।
इति नीतिसारपञ्चिकायां प्रथमस्सर्गः ॥

**End:**

एवं च ज्ञानविद्याधिकारास्तस्योऽप्यन्याः कर्मविद्याः व्यापारव्यायामप्रयोजा-(ज)ना उक्ताः ।

**Colophon:**

विद्याविभागस्तृतीयं प्रकरणम् ॥

एवमालोच्य लोके प्रवर्तितविद्यश्चतुर्वर्णाश्रमलक्षणं लोकं स्वधर्मकर्मसु व्यवस्थापयेदिति तद्व्यवस्थाप्यते ।

* * * *

गृहस्थस्य गृहे सतो यज्ञशीलत्वात् भूशय्या अनास्तरणायां भूमौ शयनमजिनं मार्गं वैयाघ्रं वा वने वासः । न ग्रामे । पयो जलम् । नीवार अकृष्टपच्यो व्रीहिः । व्रतचरितेति— तस्यापत्ये सङ्कुमितगार्हस्थ्यधर्मस्य सपत्नीकत्वेऽपि ब्रह्मचर्यप्.

## R. No. 2444.

Paper. 10¼ × 9¾ inches. Foll. 396. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Bhagavati Kāśināthaśāstrigāru of Kotipalli, Ramachandrapuram taluk, Godavari district.

Bound in 3 volumes.

लघुमञ्जूषाव्याख्या—कला

LAGHUMAÑJŪṢĀVYĀKHYĀ—KALĀ.

A commentary called Kalā on the Vaiyākaraṇasiddhāntalaghumañjūṣā which work is described under No. 1489 of the D.C.S. MSS., Vol III, by Pāyagoṇḍa Vaidyanātha who refers to a commentary on the Vēṇīsaṁhāra. The commentator gives the date of the commentary as 1842 (Vikrama Śaka), Nala year.

Complete.

**Beginning :**

रामं नाम घनश्यामं निकामहृदयङ्गमम् ।
कामं वन्दे जगद्धाम विश्रमं वचसां सताम् ॥
अमन्दगुणमन्दिरं विमलरत्नविद्याङ्कुरं
कलाधरकृताधरं कलितचित्रलक्ष्मीवरम् ।
शिरोधृतनदीवरं शिवकरं रमोमावरं
नमामि दुरिताहरं गुरुवरं सुनागेश्वरम् ॥
मञ्जूषाख्यस्य मुक्तादेर्न लाभं कलया विना ।
वैयाकरणसिद्धान्तज्ञानस्यापि यथा तथा ॥
अतस्तदाख्यां विद्धामि मञ्जूषायाः प्रयत्नतः ।
पायगुण्डो वैद्यनाथभट्टः कुर्वे स्वबुद्धये ॥
कर्तुं न जाने रचनां समर्थां न चाप्यलं चाबुधबोधनाय ।
अहं प्रवृत्तोऽस्मि तथापि तस्यां विश्वप्रणोदश्शरणं हृदिस्थः ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं स्वेष्टदेवतानमस्काररूपं मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतॄणामनुषङ्गतो मङ्गलाय च निबध्नन् चिकीर्षितं प्रतिजानीते — नागेशेति । स्वकीर्त्यनुवृत्त्यर्थं स्वनामोल्लेखोऽयम् । तत्रापि तिङन्तकृदन्तवाच्यक्रियाकर्तृत्वेन प्राधान्यादादौ तत्कीर्तनम् । भट्टत्वं चतुःशास्त्राभिज्ञत्वम् । स्पष्टञ्चेदं वेणीसंवरणव्याख्यायाम् ।

वैयाकरणानां पाणिन्यादीनां ये सिद्धान्तास्तेषां मञ्जूषेव मञ्जूषा यथा सम्पुटकः सकलमणिमुक्तादीनां सङ्ग्राहकः तथायमपि । तदाख्यो ग्रन्थस्सकलवैयाकरणसिद्धान्तसङ्ग्राहक इत्यर्थः । एतेन भूषणादिग्रन्थादेव वैयाकरणसिद्धान्तज्ञानेऽयं ग्रन्थो व्यर्थ इत्यपास्तम् । तत्र सकलसिद्धान्ताभावान्मञ्जूषात्वोल्लेखनेदमपि सूचितम् ।

* * * *

असिद्धान्तत्वेनात्र प्रक्रियांशमात्रत्यागेऽपि स्फोटान्यसिद्धान्तानामप्यवास्तवत्वात् तत्स्फोटस्यैव वास्तवत्वाद्वक्ष्यमाणविचाराणामप्यवास्तवतां ध्वनयितुं व्याकरणशास्त्रतात्पर्यविषयीभूतं सकलसिद्धान्तेषु प्रधानसिद्धान्तं तावदाह—तत्रेति । सकलसिद्धान्तानां मध्य इत्यर्थः । वाक्यस्फोट इति । स्फुटति प्रकाशतेऽर्थोऽस्मादिति स्फोटः । वाचक इति यावत् । तथाच वाक्यस्फोटो नाम वाक्यं वाचकमित्यर्थः ।

End:

रामरामात् रामरामभट्टाचार्यात् । वादीति । कक्षं तृणम् । तत्र रूपकम् । रामतः रामसिंहादुमया सहितः अस्य ग्रन्थकर्तुः पण्डिते सति । पण्डितैरिति पाठान्तरम् । अत्राद्यो युक्तः । उपस्थेन स्वस्य पयोधित्वेन शास्त्रस्य रामत्वेन रामरामस्याध्यासः । नापुत्रस्य लोकोऽस्तीत्यादि श्रुत्यगोचरायाह । शब्देन्दुशेखरमिति । स्वमतौ पत्नीत्वं . . . विवादिति ॥

द्विसागरवसुक्ष्पाकरसंमितवत्सरे ।
नलाख्ये मोष्ठमासे च वृषस्थे च दिवाकरे ॥
कृष्णपक्षे धर्मतिथौ रोहिणीधृतिसंयुजि ।
इन्दुवारे दाशशेषे कला वै पूर्तिमागता ॥

Colophon:

इति श्रीमत्पायगोण्डोपाख्यवैद्यनाथविरचिता मञ्जूषाविवृतिः कला समाप्ता ॥

---

R. No. 2445.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 98. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of Sri Nilambur Raja, Nilambur, Malabar district.

शब्दसाम्राज्यम्.

ŚABDASĀMRĀJYAM.

Foll. 1a—97a. Fol. 97b is left blank.

A grammatical treatise explaining the formation of words in accordance with certain Sūtras and commentary thereon. The Sūtras belong to the Bhōjīyavyākaraṇa. The other systems such as Pāṇinīya, Candra, Śākaṭāyana, Kalāpa, etc., and works and authors such as Bhāgavṛtti, Durga, Maitreya, Rakṣita, Vāmana, Jayāditya, Sudhākara, Kṣīrnasvāmin, etc., are mentioned by names. The author's name is not given but the work (the name of which is not stated) is said to have been written at the command of Kṛṣṇacandra.

Contains the Subanta-Sāmrājya complete and the Tiṅanta Sāmrājya incomplete.

**Beginning:**

प्रकृतिप्रत्ययाभ्यां यत् ब्रह्मतत्त्वं विवर्तते ।
तदेतत्कृष्ण इत्यादिमूर्त्या किञ्चिद्विविच्यते ॥

तत्र तावत् ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येय इत्येकश्शब्दस्सम्यक् ज्ञातश्शास्त्रान्वितस्सुप्रयुक्तः स्वर्गे लोके कामधुक् भवतीति चागमान्नित्यतया काम्यतया चाध्येये व्याकरणे लाघवेन तत्प्रवृत्त्यर्थमणाद्याः प्रत्याहारा उच्यन्ते । तदर्थं च विशिष्टक्रमानुबन्धाभ्यां लोकसिद्धा वर्णा उपदिश्यन्ते.

अइउण्, ऋऌक्, ए ओङ्, ऐ औच्, हयवरलण्, ञमङणनम् झभञ्, घढधष्, जबगडदश्, खफछठथचटतव्, कपय्, शषसर्, हल्.

आदिरितान्त्येन स मध्यः ।

आदिरन्त्येनाक्षितो मध्यैस्सह ग्राह्यः । प्रत्येकं वाक्यपरिसमाप्तिरिति नीत्या आदिमध्याः प्रत्येकं ग्राह्या इत्यर्थः ।

* * * *

इत्थं सिद्धे शास्त्रमुखे प्रकृत्याद्युपाधिकल्पनया शब्दतत्त्वं विविच्यते । तच्च शास्त्रे सुबन्तं तिङन्तं च । तयोस्तु वाक्यद्वारा प्रयोगार्हत्वात् वाक्येषु च सुबन्तप्राचुर्यात्तस्यैव पुंलिङ्गाद्यज्झलन्तप्रकृतिक्रमेणादौ विवेकः ।

* * *

शसादौ सुप्येषां पदाद्या वा स्युः पत्सु । अत्र दस्य द्वित्वे कृते दयोश्चर्त्वम् तदसिद्ध्या खयभावाच्छरो द्वित्वं न । ततोऽनुनासिकद्वितीयौ । तदत्र चान्द्रपाठक्रमानुसारात् भोजीयानामष्टौ रूपाणि ।

* * * *

तदित्थमुक्तान्येव तत्तल्लक्षणान्यनुक्तेष्वप्यङ्गेषु यथार्हमूह्यानि ।

एतत्सुबन्तसाम्राज्यमेधितं नयसम्पदा ।
कृष्णचन्द्राज्ञया गुप्तं कृतार्थयतु सर्जनात् ॥

अथ कृष्ण इत्यादिकारककाङ्क्षितक्रियाप्रधानः तिङन्तं परस्मैभाषादिशब्विकरणाद्यज्झलन्तधातुक्रमाद्विविच्यते ।

**End:**

अत एव पुषादिद्युताद्यॢकारानुबन्धा(द)र्तिसर्तिशास्तिभ्यश्च परस्मा इत्येकीकृतं कौमारैः । भागवृत्तौ च यथाश्रुतं यथाभाष्यं च सूत्रं व्याख्यातम् । यच्चाहुः—शासिसाहचर्यात(ॠ)सृ गताविति जुहोत्यायोः ऌृसशापोरिह ग्रहणम्; न त्वृ गतिप्रापणयोः, सृ गताविति भ्वाद्योः । तद्वृत्तिषो तु अविशेषात् द्वयोरप्यर्त्योः । तत्रान्त्ये सिनुदाहृतिरविरुद्धा इति तन्न—न हि वृत्त्यनुरोधेन भाष्यसङ्कोचः, प्रबलविरोधे हि बाधैव दुर्बलस्य । तदत्र भोजीयानामपि पाणिनीयानुसारेण नानिष्टार्थन्यायात् सर्व्यादेर्न तङ्चङ् ।

* * * *

इष्ठनि हि यत् फिपः कार्यं तण्णावतिदिश्यते । नचेष्ठनि । फिट् नापि फिपः भूश्च यिट्सन्नियोगशिष्टत्वान्न । न्यासे तु भावयति चिस्त्यादिः । श्येनीमाचष्टे श्येतयति ।

यचि तद्धिते ॥

अस्मिन् विषये स्त्री पुंवत्स्यात् । श्येतैतहरितरोहितानाद्वा तश्च नः एभ्यः स्त्रियां ङीप् वा स्यात्, नश्चैषां तकारस्य ।

---

R. No. 2446.

Paper. 10⅝ × 8⅜ inches. Foll. 180. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Maḍabhūṣi Kṛṣṇamacāryulu garu of Kotipalli, Godāvari district.

प्रसन्नराघवव्याख्या—फलवती.

PRASANNARĀGHAVAVYĀKHYĀ-PHALAVATĪ.

A commentary on the well-known drama, Prasannarāghava of Jayadēva. By Narasiṁhapaṇḍita alias Rājarāya, son of Mālavāmbā and Sūrāmātya of Bhāradvājagōtra. The author was the disciple of Vēṅkaṭācārya and it is stated herein that Rāmānujācārya, son of Kṛṣṇadēśika of Bāladhanuṣmat (Iḷayavilli) family also studied under this

Vēṅkaṭacārya. The work is said to have been commenced at Nūtanapurī on the 11th day of the dark fortnight of the month of Kārttika in the year Hēvilambi.

Complete.

**Beginning:**

श्रीमद्वालधनुष्मदन्वयसुधाकूपारतारेश्वरः
सद्गुणावान् गुरुकृष्णदेशिकतनूजातः कविग्रामणीः ।
श्रीमद्वेङ्कटदेशिकस्य निकटे संप्राप्तविद्यो भुवि
ह्यस्ति श्रीपतिपादपद्मभपलो(जको) रामानुजार्यस्सुधीः ॥
जीयाच्छ्रीवेङ्कटाचार्यः निगमान्तविचक्षणः ।
योऽनेडमूकं मां कृत्वा शिष्यं रक्षितवान् द्रुतम् ॥
ध्यात्वा वेङ्कटशैलेशं नत्वाचार्यपदाम्बुजम् ।
प्रसन्नराघवव्याख्यामारप्स्ये लिखितुं मुदा ॥
हेविलम्ब्यब्दकार्त्तीककृष्णैकादश्यहर्मुखे ।
लोकोपकारःशेमुष्या नूत्नपुर्यामुपारभत् ॥

इह खलु सकलकविकुलकुवलयसुधानिधिः यो जयदेवनामा कविः नाटकप्रबन्धव्याजेन निखिलपुरुषार्थनिष्यन्दिनीं रामचन्द्रचिन्तनामभिसन्धाय प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिमभिलषन्. "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे" । इति काव्यस्यानेकश्रेयस्साधनतां काव्यालापांश्च वर्जयेदित्यस्यासत्काव्यविषयतां च काव्यादौ मङ्गलस्य कर्तव्यतां शिष्टाचारस्य प्रामाण्यं च पश्यन् आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्यालङ्कारिकपरिपाटीमनुसरन्नाटकादौ कर्तव्यस्य पूर्वरङ्गस्य प्रधानाङ्गभूतामाशीरूपां नान्दीं प्रयुङ्क्ते—चत्वार इति । चत्वारः शार्ङ्गिणः पाणयः श्रेयः प्रथयन्त्विति क्रियाकारकयोजना । चत्वार इत्यत्र चतुरनडुहोरामुदात्त इत्यामागमः ।

* * * *

ननु भगवत्पाणयो विधिलिखितमेव श्रेयो विदधति, श्रेयोऽन्तरं वा । नाद्यः वैयर्थ्यात् । न द्वितीयः विधिलिखितमन्यथाकृत्य श्रेयोऽन्तरविधानस्याशक्यत्वात् इत्याशङ्क्याह—फालेष्विति । ये पाणयः अब्जभुवः ।

* * * *

**Colophon:**

इति श्रीमद्भरद्वाजान्वयतोयनिधिकलानिधेरसङ्ख्यातमख्यातसंख्यावच्छेमुषीकुवलयवनचन्द्रिकायमाणप्रशस्तकीर्तेः निष्कण्टकीकृतातिविततकणभुङ्मतपरिणाहितरणेर्विपुलतमानुत्तमगौतमसारससरसीकरणतरुणतरणेः फणिपतिभणितसुधाधारापारावारतुषारद्युतेर्निसर्गदुर्गमत्रयीमार्गविरोधिवर्गपलालप्रभञ्जनघनञ्जयायमानोभयमीमांसातिगहनदर्शननूतनारणेः रायरायप्रतिनामकनरसिंहपण्डितविद्वन्मणेः कृतौ प्रसन्नराघवव्याख्यायां फलवत्याख्यायां प्रथमोऽङ्कः ॥

श्रीमन्तं सुषुवे मनीषिहृदयाम्भोजातसूरस्सुतं
सूरामात्यवरस्सरोजनयना श्रीमालवाम्बा च यम् ।
सोऽहं व्याकरणं नृसिंहविबुधस्साङ्के प्रसन्नाभिधे
गूढार्थस्पृशि राघवे रघुपतेराद्याङ्कमन्तर्मुदे ॥

**End:**

जगति देवी भूदेवी मुक्तवैरसरसाहिंसाकर्मविवर्जिता सती शेषस्य फणातल्पेषु खेलतु क्रीडतु । सतां सद्मसु सत्पुरुषगृहेषु अक्षैर्दीव्यात् । क्रीडतु इदमस्त्विति पूर्वेण सम्बन्धः । अत्रैवं शुभदर्शनातिशंसनात्प्रशस्तिर्नाम सन्ध्यङ्गमुक्तं भवति । प्रशस्तिः शुभदर्शनमिति लक्षणात् । अन्ते सर्वपात्रनिर्गम इत्युक्तत्वात् पात्रनिर्गमनं सूचयन् ग्रन्थसमाप्तिमकरोत्—तदानीमित्यादिनेति ॥

**Colophon:**

इति श्रीमद्भारद्वाजसन्तति क्षीरपारावारजैवातृकस्यासङ्ख्यातख्यातसङ्ख्यावच्छेमुषीकुवलयवनचन्द्रिकायमाणप्रशस्तिकीर्तेर्निष्कण्टकीकृतातिविततकणभुङ्मतपरिणाहिसरणेर्विपुलतमानुत्तमगौतमसमयसारसरसीकरणतरुणतरणेः फणिपतिभणितसुधाधारापारावारतुषारघृणेर्निसर्गदुर्गमत्रयीमार्गविरोधिवर्गपलालव्रजघनञ्जयायमानोभयमीमांसातिगहनदर्शननूतनारणेः रायरायप्रतिनामनरसिंहपण्डितविद्वन्मणेः कृतौ प्रसन्नराघवव्याख्याने फलवत्याख्याने सप्तमोऽङ्कस्समाप्तः ॥

---

R. No. 2447.

Paper. $10\frac{1}{4} \times 9\frac{3}{4}$ inches. Foll. 58. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Tiru Srinivasa Varada Tatācaryar of Villiyambakkam, Chingleput district.

रत्नकोशमतवादार्थः.

RATNAKOŚAMATAVĀDĀRTHAḤ.

Foll. 1*a*—58*a*. Fol. 58*b* is left blank.

Same work as that described under R. No. 480 *ante*, by Harirāmatarkālaṅkāra.

Complete.

**Colophon:**

हरिरामतर्कालङ्कारकृतो रत्नकोशविचारस्समाप्तः ॥

## R. No. 2448.

Paper. 10½ × 9¾ inches. Foll. 58. Lines, 20 in a page. Grantha.

Transcribed in 1917-18 from a MS. of M.R.Ry. Tiru. Śrīnivāsa Varada Tātācāryar of Villiyambakam, Chingleput district.

तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Fol. 1*a*—57*a*. Foll. 57*b* contains the name of the owner of the MS. from which this was copied. Fol. 58 is left blank.

By Gadādhara. Same commentary as that described under No. 4940 of the D.C.S. MSS., Vol VIII., on the Tattvacintāmaṇidīdhiti of Raghunāthaśirōmaṇi.

Contains from Pramālakṣaṇapūrvapakṣa which wants the beginning to the end of Anyathākhyātivāda.

**Beginning:**

तत्पदं यथाश्रुतार्थकमेव । न तद्विशिष्टज्ञानपरम् । सहकारियोग्यताया असंसर्गाग्रहरूपतां घटयितुमाह —फलतोऽत्र सहकार्येवेति । तत्सम्बन्धस्य तत्स्वरूपत्वादिति भावः । स च सहकारी च धर्मज्ञानधर्मिज्ञानयोरसंसर्गाग्रहस्य भेदरूपसम्बन्धाभावाग्रहस्य भेदाग्रहपर्यवसितस्य सहकारित्वे युक्तिमाह— ज्ञानयोरिति ।

**End:**

अन्यस्य तद्धर्मभानात्प्रत्ययस्य धर्मिणोऽन्यथा तद्धर्मवृत्तित्वप्रकारेण भानं प्रतीत्यापि न निराकर्तुं शक्यमिति प्रतीत्वे चेत्यस्यार्थमाह— दीधितौ प्रतीतिस्वाभाव्यादिति ।

**Colophon:**

इति गादाधरी समाप्ता । इति प्रामाण्यवादटिप्पणी ॥

R. No. 2449.

**Paper.** 10¼ × 9¼ inches. Foll. 112. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Tiru Srinivasa Varada Tatacaryar of Villiyambakkam, Chingleput district.

कल्पद्रुः.

KALPADRUḤ.

Foll. 1a—111b. Fol. 112 is left blank.

By Kēśava. A dictionary of synonymous terms in three Skandhas. Contains the following topics :—

भूस्कन्ध—

९. सङ्कीर्णकाण्डः wants beginning.
१०. वनौषधिकाण्डः.
११. शरभादिकाण्डः.
१२. पर्वतादिकाण्डः.
१३. अब्ध्यादिकाण्डः.
१४. पातालकाण्डः.
१५. सर्पादिकाण्डः.
१६. नरकादिकाण्डः.
१७. जिनप्रकाण्डः.

भुवस्स्कन्ध—

१. साधारणप्रकाण्डः.
२. देवप्रकाण्डः.
३. नक्षत्रकाण्ड.
४. कालकाण्ड.
५. सत्रानाट्यकाण्ड.

स्वस्स्कन्धः—

१. ब्रह्मकाण्डः.
२. यज्ञादिकाण्डः.
३. अव्ययप्रकाण्डः.
४. लिङ्गप्रकाण्डः.

**Beginning :**

लेशास्तूपपदं गन्धोऽनुबन्धेऽथल्करावपि ।
गालिर्गाली स्त्रियौ क्लीबे विकल्पेऽप्यवमर्षणा ॥
स्यादाक्रोशनमाक्रोशश्शापनं शमनं शयः ।
वप्रस्तु धूलिकेदारः स्फावीतिर्भक्षणं च सा ॥

• • • •

भावप्रधाना ये प्रायः पर्यायेषु च नोदिताः ।
तेऽत्र यत्कीर्तितास्शेषं ज्ञेयं शिष्टप्रयोगतः ॥
कल्पद्रौ केशवकृते नामप्रकृतिबोधने ।
सङ्कीर्णो नवमः काण्डो जातस्संपूर्णतां गतः ॥

**End:**

कुतः कर्तर्यसंज्ञायां कृत्याः कर्तरि कर्मणि ।
अणाद्यन्तास्तेन रक्ता ह्यर्थो नानार्थभेदकाः ॥
षट्संज्ञकास्त्रिषु समाः युष्मदस्मत्तिङव्ययम् ।
परं विधेये शेषं तु ज्ञेयं शिष्टप्रयोगतः ॥
कल्पद्रौ केशवकृते फलिते नामसत्फलैः ।
स्वचादीनां सर्वलिङ्गानां प्रकाण्डस्सिद्धिमागतः ॥
इतीह शब्दकल्पद्रुर्यदि केशवनिर्मितः ।
भूर्भुवस्स्वस्त्रिभिस्स्कन्धैस्संप्राप्तस्सिद्धिमुत्तमाम् ॥

**Colophon:**

इति केशवकृतौ भूर्भुवस्स्वराख्यपर्यायस्कन्धाः संपूर्णाः ॥

---

## R. No. 2450.

Paper. 10⅜ × 8⅜ inches. Foll. 40. Lines, 20 in a page. Grantha. Good.

(a) शब्दब्रह्मविलासः.
**ŚABDABRAHMAVILĀSAḤ.**

Foll. 1a—30b.

Transcribed in 1917–18 from a MS. of M.R.Ry. V. Gōpālācaryar of Villiyambakkam, Chingleput district.

A commentary on the Prātiśākhya explaining certain points apparently contradictory in the two commentaries thereon, viz., Tribhāṣyaratna and Vaidikābharaṇa. By Vīrarāghavakavi of Lakṣmīkumāratātadēśika family at Conjeeveram. The author ascribes the text to the authorship of Hanumat and states that Ātrēya, Māhiṣēya and Vararuci wrote commentaries on it.

Incomplete.

**Beginning:**

वन्दे तं देवमहं छन्दोमयवाहनं श्रुतिश्वासम् ।
अजनि प्रणवकरण्डकमरतकमूर्तिस्त्रयीतनुकुले यः ॥
वेदाद्यास्सर्वविद्या निगममयतनोस्तिग्मभानोरधीत्य
प्राज्ञाग्र्यः प्रातिशाख्यं निखिलबुधजनश्रेयसे यश्चकार ।

बोद्धुं यद्वैभवाब्धिं जगति जडधियो नेशते नाश्रितेनाः
स श्रीमान् रामदूतः कलयतु विमलं मानसं नः प्रसन्नः ॥
लक्ष्मीनन्दनतातदेशिककुलक्षीराब्धिलब्धोदयः
योऽतानीदवनीसुताप्रियतमप्रीत्यै प्रबन्धान् बहून् ।
सोऽयं श्रोत्रियवीरराघवकविः कर्तुं समुज्जृम्भते
शब्दब्रह्मविलासमागमगवीलक्ष्मज्ञमोदप्रदम् ॥
आत्रेयो माहिषेयो वररुचिरपि च प्रातिशाख्यस्य चक्रुः
व्याख्यां भाष्याण्यमीषामनुविदधदयं त्रीणि कश्चिद्विपश्चित् ।
व्यातानीद्भाष्यरत्नं तदनुपदमथाधीरयत्कोऽपि धीरः
किञ्चित्साधिन्तयामः सदसदिह वयं वेदविन्मोदबुद्ध्यै ॥
यत्र त्रिभाष्यरत्नस्य वैदिकाभरणस्य च ।
स्पर्धा बद्धात्र शुद्धार्थमद्धा निर्धारयाम्यहम् ॥
नव्यं करोमि चाक्षेपकौक्षेयकमिहासकृत् ।
नटत्प्रतिभटाटोपपाटनस्फुटपाटवम् ॥

इह खलु निखिलजगदेककारणभूतः परमकारुणिको भगवान् रमारमणस्स्वस्वरूपरूपगुणविभूतिबोधसाधनं सुकृतिजनसुगतिहेतुद्विजातीनां नेत्रमिव वेदशास्त्रं चतुर्मुखेन जगति प्रवर्तयामास । अथ भगवान् जगत्प्राणसूनुः त्रयीतनुसकाशसमासादितं स्वात्मानमिव सीतारमणैकपरायणं नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासीत्यादि श्रुत्वा स्वतावोत्पादितत्वेन स्थापिततया स्वभ्रातृतयाभिमन्यमानं स्वाचार्यमूर्तिमयमाम्नायमखिलमक्षरक्षतिमपि विना रक्षितुं कृतक्षणः प्रतिशाखं लक्षणमाचचक्षे । तत एव तदखिलं प्रातिशाख्यसमाख्यमाचरब्धुः । तत्रेदं तैत्तिरीयशाखामधिकृत्य कृतमथ वर्णसमाम्नाय इत्यादिकं प्रातिशाख्यमध्वर्यवो वयमधीमहे । तदिदं सूत्रमयं लक्षणं ब्रह्मसूत्रादिभ्योऽपि विलक्षणम् ।

* * * *

करिगिरिपरिवृढ सुदृढं भवदुत्सवमेत्य वेदपाठजुषः ।
विदुषः प्रणम्य मूर्ध्ना किमपि निबध्नामि विभ्रहिमातेदपि ॥ !

अथ वर्णसमाम्नायः । शास्त्रारम्भसूत्रमिदम् । अत्र त्रिभाष्यरत्नकारः—

मङ्गलानन्तरारम्भकात्स्न्र्येष्वथो अथेति कोशादथशब्दस्य बह्वर्थसिद्धावप्यौचित्यान्मङ्गलार्थकत्वं प्रथममभिधाय स्वाध्यायाध्ययनानन्तरं लक्षणापेक्षणादध्ययनानन्तर्यमपि तदर्थमभिधाय तदनु स्वयैवेति विनिवर्तकाधिकारधारका इति परिभाषानुरोधादधिकारार्थकत्वमप्यभाषिष्ट । एवं सत्यत्र वैदिकाभरणकारः अथेत्ययं शब्दो अधिकारार्थः प्रयुज्यते नानन्तर्यार्थः ।

**End:**

नचात्र पदग्रहणे परिभाषाविरोधः नानापदवदिङ्ग्यमसङ्ख्यान इति वचनेन पदत्वस्यैव सिद्धत्वादिति चेन्न । अनिङ्ग्यपदस्यामरासुराचला इत्यादिवद्योगरूढत्वादतिप्रसङ्गावकाशविरहादनिङ्ग्यपदेन पदावयवानाम्.

---

(b) चक्रादिधारणप्रमाणम्.

CAKRADIDHĀRAṆAPRAMĀṆAM.

Foll. 31a—35a. Foll. 35b and 36 are left blank.

Transcribed in 1917–18 from a MS. of M.R.Ry. N. Kṛṣṇacakravartiyaṅār of Ketandipatti, North Arcot district.

Explains that the Mantra of the Sāmavēda beginning with the words चमूषच्छ्येनश्शकुनः enjoins the sacrament of Cakrādidhāraṇa (branding the Śrī Vaiṣṇavas on the forearm with the metallic symbols resembling God Viṣṇu's conch and discus).

Incomplete.

**Beginning:**

अन्तस्तमिस्रपरिपच्छतपत्रबन्धोराम्नायमस्तकगुरोश्चरणारविन्दम् ।
ये संश्रिता भुवि जनाः प्रणतेन मूर्ध्ना तेषामदक्षिणपदाम्बुजमुद्वहामः ॥

कविकथकगजानां गर्वभङ्गे प्रवीणो
निगमशिखररूपे कानने न्यस्तचित्तः ।
श्रुतिजननभवभीतिं खण्डयन् कोऽपि सिंहः
शरणमशरणानामस्तु नस्संश्रितानाम् ॥

एवं चमूषमन्त्रोऽपि माने चक्रादिधारणे ।
इत्येवं चिन्त्यते न्यायैः परोक्तिपरिपन्थिभिः ॥

अपि चात्र श्रूयते—चमूषच्छ्येनश्शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत्। अपामूर्मिं सचमानस्समुद्रं तुरीयं धाम महिषो विवक्ति। इति। अत्राचार्यपादाः। गोविन्दस्यायुधानि बिभ्रत् तत एव चमूषदादिपदस्तबकनिरुक्तविशेषोपस्थितैर्गुणैर्विशिष्टस्सन् तुरीयं धाम प्राप्नोतीत्येकवाक्यता संसारनिवृत्तिपूर्वकतुरीयधामप्राप्तिकामो गोविन्दस्यायुधानि बिभ्रदिति विध्यर्थ इत्याहुः। अत्रायमभिप्रायः। अपामूर्मिं जलविकारभूतमित्यर्थः। इहापूछब्द उपलक्षकः।

* * * *

चमूषदित्यादिना फलनिर्देशः। न च चक्रादिधारणस्य संस्कारकर्मतया परार्थत्वात् फलश्रवणमर्थवादस्स्यादिति वाच्यम्। . . . . . सन्निपत्योपकारकतया वा तस्य भगवदुपासनाङ्गत्वेन तद्द्वारा फलवत्त्वसंभवेन साक्षात्फलसाधनत्वांशे अर्थवादत्वस्येष्टत्वात्। अत्र चमूशब्देन नित्यसूरिपरिषद्विवक्षिता। तस्यां सीदतीति चमूषत्। श्येनः शंसनीयं गच्छतीति निरुक्तम्। शक्नोत्यात्मानमुन्नेतुमिति निरुक्तम्।

**End:**

अत्रोच्यते एवं हि चमूषन्मन्त्रे सुदर्शनवाचकपदाभावेन तदध्याहारो वाच्यः। न चाध्याहारं विनापि चमूषन्मन्त्रात् गोविन्दुरायुधानिति श्रुतपदैरेव सुदर्शनप्रकाशोपपत्तौ . . . . . . . . . . . प्रयुक्तः . . . . . . . .

---

(c) साङ्ख्यकारिकाव्याख्या.

SĀṄKHYAKĀRIKĀVYĀKHYĀ.

Foll. 37a—39a Foll. 39b and 40 are left blank.

A commentary on stanza 14 of Īśvarakṛṣṇa's Sāṅkhyakārikā quoted in the Racanānupapattyadhikaraṇa of Rāmānuja's Śrībhāṣya.

Incomplete.

**Beginning:**

अत्र खलु रचनानुपपत्त्यधिकरणभाष्योदाहृतसाङ्ख्यमतसङ्ग्रहकारिकास्तु बालानां सुखबोधाय व्याख्यायन्ते। तथाहि— त्रसरेणुभिरेव त्रसरेणुप्रभृतिक्षितिमहीधरादिकार्यारम्भसंभवे अत्यन्तापरिदृष्टसत्त्वरजस्तमोमयातिविपुलतरना-

नाकार्यशक्तियुक्ताव्यक्तप्रधानाख्यद्रव्यकल्पने मानाभाव इति वदतो वैशेषिकादीन् निराकर्तुं प्रवृत्तान्यनुमानानि सङ्गृह्य प्रातिलोम्येन दर्शयति । भेदानामित्यादिना । भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च ।

कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥

कारणमस्त्यव्यक्तमिति । अत्रायमर्थः । विश्वरूपमेव वैश्वरूप्यमिति स्वार्थे ष्यञ् । षष्ठ्यन्तस्य तस्य कारणमस्त्यव्यक्तमित्युत्तरत्रान्वयः ।

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्तात् ।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥

**End:**

प्रकृतेस्सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति ।
या द्रष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥

---

R. No **2451.**

**Paper.** 10¾ × 9¼ inches. Foll. 212. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Kappakanthula Rāmasastri of Cocanada, Gōdavari district.

Bound in 2 volumes.

सिद्धान्तकौमुदीव्याख्या—चन्द्रोदयः.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: CANDRŌDAYAḤ.

A commentary on the Siddhāntakaumudī. By Kṛṣṇabhaṭṭa, son of Kāmākṣi and Viśvanāthayajvan. The commentator was patronised by Jōgipaṇḍita, son of Ramājikannappa.

Contains a small portion in the beginning of the Saṁjñāprakaraṇa and from about the end of Acsandhi to the end of Samāsāśrayavidhi.

**Beginning:**

सूर्यनारायणं देवं शिवं त्रिपुरसुन्दरीम् ।
गुरूनधिगतार्थांश्च निरन्तरमहं भजे ॥
श्रीविश्वनाथयज्वानं पितरं वैदिकोत्तमम् ।
कामाक्षिनाम्नीं जननीं कलयेऽभीष्टसिद्धये ॥

श्रीमद्रामाजिकल्पतपस्सम्परफलायितः ।
श्रीजोगिविबुधो विद्वत्प्रभुर्विजयतेतराम् ॥
तदाश्रितेन सिद्धान्तकौमुद्याः क्रियते मया ।
व्याख्या चन्द्रोदयप्रख्या कृष्णभट्टाख्यसूरिणा ॥
पूर्वटीकागतान्येव व्याख्यानवचनान्यहम् ।
लिखाम्यथापि तुष्यन्तु सन्तस्तत्कृष्ण लेखनात् ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तये कृतं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते—मुनित्रयमित्यादिना । इयं विरच्यत इत्यन्वयः । मयेति शेषः । रच प्रतियत्ने प्रतियत्नो गुणाधानम् । विपूर्वादस्माद्वर्तमानसामीप्ये भविष्यदर्थे कर्मणि वर्तमानप्रत्ययः । वैयाकरणेति व्याकरणमधीयते विदन्ति वा वैयाकरणाः तदधीते तद्वेदेत्यणि न य्वाभ्यामित्यैच् । तत्सिद्धान्तानां कौमुदी प्रकाशिकेत्यर्थः । निर्दुष्टसकलजनाह्लादकत्वेन साम्येन कौमुदीशब्दप्रयोगः । किं कृत्वा क्रियत इत्यत आह—मुनित्रयमित्यादिना ।

* * * *

Colophon:

इति श्रीमद्रामाजिकल्पसुकृतपरिपाकश्रीमदद्वैतविद्याचार्यश्रीजोगिपण्डितेन परिपालितस्य कृष्णम्भट्टस्य कृतौ सिद्धान्तचन्द्रोदये स्वरसन्धिः ॥

End:

प्रायस्येति—प्रायः पापं विनिर्दिष्टं चित्तन्तस्य विशोधनम् । इति स्मरन्ति । यद्वा प्रायश्शब्दो विनाशवचनः । चित्तिशब्दस्साधने विनष्टानां कर्मणां पुनस्साधनं कर्मेत्यर्थः । प्रायस्य चित्तं प्रायश्चित्तम् । वनस्य पतिः वनस्पतिः । आकृतीति । तेनाविहितलक्षणः सुट् पारस्करादिषु ज्ञेय इत्यर्थः । तेन परश्शता इति, अधिश्रयन्ति जनता परश्शताः इति भावः । शतात्पर इति विग्रहे पञ्चमीति (योगविभागात्समास) इति ॥

Colophon:

इति सिद्धान्तचन्द्रोदये समासाश्रयविधयः ॥

---

R. No. 2452.

Paper. 10¼ × 9¼ inches. Foll. 158. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS obtained through the Sub-Magistrate of Kovvuru, Kistna district.

शुक्लयजुर्वेदभाष्यम्.

ŚUKLAYAJURVĒDABHĀṢYAM.

Foll. 1a—157a. Foll. 157b—158 are left blank.

A commentary on the Kaṇva recension of the Śuklayajurvēda. By Anantācārya, son of Bhāgirathī and Bhaṭṭanāgēśa and grandson of Yallambhaṭṭa. The commentator says that he undertook to write the commentary after consulting several works and for the reason that Mādhavācārya commented only on the first twenty Adhyāyas. The commentary is called Bhāvārthadīpikā.

Contains the commentary on the Adhyāyas 21 to 30.

**Beginning:**

वन्दे श्रीमदनन्तसंज्ञगिरिशं लक्ष्मीनिवासं हरिं
विघ्नध्वान्तदिवाकरं सुरगुरुं सर्वार्थसिद्धिप्रदम् ।
ब्रह्मा शर्वसुरेन्द्रपूर्वकसुरा यस्य प्रसादात् सदा
सर्वारम्भसमाप्तिमीयुरमलं वह्वृचवेदं परम् ॥
नत्वा क्षीराब्धिजाजानि तथा ब्रह्मादिकान् सुरान् ।
गणेशं विघ्नहर्तारं वन्दे हैमवतीसुतम् ॥
चतुर्दशसु विद्यासु निष्णाताश्शुद्धचक्षुषः ।
अपरोक्षब्रह्मतत्त्वा जयन्ति गुरवे नमः ॥
श्रुतिसकलरहस्यं विविलं (बिम्बितं) यस्य चित्ते
मुकुर इव गुरुजं (मुखाब्जं) दोषमालिन्यशून्ये ।
स्वपदविमलभक्त्या यस्य तुष्टो रमेशो
जनकजनकयल्लंभट्टमेनं नतोऽस्मि ॥
वन्दे श्रीपितृचरणान् भट्टनागेशसंज्ञकान् ।
यत्प्रसादादहं मान्द्यः सञ्जातो जडधीरपि ॥
वन्दे भागीरथीमम्बां . . गुणशालिनीम् ।
यत्कृपाप्लवमासाद्य विद्यापारङ्गतोऽस्म्यहम् ॥
समस्तकण्वशाखिभ्यो मूर्धन्येषोऽञ्जलिर्मया ।
बध्यते प्रथमं दृष्ट्वा कृपां कुर्वन्तु ते मयि ॥
व्याख्याता कण्वशाखीयसंहिता पूर्वविंशतिः ।
माधवाचार्यवर्येण स्पष्टीकृत्य न चोत्तरा ॥

अतस्तां व्याकरिष्येऽहमनन्ताचार्यनामकः ।
अनेकग्रन्थमालोच्य दीपिका क्रियते मया ॥
बहूनि सन्ति भाष्याणि प्रणीतानि हि सूरिभिः ।
कोऽप्यऽस्या महिमाविद्योऽभिज्ञै[र्ये]र्ज(ग)ति सर्वतः ॥
न पाण्डित्याभिमानेन न च वित्तस्य लिप्सया ।
दीपिका रच्यते किन्तु लक्ष्मीकान्तस्य तुष्टये ॥
यात्किंचिन्मम चापल्यं क्षाम्यन्तु च विचक्षणाः ।
गुणगृह्यास्सदा सन्तो बालस्य पितराविव ॥

काण्वशाखारहस्यं तु श्रीभागवतविष्णुपुराणयोः—

अस्मिन्नप्यन्वे ब्रह्मन् भगवान् लोकभावनः ।
ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ॥
पराशरात्सत्यवत्यामंशांशकलया विभुः ।
अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ॥
ऋगथर्वयजुस्साम्नां राशिमुद्धृत्य सर्वशः ।
चतस्रस्संहिताश्चक्रे सूत्रैर्मणिगणा इव ॥
तासां स चतुरः शिष्यानुपहूय महामुनिः ।
एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ॥
पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ।
वैशम्पायनसंज्ञाय निगदाख्यं यजुर्गुणम् ॥
साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ।
अथर्वाङ्गिरसं प्राह स्वशिष्याय सुमन्तवे ॥
तैश्च शिष्यप्रशिष्यादिद्वारा शाखाः प्रवर्तिताः ।
वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन् ॥
ये चरु(रुः) ब्रह्महत्यांहःक्षपणं स्वगुरोर्व्रतम् ।
याज्ञवल्क्यस्तु तच्छिष्यमाहाह भगवन् कियत् ॥
चरितेनाल्पसाराणां चरिष्येऽहं सुदुष्करम् ।
इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ।
विप्रावमन्त(त्वं)च्छिष्येण मदधीतं त्यजाश्विति ॥

देवरातसुतस्सोऽपि छर्दित्वा यजुषां गणम् ।
ततो गतोऽथ मुनयः ददुः शुक्लान् यजुर्गणान् ॥
भूत्वा तित्तिरयो ब्रह्मन् तल्लोलुपतया ददुः ।
तैत्तिरीया इति यजुश्शाखा आसन् सुपेशलाः ॥
याज्ञवल्क्यस्ततो ब्रह्मन् छन्दांस्यतिगवेषयन् ।
गुरोरविद्यमानानि सूपं तस्यार्कमीश्वरम्(?) ।

ओं नमो भगवते इत्यादिस्तोत्रेण—

एवं स्तुतस्स भगवान् वाजिरूपधरो रविः ।
यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः ॥
यजुर्भिरकरोच्छाखा दश पञ्चशतैर्मुनिः ।
जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः ॥ इति ।

अयातयामानि अगतसाराणि वीर्यवन्तीत्यर्थः । इति द्वादशः स्कन्धः ।

* * * *

**Colophon:**

इति श्रीमदनन्ताचार्यविरचितभावार्थदीपिकायामेकविंशाध्यायस्य प्रथमानुवाकः ।

**End:**

अग्निमद्य । एकाधिका ब्राह्मी गायत्री, सूक्तस्या अथ । ब्राह्म्यनुष्टुप् । एते व्याख्याते । वयोधसे इति । अत्राधिकमिन्द्रविशेषणम् । त्वामद्येति प्रतीकोक्तं सर्वोऽपि पठनीयः, एकाधिकाविकृतिच्छन्दस्कः, अयमपि व्याख्यातः । इति त्रिंशाध्याये चतुर्थोऽनुवाकः ।

**Colophon:**

इति श्रीमन्नागदेवभट्टात्मजेन श्रीमदनन्ताचार्येण विरचितायां भावार्थदीपिकायां काण्वीयसंहिताभाष्ये त्रिंशोऽध्यायस्समाप्तः ॥

अमुना वेददीपेन मया नीराजितो हरिः ।
मच्छ्रमं सार्थकीकृत्य मद्वंशं सर्वदावतु ॥

---

R. No. 2453.

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 68. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Dronamrâju Vêṅkatâchalapati Rao gâru of Pulla, Ellore taluk, Kistna district.

(a) प्रवरनिर्णयः.

PRAVARANIRNAYAH.

Foll. 1a–37b.

Similar to the work described under No. 2922 of the D.O.S. MSS., Vol. V. Authorities are cited herein from Pravaramañjari, Nirṇayasindhu and other works. By Yajñanārāyaṇa, son of Veṅkaṭeśa of Indrakaṇṭhi family.

Incomplete.

**Beginning:**

भजामि भवनन्दनं नतमनोऽम्बुजेन्दिन्दिरं
गजाननमहर्निशं बहुलविघ्नविच्छित्तये ।
शशाङ्कशकलोज्ज्वलन्मकुटबन्धुरं सुन्दरं
सुरासुरजनैर्नुतं निखिलमौनिवृन्दैर्नतम् ॥

* * * *

शुद्धोत्कृष्टेन्द्रकण्ठीकुलजलधिविधोर्वेङ्कटेशस्य सूरेः
पुत्रेण प्रोच्यते सत्स्मृतिनिचयदृशा यज्ञनारायणेन ।
स्मर्तॄणां तोषणाय प्रवरपदलसन्निर्णयं सारभूतं
सूत्राण्यालोच्य सर्वाण्यखिलमुनिमतान्यादरात्सम्यगत्र ॥

अथापरिमितानां गोत्राणां सङ्ख्यानियमो निर्णीयते—

अत्राश्वलायनः—

गोत्राणान्तु सहस्राणि प्रयुतान्यर्बुदानि च ।
ऊनपञ्चाशदेवैषां प्रवरा ऋषिदर्शनात् ॥ इति ॥

गोत्रलक्षणं निर्णयसिन्धौ—प्रवरमञ्जर्यामपि बोधायनेनोक्तम्—

विश्वामित्रो जमदग्निर्भरद्वाजोऽथ गौतमः ।
कश्यपोऽत्रिर्वसिष्ठश्च सप्तैत ऋषयस्स्मृताः ॥ इति ।

सप्तानामृषीणामगस्त्याष्टमानां यदपत्यन्तद्गोत्रमित्याचक्षत इति । गोत्रं वंशपरम्पराप्रसिद्धम् । प्रवरास्तु । मन्त्रानाय बहूनां यैरग्निर्व्रियते ये प्रवरा निष्प्रवराश्च ।

तदुक्तं कल्पकारेण—वासिष्ठेति होता वसिष्ठवदित्यध्वर्युरित्यादिना येषां वर्णमामनन्ति ते प्रवराः ।

**End:**

शातातपोऽपि—

परिणीय सगोत्रां तु समानप्रवरां तथा ।

कृत्वा तस्याः समुत्सर्गमतिकृच्छ्रं समाचरेत् ॥

प्रजामुत्पाद्येवंत् चान्द्रायणं विवाहमात्रेऽतिकृच्छ्रं चरेत्सर्वत्र श्रुतान्तेऽष्टोत्तरशतं मिन्द्राहोमः पत्नीं परित्यक्त्वा तां जननीमिव रक्षेदिति ॥

**Colophon:**

इन्द्रकण्ठी यज्ञनारायणसूरिविरचिते प्रवरनिर्णये कूटस्थसम्बन्धनिर्णयः ॥

---

(*b*) प्रवरनिर्णयः.

PRAVARANIRṆAYAḤ.

Foll. 37*b*—42*a*.

Similar to the above. Āpastamba is saluted in the introductory stanzas and the Āpastambapravarasūtras are quoted.

Incomplete.

**Beginning:**

प्रणिपत्य महात्मानमापस्तम्बं महामुनिम् ।

शास्त्राचारानुगुण्येन वक्ष्ये प्रवरनिर्णयम् ॥

पुरा कदाचित्सर्वेऽपि मिलित्वा धर्मकोविदाः ।

गोत्रप्रवरसम्बन्धमीमांसां बह्वकुर्वत ॥

कयोः कयोश्चित्सम्बन्धो न सम्बन्धः कयोः कयोः ।

इति प्रश्ने च निश्चिक्युरेवं प्रवरनिर्णयम् ॥

तथाहि—

प्रवरान्व्याख्यास्यामः आर्षेयं वृणीते बन्धोरेव नैत्यथो सन्तत्या इति विज्ञायते— इत्यापस्तम्बसूत्रम् ।

शास्त्राचारानुसारेण सूत्रार्थोऽथ विमृश्यते ।

भृगुस्त्वथाङ्गिरश्चात्रिविश्वामित्रोऽथ कश्यपः ॥

**End:**

मौद्गल्यमुद्गलाभ्यां च न विवाहः परस्परम् ।

स्वतन्त्रकपिगोत्रेण भारद्वाजाः प्रयुञ्जते ॥

अस्वतन्त्रं कपेर्गोत्रं न साध्यं विबुधैरपि ।
इत्यादिशास्त्रमालोच्य सदाचारं समाचरेत् ॥

---

(c) कूटस्थगणनाविचारः.

KŪṬASTHAGAṆANĀVICĀRAḤ.

Foll. 42a—43a.

An enquiry into the marriageable relationship by a reference to the common ancestorship among the parties. Parāśara is saluted in the introductory stanza.

Incomplete.

**Beginning:**

प्रणिपत्य महात्मानं पराशरमहामुनिम् ।
कूटस्थगणनाशास्त्रं क्लृप्तं विज्ञाप्यतेऽधुना ॥
वध्वा वरस्य वा मातापितरौ द्वौ प्रयोजकौ ।
मातृपक्षस्य पित्र्यस्य भवेतां नर्मदोत्तरे ॥
षष्ठे चाप्यष्टमे वापि कूटस्थाद्गणने सति ।
मातृपक्षे पितुः पक्षे न स्यात्सापिण्ड्यमुत्तरे ॥
कूटस्थपुरुषोत्पन्नौ पुत्रीपुत्रौ प्रयोजकौ ।
मातृपक्षस्य पित्र्यस्य नर्मदायाश्च दक्षिणे ॥

**End:**

मातृमातृस्वसारं च कन्यकामुद्वहेदिति ।
षष्ठेऽष्टमे पक्षतुर्यपञ्चमे षष्ठ एव वा ॥
दोषो नास्त्युभयत्रापि नर्मदोदग्वाग्दिशोः ।
उद्वहेत्पञ्चमीं षष्ठीं क्रमात्पित्रोरवागिति ॥

---

(d) षट्त्रिंशत्स्मृतितात्पर्यदीपिका.

ṢAṬTRIṂŚATSMṚTITĀTPARYADĪPIKĀ.

Foll. 43b—44b.

Similar to the above. The work is apparently based on 36 Dharmaśāstra treatises.

Incomplete.

**Beginning:**

श्रीमत्पराशरार्यादीन् प्रणिपत्य महात्मनः ।
षट्त्रिंशत्स्मृतितात्पर्यदीपिका वर्ण्यतेऽधुना ॥

सन्तानं विद्यते यस्मात्पूर्वजादुभयत्र च ।
तदादि गणयेद्धीमान्वरं यावच्च कन्यकाम् ॥
वध्वा वरस्य वा माता पक्षौ च यदि गण्यते ।
स पक्षो मातृपक्षः स्यात्पितृपक्षः पिता यदि ॥

**End:**

कूटस्थादिवशात्तु मातृभगिनीशब्दद्वयं नोच्यते ॥
आदिपदेन यावद्भूष्यमपि क्षमाक्षमिति व्याख्यातम् ॥

---

(*c*) षट्त्रिंशन्मततात्पर्यदीपिका.

ṢAṬTRIṀŚANMATATĀTPARYADĪPIKĀ.

Foll. 45*a*—52*b*.

Similar to the above.

Incomplete.

**Beginning:**

श्रीमत्परमसूर्यादीन् प्रणिपत्य महात्मनः ।
षट्त्रिंशन्मततात्पर्यदीपिकाद्य प्रकाश्यते ॥

अस्ति पुष्करिणी काचिन्नर्मदाख्या महानदी ।
तदुत्तरतटे चैव तद्दक्षिणतटे तथा ॥

कूटस्थगणनाशास्त्रं सङ्कीर्णमविमर्शतः ।
सर्वेषामप्यसङ्कीर्णं विमृश्याद्य प्रदर्श्यते ॥

सापिण्ड्यमसगोत्राणां नर्मदोत्तरवासिनाम् ।
श्रुतिस्मृतिसदाचारैः प्रथमं तावदुच्यते ॥

तथाहि आचारदीपिकायाम्—

सन्तानं भिद्यते यस्मात्पूर्वजादुभयत्र च ।
तदादि गणयेद्धीमान्वरं यावच्च कन्यकाम् ॥
कूटस्थगणनापक्षौ माता यद्वा पितास्ति चेत् ।
वध्वा वरस्य वा मातृपितृपक्षौ यथाक्रमम् ॥

मिताक्षरायाम्—

मातृतः पञ्चमादूर्ध्वं पितृतः सप्तमात्परम् ।
मातृतः मातृसन्ताने ।

**End:**

गुर्वर्पितां गुरोः पुत्रीं धनक्रीतां परित्यजेत् ।
सापत्न्यमातृभगिनीतत्सुतापुत्रिका तथा ॥

निजलोदरिदौहित्री दौहित्री मातुलस्य च ।
मातुलस्य तथा पौत्री षडेतास्स्युर्विवर्जिताः ॥

---

(*f*) गोत्रप्रवरनिर्णयः.

GŌTRAPRAVARANIRṆAYAH.

Foll. 52*b*—58*b*.

Similar to the work described under sub-division (*a*) above.

Complete.

**Beginning:**

भृग्वङ्गिराः काश्यपात्रिर्वसिष्ठागस्त्यगाधिजाः ।
सप्त महर्षयस्तेभ्यो गणा अष्टादशाभवन् ॥
भृगोः पञ्च गणाः पूर्वमष्टौ वाङ्गिरसो गणाः ।
अन्ये त्वेकैकगणिन इत्यष्टादश तद्गणाः ॥

**End:**

समानप्रवरां कन्यां सपिण्डां चैव गोत्रजाम् ।
नैव तां वरयेत्प्राज्ञः मातृवत्परिपालयेत् ॥

**Colophon:**

इति गोत्रप्रवरनिर्णयः ॥

Foll. 58*b*—61*a* contain quotations of stanzas from various Smṛtis and Purāṇas in regard to the desirable and undesirable qualities and characteristics of the bride and the bridegroom. Fol. 61*b* is left blank.

---

(*g*) एकादश्यादिनिर्णयः.

ĒKĀDAŚYĀDINIRṆAYAH.

Foll. 62*a*—66*a*. Foll. 66*b* and 67 contain the table of Gaṇas. Fol. 68 is left blank.

A treatise on the determination of the time for the observance of fasts, feasts, etc.

Contains Smārtaikādaśī, Vaiṣṇavaikādaśī, Sādhanadvādaśī, Śivarātri, Nṛsiṁhajayantī.

**Beginning:**

विष्णुपुराणे एकादशी निर्णीयते । वैष्णवनिर्णयः ।

एकादशी द्वादशी वाधिकं त्यज्यतां दिनम् ।
पूर्वं ग्राह्यन्त्त्तरं स्यादिति वैष्णवनिर्णयः ॥

एकादशीमात्रवृद्धौ स्मार्तविषये तूच्यते—

प्रथमेऽहनि सम्पूर्णा कर्तव्या रात्रिसंयुता ।
द्वादश्यां च तथा तात दृश्यते पुनरेव च ॥
पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो ।

इदं स्कान्दवचनम् . . विद्धैकादशीमात्रवृद्धौ भनेताः—

एकादशीमात्रवृद्धौ शुक्ले कृष्णे विशेषतः ।
उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृही ॥

• • • •

**Colophon:**

इति स्मार्तैकादशीनिर्णयः ।

अथ वैष्णवैकादशी—

उदयात्प्राग्यदा नाथ चतस्रो घटिकास्तु याः ।
अरुणोदयविद्धैषा तदा नोपवसेत्पुमान् ॥
एकादशी द्वादशी वाधिकं चेच्यज्यतां दिनम् ।
(पूर्व)ग्राह्यं तूत्तरं स्यादिति वैष्णवनिर्णयः ॥

• • • •

**Colophon:**

इति वैष्णवैकादशीनिर्णयः ।

अथ साधनद्वादशी—

यदा भवेदतीवाल्पा द्वादशी पारणे दिने ।
उषःकाले द्वयं कार्यं प्रातर्मध्याह्नकर्म च ॥
अल्पायामर्घ . . . . द्वादश्यामरुणोदये ।
स्नानार्चनक्रियाः कार्या दानहोमार्चनादिकाः ॥

**End:**

अथ नृसिंहजयन्ती निर्णीयते—

शुक्लपक्षे चतुर्दश्यां मासे माधवसंज्ञके ।
प्रादुर्भूतो नृसिंहाख्यस्तस्मात्तां समुपोषयेत् ॥

• • • •

निशामुखं सायंसन्ध्या ; सायंसन्ध्या त्रिघटिका अस्तादुपरिभास्वतः । इति सायंसन्ध्योक्ता । तस्मादस्तमयानन्तरं त्रिघटिकात्रयमध्ये व्याप्तिर्भवति तद्दिने कुर्यात् ।

R. No. 2454.

Paper. 10¾ × 9¼ inches. Foll. 116. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Jayanti Jogannagāru of Hamsavaram, Tuni division, Godavari district.

(a) दशाभुक्तिफलानि.

DAŚĀBHUKTIPHALĀNI.

Foll. 1a—116.

Gives the fortune of a person during the planetary periods and sub-periods.

Incomplete.

**Beginning**:

. . . . . . . पणाध्याय उच्यते ।
एकान्ते जनरहिते शुद्धे देशे सुखासने भूत्वा ॥
प्रणिपत्य त्वाचार्यं विघ्नेशं च ग्रहान्स्सर्वान् ।
मौनी मान्यमतिस्स्यात् . . . . . . . . ॥
* * * *
अतिसूक्ष्मतरं ज्ञात्वा गतिं ग्रहाणामनेकचारज्ञः ।
द्रेकाणं नवभागं द्वादशत्रिंशांशकादीनाम् ॥
भाकुफ(लदा रविकुसुता)बुधगुरुमन्दास्तु शुभफलदास्सुः ।
उदयफलं शिशिरांशोः शुक्रफलं गतिसमानवशात् ॥
वक्रानुदग्रकाले ग्रहचारं . . . . . . . . . . . ।
तस्मात् बहुप्रकारैर्गणितविशेषस्तु चिन्तयेत्तज्ज्ञः ॥
* * * *
यावद्गते दशेशर्क्षे तत्फलं तत्र निर्दिशेत् ।
श्रीमण्डितेष्वथैकस्मिन पापस्तिष्ठति दुर्लभः ॥
सौम्यग्रहयुतांशस्स्याद्दशान्ते मृत्युमुद्दिशेत् ।
राशिसन्धौ यदा काले व्याधिस्तत्र विनिर्दिशेत् ॥
* * * *

**Colophon**:

इति रविमहादशाप्रकरणम् ।

**End**:

सामान्यमेतदुक्तं राशिप्रत्येकमंशकान्वक्ष्ये ।
मेषाश्रितचन्द्रदशा स्त्रीसुतलाभं विदेशकर्मरतम् ।

(5) तिथिचक्रम्.

TITHICAKRAM.

Foll. 12a—16a.

Gives the astrological calculations for determining the various Tithis, the Avamās, etc., useful for the preparation of Indian calendars. By Narasiṁha, son of Naupurī Śiṅgayārya who was the younger brother of Mādhava of Vadhūlagōtra, son of Pēddividvat, a devotee of God Lakṣmīnarasiṁha, a form of Viṣṇu, worshipped at Naupurī situated somewhere on the banks of the Kṛṣṇa. The author says that he has based his work on the Tithicakra of Mallikārjunasūri. From the fourth stanza in the beginning it is apparent that the work was written between Śaka 1609 and 1669.

Complete.

**Beginning:**

वन्दे वेदान्तसंवेद्यमाद्यन्तरहितं विभुम् ।
कृष्णं कुवलयश्यामं गोपीजनमनोहरम् ॥
तिथिचक्रं यत्प्रणीतं मल्लिकार्जुनसूरिणा ।
कालेन महता तस्मिन् विलीभूते तदादरात् ॥
नौपुरीसिङ्गयार्यस्य नरसिंहेन सूनुना ।
एतदेवं स्फुटतरं क्रियते सौरसम्मतम् ॥
षष्टिर्विंशतिगुणितं व्यपगतसंवत्सरेण संमिश्रम् ।
नवगगनाब्धिसमेतं शकनृपकालं विजानीयात् ॥

अथ युगुणमाह—

३३ ३ १
शाकस्सुराग्निचन्द्रोनोऽभ्यस्तोऽर्कैर्मासयुक्पृथक् ।
त्रिघ्नः स्वाष्टाब्धिनेत्रांशयुक्तः शरशशाङ्कयुक् ॥
नागनन्दांशसंयुक्तो दिनीकृत्य दिनान्वितः ।
पृथक् स्वाष्टाभ्रशैलांशयुक्तो वेदाङ्कभाजितः ॥
लब्धावमदिनैरूनसौम्यादिर्दिनसञ्चयः ॥

**End:**

श्रीकृष्णवेण्याः तटनौपुरीश्रीलक्ष्मीनृसिंहाङ्घ्रिसरोजभृङ्गः ।
सुवित्तवानोज्झलपेद्दिविद्वत्तनूभवो माधवनामधेयः ॥
सोऽयं समस्तागमपारदृश्वा विद्वद्वरस्सद्गुणवंशजन्मा ।
वाधूलगोत्रामरवारिराशेर्यज्जन्म पूर्णेन्दुसमागमोऽभूत् ॥

तस्यानुजो जगति सिङ्गय . . . . . . .
ख्याततरसमस्तबुधसंस्कृतजेतृभावः ।
तस्यात्मजेन नरसिंहमनीषिणा च
स्पष्टं लघुस्फुटतरं तिथिचक्रमुक्तम् ॥
तिथिचक्रमिदं लघुस्फुटं रचयित्वा नरसिंहधीमणिः ।
प्रणतोऽस्मि सरस्वतीमहं प्रणवं पङ्कजसंभवप्रियाम् ॥
* * * *
तिथिचक्रपदं(मिदं)स्थानं पूर्वस्य ध्रुवके विधोः ।
ऋक्षादिषु धनं कुर्यान्नेत्राब्धिगजसागरैः ॥

**Colophon:**

इति श्रीनृसिंहगणिततिथिचक्रं समाप्तम् ॥

---

(c) तिथिचक्रम्—आन्ध्रटीकासहितम्.

TITHICAKRAM WITH TELUGU MEANING.

Foll. 16b—31a.

Same work as the above and with meaning in Telugu.

Complete.

---

(d) చరపాటలకు టీక.

CARAPĀTALAKU ṬIKA.

Foll. 31b—37a. Foll. 37b—45b contain Tithicakrapadakas.

See the Telugu part of the Triennial Catalogue of MSS.

Complete.

---

(e) प्रतिभागगणितम्—आन्ध्रटीकासहितम्.

PRATIBHĀGAGAṆITAM WITH TELUGU MEANING.

Foll. 45b—59a.

Same work as that described under R. No. 1042(a) ante.

Complete.

---

(f) ప్రతిభాగపదకాని.

PRATIBHĀGAPADAKANI.

Foll. 59a—64b.

Same work as that described under R. No. 1042(b) ante.

Complete.

(*g*) ప్రతిభాగగ్రహస్ఫుటపదకాని.

PRATIBHĀGAGRAHASPHUṬAPADAKĀNI.

Foll. 64*b*—80*a*.

Same work as that described under R. No. 1042(*c*) ante. Complete.

---

(*h*) लघुमानसम्—आन्ध्रटीकासहितम्.

LAGHUMĀNASAM WITH TELUGU MEANING.

Foll. 80*b*—115*b*. Fol. 116 is left blank.

Same text as that described under No. 13475 of the D.C.S. MSS., Vol. XXIV but with some difference. By Mañjulācarya. The second stanza in the beginning indicates the date of composition of the work. A Telugu commentary is added at the end.

Contains the following Adhikaras:—

१. मध्याधिकारः.
२. स्फुटगत्यधिकारः.
३. चन्द्रग्रहणाधिकारः.
४. सूर्यग्रहणाधिकारः.

**Beginning:**

प्रकाशादित्यवत्ख्यातो भारद्वाजो द्विजोत्तमः ।
लघुपूर्वं स्फुटोपायं वक्ष्येऽन्यं लघुमानसम् ॥
षष्ठ्याभ्यस्त(ाः)षट् च यमाः प्रभवाद्यब्दसंयुताः ।
तिथिवारादिसंयुक्तो वत्सरा(ः) शकभूपतेः ॥
०० १  १ : ११०६
खखशशिविधुनितशाके चैत्रादौ भौमवासरमध्याह्ने ।
११ २४ १२  ० १ ६३ ३६०
मादिभवजिनाकृतयः सूर्यश्चन्द्रः खमेकमङ्गगुणाः ॥
६१६  ५ १८ ०१०
सङ्क्रमस्तिथयस्तर्का ध्रुवको बाणाधृतिखानिराहोस्तु ।
८ ७ ५ ६ ३१ ३५५३०
सूर्यवन्मन्दोच्चांशो वसु तुरगा बाणागोश्विनखिकलाः ॥

**Colophon:**

इति लघुमानसे मध्याधिकारः प्रथमः ॥

**End:**

याम्यगोले रवेस्सपक्षे नैरृत्यां तु निमीलनम् ।
ईशोन्मुन्म(शे चोन्मी)लनो(नं) वायौ मोक्षश्चाग्नेयकोणके ॥

उदग्गोले वायुकोणे स्पर्शश्चाग्नौ निमीलनम् ।
उन्मीलं तु नैरृत्यामीशान्ये मोक्ष उच्यते ॥

**Colophon:**

इति लघुमानसे सूर्यग्रहणाधिकारश्चतुर्थः ॥

---

R. No. 2455.

Paper. 10¼ × 8¼ inches. Foll. 71. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. V. K Kuṭṭi Eṭṭan Rāja of Padiññārakōvilagam, Calicut.

(a) बकवधचम्पूः.

BAKAVADHACAMPŪḤ.

Foll. 1a—2b.

Narrates in verse and prose the Purāṇic story of the killing of the Bakasura by Bhima, of the Pāṇḍavas.

Complete but wants the beginning.

**Beginning:**

अथैकचक्रं द्विजचक्रपूर्णं संप्राप्य सम्पादितविप्रवेषाः ।
चक्रुर्निवासं द्विजवर्यगेहे भिक्षां तितिक्षानिरताश्चरन्तः ॥

एवमेव नीयमाने समये कस्यांचन विगलितप्राययामायां त्रियामायामात्मजाभ्युदयमेव चिन्तयन्त्यां कुन्त्यामुत्थाय प्राङ्मुखोपविष्टे विशिष्टं किमपि जप्यं जपति धर्मसमये धर्मात्मजे ।

* * * *

अथ किं ब्रवीमि परिपाकमंहसामतिभीषणो बक इति क्षपाचरः ।
स्वसुरादरात्स्वयमिवागतो यमो यमुनावनान्तमवलम्ब्य वर्तते ॥

**End:**

हित्वा बकाद्धरममुष्य शवाङ्गमुच्चै-
रुत्तुङ्गतालविटपे विनिधाय मानी ।
सुस्नात एष समुपेत्य गृहं द्विजातेः
भक्त्या युधिष्ठिरपदाम्बुरुहे नतोऽभूत् ॥

**Colophon:**

इति बकवधप्रतिपादिका कथा समाप्ता ॥

---

(b) पाञ्चालीस्वयंवरकथा.

PĀÑCALĪSVAYAṀVARAKATHĀ.

Foll. 3a—17b.

A short poem narrating the story of the Svayaṁvara (the marriage in which the husband is chosen by the maiden herself) of Pañcālī or Draupadī and the leading incidents that happened on that occasion.

Complete.

**Beginning:**

चिन्मयं नवकलायकोमलच्छायकायमसितायतेक्षणम् ।
अस्तु तत्किमपि वस्तु निर्मलं मामके मनसि रामनामकम् ॥
अञ्चितायतदृगञ्चलेन यश्चारु चोरयति गोपिकामनः ।
एष घोषनवनीतमोषको मोमुषीतु मम शेमुषीमलम् ॥
उन्मुक्ता देवगत्या कथमपि भवनाज्जातुषा(तु)जातु सार्धं
कुन्त्या सन्तीर्य गङ्गां पथि पृथुलबलं पातयित्वा हिडिम्बम् ।
बिभ्राणा विप्रवेषं बकवधमुदितक्ष्मासुरामेकचक्रा-
मध्यासामासुरासूचितमहितभुजागौरवाः कौरवेन्द्राः ॥
निवसत्सु च तेषु विप्रगेहे समवापुर्निशि केचिदध्वनीनाः ।
सहितैरथ सङ्कथा वितेने निजवार्तावगमाय धर्मजन्मा ॥
हे स्वागतं क्षितिसुराः कतमं प्रदेशं
धन्यं विधातुमयमद्य समुद्यमो वः ।
इत्यादि सादरममुं परिपृष्टवन्तं
विप्रेषु कोऽपि पुनरित्थमुवाच वाचम् ॥
किं नाकर्णि भवद्भिरद्भुतमिदं भूयान् समुज्जृम्भते
पाञ्चालीक्षितिपालकस्य नगरे कोऽप्येष कोलाहलः ।
दृप्यद्विप्रकुलं चलन्नृपकुलं संभ्रान्तनानाजनं
येन क्ष्मावलयान्तरं सकलमप्यन्यादृशं दृश्यते ॥

तत्र च—

विश्वोत्कृष्टा जगति वपुषा वल्गुना फल्गुनार्थं
जज्ञे यज्ञे द्रुपदनृपतेः कन्यका कापि कुण्डात् ।
पश्चाज्जाते जतुभवनतः पाण्डवानामभावे
लक्षच्छेदं स किल मनुते दुष्करं शुल्कमस्याः ॥

• • • •

यातायातं मुहुरपि हृदा तावतो सा कथञ्चित्
बाला मालाविलसितकरा प्राप्य तं वीरमौलिम् ।

अंसे तस्य प्रकृतिसुभगे मालिकामर्पयित्वा
प्रस्विन्नाङ्गी नमितवदना तस्थुषी तत्र रङ्गे ॥

**End:**

इत्थं जित्वा नृपौघान् निजभुजमहसा शक्रसूनुस्तदानीं
साकं भीमेन तुष्टैरवनिसुरवरैर्विस्मितैस्तैः कृताशीः ।
धीरो भूपालपुत्रीं रणभुवि जयलक्ष्मीमिवादाय मूर्तां
तस्मादग्र्यात्प्रतस्थे प्रमुदितहृदयः कुम्भकाराधिवासम् ॥

**Colophon:**

इति द्रौपदीस्वयंवरकथा संपूर्णा ॥

---

(e) पञ्चेन्द्रोपाख्यानम्.

PAÑCENDROPĀKHYĀNAM.

Foll. 18a—32b.

A narrative composition in verse and prose describing the circumstances under which Draupadi originally wedded to Arjuna alone became the recognised wife of all the five Pāṇḍava brothers.

Complete.

**Beginning:**

श्रीरत्नलाभमुदितौ युवरत्नलाभ-
प्रीतां प्रगृह्य कमनीं कुरुवंशवीरौ ।
कौलालमालयमुपेत्य पुरेव तत्र
भ्रातॄंश्च मात्रसमेैर्मिलितावभूताम् ॥
कन्यां गृहोदरगतां बहिरागतास्ते
भिक्षेयमित्युपहृतेति सलीलमूचुः ।
सा भुज्यतां सह भवद्भिरिति ब्रुवाणा
कुन्ती निरेत्य च निरीक्ष्य विलज्जिताभूत् ॥
तावत्स वत्सलतया तरलान्तरात्मा
बद्धेक्षणस्सह बलेन कुलालगेहम् ।
गूढं प्रविश्य वचनैरमृतायमानै-
राश्वास्य पाण्डुजनुषः स्वपुरीं प्रतस्थे ॥

ततश्च तज्जातिजिज्ञासया निगूढमनुगम्य कुलालनिलयप्रचारितचारे तद्-

विदूरनिविष्टवृष्टयुम्ने तेषु च सायमुपहृतभिक्षेषु जननीनियुक्तपरिहर्ष. . . पार्षदी प्रथमपरिवेषणविशेषसरसमन्नमुपयुज्य मुदितेषु

• • • •

पुरं प्रविष्टेषु परिमृष्टाशनपरितुष्टेषु चिरदृष्टशास्त्रादिदर्शनपरिह्लिष्टेषु सुखनिविष्टेषु परिपृष्टः सादरं द्रुपदेन धर्मात्मजः स्वयं निर्मायमवादीत् ।

पञ्चापि पाण्डुतनया वयमेव राजन्
माता पृथेयमिह लक्ष्यभिदर्जुनोऽयम् ।
प्राक् धार्तराष्ट्रकृतजातुषगेहमुक्ताः
षण्मासमात्रमचराम निगूढवेषाः ॥

• • • •

किं शङ्कसे पञ्चपतित्वहेतुं
प्राग्जन्मवृत्तं कथयाम्यमुष्याः ।
प्रागिन्द्रसेनेति जगत्प्रतीता
नारायणी काचन कन्यकाभूत् ॥

• • • •

रेरे . . . . दिवस्पतिहतक मत्परिभवनिष्पतितस्वर्गपदचतुर्वासववासभूतामिहत्यां गुहामुद्घाट्य तां प्रविश्य तदनुभवमनुभवेति । सोऽपि कन्दरामिमां प्रवरवलितेन करेणोद्घाट्य तदन्तरस्वसम . . . . से निजतुल्यमासश्चतुरो विषण्णान् निषण्णानालोक्य साध्वसविवशः प्रविश प्रविशेति भूतगणनोदनारब्धक्रन्दनस्सङ्क्रन्दनो बहुशः प्रणम्य दीनमूचे कलारुद्रम् ।

• • • •

पञ्चापि सार्धमवतीर्य महीममुष्याः
कामं प्रपूर्य पुनरेष्यथ दिव्यलोकम् ।
धर्मानिलाश्विन इमाजनयन्तु पूर्वौ
जन्योस्त्वयन्तु जनकोऽपि नवीनशक्रः ॥

**End:**

इत्थं क्लृप्तव्यवस्थां द्रुपदनृपसुतामानुपूर्व्या भजन्तो
याते तस्मिन् मुनीन्द्रे हतविमतजना वर्धयन्तस्स्वराज्यम् ।
रोषस्याकस्मिकत्वात् क्वचिदनुमतेऽप्यायुधादानभीत्या
राजान्तर्न्यस्तशस्त्रास्सुखमिह नगरे रेमिरे पाण्डुपुत्राः ॥

(*d*) सुभद्राहरणचम्पूः.

SUBHADRĀHARAṆACAMPŪḤ.

Foll. 32*b*—52*b*.

A literary composition in verse and prose based on the Purāṇic story of the marriage between Subhadrā and Arjuna.

Complete.

**Beginning:**

अधिनिशमथ सुप्तासुप्तलोके पुरान्ते
कमपि रुदितघोषं शुश्रुवानिन्द्रसूनुः ।
कुरुतनयकुनीतिप्रेरितैश्चोरपाशै-
रपहृतपशुपङ्क्तेः कस्य चिद्भूसुरस्य ॥

* * * *

भूसुरैरनुगम्यमानोऽपि भाविदिग्विजययात्रामासूत्रयन्निवोत्तराशां प्रति प्रस्थितः तापहराणि पापहराणि च शिशिरपुण्यानि सरित्सरोऽरण्यानि भजन्नुपहिमवन्तं गङ्गाद्वारमाससाद ॥

* * * *

ततश्च विनिद्र एव सुभद्रागुणगणविचिन्तया तदवाप्त्युपायविचिन्तया च वीतनिशावशेषः प्रभाते पुनः पुरीगमनत्वरावतो मे निरीक्षणमिदं निगूहनीयमेव त्वयेत्यभिमन्त्रिते यातवति यादवनन्दने ।

* * *

इतः परं कृष्णमतावबोधात् पुरो न मां कोऽपि विदां करोतु ।
अतो गृहीत्वा लघु भिक्षुवेषं मुकुन्दसंप्राप्तिविधौ यतिष्ये ॥

**End:**

पार्थो वल्लववाट एव मिलितः कृष्णादिवृष्णीश्वरैः
इन्द्रप्रस्थमगात् समर्हणवलत्सोदर्यपर्याकुलम् ।
किंचिच्छ्रीधरदत्तयौतकधनैर्नागाश्वरत्नादिभिः
पूर्वस्मादवृधे शताधिकतरं तत्पाण्डवानां पुरम् ॥

तत्र च पुरे सुहृत्संभावनमयेषु बहुषु दिनेषु गतेषु—

बलमुसलयदुमण्डले प्रयाते वसति च तत्र हरौ स शक्रसूनुः ।
यदुवरसहजाकुचाङ्कुरे च द्रुपदसुताकुचमण्डले च रेमे ॥

**Colophon:**

इति सुभद्राहरणप्रदीपिका कथा संपूर्णा ॥

(c) रुक्मिणीस्वयंवरचम्पूः.

RUKMIṆĪSVAYAMVARACAMPŪḤ.

Foll. 53a—69a. Foll. 69b—71 are left blank.

A literary composition in verse and prose describing the Purāṇic story of the Svayamvara of Rukmiṇī and her marriage with Lord Kṛṣṇa together with the chief incidents that led up to it.

Complete.

**Beginning:**

यच्चादौ वरराजमण्डलपरिग्रासं बलेनान्ततः

स्वच्छन्दं खलु चक्रिणो रणभुवि प्रत्यर्थिमित्रग्रहम् ।

स्पष्टं दृष्टवतो जनानतितरां व्यस्मापयत्तन्महा-

द्रुक्मिण्याः परिणीतिपर्व भवतु प्रीत्यै विभूत्यै च नः ॥

अथ तामाजितः स्वशासनाचरमाब्धौ सुरशिल्पिकल्पिताम् ।

अपराममरावतीमिवाध्यवसद् द्वारवतीं स्वकैस्सुखम् ॥

रामोऽथ रेवतसुतां परिणीय तस्यां

प्रेमानुरागकुतुकाकुलितान्तरात्मा ।

रेमे तया नववधूचितपेशलाभिः

लीलाभिरुन्मिषदनन्यजया रमण्या ॥

तत्रान्तरे भीष्मकस्य भार्गवी भाग्यशालिनः ।

पुत्री भूत्वा स्वकान्त्यालंचक्रे कुण्डिनमन्दिरम् ॥

रुक्मिणीति कृताख्या सा रुक्मभूषणभूषिता ।

रुक्मिणस्सोदरी कुन्दकुड्मलोपमद्रदा बभौ ॥

* * * *

सा तु खलु सारसाक्षी आदित एव नादितवंशस्य गोपिकाजारस्य स्वसक्तचित्तानुवर्तनैकतृष्णस्य श्रीकृष्णस्य निर्गुणस्यापि तद्गुणगणानाकर्ण्य तत्प्रभृत्येवाप्रतीकेऽपि सुप्रतीकेऽपि तस्मिन् विप्रसक्तमानसा अप्रमेयस्य तस्यात्मभागिन्या

* * * *

यदुकुलाभरणस्मरणैकशरणा कथमपि कमपि कालं विनोदयामास ।

**End:**

आदावानौ स्वशक्त्या शकलितविमतिस्पष्टविभ्रष्टकीर्ति-

च्छेदानादाय सर्वान् कुहचन पुनरप्यप्ररोहार्थमेतान् ।

लाजव्याजेन जायाञ्जलिभिरथ मुहुः क्षेपयित्वा कृशानौ
नूनं मानी कुनार्योऽभवदतिवलवत् स्त्रीनिमित्तं हि वैरम् ॥
अश्मारोपविधानादीन्यग्न्यारोपावधीन्यथ ।
चक्रे सर्वाणि कर्माणि चक्री गर्गोक्तमार्गतः ॥
अक्षीणमी(नी)तिद्रविणैरनन्तैर्लक्ष्मीकरग्रहविधिं विधिवद्विधाय ।
पक्षीन्द्रकेतुरधिकं मुमुदे पुरोधोमुख्यैः प्रहृष्टहृदयैः मतिलङ्घिताशीः ॥

**Colophon:**

इति रुक्मिणीपरिग्रहप्रतिपादिका कथा समाप्ता ॥

The scribe adds—

श्रीशार्दूलपुरस्थबन्धुनिवहः श्रीशैलपाथोनिधि-
क्षोणीशान्वयदुग्धसिन्धुहिमगोः कृष्णाह्वयस्याज्ञया ।
शिष्यः कोऽप्यलिखद्विदम्बरकवे रामप्रबन्धत्रयं
श्रीकृष्णाख्यपुरस्थितैः कविवरैराराधितस्य स्वयम् ॥

---

R. No. 2456.

Paper. 10½ × 8⅜ inches. Foll. 20. Lines, 20 in a page. Telugu Good.

Transcribed in 1917-18 from a MS. obtained through the Sub-Magistrate of Kovvūru, Kistna district.

(a) कण्वप्रस्तावसंग्रहकदम्बकम्.

KAṆVAPRASTĀVASAṄGRAHAKADAMBAKAM.

Foll. 1a—7a.

A collection of stanzas from different sources which give some information about the sage Kaṇva and his greatness.

Contains the 5th Adhyāya from Dēvakāṇḍa and 64th from Upadēśakāṇḍa in the Skāndapurāṇa and the 8th Adhyāya in Brahmōttarakhaṇḍa.

**Beginning:**

देवसेना उवाच—

देवसेना ततः स्कन्दमात्मनः पतिमव्ययम् ।
अपृच्छदानता बह्या वृत्तान्तमनुपूर्वशः ॥

गुहः—

युवामुपेन्द्रतनुजे पूर्वमास्तां वरानने ।
मत्पाणिग्रहमुद्दिश्य ते तपोऽश्रयतां महत् ॥

तपसा तेन तुष्टोऽहमभजं वां महत्वति ।
उत्पत्तये कृतानुज्ञे युवामुत्पत्तिमाश्रिणे(ते) ॥
तथैव त्वामिन्द्रपुत्रीं विधिनाङ्गीकरोम्यहम् ।
इयमसौ वपुस्त्यक्त्वा काञ्चीपुरसमीपतः ॥
लवल्याख्या गिरौ रम्ये मत्स्नेहातिशयान्विता ।
तपश्चचार परमं मां ध्यात्वा चैव मानसे ॥
तत्र रम्ये वने कस्मिन् कण्वशापवशाद्धरिः ।
शिव ऋष्यमिवस्तत्र चचार परमं तपः ॥
तत्रागता यथा लक्ष्मीः हरिणीरूपमास्थिता ।
तां दृष्ट्वा यं(?) मर्त्योयं मुमोह मदनातुरः ॥
लवलीकुण्डमध्येयं तदुत्पन्ना वराङ्गना ।
तदाख्यया जगत्यस्मिन् प्रथिता तेन सुन्दरी ॥
उपेन्द्रः कण्वशापेन निषादानां कुलेऽजनि ।
अहन्तु व्याधनाथोऽयं दृष्ट्वा तां लवलीं तदा ॥
समादाय स्त्रियै स्वस्य दत्तवाननपत्यवान् ।

• • • •

**Colophon:**

इति श्रीस्कान्दे महापुराणे शङ्करसंहितायां देवकाण्डे कण्वमुनिप्रस्ताव-
कथनं नाम पञ्चमोऽध्यायः ।

एकदा विष्णुभवनं पुरोपेन्द्रस्समाययौ ।
स्वमेव मूर्तिभेदस्थं प्रद्युम्नादिव अच्युतः ॥
मिथस्संभाषणं कृत्वा किंचित्कालमवस्थितः ।
एतस्मिन् समये कण्वः काश्यपस्य सुतो महान् ॥
वैकुण्ठभवनं प्राप विष्णुसंभाषणोत्सुकः ।
तं दृष्ट्वा तौ समायान्तं शिवभक्तं दृढव्रतम् ॥
न व्यलोकयतामक्ष्णा नासनं ददतुश्च तौ ।
न वाचं चाप्यवदतामास्तां मौनमुद्रया ॥
तौ तदा तादृशौ दृष्ट्वा चुकोप मुनिसत्तमः ।
शशाप मां शिवस्येष्टं मत्वा तूष्णीं बभूवथ ॥

विष्णोऽतस्त्वमनेकानि जन्मानि भज मद्गिरा ।
अत्रश्च तत्र सर्वत्र दत्तश्शापो मयात्र ते ॥
इयं च लक्ष्मीस्त्वत्पार्श्वे स्थिता मृगवदत्र वै ।
मृगीभवतु मच्छापादुपेन्द्रोऽप्ययमीदृशः ॥
कैराती योनिमासाद्य कानने वसताच्चिरम् ।
तव भक्ताश्च लोकेऽस्मिन् सन्तु ते शिवनिन्दकाः ॥

* * * *

**Colophon:**

इति श्रीस्कान्दे महापुराणे शङ्करसंहितायामुपदेशकाण्डे चतुष्षष्टितमोऽध्यायः ॥

उपरि दधीचिप्रशंसा—अथ ब्रह्मोत्तरखण्डे अष्टमाध्याये सूतः—

नित्यानन्दमयं शान्तं निर्विकल्पं निरामयम् ।
शिवतत्त्वमनाद्यन्तं ये विदुस्ते परां गताः ॥

**End:**

अष्टौ पुत्रानेकां कन्यां च जनयित्वा पुत्रमित्रकलात्रादिभिस्सोमवारव्रतयुक्तया पत्न्या सह बहुकालं सुखान्यन्वभूत ॥

**Colophon:**

एवमष्टमोऽध्यायः ॥

---

(*b*) माध्यन्दिनशाखाविषयः.

MĀDHYANDINAŚĀKHĀVIṢAYAḤ.

Foll. 7*b*—12*b*.

A disquisition establishing the precedence of the Mādhyandina Śākhā of the Śuklayajurvēda over the Kaṇvaśākhā thereof. The title Kaṇvamahāmunicaritramu given at the beginning of the work, the first stanza and the colophon are misplaced and have no connection with the work.

**Beginning:**

अनन्तभट्टनामाहं कण्वशाखी सतां मुने ।
आह्निकं स्वनिबन्धेऽस्मिन् संगृह्णामि यथाविधि ॥

इत्यनन्ताह्निके—

अथ पञ्चदशशाखासु माध्यन्दिनशाखा मुख्येति वेदितव्या । सौपुत्र-

मुरु बिभ्रत इत्याद्याख्यायिकाभिः—पञ्चदशशाखानामनन्तरभावित्वमिति न कश्चिदपि क्षुद्रोपद्रव इति संक्षेपः। अथ पञ्चदशशाखासु माध्यन्दिनी शाखा मुख्येति वेदितव्या।

तदुक्तं बृहन्नारदीये—

> यजुर्वेदमहाकल्पतरोरेकोत्तरं शतम्।
> शाखास्तत्र शिखाकारा दश पञ्चाथ शुक्लगाः॥

* * * *

तथाचेदं होलीरभाष्यम्—

> यजुर्वेदस्य मूलं हि भेदो माध्यन्दिनीयकः।
> सर्वानुक्रमणी तस्याः कात्यायनकृता तु भू(सा)॥
> व्याख्यां तस्यास्तु होलीरः कुर्वे नत्वा गणाधिपम्।
> विलोक्य सर्वसूत्राणि भाष्याणि विविधानि च॥

* * * *

त्रयाणामपि वेदसंज्ञा। एतत्त्रयं शतपथब्राह्मण एव पठितम्। सोऽसावाज्यमधिश्रयतीति विधिः। इति त्वेति। विधेयो मन्त्रः इषे तदाह— इषे त्वेत्यर्थवादस्तर्क इत्यादि ज्ञेयम्।

**End:**

तस्मान्माध्यन्दिनीयशाखा एव पञ्चदशसु वाजसनेयशाखासु मुख्या सर्वसाधारणा। अत एवोक्तं वसिष्ठेन—माध्यन्दिनी तु या शाखा सर्वसाधारणी तु सा॥

इति संक्षेपः।

**Colophon:**

इति श्रीकण्वकण्ठाभरणे आशीर्मन्त्रविचारस्तमाप्तः॥

The scribe of the original MS.

ति. मु. शास्त्रिणा लिखितं शुक्लनामकवत्सरे मुल्लगोड्डग्रामे। चित्रमध्ये ब्राह्मणस्य मध्ये मन्त्रे यथाक्रमम्।

---

(c) కణ్వచరిత్రము (యక్షగానము.)

KAṆVACARITRAMU (YAKṢAGĀNAMU)

Foll. 13a—19a. Foll. 19b—20 are left blank.

Incomplete.

See the Telugu part of the Triennial Catalogue.

R. No. **2457.**

Paper. 10⅜ × 9⅜ inches. Foll. 38. Lines, 20 in a page. Telugu. Good.
Transcribed in 1917-18 from a MS. of M.R.Ry. Upādhyāyalu Sūryacintāmaṇi Śāstrigāru of Narasapur, Kistna district.

**वैद्यकल्पः.**

**VAIDYAKALPAḤ.**

Foll. 1a—38a. Fol. 38b is left blank.

Gives the preparation of different kinds of medicines including those prepared from trees, plants, roots, etc. The title **Vṛkṣakalpa** given at the beginning of the work is apparently a misnomer.

Incomplete.

Contains the following Kalpas:—

१. कलङ्ककरणम्.
२. रसबन्धनौषधयः.
३. अपराजिताकल्पः.
४. ब्रह्मदण्डीकल्पः.
५. अश्वगन्धाकल्पः.
६. मुसलीकन्दकल्पः.
७. अस्थिशृङ्खलाकल्पः.
८. ज्योतिष्मतीकल्पः.
९. श्वेतार्ककल्पः.
१०. महावज्रराजकल्पः.
११. गन्धककल्पः.
१२. तालककल्पः.
१३. वज्रीकल्पः.
१४. तृणज्योतिष्मतीकल्पः.
१५. एकवीराकल्पः.
१६. देवदालीकल्पः.
१७. पीतदेवदालीकल्पः.
१८. कटुतुम्बीकल्पः.
१९. क्षीरकन्दकल्पः.
२०. रुदन्तीकल्पः.
२१. सोमराजकल्पः.
२२. दक्षिणदेशिताम्रवनकल्पः.
२३. मयूरगिरिकल्पः.
२४. नागमण्डलकल्पः.
२५. चन्द्रोदककल्पः.

**Beginning:**

अथ कलङ्ककरणं लिख्यते —
अथ स्वदेहे मुखानुभवसिद्ध्यर्थं मूकतकलङ्ककरणमाह—

उमापतिं नमस्कृत्य नत्वा श्रीमादिभैरवम् ।
वक्ष्यामि देहसिद्ध्यर्थं कलङ्काकृतिचूर्णकम् ॥
मक्षिकापादमात्रेण कलङ्कं यत्र विन्यसेत् ।
मुद्रधातुरसात्तत्स्पर्शनाद्धेमपर्वताः ॥
तत्कलङ्कं प्रवक्ष्यामि दुर्लभं भुवि मानुषैः ।
गोपनीयं प्रयत्नेन न देयं कस्यचित्कदा ॥

नाज्वल्यमाना हरितालका च पृथक् क्रियेतां समभागहिङ्गुलाः ।
निष्पीड्य चैकाद्य(ताढ)शपलकेन(केन) आनने काषत्रपुटे समक्काम् ॥ !
वारत्रयं तत्रिगुणेन कार्यं पश्चात्पुटे तां कपिराजपुत्रिकाम् ।
रसं गृहीत्वा शिवटङ्कया च देयः पुटः पत्रमितश्च सङ्ख्यया ॥

* * * *

अथ रसविध्यौषधयोगं व्याचक्षते—

देव्युवाच—

ओषधी कीदृशी नाम रसमूर्च्छाकरी शुभा ।

शिव उवाच—

केन वा सूतभस्म स्यात्केन वाखोटबन्धनम् ॥
शृणु भैरवि यत्नेन रहस्यं रसबन्धनम् ।
ब्रह्मविष्णुमहेन्द्राद्यैः न ज्ञानं निरवन्दिते ॥
गङ्गायमुनयोर्मध्ये प्रयागो नाम राक्षसः ।
तस्य मध्ये वरारोहे तत्क्षणात् बध्यते रसः ॥
निशाचरस्य पत्राणि गृह्णीयात्साधकोत्तमः ।
रसो निष्पीडितो देवि रसो भवति चोत्तमम् ॥

* * * *

अथापराजिताकल्पः—

ओषधी कथिता पूर्वं ब्रह्मणा च महात्मना ।
धनदा च महापुष्पे सावित्री ब्रह्मनिर्मिता ॥
अनया सर्वकार्याणि कुर्यादेवं विचारयेत् ।
जया च विजया चैव सुभगा दैत्यमोहिनी ॥
अपराजिता च लोकेऽस्मिन् ख्याता च गिरिकर्णिका ।
पुष्पे समुद्धृता यत्नाद्विजयाय शुभावहः ॥
हस्तेनोद्धृत्य संगृह्य रक्षयेत्सुसमाहितः ।

* * * *

अतः परतरं नास्ति योगिनां योगमुत्तमम् ।
सप्ताभिमन्त्रितं कृत्वा सततसिद्धिप्रदा भवेत् ॥

**End:**

ताराभ्रसूतकं चैव वङ्गस्तम्भकरं परम् ।
तत्सूतं बीजसंयुक्तं तारयेत्सारयेद्रसे ॥

द्वित्रिपञ्चगुणैर्नापि तत्तोयेनैव पाचयेत् ।
मारयेद्भूधरीयन्त्रे बीजं तस्य महीतले ॥

R. No. 2458.

Paper. 10¾ × 9¼ inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Kandukūri Śivaprasādabhūṣaṇa Rao of Narasapur, Kistna district.

शिवलिङ्गार्चनम्.

ŚIVALIṄGĀRCANAM.

Foll. 1a—23a. Fol. 23b gives the contents of the work. Fol. 24 is left blank.

A treatise purporting to give the daily routine of the Vīraśaivas and the manner of conducting the worship of Śivaliṅga.

Breaks off with the explanation of the Sandhyāvandana.

**Beginning:**

शिवसंस्कारहीनानां धर्मः पैतामहस्स्मृतः ।
इति शास्त्राणि संलिख्य सारमुद्धृत्य साम्प्रतम् ॥
वीरशैवोचितं वक्ष्ये शिवलिङ्गार्चनं परम् ।
संसारदुःखपाशघ्नं साक्षान्मोक्षप्रदं शुभम् ॥
दिनकर्मसमायुक्तं दिव्यबोधैकसाधनम् । इति ।

ननु वीरशैवानां लिङ्गार्चनमेव लिङ्गाङ्गसम्बन्धरूपदिव्यज्ञानमित्यशेषशैवसिद्धान्तेषु प्रसिद्धम् । तद्दिनकर्मसमायुक्तं कर्तव्यमित्युक्तम् । दिनकर्मणा कामफलमिति चेत्तत्र ब्रूमः—शैवसिद्धान्तशिखामणौ—

ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः ।
तस्मादाचारवान् ज्ञानी भवेदादेहपातनात् ॥
ज्ञाने सिद्धेऽपि विदुहं(षुरं)कर्मापि विनियुज्यते ।
फलाभिसन्धिरहितं तस्मात् कर्म न सन्त्यजेत् ॥

* * * *

क्रमान्नित्यादिकं वक्ष्ये क्रमबोधविधानतः ।
साधकानां हितार्थाय चतुराश्रमधर्मिणाम् ॥

रात्रिकाले पञ्चदशमुहूर्तो ब्राह्मसंज्ञकः ।
तस्मिन्नुत्थाय मनसि चिन्तयेच्छङ्करं शुचिः ॥
गुरुं चरं शिवं पश्येत्तेभ्योऽन्यं न विलोकयेत् ।
ततो गृहाद्विनिर्गत्य बहिर्गच्छेदतन्द्रितः ॥

* * * *

अथ सन्ध्याविधिरुच्यते—

संहिताभिरसर्वाङ्गुलीभिः पूरककुम्भकरेचकपूर्वकं प्राणायामं कुर्यात् । अ(त)थाचापस्तम्बः—

अर्थं वा सिसाधयिषुरिति । तत्र वृत्तिकारः—

अर्थं प्रयोजनं तच्च दृष्टमदृष्टं वा सिसाधयिषुः साधयितुमिच्छुः कातमितोऽाकाशशरीरिम्लानेः प्राणायामे . . . . . त्रिवारं प्राणायामं कुर्यादिति । शारदातिलके—

प्राणायामं पुरा कृत्वा गायत्रीं सन्ध्ययोर्भवे(र्जपे)त् ।
सप्तव्याहृतिसंयुक्तां गायत्रीशिरसान्विताम् ॥

* * * *

अत्र प्रथमतः प्रणवपदम् । ओं भूः भूलोकाभिमानिन्यो रुद्रदेवताः । अत्र ऋचः—ओं सहस्राणि सहस्रशो ये रुद्रा अधिभूम्याम् ओङ्कारार्थचिदाकारशिवाभिदब्रह्मैक्येन स्तूयत इति तात्पर्येण निर्दिष्टमुक्तम् । महोपनिषदि—

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥ इति ।

End:

पुनः गङ्गायमुनयोरिडापिङ्गलयोर्मध्ये सुषुम्णायां योगधारणया प्राणापानौ समौ नासाभ्यन्तरचारिणौ कृत्वा सुषुम्णामार्गं प्राप्य सहस्रारचन्द्रामृतसिक्तचिद्लिङ्गध्यानपराः श्रीमद्रमनादिमहाकायान्ताष्टाविंशतियोगाचार्याः शिवयोगिनः ते (तान्) मम शिवैक्यसमाधिनिष्ठाप्रदानार्थं नमस्करोमीति भावः । इति ।

---

## R. No. 2459.

Paper. 10¾ × 9¼ inches. Foll. 16. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Droṇamrāju Vēṅkaṭacalapati Rao gāru, Pulla, Ellore taluk, Kistna district.

शुद्धानन्दः—सव्याख्यः.

ŚUDDHĀNANDAḤ—WITH COMMENTARY.

A treatise on Advaita Vēdānta explaining the nature of the supreme Brahman, the means of attaining salvation, etc. The author says that he wrote this work for the enlightenment of the people on the banks of the river Godavari. He is said to have undertaken this work at the instance of Vēṅkaṭakṛṣṇarāya of Varadaṭla family.

Contains the following three Ullāsas.

१. परमवस्तुस्वरूपनिरूपणम्.

२. साधननिरूपणम्.

३. ब्रह्माभ्यासः.

**Beginning:**

निर्भेदे मानमाने निखिलगुणगणा यत्र सत्तां भजन्ते
तत्सान्नित्यं निरंशे निजसुखमहमित्येव निश्चित्य शम्भोः ।
कारुण्यात्सत्त्वशुद्ध्या विलसितमनसां तद्विबोधैकहेतुं
शुद्धानन्देति नाम्ना सहितमघहरं ग्रन्थमेकं करोमि ॥
शुद्धानन्दार्थबोधाय व्याख्यानं क्रियते मया ।
विचिन्त्य शिवमात्मानं निर्द्वैतं विदुषां मुदे ॥

अथ भगवन्तः शङ्कराचार्याः परमकारुणिकाः अखण्डानन्दात्मकं नित्यं वस्तु ज्ञातुमधिकारिणां सूत्रभाष्यादिग्रन्थैस्सर्वोपनिषदामर्थं स्फुटीकृतवन्तः । तथापीदानीन्तनजनाः अत्यन्तकलिदोषेण निजनिष्ठापराङ्मुखाः आचार्योक्तमर्थमन्यथा वर्णयन्तः अतत्त्वविदो लोकप्रतारकास्सन्तो वर्तन्ते बहवः ।

* * * *

अस्मिन्नपि देशे अत्यन्तपुण्यतमगोदावरीतीरे केचनाधिकारिणः मादृशासंसेवकास्सन्ति । तेषु कञ्चनाधिकारिणं मत्संश्रितमुपलभ्य तस्य निरङ्कुशनिजानन्दप्रतिपत्तिसंसिद्ध्यै तन्निस्संशयाय तस्य विद्याप्राप्तिप्रकारनिरूपणपूर्वकमस्य ग्रन्थस्य सच्चिदानन्दात्मकं निर्द्वैतं वस्तु प्रतिपाद्यमिति सूचयन् शिष्यशिक्षार्थं शिष्टाचारप्राप्तं मङ्गलमाचरितं सूचयन् सप्रयोजनं ग्रन्थकरणं प्रतिजानीते—निर्भेद इत्यादिना । अत्राहमिति पदमध्याहर्तव्यम् ॥

* * * *

न्यकरणप्रकारं प्रदर्शयन्नेतन्नेरकस्य नाम निबध्नाति । सुखात्मेति ।
सुखात्मबोधप्रविवेचनाय शुद्धैस्सुवर्यैर्युक्तकृति कुरुध्वम् ।
इति प्रजातो वरदाद्र्लवंशे मां प्रेरयद्वेङ्कटकृष्णरायः ।

* * * *

न साध्यं साधनं तस्मिन् शुद्धानन्दस्वरूपतः ।
स्वप्रकाशे न प्रमाणमिति विद्वद्भिर्निर्णयः ॥

इदानीं विद्वदनुभवसिद्धमेतद्ग्रन्थाभिधेयं नित्यापरोक्षं वस्तु निरूप्यते । न साध्यमित्यादिना । तस्मिन् स्वापरोक्षे नित्यात्मनि साध्यं कार्यं मोक्षस्वरूपं न मोक्षात्पूर्वमेवासङ्गचिद्रूपत्वात् स्वस्य । नच न मोक्षस्य कार्यत्वमिति वाच्यम् । ज्ञानस्य निरक्षरत्वापत्तेः । अत एव न साधनम् । मोक्षसाधकज्ञानमपि नास्ति । ज्ञानस्यापि मायाकार्यत्वात् ।

* * * *

**Colophon:**

इति शुद्धानन्दे परमवस्तुस्वरूपनिरूपणं नाम प्रथमोल्लासः ॥

**End:**

ततः पुरुषस्य वैकल्पिकः भेदनिमित्तः भ्रमः । उत्पन्नोऽहं विनष्टश्च बद्धोऽहं मुक्त इति च भ्रान्तितः कथं केन प्रकारेण भवेत् । सर्वस्य जगतः स्वसत्तातिरेकेन विचारितत्वादिति भावः । निष्कृष्टार्थमाह ।

इत्थं निरन्तरं यस्तु स्वात्मानं चिन्तयेत्सुधीः ।
स एव पुरुषो लोके ब्रह्मवित् ब्रह्म च स्वयम् ॥

**Colophon:**

इति ब्रह्मा(शुद्धा)नन्दे ब्रह्माभ्यासो नाम तृतीयोल्लासः ॥

---

R. No. 2460.

Paper. 10¼ × 9¾ inches. Foll. 16. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Dronamrāju Vēnkaṭacalapati Rao gāru of Pulla, Kistna district.

**पञ्चप्रकरणी.**

**PAÑCAPRAKARAṆĪ.**

Foll. 1*a*—15*a*. Fol. 15*b* is left blank. Fol. 16*a* gives the contents of the work. Fol. 16*b* is left blank.

A treatise bearing on the Advaita Védanta. Complete in the following 5 Prakaraṇas:—

१. ब्रह्मात्मविज्ञानविवेकः.
२. अध्यारोपणकथनम्.
३. अपवादनिरूपणम्.
४. साधनप्रकारनिरूपणम्.
५. आत्मज्ञानप्रकरणम्.

**Beginning:**

श्रीरामं सीतया सार्धं नत्वा सर्वहृदि स्थितम् ।
सत्सुखानुभवग्रन्थं कुर्वे बुद्धिविशुद्धये ॥
सच्चिदानन्दरूपं तत पूर्णं विष्णोः परं पदम् ।
यत्प्राप्तये समारब्धा वेदान्तास्सकला अपि ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥
अहं बद्धोऽस्मि संसारे मम मुक्तिः कथं भवेत् ।
किंचेद्वैराग्यसम्पन्नस्सोऽस्मिञ्छास्त्रेऽधिकारवान् ।

तत्र प्रथमं गुरुशिष्यलक्षणम् । शान्तो दान्तो जितेन्द्रियः । इह लोके परलोके च विषयसुखनिस्पृहः शिष्यः योग्यः ज्ञानाधिकारी च ।

* * * *

अथ संक्षेपेणात्मतत्त्वं प्रतिपाद्यते । आत्मा सच्चिदानन्दस्वरूपः सत् सत्यस्वरूपः । चित् ज्ञानस्वरूपः । आनन्दः सुखस्वरूपः । एवंभूतस्यात्मनः द्विविधो व्यवहारः एको विशेषः । एकः केवलः । तत्र विशेषव्यवहारस्त्रिविधः जाग्रदवस्था, स्वप्नावस्था, सुषुप्त्यवस्था । तत्र सुषुप्त्यवस्थायामयं जीवः । अहङ्कारलये सति परमानन्दस्वरूपं ब्रह्म प्राप्नोति । तथाह—कैवल्योपनिषच्छ्रुतिः । सुषुप्तिकाले सकले विलीने तमोऽभिभूतस्सुखरूपमेति । स्वप्नावस्थायामयं जीवः जाग्रदवस्थायां गिरिनदीसमुद्रमनुष्यकुटुम्बिजनपश्वादिज्ञानवत् स्वप्ने ज्ञाननिद्रायां दशविधबाह्येन्द्रियनिवृत्तौ शमनं प्राप्नोति ।

* * * *

**Colophon:**

इति पञ्चप्रकरण्यां ब्रह्मात्मविज्ञानविवेको नाम प्रथमप्रकरणं समाप्तम्

**End:**

नन्वा प्राणा उत्क्रामन्ति । अत्रैव सम[र]लीयन्ते विमुक्तश्च विमुच्यते च ब्रह्मविद् ब्रह्मैव भवति; ओं नमो ब्रह्मविद्भ्यो नमो ब्रह्मविद्भ्यः । परं नास्ति भूतं न भविष्यति ॥

**Colophon:**

इति पञ्चप्रकरण्यां आत्म . . . . . नाम पञ्चमकरणं समाप्तं ॥

---

## R. No. 2461.

Paper. 10¼ × 9¾ inches. Foll. 24. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Muhilil Tavali Vīrarāyan Uṇṇi Anujan Raja of Pudiyakovilagam, Calicut, Malabar district.

भाणः.

BHĀṆAḤ.

Foll. 1a—22a Foll. 22b—24 are left blank.

A kind of drama technically called Bhāṇa describing the passion of love between one Śṛṅgāralatā and her lover. The drama is probably first enacted at Śivapuri (Trichur?)

Wants the beginning and the end.

**Beginning:**

(सहर्षम्) हन्त वयमनुगृहीता भवद्भिः यन्महच्छब्दवाच्यकोटौ प्रवेश्यामहे.

विनयादिगुणग्रामदर्शनप्रीतचेतसाम् ।
अनुग्रहेण साधूनां महत्त्वं याति मानवः ॥

किं ब्रूथ—

भवतु त्वरितमेवारभ्यताम् ।
सरसाभिनयावलोकने कृतकौतूहलमस्ति नो मनः ।
समयस्य विलम्बनं ततः परिसोढुं नहि पारयामहे ॥

(सरभसं तथेति परिक्रम्य नेपथ्याभिमुखमवलोक्य) प्रिये इतस्तावत्। प्रविश्य नटी ।

एसा पत्तम्हि । अहिमदकरणिज्जे आणवेदु अज्जो ।

सूत्रधारः—आदिष्टोऽस्मि परत् कुलराजनियोगानुगुणमेव संप्रति सभासद्भिः सद्भिः । तदारभ्यतां वर्तमानं हेमन्तकालमधिकृत्य सङ्गीतकम् ।

नटी—जं आणवेदि अय्यो (इति गायति)—

कुन्दलआ मुउलद्दिअ महुअरहुंकारसीदपवणेहिम् ।
आहुणिआ इदिणाइं हिअए जणअन्वि पंमहं जळणम् ।

ततः प्रविशति विटः—

विटः—

विभाकरेत्यादि पठति । (सर्वतोऽवलोक्य)

आरूढैरुदयाचलं दिनपतेरुस्रैस्तमिस्रापहै-
रारक्तं पुरतोऽन्यतश्च विपुलध्वान्तोपलीमेचकम् ।
एतद्दिग्वलयं विभाति वलभिन्नीलाश्मभिर्निर्मितं
दामेवोज्ज्वलपद्मरागघटितश्रीमन्महानायकम् ॥

भद्रे केरलविषयजातासि । (स्वगतम्) अये इयं व्रीलालापनतमुखी मौनमेवावलम्बते । तदेवं भणामि ।

(परिक्रम्यावलोक्य) अये शृङ्गारलताया मन्दिरमिदमालोक्यते । अत्रान्तः प्रविशामि (प्रवेशं नाटयित्वा) हन्त शृङ्गारलतेयं तुङ्गारवजनितमनिकेतन-प्रसादं निजनिकेतनप्रासादमधिरुह्य गवाक्षेण वीक्षमाणा तिष्ठति ।

**End:**

किं ब्रूथ—आर्य मास्तु भवतश्चित्तदूषणम् । इदं तावद्विजानीहि ।

मध्येकेरलमिद्धसर्वविभवैः सद्धामभिर्मण्डितं
शुद्धान्तःकरणैः ऋचां निपठने श्रद्धालुभिश्च द्विजैः ।
यद्धाम स्मरवैरिणः शिवपुरीत्यद्धा प्रसिद्धा गुणैः
स्पर्धालु त्रिदिवेन तत्परिसरे बद्धाधिवासा वयम् ।

सत्वरमुपसर्पन् भो भोः प्रियसख मामैवमाचरितव्यम् । यदात्मानं प्रत्यात्मनोऽनुचितमभ्युत्थानम् । यच्च विशिष्याधुना परिश्रान्तोऽसि । किं ब्रवीषि । सखे उभयमपि युक्तरूपमेव कारणमनभ्युत्थानस्य । किन्तु—

अभिलाषेवावां मनसि करणेष्वप्यविरता-
दतिस्नेहात्सख्यं न च खलु तदाप्यात्मनि भिदा ।
परिष्वङ्गं वाञ्छन् सपदि वपुषोश्चैक्यजनकं
करोम्यभ्युत्थानं चिरधृतवियोगव्यथितयोः ॥

इति । सखे सम्यगाचरितं ममापि चेतस्त्वदा-

## R. No. 2462.

Paper. 10¼ × 9¾ inches. Foll. 16. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Upadhyayula Sūryacintāmaṇi Śāstri, Narasāpur, Kistna district.

Fol. 9 contains the 30th Adhyāya of the Garbhakulārṇava.

### नित्योत्सवग्रन्थः.

### NITYŌTSAVAGRANTHAḤ.

Same work as that described under No. 5668 of the D.C.S. MSS., Vol. XII. By Umānandanātha who says that he wrote this work at the instance of his Guru Bhāsuranandanātha who is said to have originally come from Kāśi and settled on the banks of the river Kāvēri in the Cōḷa country. The author refers to Ratnālōka, a work of his Guru Bhāsurānandanātha for detailed information and has based his treatise on the Kalpasūtra of Paraśurāma, the sixth incarnation of God Viṣṇu and supplemented it with views and quotations taken from several Tantras. The work is divided into seven Ullāsas, the names of which are given in a stanza in the extract. Of these this manuscript contains only the आरम्भोल्लास and the तरुणोल्लास.

**Beginning :**

नत्वा श्रीभासुरानन्दनाथपादाम्बुजद्वयम् ।

तनोत्युमानन्दनाथो नित्योत्सवमनन्यधीः ॥

नत्वा नाथपरम्परां शिवमुखां विघ्नेश्वरं श्रीमहा-

राज्ञीं तत्सचिवांस्तदीयघननानाथांस्तदन्तः पराम् ।

एवामावृतिदेवताः परिमितान् रश्मिभजा(भा)निर्जरान्

वीरांश्च प्रणमे निबन्धनमिदं नाम्नापि नित्योत्सवम् ॥

अन्तेवसता शम्भोरवतारेणाच्युतस्य षष्ठेन ।

प्रकटयति कल्पसूत्रं प्रोक्तं रामेण यत्र गदितोऽर्थः ॥

काश्याश्चोलं देशमेत्य कावेर्यङ्कविहारिणा ।

नाथेन भासुरानन्दनाथेनेहास्मि योजितः ॥

यस्यादृष्टो नास्ति भूमण्डलांशो यस्यादासो विद्यते न क्षितीशः ।

यस्याज्ञातं नैव शास्त्रं किमन्यैर्यस्याकारः सा परा शक्तिरेव ॥

भृगुरामसूत्रजालकभग्नप्रसरस्य मे द्विजस्येह ।

ग्रन्थिविमोकधुरीणं गुरुचरणस्मरणमेव मार्गकरम् ॥

आरम्भतरुणयौवनप्रौढतदन्तोन्मनावस्थाख्यैः ।
सूत्रोदितैस्तु सप्तभिरुल्लासैराश्रितेऽप्यविश्रान्तिः ॥
एषु दीक्षा गणेशश्रीश्यामाक्रोडीपराक्रमाः ।
सामान्यश्च क्रमोऽन्येषां क्रमेण प्रतिपादितः ॥
प्रतिपाद्येषु मुख्यत्वमङ्गतान्यच्च यद्भवेत् ।
तत्सर्वं श्रीगुरुप्रोक्ते रत्नालोकेऽधिगम्यताम् ॥
न्यायोपसंहृतैरङ्गैः प्रयुञ्जानस्य मे क्रमात् ।
भ्रमप्रमादास्खलितं समादधतु तद्विदः ॥
सूत्रसंसूचितानुक्ता विरुद्धाङ्गेतिकार्यता ।
तन्त्रान्तरात्सम्प्रदायादप्युक्तेह क्वचित् क्वचित् ॥
इह क्रमाणां सर्वेषां श्रीक्रमः प्रकृतिर्मतः ।
अतिदिश्य तमन्यत्र विशेषस्तु निरूप्यते ॥
श्रेयोऽर्थिनस्साधकस्य साङ्गे श्रीसुन्दरीक्रमे ।
आवश्यकत्वात् प्रथमं दीक्षाविधिरुदीर्यते ॥

तस्य च कालनिर्णयो मन्थानभैरवतन्त्रे—

वैशाखे सिद्धिदा दीक्षा श्रावणे वृद्धिदा नृणाम् ।
आश्विने सर्वसिद्धिस्स्यात्कार्तिके ज्ञानवृद्धिदा ॥

* * * *

अथोक्तकालमन्तरेणापि दीक्षार्हकालो यथा—

दीक्षा कार्या स्वकालेऽपि पवित्रे गुरुपर्वणि ।

विषुवे तुलामेषसङ्क्रमणयोरित्यर्थः । अयनद्वन्द्वे कर्कटमकरसङ्क्रान्त्योः । सङ्क्रान्त्यां तदन्यासु सङ्क्रान्तिष्वित्यर्थः । दमनोत्सव इति । चैत्रपूर्णिमादिषु, दमनकरणदेवीपूजादिनेष्वित्यर्थः । पवित्रे श्रावणपूर्णिमादिषु देव्याः पवित्रारोपणदिवसेष्वित्यर्थः ॥

* * * *

**Colophon:**

इति श्रीभासुरानन्दनाथचरणारविन्दमिलिन्दायमानमानसेनोमानन्दनाथेन निर्मितेऽभिनवे कल्पसूत्रानुसारिणि नित्योत्सवे निबन्धे दीक्षासमारम्भनिरूपणं नामारम्भोल्लासः प्रथमः ॥

नत्वा श्रीभासुरानन्दनाथपादाम्बुजद्वयम् ।
तनोत्युमानन्दनाथस्तरुणोल्लासमादृतः ।

**End :**

इत्थं पुरश्चरणेन सिद्धमनाः स्वातन्त्र्येणोपास्तौ च श्रीक्रमोक्तक्रमेण नैमित्तिकार्चनपरः काम्यापेक्षी चेत् इयामाक्रमे वक्ष्यमाणेन तत्कामानुगुणेन द्रव्येणेष्ट्वा सिद्धसङ्कल्पः सुखी विहरेत् ॥

**Colophon :**

इति श्रीभासुरानन्दनाथचरणारविन्दमिलिन्दायमानमानसेनोमानन्दनाथ(थेन)निर्मिते कल्पसूत्रानुसारिणि नित्योत्सवे गणपतिक्रमनिरूपणोल्लासो द्वितीयः ॥

---

R. No. **2463.**

**Paper.** 10¾ × 8¼ inches. Foll. 65. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Muhilil Kutti Anujan Tambiran of Chālapuram, Calicut.

**रामचरितम्.**

**RĀMACARITAM.**

**Foll.** 1*a*–64*b*. Fol. 65*a* contains the name of the owner of the MSS. from which this was copied. Fol. 65*b* is left blank.

Same work as that described under No. 11710 of the D.C.S. MSS., Vol. XX. The extract given below is from the 13th Sarga.

Contains the Sargas 1—12 complete and the 13th incomplete.

अथादरेणातिथिमर्चयन्तीमात्मानमज्ञातनिजापदेशाम् ।
अत्यन्तमन्तर्धृतसंभ्रमेऽपि धीरो यतिस्तां स्मितपूर्वमूचे ॥

कल्याणशीले कलवाणि बाले कल्लोललीलाहरणोचितभ्रूः ।
प्रीतस्त्वदालोकनमात्रतोऽहं सपर्यया किं पुनरातिथेयी(थ्या) ॥

इदं किमप्येव वदामि बाले कृतावधाना भवती शृणोतु ।
जानामि सम्यग् भवदीयवार्तामामूलतो दिव्यविलोचनेन ॥

*  *  *  *

किमाभिमुख्येन मिथः पतन्ती नेत्रे चकास्तश्चपलेक्षणायाः ।
दृशौ कुरङ्गीनयनस्य कुल्येव रत्नशृङ्गाररसस्य चास्याः ॥

मध्ये तयोर्भाति कनीनिकाख्यं लीलामरुत्कम्पितमुत्पलं यत् ।
अस्यास्सपत्नाक्रियते स्म दृष्टिः पद्मावलिभ्यां परमेष्ठिना यत् ॥

R. No. 2464.

Paper. 10¾ × 9¾ inches. Foll. 12. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. T. V. Saranyacarlu of Raghavapuram, Ellore taluk, Kistna district.

(a) द्रविडवेदप्रमाणम्.

DRĀVIḌAVĒDAPRAMĀṆAM.

Foll. 1a—8a.

Shows the greatness of the Drāviḍavēda or the Tamil Prabandhas of the Āḻvārs with authoritative quotations from Purāṇas, Āgamas, etc.

Incomplete.

**Beginning:**

यस्तु द्रविडवेदार्थज्ञाता स पुरुषः स्मृतः ।
दानपात्रं च संपूज्यो विशेषाच्च मुमुक्षुभिः ॥
यस्तु द्रविडवेदार्थज्ञाता तस्य पदद्वयम् ।
संक्षालयित्वा पादाम्बु पेयं मोक्षफलार्थिभिः ॥
यस्तु द्रविडवेदार्थज्ञातारं प्रणमेन्नरम् ।
स बहून्यपि वर्षाणि ब्रह्मलोके महीयते ॥

* * * *

पारमेश्वरसंहितायाम्—

ब्राह्मणः क्षत्रियो वैश्यश्शूद्रो वान्योऽथ शङ्करः ।
अधीतद्रामिडाम्नायः पूज्यो नित्यं न संशयः ॥

* * * *

आदित्यपुराणे—

स्वशाखाध्ययनं कृत्वा वैष्णवो द्रविडश्रुतिम् ।
अनधीत्य श्रमं शास्त्रैः यः करोति स दुर्मतिः ॥
पितुर्मृताहात्पूर्वेद्यू रात्रावध्ययनं द्विजैः ।
कार्यं द्रमिडवेदस्य पितुस्तृप्तिर्न चान्यथा ॥
श्राद्धभोजनकालेषु स्वशाखा द्रमिडश्रुतिः ।
पठनीया द्विजैर्विष्णुभक्तैः पितृमुदे ध्रुवम् ॥

**End:**

ब्रह्मकैवर्ते—

द्रमिडोपनिषद्गाथागुम्भाध्ययनतो इदम् ।
चूर्णयित्वावघातेन हरिद्राणां कदम्बकम् ॥

* * * गुम्भनी

तेषां भक्त्यै पवित्रादीन् दत्वा शक्त्यनुसारतः ।
संपूजयित्वेदं कार्यं पुत्रस्येति सुनिश्चितम् ॥
द्रमिडोपनिषद्गाथागुम्भेनाष्टाक्षरेण वा ।
पुंसूक्तेन च वा कार्यं देवताराधनं द्विज ॥ इति ॥

---

(*b*) श्रीवैष्णवलक्षणम्.

ŚRĪVAIṢṆAVALAKṢAṆAM.

Foll. 3*a*—11*b*.

Gives the characteristics of the Śrī-Vaiṣṇava Prapannas with authoritative quotations justifying and extolling their conduct with reference to certain matters.

Deals with the following subjects:—

| | |
|---|---|
| अभयहस्तप्रमाण. | शङ्खचक्रादिधारणप्रमाण. |
| विधवाकेशधारणप्रमाण. | प्रपन्नलक्षण. |
| महालयाकर्तव्यप्रमाण. | श्रीपादतीर्थग्रहणप्रमाण. |

**Beginning:**

नमन्मनो नाध्ययनान्न यज्ञान्न तपः क्रमात् ।
नित्यागाधश्रुते(?) ब्रह्म गुरूपसदनं विना ॥ ?
अपि सत्सेवनपरो न चेत्तापादिसंस्कृतः ।
अनर्चार्हतया विष्णोर्दास्यात्प्रच्यवते ध्रुवम् ॥

स्मृतिचन्द्रिकायाम्.

कौपीनं कटिसूत्रं च वस्त्रयुग्मं च धारयेत् ।
यावन्न धारयेद्विप्रस्तावच्छूद्रो न संशयः ॥

* * * *

विधवानां च सर्वासां प्रातः स्नानं विधीयते ।
अर्धचन्द्राकृतिं मृत्स्नां ललाटे धारयेत्सदा ॥

* * * *

विजयसंहितायाम्—

प्रपन्ना पतिना हीना या नारी केशधारिणी ।
तस्यास्तद्धारणे ब्रह्मन् दोषो नास्तीति मे मतिः ॥
स्त्रीणां तु भर्तृहीनानां वैष्णवीनां विशेषतः ।
यावच्छरीरपातं वै प्रशस्तं केशधारणम् ॥

* * * *

वासिष्ठसंहितायाम्.

सकृन्महालयोऽप्येवं नानुष्ठेयं वसुन्धरे ।
मदेकशरणैर्नित्यं प्रपन्नैर्मत्परायणैः ॥

End:

आध्यात्मिकविनाशाय भगवद्भक्तिपूर्तये ।
सम्यग् ज्ञानप्रकाशाय स आचारोऽयमीरितः ॥
वस्त्रं तु द्विगुणीकृत्य पाणौ पाणिं निवेशयेत् ।
तस्मिन् तीर्थं प्रतिष्ठाप्य त्रिः पिबेद्बिन्दुवर्जितः ॥

Fol. 11*b* contains Ēkādaśīviṣaya.

---

(*e*) द्वयोपनिषत्.

DVAYOPANIṢAT.

Fol. 12*a*.

Same work as that described under No. 548 of the D.C.S. MSS., Vol. I, Part III.

Complete.

---

R. No. 2465.

Paper. 10¾ × 9½ inches. Foll. 192. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Aupalakat Karuṇakara Menon, B.A., B.L., Chalapuram, Calicut.

भागवतम्—सव्याख्यानम्.

BHĀGAVATAM: WITH COMMENTARY.

Foll. 1*a*–191*b*. Fol. 192*a* contains the name of the owner of the MS. from which this was copied. Fol. 192*b* is left blank.

Same text as that described under No. 2161 of the D.C.S. MSS., Vol. IV, Part II. The commentary contained herein is called Padayōjana and is by Bhavadāsa or Bhagavaddāsa, pupil of Aruṇādri Guru and native of Sāgarapurakṣētra. The commentator states that he has based it on Śrīdharasvāmin's commentary and added short explanatory notes (for all the words of the text) of his own as well as from other commentaries and that he undertook this work at the instance of Queen Uttarāṣāḍham Lakṣmi Ammal, sister of Virarājamānavikrama.

Contains the 11th Skandha which breaks off in the 20th Adhyāya.

कृष्णं मरकतश्यामं भक्तानामघकर्षिणम् ।
सदानन्दचिदात्मानं परं गुरुमुपास्महे ॥

यदज्ञानाद्यत्र स्फुरति यदपि द्योतितमिदं
तिरोधत्ते यस्मिन्नपि यदवबोधाज्जगदिदम् ।
इदं श्रीकृष्णाख्यं स्वरसपरमानन्दनिबिडं
परं तत्त्वं चित्ते विलसतु मनोवागविषयम् ॥

सन्तानं शिवयोराद्यं सन्तानं सर्वसम्पदाम् ।
दन्तावलमुखं विघ्नसन्तानहरमाश्रये ॥

आभुग्नमध्यमुत्तुङ्गकुचमुद्यत्स्मिताननम् ।
हारगौरं वपुर्वाचां निदानं समुपास्महे ॥

चन्द्रार्धाभरणस्य सागरपुरक्षेत्रेशितुस्सन्निधौ
जातं वाञ्छकनित्रनाम्नि भवदासाख्यं द्विजन्मालये ।
आनीतं स्वगुणैर्विकृष्य गिरिसिन्धुक्ष्मापतेस्सोदरी
चर्चां भागवतस्य कर्तुमशिषद्राज्ञी कदाचिद् द्विजम् ॥

श्रीमानविक्रममहोदरया मुकुन्दलीलामरन्दरसलीलहृदा च राज्ञा ।
आज्ञापिता महितभागवतार्थरत्नमालाविलेखनकृते प्रयतामहेऽद्य ॥

संप्रत्येकादशस्कन्धव्याख्यानमत्र लिख्यते ।
अस्माभिराज्ञया राज्ञ्या विज्ञानविशदात्मनः ॥

प्रायशः श्रीधराचार्यग्रन्थ एवात्र लिख्यते ।
अन्यग्रन्थश्च कुत्रापि स्वत एव स्वकल्पितः ॥

प्रयोजनं तु सर्वेषां पदानामिह सान्वयम् ।
प्रायः प्रक्षिप्तपर्यायमुपादानमनन्यगम् ॥

एवंविधो हि प्रारम्भो निर्वोढुमतिदुष्करः ।
अस्माकं मन्दबुद्धीनां तथापि प्रयतामहे ॥

राज्ञ्याः स्वाज्ञानुसारेण प्रीतिलाभो महांश्च नः ।
श्रीगोविन्दप्रसादश्च विबोधश्च त्रयं फलम् ॥

क्षमन्तां साहसमिदं सन्तस्सन्तोषशालिनः ।
किञ्चास्माननुगृह्णन्तु गुणदोषविवेचकाः ॥

अज्ञानेन यदस्माभिरबद्धमपि भाष्यते ।
तदन्यदपि नस्सर्वं श्रीगोविन्दार्पणं भवेत् ॥

मद्दाचितः परानन्दकृष्णक्रीडानुवर्णिता ।
तन्निवृत्त्या परानन्दपदारोहोऽनुवर्ण्यते ॥

एवं तावद्दशमस्कन्धे भूभारावतरणाय ब्रह्माद्यर्थनया यदुकुलकलितपूर्णावतारस्य भगवतः श्रीकृष्णस्य यदुकुलावतारितसकलसुरांशैस्सह भूभारहरणोचितप्रवृत्तिविडम्बनेन तच्छ्रवणस्मरणादिपराणां परेषामानन्दकारणं क्रीडा निरूपिता।

* * * *

**Colophon:**

इति श्रीवासुदेवकथातीर्थावगाहपवित्रकीर्तेः श्रीवीरराजसंज्ञश्रीमानविक्रमसहोदरायाः पूर्वालयकमललक्ष्म्याः श्रीमदुत्तराषाढाजातायाः अभिनवलक्ष्म्या राज्या आज्ञया स्वाज्ञानध्वान्तचित्रभानुश्रीपुरुषोत्तमपादगुरुभक्तिमता श्रीमदरुणादिगुरुनाथानुशिक्षितेन भगवद्दासेन पूरितपदयोजनायां श्रीधरस्वामिविरचितायामेकादशस्कन्धव्याख्यायां प्रथमोऽध्यायः ॥

**End:**

यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितम् ।
योगेनै . . . . . . . . ॥

---

## R. No. 2466.

Paper 10⅝ × 9¼ inches. Foll. 54. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Drōṇamrāju Vēṅkaṭācalapati Rao gāru of Pulla, Ellore taluk, Kistna district.

**संहितारत्नाकरः.**

**SAMHITĀRATNĀKARAḤ.**

Foll. 1*a*—53*a*. Foll. 53*b*—54*a* give the contents of the work. Fol. 54*b* is left blank.

A digest in Vaikhānasāgama dealing with the consecration of images in temples and with the conduct of festivals and other matters connected therewith. In regard to the former the author says that he consulted the Vāsādhikāra, Kriyādhikāra and Yajñādhikāra (of the Bhṛgu Saṁhitā), the Vimānārcanakalpa (of the Marīcisaṁhitā), Tattvaprakāśikā, Sarvapratiṣṭhāvidhidarpaṇa, Lakṣaṇadīpikā, Saṅgrahamarīci, etc; but he followed generally the order given in the Marīcisaṁhitā.

Deals with the following subjects:—

(१) प्रतिष्ठाप्रकरणम्—

१. उपोद्घातप्रकरण.
२. अङ्कुरार्पणप्रकरण.
३. अयनमासतिथिवारनक्षत्रयोगकरणमुहूर्तप्रकरणम्.

४. आचार्यलक्षणाचार्यादिऋत्विग्वरण.

५. यज्ञसंभारप्रकरणम्.

६. अग्निकुण्डप्रकरणम्.

७. नयनोन्मीलनप्रकरणम्.

८. अधिवासत्रयविशेषाधिवासप्रकरणम्.

९. अग्निप्रणयनप्रकरणम्.

१०. होमद्रव्यादिदेवताप्रकरणम्.

११. कुम्भपूजासप्तकलशस्नपनप्रकरणम्.

१२. शय्यास्तरणशयनसर्वदेवार्चनप्रकरणम्.

१३. हौत्रखण्डे सभ्यहोमप्रकरणम्.

१४. रत्नन्यासदक्षिणदानप्रकरणम्.

१५. प्रतिष्ठाक्षरन्यासावाहनप्रकरणम्.

(२) उत्सवप्रकरणम्—

१. उत्सवप्रथमदिनादिनवमदिनपर्यन्तं क्रियासङ्ख्यानिर्णयः.

२. ध्वजदण्डप्रकरणम्.

३. ध्वजपटप्रकरणम्.

४. यागशालास्थानमण्डपद्रव्यसङ्ग्रहणप्रकरणम्.

५. स्नपनध्वजदण्डस्थापनप्रकरणम्.

६. ध्वजपटप्रतिष्ठाभेरीपूजाप्रकरणम्.

७. ध्वजारोहणप्रकरणम्.

८. सभ्याग्निकुण्डप्रकरणम्.

९. प्रथमदिनमारभ्य नवमदिनपर्यन्तं होमबलिहृत्सवविशेषपूजाप्रकरणम्.

१०. चूर्णोत्सवावभृथध्वजावरोहणप्रकरणम्.

११. पुष्पयागप्रकरणम्.

१२. उत्सवदैवत्यादिवर्षदैवत्यादिप्रकरणम्.

१३. वारादिदैवत्यम् (incomplete).

**Beginning:**

अथेदानीं प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थं सम्प्रदायप्रवर्तनार्थं चेष्टदेवतानमस्काररूपं मङ्गलमादौ निबध्नाति, श्रीविष्णुमित्यादिना—

श्रीविष्णुं श्रीमहीयुक्तं शान्तं शेषं खगाधिपम् ।
सुदर्शनाद्यायुधानि सुमूर्तानि नमाम्यहम् ॥
मरीचिं भृगुमत्रिं च कश्यपं विखनोमुनिम् ।
आगमानां प्रवक्तॄंश्च वन्दे सूत्रप्रवर्तकान् ॥

नारायणस्य यस्यात्मा तत्स्वभूतः प्रवर्तते ।
वेदवेदाङ्गतत्त्वज्ञं तमनन्तं नमाम्यहम् ॥
वैखानसमहाशास्त्रपारगान्सप्त गोत्रजान् ।
वैखानसानहं वन्दे वेदवेदाङ्गकोविदान् ॥

इतीष्टदेवताप्रार्थनां गुरुवन्दनं च कृत्वा विष्णोः प्रतिष्ठां वक्ष्यामि । अत्र वासाधिकारे प्रतिष्ठाशब्दो निरुक्तः ।

प्रतिबुद्ध्या प्रतिष्ठा चेत् प्रतिष्ठेत्युच्यते बुधैः ।
अतः प्रतिष्ठा कर्तव्या सर्वसाधरणेति सा ॥ इति ।

प्रतिष्ठाशब्दार्थमुक्त्वा तत्र संगृहीतग्रन्थान् वक्ष्यामि । वासाधिकारक्रियाधिकारयत्नाधिकारान् समूर्तार्चनाधिकरणं विमानार्चनकल्पद्वयं च, तत्त्वप्रकाशिकां सर्वप्रतिष्ठाविधिदर्पणलक्षणदीपिकां च सङ्ग्रहमरीचिमपि विलोक्य सङ्ग्रहमरीच्युक्तक्रममेव पुरस्कृत्याङ्कुरार्पणाद्यक्षन्यासावाहनान्तं शिलाबेरप्रतिष्ठाक्रियाकलापे यत्र यत्र विशेषास्सन्ति तत्र तत्र तांस्तान्विशेषान् सङ्गृह्य व्याख्यायते । एवं सङ्ग्रहेण ग्रन्थसाङ्कर्यदोषः । तथा वासाधिकारे—

मयाङ्गिरसात्रिणा च कश्यपेन चतुर्विधम् ।
कर्षणादिप्रतिष्ठान्तमन्योन्यं नैव सङ्करम् ॥

इति भृगुणोक्तत्वादेतेषां ग्रन्थानां सङ्करदोषं परिहृत्य देवयजनं वक्ष्यामि । अस्य यज्ञस्य—

१. अङ्कुरार्पणम् पूर्वम्,
२. द्वितीयं सम्भारादिसंभरणम्,
३. वास्तुहोमः,
४. चतुर्थमक्षिमोचनम्,
५ पञ्चमं बिम्बशुद्धिः,
६ षष्ठं मथनाग्न्यायतनम्,
७. सप्तमं पञ्चाग्नीनां प्रणयनम्,
८. अष्टमं कुम्भपूजाध्यानम्,
९. नवमं कलशस्थापनम्,
१०. दशमं शयनास्तरणम्,
११. प्रतिसरबन्धं शयनं चैकादशम्,
१२. हौत्रप्रशंसा द्वादशम्,
१३. सर्वदेवार्चनं त्रयोदशम्,
१४. प्रधानहोमः चतुर्दशः,
१५ त्रिषवणस्नानं देवस्योत्थापनं पञ्चदशम्,
१६. रत्नन्यासः षोडशः,
१७. दक्षिणादानाग्निसंग्रहणं च सप्तदशम्,

१८. सप्रमदक्षिणमष्टादशम्,
१९. आलयस्थापनमेकोनविंशतिकम्,
२०. चलाचलावाहानं विंशतिकम्,
२१. प्राणप्रतिष्ठामन्त्रन्यास एकविंशतिकः,
२२. स्थापकैस्सह पुण्याहवाचनं द्वाविंशतिकम्,
२३. नित्यार्चनं ब्राह्मणवैष्णवदैवज्ञानां प्रपूजनं त्रयोविंशतिकम्,
२४ उत्सवस्नपनं चतुर्विंशतिकम्,
२५. एतेषामपि पर्यायेण महाहविर्निवेदनं पञ्चविंशतिकम्,

कारयेत् ।

**Colophon:**

इति संहितारत्नाकरे उपोद्घातप्रकरणं प्रथमम् ॥

* * * *

इति श्रीवैखानसे संहितारत्नाकरे प्रतिष्ठाक्षरन्यासवाहनप्रकरणं पञ्चदशम् । प्रतिष्ठाप्रकरणानि समाप्तानि ॥

अथोत्सवप्रकरणप्रारम्भः—

श्रीभूयुक्तं हरिं नत्वा मुनीन् विखनसं मुनिम् ।
वक्ष्येऽहं चोत्सवं विष्णोः शान्तं विष्णुं सुदर्शनम् ॥

मरीच्यादिग्रन्थानवलोक्य तत्सारं गृहीत्वा मरीच्युक्तक्रमेणाङ्गीकृत्य यत्र यत्रापेक्षितमस्ति तत्र तत्रैव लिख्यते—

उदित्युत्कृष्टवचनं सवो यज्ञमुदाहृतम् ।
तस्मादुत्कृष्टयज्ञत्वादुत्सवस्सर्वकामदः ॥

इत्यैहिकामुष्मिकफलप्रदत्वादुत्सवं वक्ष्यामि । अथोत्सवविधिस्त्रिविधः । प्रत्यब्दमेकस्मिन् मासि नित्यं क्रियते नित्योत्सवः । उपद्रवशान्त्यर्थं शान्त्युत्सवः । द्रव्यालाभे श्रद्धया कृतः श्रद्धोत्सव इति त्रिविधः ॥

* * * *

**Colophon:**

इति श्रीवैखानसे संहितारत्नाकरे श्रीविष्णुदेव्यागमधर्मशास्त्रे उत्सवप्रथमदिनादिनवमदिनपर्यन्तं क्रियासङ्ख्यानिर्णयो नाम प्रथमः परिच्छेदः ॥

**End:**

इति श्रीवैखानसे संहितारत्नाकरे श्रीविष्णुदिव्यागमधर्मशास्त्रे उत्सवदेवत्यादिवर्षदेवत्यान्तप्रकरणं द्वादशम् ॥

अथ वार्देवत्यम्--

उदु त्यं चित्रमित्यर्के । सोमं या ते धामानीति चन्द्रके ।

* * * *

अथ नक्षत्रदैवत्यम्—

अग्नये कृत्तिकाभ्य इत्यादि तत्तन्नक्षत्रदैवत्यं जुहुयात् ।

---

R. No. 2467.

Paper. 10¼ × 9¾ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. obtained through the Sub-Magistrate of Kovvūru, Yernagūdem taluk, Kistna district.

कात्यायनशुल्बसूत्रम्, सव्याख्यानम्.

KĀTYĀYANAŚULBASŪTRAM WITH COMMENTARY.

The aphorisms laying down the form, the dimensions and other details required for the construction of sacrificial altars according to the Kātyāyana school together with a commentary written by Mahīdhara, son of Kēśava, at the instance of his Guru Ratnēśvara on Sunday, the 13th day of the bright fortnight of the last month in the year 1646 (Vikrama). The commentator says that he has followed the Bhāṣya and also the Vṛtti of Rāma.

Contains the following subjects (Kaṇḍikās):—

१. प्राच्यादिकथनम्.
२. चतुरश्रादिकथनम्.
३. समासव्यासकथनम्.
४. समासकथनम्.
५. पुमुच्चयकथनम्.
६. वेदीष्टकालक्षणम्.

Complete.

**Beginning:**

श्रीनृसिंहं नमस्कृत्य रमेशं भक्तवत्सलम् ।
शुल्बस्य विवृतिं वच्मि भाष्यवृत्त्यनुसारिणीम् ॥

श्रीमान् कात्यायनः पञ्चदशशाखासाधारणं कल्पसूत्रं विरच्य तत्र कथित-वेद्यादिमानोपयोगितया शुल्बपरिशिष्टं चिकीर्षुः प्रतिजानीते—

रज्जुसमासं वक्ष्यामः ।

रज्ज्वा समस्यते संक्षिप्यते यः प्रदेशः स रज्जुसमासः समासो ह्रासस्या-प्युपलक्षकः चतुरश्राच्चतुरश्रं निर्जिहीर्षन्नित्यादिवक्ष्यमाणत्वात् । रज्ज्वा संक्षि-

ष्यते विस्तीर्यते च यथा तं प्रकारं कथयिष्याम इत्यर्थः । यद्वा रज्जोस्समासं सम्यगसनं क्षेत्रानुगुणतया धारणं रज्जुसमासस्तं वक्ष्यामः । प्रतिज्ञैषा शिष्यप्रोत्साहनाय । ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तत इत्युक्तेः । प्राच्यं शादौ प्राक्शब्दः श्रूयते । तथेह प्राचमुद्धरन्तीत्यादौ । अतो प्राचीज्ञानार्थमाह—
स मे शङ्कुं निखाय शङ्कुसंमितया रज्ज्वा मण्डलं परिलिख्य यत्र रेखयोः शङ्क्वग्रच्छाया निपतति तत्र शङ्कू निहन्ति सा प्राची ।

* * * *

**Colophon:**

इति शौल्वे विवरणे महीधरविदा कृते ।
प्राच्यादिकथनं नाम प्रथमा कण्डिकागमत् ॥

**End:**

अथिमानं पञ्चमांशं पक्षयोरुभयोर्न्यसेत् ।
दशमांशेन पुच्छस्य पुच्छमप्यत्र वर्धयेत् ॥
पुच्छस्य पक्षयोश्चापि पश्चादेवं नियोजयेत् ।
दशमांशं पञ्चमांशं लक्षणं त्वथिमानकम् ॥
षट्त्रिंशत्प्रक्रमाः प्राच्यां चतुर्विंशतिरंसयोः ।
श्रोणेस्त्रिंशत्प्रक्रमास्त्युर्वेदी सोमाख्यके मखे ॥
सूत्रदोषदरिद्रस्य गूढमन्त्रस्य धीमतः ।
समाप्तेयं क्रिया शौल्वी कात्यायनमहात्मनः ॥

**Colophon:**

इति शौल्वे विवरणे महीधरविनिर्मिते ।
वेदीष्टकालक्षणाख्या षष्ठीयं कण्डिकागमत् ॥

व्याख्यातृवंशादिविवरणम्—

रसवेदाङ्कभूवर्षे मास्यन्ते धवले दले ।
त्रयोदश्यां रवेर्वारे वारणस्यां महीधरः ॥
श्रीरत्नेश्वरमिश्रस्य सुगुरोः केशवात्मजः ।
आज्ञया विवृतिं शौल्वीं भाष्यवृत्त्यनुसारिणीम् ॥
विदुषां सुखबोधाय व्यधाद् बुद्ध्यनुसारतः ।
भाष्यं रामकृतां वृत्तिं सूत्राण्यालोच्य तत्त्वतः ॥

नीलकण्ठो रमानाथः सिताभश्चन्द्रशेखरः ।
भैरवश्च कृपासिन्धुः स मे तुष्यान्नृकेसरी ॥

**Colophon :**

इति श्रीमन्महीधरविरचितं शुल्बसूत्रविवरणं समाप्तिमगमत् ॥

---

R. No. 2468.

Paper. 10¼ × 8¼ inches. Foll. 8. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of Rāja Śrī Pudiyakōvilagam Muhiḷ Vīrarāyamuni Anujan Rāja of Calicut.

पार्थलीला.

PĀRTHALĪLĀ.

Foll. 1*a*—7*b*. Fol. 8 is left blank.

Gives an account of Arjuna's combat with Śiva who came disguised as a hunter to test his devotion and valour while he was doing severe penance for getting the Pāśupatāstra and of the ultimate gift of the divine missile by Śiva to his devotee. Also gives a few stanzas about the Pāṇḍava's incognito and the Svayaṁvara of Draupadi.

Incomplete.

**Beginning :**

कृतेऽथ किम्मीरवधे बकारिणा
वनं गतः काम्यकमस्तकण्टकम् ।
युधिष्ठिरो धौम्यमुखैस्सह त्वि(द्वि)जैः
स्थितिं व्यधाद् द्वैतवनान्तिके चिरम् ।
ततोऽर्जुनस्सत्यवतीसुतान्मुनेरवाप्य विद्यामरिनिर्जयोत्सुकः ।
ययौ हिमाद्रिं तपसा प्रसादितात् पुरद्विषः पाशुपतास्त्रलब्धये ॥
विलङ्घ्य देशान् विविधान् विलोकयन् स शैलराजं मृगनाभिगन्धिनम् ।
सदा हिमानी दशदिक्प्रसारिणीं बिभर्ति यः कीर्तिमिवात्मसंभवाम् ॥

* * * *

उदग्रतेजोऽभिहतैर्महर्षिभिर्निवेदिते तादृशि तब्धसाचिनि ।
हरेण भक्तार्तिहरेण तत्क्षणं किरातरूपं प्रतिपन्नमुत्तरम् ॥

* * * *

अथापतन्तं धृतसूकराकृतिं खुराहतग्राह(व)विनिर्यदर्चिषम् ।
स घोरघोणादलितान्तिकद्रुमं जिघांसुमालोकत मूकदानवम् ॥
स तं विदित्वासुरमेव कश्चन द्विषन्नियुक्तं स्वतपोविघातकम् ।
निहन्तुकामः पदमुच्छ्रितं निजं क्षितौ निचिक्षेप शरं च कार्मुके ॥

* * * *

स तत्र निष्पन्दविलोचनोत्पलैर्विलोकितस्सस्पृहमप्सरःकुले ।
अधिष्ठितोऽर्धासनमस्य सन्ततं ययौ जयन्तादपि माननीयताम् ॥
कृताभिसारां स कदाचिदूर्वशीं स्मरस्य मूर्तामिव शस्त्रदेवताम् ।
उपाचरन् मातृवदादृतो वशी शशाप सा वर्षवरो भवेति तम् ॥

इति ॥

पार्था मत्स्यपुरे गूढमन्त्यमब्दं निनीषवः ।
मस्थाप्य द्वारकां सर्वाननुगांस्तद्वनं जहुः ॥
उपप्लव्यमुपागम्य पितृकाननशाखिनि ।
निधाय शस्त्रसम्भारं वेषान्तरभृतोऽपि शम् ॥

* * * *

स्वेनैव वत्सरस्यान्ते साफल्यं यास्यसीति सः ।
प्रायुङ्क्त प्रणतायास्मै जनेशाय जयाशिषम् ॥ इति ।
अथैवमाख्याय स वीरवर्यस्त्रिकीर्षितः कार्मुकमाततज्यम् ।
महीपतीन् मञ्चगतान् भगिन्यै प्रदर्शयन् प्राक्रमताभिधातुम् ॥
दुर्योधनोऽसौ नृपतिः पुरस्ताद् दृष्ट्वा मदीयां श्रियमत्युदग्राम् ।
व्रीडेन गूढां किल दिश्युदीच्यां कुत्रापि वासं कुरुते कुबेरः ॥

**End:**

तेषां समीपेऽथ निवेश्य कृष्णां नृपाय तस्मै विजने निषण्णः ।
स पञ्चपतीत्वमशेषमस्यां यथाक्रमं प्राक्रमताभिधातुम् ॥
इयं पुरा जन्मनि पुण्यशीला नालायनीति श्रुतनामधेया ।
वृद्धं पतिं कुष्ठिनमुग्ररोषं मौद्गल्यमाराधयति स्म साध्वी ॥

**Colophon:**

इति पार्थलीला ॥

---

R. No. 2469.

Paper. $10\frac{1}{4} \times 8\frac{1}{4}$ inches. Foll. 26. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Drōṇamrāju Vēṅkaṭācalapati Rao gāru of Pulla, Ellore taluk, Kistna district.

संहितारत्नाकरः.

SAMHITĀRATNĀKARAḤ.

Foll. 1a—25b. Fol. 26a contains Kṛṣṇārghyaviṣayakaślokas. Fol. 26b is left blank.

Same work as that described under R. No. 2466 ante. There is additional matter at the end as given below.

Contains the Utsavaprakaraṇa which deals with the following subjects:—

१. प्रथमदिनादिनवमदिनपर्यन्तक्रियानिर्णयः.
२. आचार्यादिऋत्विग्वरणम्.
३. मृद्ग्रहणम्.
४. अङ्कुरार्पणम्.
५. सप्तकलशस्नपनोत्सवादिस्नपनम्.
६. स्नपनद्विगुणार्चनद्विगुणानिवेदनम्.
७. ध्वजदण्डशुद्धिसंस्थापनम्.
८. वास्तुदेवतामण्डलम्.
९. वास्तुहोमः.
१०. ध्वजपटप्रतिष्ठा.
११. अनपायिदेवतापूजा.
१२. भेरीपूजाताडनं च.
१३. आवाहनाद्यखिलगद्यपद्यैः देवताबलिः.
१४. ध्वजारोहणम्.
१५. वेद्यां नवकुम्भारोपणम्.
१६. सभ्याग्न्याधानम्.
१७. कुम्भेषु नवमूर्त्यावाहनम्.
१८. यागदीक्षाकौतुकबन्धनम्.
१९. सभ्याग्निहोत्रादिहोमः.
२०. वेदिस्थदेवानां पूजनम्.
२१. उत्सवबलिनिर्वहणम्.
२२. उत्सवभ्रमणम्.
२३. आस्थाने राजोपचारकलादिभक्ष्यनिवेदनम्.
२४. पुष्पाञ्जलिप्रणामादि.

प्रथमदिनादिनवमदिनपर्यन्तक्रियाक्रमः—

२५. नवमेऽहनि सायं चूर्णोत्सवः.
२६. अवभृथः.
२७. मौनबलिः.
२८. पुष्पयागः.

**End:**

स सर्वान् कामानवाप्नोति बहुपुत्रपौत्रवान् धनधान्यादिसमृद्धिमान् शत्रुविजयी भूत्वा इष्टान् सर्वान् भोगानवाप्नोति ।

* * * *

यजमानस्य दक्षिणे हस्ते अक्षतोदकं प्रक्षिपेत् । यजमानश्च सर्वान् कामानवाप्नोति । आचार्यायर्त्विग्भ्यो नवविधदक्षिणां दद्यात् ॥

**Colophon:**

इत्युत्सवसारस्संपूर्णः ॥

---

R. No. **2470.**

Paper. 10½ × 9½ inches. Foll. 74. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of Rāja Śrī Mānavikrama Anujan Kuññuṇṇi Rāja of Paḍiññārēkōvilagam, Calicut.

देवीमाहात्म्यव्याख्या—गूढार्थदीपिका

DĒVĪMĀHĀTMYAVYĀKHYĀ: GŪḌHĀRTHADĪPIKĀ.

Foll. 1*a*—73*a*. Foll. 73*b* and 74 are left blank.

A commentary on the Dēvīmāhātmya which work has been described under No. 2444 of the D.C.S. MSS., Vol. IV, Part II.

Contains the Adhyāyas 1 to 13 complete.

**Beginning:**

संविद्रूपा परा शक्तिः त्रिगुणानन्तरूपिणी ।
जगज्जन्मस्थितिध्वंससाक्षिण्यस्तु शिवाय नः ॥
आत्मानन्दसुधाधाम्नो गुरुदुग्धाम्बुधेर्मम ।
कटाक्षच्छिलिकल्लोलाः क्षालयन्तु मनोमलम् ॥
श्रीमद्गुरुपदाम्भोजभावना वासनामयी ।
देवीचरितगूढार्थदीपिका प्रोच्यते मया ॥

इह खलु पुरा शशिमौलिप्रणामान्तेवासी समस्तविशारदः श्रीमार्कण्डेयः परमेश्वरप्रसादलब्धाष्टादशविद्यः क्रोष्टुकिनाम्ने स्वशिष्याय तास्समुपदिदेश । प्रसिद्धाश्च ता अष्टादश विद्याः । तथाच श्रूयते—

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वो वेद एव च ।
अर्थशास्त्रचतुर्थास्ते विद्या ह्यष्टादश स्मृताः ॥ इति ।

• • • •

तत्रास्मिन् वाराहाख्ये कल्पे षण्मनवोऽतीताः—स्वायम्भुवस्वारोचिषोत्तमतामसरैवतचाक्षुषाख्याः । साम्प्रतं सप्तमो मनुर्वैवस्वतो नाम । तस्य

मत्स्यमूर्तेरनुग्रहान्मन्वन्तरलाभश्च तत्रपञ्चमुपवर्णितः । परं भविष्यतस्सावर्णे-र्विष्णुमायाप्रसादतो मन्वन्तरलाभश्चोक्तः । तत्र तस्य सेवानुग्रहप्रकारः सप्रपञ्चं विविस्सता क्रोष्टकिना पृष्टो मार्कण्डेयस्तद्विवक्षुस्तन्मनस्समाधानार्थं तमभिमुखीकरोति । सावर्णिः सूर्यतनय इति श्लोकद्वयेऽन्वयः । अष्टमः मनुः कथ्यते लोके तदुत्पत्तिं निशामय । उत्पत्तिरुद्भवहेतुः कार्येण कारणोपचारः पूर्वजन्मनि तस्य तत्सेवया तदनुग्रहलाभप्रकारः ।

* * * *

अत्रेदमनुसन्धेयम्—इह खलु पुरा त्वष्टृसुता संज्ञासंज्ञा भार्या सूर्यस्यासीत् । तस्मात्तस्यां समजनि सकलप्रजासंयमनो यमो, यमुना चैका कन्यका, वैवस्वतो मनुरपि । एवं सञ्जातपुत्रा सती संज्ञा स्वभर्तृदेहतैक्ष्ण्यमसहमाना तत्परिहाराशंसया तपश्चर्तुमुद्यता पतिव्रतायाः स्वस्याः भर्तृशुश्रूषणमन्तरेण कर्मान्तरेष्वनधिकारमाशङ्क्य तदप्यात्मनैव निर्वोढुमिच्छति । योगबलेन स्वच्छायायाः स्वसमानवर्णां सवर्णां सुवर्णसवर्णां काचन वनितां निर्मायाहं तपश्चर्तुं गमिष्यामि । त्वमत्रैव स्थित्वा भर्तारं परिचर ।

* * * *

महाभाग इति । महाभाग्यहेतुः रवेस्तनयस्सावर्णिरित्युक्तानुवादः ।

* * * *

एवं श्रोतव्यसारकथनपूर्वकमभिमुखीकृताय शिष्यायोपदि(दे)श्यमुपदिशति गुरुः—स्वारोचिषेऽन्तरे इत्यादिना । हे क्रोष्टके पूर्वं सुरथो नाम सुरथ इति प्रसिद्धः कश्चिद्राजाभूत् । अत्र नामशब्दः प्रसिद्धौ ।

* * * *

**Colophon:**

इति देवीमाहात्म्यव्याख्यायां गूढार्थदीपिकायां प्रथमोऽध्यायः ॥

**End:**

सावर्णो भविता मनुरित्युपसंहारश्च कृतः । तेन चात्र सवर्णशब्दस्याजामेकां लोहितशुक्लकृष्णामिति श्रुतेर्गुणसाम्यरूपिण्याः प्रकृतेर्वाचकत्वादुपक्रमोपसंहारैकरूप्यादिर्षाड्विधतात्पर्यलिङ्गपर्यालोचनया रहस्यैक्यविषयत्वमवधार्यते । सुरथवैश्यौ च तत्सेवया भुक्तिमुक्तिफलसाधनत्वख्यापनायोदाहियेते ॥

**Colophon:**

इति देवीमाहात्म्यव्याख्यायां त्रयोदशोऽध्यायः ॥

या चक्रे मधुकैटभासुरवधं संभूय देहाद्धरेः
या जज्ञे महिषं च देवमहसा संभूतदिव्याकृतिः ।
भूत्वा चन्द्रशिखामणेः प्रियतमा देहाच्च या सानुगान्
शुम्भादीन्निजघान सास्तु सततं भुक्त्यै च मुक्त्यै च नः ॥

---

R. No. 2471.

Paper. 10¼ × 9¾ inches. Foll. 54. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Drōṇamrāju Vēṅkaṭācalapati Rao gāru of Pulla, Kistna district.

ब्रह्मसूत्रविषयवाक्यवृत्तिः.
BRAHMASŪTRAVIṢAYAVĀKYAVṚTTIḤ.

Foll. 1*a*—53*a*. Fol. 53*b* contains the name of the owner of the MS. from which this was copied. Fol. 54 is left blank.

A commentary on the Vişayavākyas or Upaniṣadic passages forming the basis of the discussion in the Brahmasūtras. From the first Pāda, the name of the commentator is not given. In the colophon of the second and the third Pādas, the name of the commentator is made out as Rāmānanda. In the colophon of the fourth Pāda, it is stated that the commentator is Vigitanendra (Vijñānēndra), disciple of Vāsudēvēndra.

Contains the first Adhyāya complete.

**Beginning:**

श्रीशिवं सच्चिदानन्दं परमात्मानमव्ययम् ।
मायामूर्तिं योगिवेद्यं तं वन्दे तत्त्वसिद्धये ॥

अथातो ब्रह्मजिज्ञासा ।

ओं तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति । यथेह भूलोके कर्मणा चितस्सम्पादितः पुत्रमित्रकलत्रादिलक्षणो लोकः जनः क्षीयते नश्यति एवमेवामुत्र स्वर्गादिलोकेष्वपि पुण्येन चितः सम्पादितः पुत्रमित्रकलत्रादिलक्षणो लोकः क्षीयते नश्यतीत्यर्थः ।

* * * *

**Colophon:**

इति श्रीब्रह्मसूत्रविषयवाक्यवृत्तौ प्रथमस्याध्यायस्य प्रथमः पादः ॥

इति श्रीरामानन्दीये प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तः ॥

इति श्रीरामानन्दीये पारमहंस्यां संहितायां प्रथमस्याध्यायस्य तृतीयः पादः समाप्तः ॥

**End:**

हे शिष्य वटफलमानय, शिष्य आह इदं भगव इति, पुनरपि गुरुराह भिन्धीति । अण्व्यः सूक्ष्माः धानाः बीजानीत्यर्थः । तासां धानानां मध्ये एकां धानां भिन्धीत्यर्थः । न किंचन भगव इति कृत्वा(त्वा) वटबीजा वटवत् दृष्टान्तेनातीन्द्रियाणां सूक्ष्माणां परमाणूनां जगत्कारणत्वं प्रतिपाद्यत इति नैयायिका वदन्ति तदसङ्गतम । बहुश्रुत्यनुसारेण वटबीजावयववदिन्द्रियाग्राह्यस्याकाशवत्सर्वत्र व्यापकस्य परमात्मन एवानया श्रुत्या जगत्कारणत्वप्रतिपादनादिति भावः ॥

**Colophon:**

इति श्रीपदवाक्यप्रमाणश्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवेन्द्रमुनिवर्यचरणारविन्दमकरन्दमधुव्रतश्रीसदाशिवप्रेरितश्रीविजिता(ज्ञा)नेन्द्रस्वामिविरचिते सर्ववेदान्तश्रुतिसारसङ्ग्रहे वैदिकोत्तमविद्वज्जनमनोहरे मन्दबुद्ध्यास्तिकनामधेये पुरुषार्थसुधाभिधाने प्रथमाध्यायः ॥

---

## R. No. 2472.

Paper. 10¾ × 9½ inches. Foll. 148. Lines, 20 in a page. Dēvanāgarī and Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. D. V. Vīrabhadra Sōmayājulugāru of Jēgurupāḍu, Rajahmundry taluk, Gōdāvari district.

(a) ताजकतन्त्रसारः.

### TĀJAKATANTRASĀRAḤ.

Foll. 1a—42a. Fol. 42b contains some stanzas in Tājaka.

Similar to the work described under R. No. 420 ante. There are many lacunæ in the beginning and so nothing can be made out regarding the author. Probably it was written at the instance of Smarasiṁha, son of Kumārasiṁha of Paglāṭa family in the Cālukya line of kings. The work seems to be also called Gaṇakabhūṣaṇa.

Contains the Saṁjñātantra, the Pracchātantra and the Varṣaphalatantra.

**Beginning:**

क्रूरनतवनगमध्याह्नपित्तकटुकधातुरक्तहोमकृतः ।
व्यङ्गचतुष्पददावो दीपोश्चर्य्यश्चतुरश्रो युवा भौमः(?) ॥

गुवातिशुभगामचतुरः प्रभातसमता तु जीवसर्वतनश्च ।
खगनिलशूद्रपितृवनहोमानि बुधः शिशुश्चत्तः ॥

*  *  *  *

अथ पञ्चवर्गिकाः ।

स्वगृहं स्वोच्चं हृद्दात्रैराशिकमुसहं चेति ।
पञ्च ग्रहाधिकारा विनाधिकारं ग्रहे न बली ॥

**Colophon:**

इति प्राग्वान्वयकुमारसिंहात्मजसमुद्रिते ताजकतन्त्रसारे गणकभूषणं नाम प्रथमं तन्त्रम् ॥

**End:**

रन्ध्रे शुभाशुभैश्च स्मरकुजेनन्दुनातनौनैव-
जन्मानुदवर्षफलं निधिमिव कीर्तिं . . . द्धये(?) ।
विबुधा तन्नयनिर्विकल्पं
ताजिकतन्त्रोद्यतं कल्प्यम् ॥
चौलुक्यक्षितिपालसूनुसकलव्यापारपारं भ्रम-
द्दल्लापिक्ष्यभूर्ध्वभूपसचिर(वः) खण्ड . . . खण्डाह्वयः ।
श्रीमान् शोमसदेव इत्यभिजनो तस्या भवेत्सज्जन-
सुमन्त इति प्रशान्त इति प्रशान्तसुमतिस्तत्पादभूरङ्गभूः(?) ॥
तस्यात्मज सह(स्तमज)निष्ट कुमारसिंह-
नामा प्रमाणितगुरुर्ग . . . ग्रगेहम् ।
तत्सूनुना गगणभूग(णकवर्ग)मुदे स्मरेण
खण्डोम्युद(मु)द्रियत ताजिकपद्मकोशात् ॥
यत्तार्तीयकतन्त्रे स्मृतमिदं खेटत्रयोगापरि-
प्रच्छावर्षफलाङ्कितं दृढमतिस्तत्तन्त्ररत्नत्रयम् ।
आनल्पं किल कल्पयिष्यति भ्राजिष्णु सोऽन्तस्सुखं
भाविन्यत्रिशुभाशुभानि निगदन् . . . . . प्यते ॥

**Colophon:**

इति श्रीपल्लाटान्वयकुमारसिंहात्मजसमरसिंहसमुद्रे ताजकतन्त्रसारे गणकभूषणनाम्नि वर्षफलाख्यं नाम तृतीयतन्त्रं समाप्तम् ।

(b) ताजकतन्त्रसारः, आन्ध्रटीकासहितः.

TĀJAKATANTRASĀRAḤ WITH TELUGU MEANING.

Foll. 43a—60a.

Same work as the above and with meaning in Telugu.

Contains in disorder some portion from the beginning of the third Tantra.

**Beginning:**

(लम)श्रीचन्द्रले पदयुग्मं हृदि मेऽस्तु सदा नमश्चरैर्नित्यम् ।
परशिवमहिषीं परं ते नारायणमुनिनाथके नमो नित्यम् ॥
श्रीमुक्तभागाटङ्का खेटकर्तव्या वर्षलग्नगा ।
आदौ स्वल्पांशका स्याप्यास्ततोऽधिकारक्रमात् ॥
तत्तुष्टावोदयलग्ने तदेकयं माजको भवेत् ।
दिनादिवर्षमासानां यदुक्तं स्याद्गुणकं स्फुटम् ॥
सर्वग्रहहीनांशान् गुणयेद्गुणकेन च ।
नचिराख्या दशा सा स्यात् यवनाचार्यभाषितम् ॥

**End:**

पुण्यसहमे शनिं पात्य रात्रौ वामं सदालग्ने देयम् । उपायसहमं दिवसे शनौ गुरुं पात्य रात्रौ वामं सदा लग्ने देयं दारिद्र्ये सहमं दिवसे पुण्यसहमे बुधं पात्य रात्रौ वामं सदा बुधे देयम् ॥

इति सहमान समाप्तः ॥

* * * *

దివసమందు పుణ్యసహమలో సుబుధునిం బట్టి రాత్రౌ వాముం సదా బుధే దేయమ్.

ఇతి సహమానసమాప్తిః తాత్పర్యం సంపూర్ణం.

---

(c) ताजकचन्द्रिका.

TĀJAKACANDRIKA.

Foll. 60a—68a and 137a—141b.

A treatise in astrology: by Śaṅkara, son of Rāmacandra and grandson of Puruṣottama of Mudgala family who is said to have lived in Nādur on the northern banks of the river Gautamī in Gōdāvari. The work was written between Śaka 1489 and 1549.

Contains the following Adhyāyas:—

१. वर्षप्रवेशवर्षेश्वरानयनम्.
२. पञ्चवर्गिकफलाध्यायः.
३. वर्षेशग्रहफलाध्यायः.
४. मुन्थाफलाध्यायः.
५. षोडशयोगादष्टचध्यायः.
६. मासफलाध्यायः.
७. दशसाधनाध्यायः.
८. सहमाध्यायः.
९. द्वादशभावस्वरूपाध्यायः.
१०. भावफलाध्यायः (wants the beginning).
११. प्रश्नकाराद्वर्षफलानयनाध्यायः.

**Beginning:**

प्रणम्य लक्ष्मीं स्वगुरोः पदाब्जं रम्यं महाविघ्नहरं गणेशम् ।
वक्ष्ये स्फुटं ताजकशास्त्रसारात् समाफलं सद्गुरुसम्प्रदायम् ॥
प्रागुक्तमेतद्गहनं मदिन्द्र मुह्यन्ति मुग्धाः खलु येन तेषाम् ।
सद्बोधसिध्यै क्रियतेऽथ सारं श्रीरामचन्द्रात्मजशङ्करेण ॥
धाता कृतादौ सच्छास्त्रं त्रेतायां बादरायणः ।
द्वापरे चाकरोद्गर्गो यवनस्ताजकं कलौ ॥
तस्मात्सम्यगिदं ज्ञानं ताजकं सत्यमेव च ।
विबुधैस्तु चमत्कारि फलबोधप्रकाशतः ॥

श्रीमद्दैवज्ञचक्रचूडामणिरामचन्द्रात्मजशङ्करोदितताजकचन्द्रिकायां मासफले शास्त्रप्रश्नस्याधिकारः ।

अथ वर्षप्रवेशानयनप्रकारः—

याताब्दसङ्ख्यां गणयेच्चतुर्स्थं(र्घ्न)मेकेन . . . . . . . . ।
घने १६ गुणे ३१ स्वरामैः ३०.
वारादिकं चोर्ध्वमथात्रिभक्तं
जन्माहनाद्या(द्या)दियुतं ध्रुवं स्यात् ॥

अथ प्रकारान्तरेण—

उत्पत्तितो यातनमास्त्रिधाम्रः शरैः करैः षड्भिरथाद्रिभक्ताः ।
जन्माहनाड्यादियुतं फलं तत् वर्षप्रवेशो दिननाडिकाद्यम् ॥

* * * *

**Colophon:**

इति दैवज्ञचूडामणिरामचन्द्रात्मजशङ्करोदिते(तायां) ताजकचन्द्रिकायां समाफले वर्षप्रवेशवर्षेश्वरयोरानयनाध्यायः प्रथमः ॥

* * * *

तदानीं सिद्धिमायाति कार्यमित्थं न संशय. ।
नक्रे चयमयाख्ये च स्व . . ले कुन्दसंज्ञिते (?) ॥
रुषा विकुद्धत . . रेदुद्ध उद्धिरके तथा (?) ।
इष्टवारे चेन्दुवारे कार्यसिद्धिमवाप्नुयात् ॥
शेषैर्योगैर्न सिद्धिस्स्यादेवं प्रश्नविदो विदुः ।
एकः शुभो लग्नपकार्यपत्योः शुभेक्षितस्स्याद्दलवांस्त[न]थोर्यः ।
शोध्यः पराच्छेपलवा दिनानि कार्यं तदन्ते किल सिद्धिमेति ॥
समाफलमिदं सम्यग्ये पठन्ति मनीषिणः ।
तेषां सिद्धिर्यशोयुक्तिर्नित्यं स्यान्नात्र संशयः ॥
गौतम्युत्तरतीरे श्रीमद्यमेश्वरसन्निधौ ।
स्वद्गुसुवर्णयोस्सङ्गं युक्तये नादुरामिधम् ॥
नगरं चैव तत्रासीन्मुद्गलान्वयसंभवः ।
हरिभक्तेति विख्यातो वेदशास्त्रविशारदः ॥
तस्यात्मजः श्रीपुरुषोत्तमाख्यः ख्यातः क्षितौ वेदविदां वरिष्ठः ।
तस्मादभूद्वेदविदां वरिष्ठः श्रीरामनामा पृथुकीर्तियुक्तः ॥
तस्यात्मजः शङ्करनामधेयः स्वतातपादाब्जयुगप्रसादात् ।
समाफलं सद्गुरुसम्प्रदायं मुदे शिशूनामकरोत् स्फुटं हि ॥

* * * *

षडष्टादशगुणितं व्यपगतसंवत्सरेण संमिश्रम् ।
नवगगनाब्धिसमेतं शकनृपकालं विजानीयात् ।

* * * *

अथ सुतभावः—

सन्तत्याश्रयमन्त्राणां गमनस्य शुभाशुभम् ।
विद्यासमृद्ध्युपायानां सुतस्थानाद्विनिर्णयः ॥

* * * *

**Colophon:**

इति ताजकचन्द्रिकायां भावफलाध्यायो दशमः ॥

**End:**

यस्य जन्मकालो ज्ञायते तस्य वर्षफलज्ञानं वक्ष्यते ।
येषां जन्मफलं नास्ति तेषां वर्षफलं मया ।

क्रियते फलसंसिद्धेः प्रश्नकालाद्यथोक्तवत् ।
प्रश्नलग्नपतिस्सोऽपि वर्षलग्नपतिः स्मृतः ॥

* * * *

**Colophon:**

इति श्रीमद्दैवज्ञचक्रचूडामणिरामचन्द्रात्मजशङ्करोदिते ताजकचन्द्रिकायां समाप्ते प्रश्नकाराद्वर्षफलानयनाध्याय एकादशः ॥

Foll. 68a—73a contain Kālacakra and Tithicakra with Telugu meaning.

---

(d) तारापथप्रकाशिकापदकानि.

TĀRĀPATHAPRAKĀŚIKĀPADAKĀNI.

Foll. 73a—90b.

Same work as that described under No. 13427 of the D.C.S. MSS., Vol. XXIV.

Complete.

---

(e) गणकानन्दः.

GAṆAKĀNANDAḤ.

Foll. 91a—94b.

A treatise in astronomy by Sūrya.

Complete in eight Adhyāyas, but wants the beginning.

**Beginning:**

यः पञ्चाङ्गजशुद्धिहीनदिनकृत्तद्क्रान्त्यहोपापिनां
षड्वर्गः कुनवांशकोऽष्टमकुजषट्कं भृगौ कर्तरि ।
लग्नं चाष्टममष्टमेन्दुरुभयोश्चान्द्राष्टरिष्फारिगः
चन्द्रस्स ग्रह एव वारजनितः स्वादुर्मुहूर्ताभिधः ॥

रवार्जूरस्तु समाग्निभं ग्रहणभं चोत्पातभं क्रूरयुक्
धिष्ण्यं चाशुभविद्धभं विषयुतं लग्नस्थदोषास्तथा ।
गण्डान्ता व्यतिपातवैधृतिमहाशूला इति स्वाभिधं
लग्नस्यो . . लैकविंशतिमहादोषान् प्रवक्ष्येऽथ तान् ॥

* * * *

ज्याः प्रोझ्य षड्भिस्तच्छेषान् हत्वा तद्विवरोद्धृतम् ।
ज्यासङ्ख्यायां षड्गुणायां क्षिपेत्सुधनुरंशकाः ॥
नव नागास्सप्त शैलचन्द्रास्त्रिरसबाहवः ।
रसाद्रिरामाषड्बाहुवेदाभूगगनेषवः ॥
खाद्रिबाणा देवरसाननाष्टाङ्गं गजाम्यगाः ।
गजाद्रितुरगा व्योमचन्द्रनागास्तुरद्विषाः ॥
नगाद्रिनागनेत्रार्धगजाज्यातिथिसंमिता ॥

* * * *

**Colophon :**

इति सूर्यकृते गणकानन्दनामनि स्फुटग्रहावबोधार्थे द्वितीयोऽध्यायः ।

**End :**

बिम्बापराग्रतायोगात् प्राक् शुक्लमसितं न्यसेत् ।
सितासितौ ततः प्राच्यां पक्षार्धं द्वितयावधिः ॥
न्यसेद्भेदस्तु तत्पश्चाद्विन्यात्तेनेन्दुमण्डलम् ।
निजोदग्याम्यरेखायां दृश्यते शृङ्गमुन्नतम् ॥

**Colophon :**

इति सूर्यकृते तन्त्रे गणकानन्दनामनि शृङ्गोन्नतिप्रबोधार्थषष्ठमोऽध्यायः॥

॥ इति गणकानन्दं संपूर्णम् ॥

Contains the following subjects :—

| | |
|---|---|
| १. ग्रहास्तोदयांशाध्यायः. | ५. परिलेखनाध्यायः. |
| २. स्फुटग्रहावबोधाध्यायः. | ६. पातवैधृत्यध्यायः. |
| ३. उपकरणाध्यायः. | ७. चन्द्रच्छायाध्यायः. |
| ४. ग्रहयुद्धग्रहसमागमाध्यायः | ८. शृङ्गोन्नत्यध्यायः |

---

(*f*) लघुमानसम्.

**LAGHUMĀNASAM.**

Foll. 94*b*—9*6b*.

A treatise in astronomy. The headings of the Adhyāyas given below will show the subject-matter dealt with therein. By Mañjulācārya.

Contains the following Adhyāyas.

१. सूर्यग्रहाधिकारः.
२. मध्यग्रहाधिकारः.
३. चन्द्रग्रहाधिकारः.
४. छायालग्नाधिकारः.
५. ग्रहयुद्धग्रहाधिकारः.
६. ग्रहोदयास्तमयाधिकारः.

**Beginning:**

प्रकाशादित्यवत्ख्यातो भारद्वाजो द्विजोत्तमः ।
लघुपूर्वं स्फुटोपायं वक्ष्यते लघुमानसः ॥
चैत्रादौ वासरक्रान्तिस्तिथ्यर्केन्दुश्शकध्रुवान् ।
ज्ञात्वा ग्रहान् शाकवर्षान् को वा जन्म गणयेत्तथा ॥
खखशशिविधुमिताकाशो चैत्रादौ भौमवारमध्याष्टौ ।

* * * *

पूर्ववत्य(त्स)रचैत्रादौ द्विगुणाङ्कादिसाधने ।
व्यर्कश्चाककुजादीनां योगं मेषं व्रजेदमी ॥

**Colophon:**

इति मञ्जुलाचार्यकृते लघु (मानसे सूर्यग्रहाधिकारः प्रथमः) ॥

**End:**

चरतो नांशषड्वर्गविशेषेणाक्षवाहतात् ।
स्वनिक्षेपादवाप्तेन खचरं संस्मृतं स्फुटम् ॥

**Colophon:**

इति लघुमानसे ग्रहोदयास्तमनाध्यायः षष्ठः ॥

अन्तरर्केन्दुदिनयोर्बिनाडयचफलभाक्तिका ।
यावत्तावद्व्यतीपातो वैधृतिस्ते दिवानिशौ ॥

* * * *

चन्द्रोपरागाध्यायोक्त इव स्तिथ्य(स्थित्य)र्धमानयेत् ।
लम्ब(न)स्फुटपर्वाणं निधाय त्रिविधं ततः ॥
तिथ्यर्धौ सयुतौ मध्यौ कालौ स्पार्शिकमोक्षकौ ।
लम्बनस्फुटपर्वैव मध्यकालस्तथोच्यते ।
गतेष्वाभ्यां लम्बनस्फुटार्कां तात्कालिकं क्रियात् ॥

Foll. 99 and 100*a* contain some Telugu passages in Jyautiṣaviṣaya.

---

(*b*) ज्यौतिषविषय, :आन्ध्रटीकासहितः.

**JYAUTIṢAVIṢAYAḤ WITH TELUGU MEANING.**

Foll. 100*a*—111*b*.

A treatise of an astronomical and astrological character dealing with the following subjects :—

| | |
|---|---|
| १. संवत्सरफलानि. | ५. तिथिनिर्णयः. |
| २. योगफलम्. | ६. कालचक्रजातकम्. |
| ३. ग्रहणविषयः. | ७. मेघोत्पत्तिः. |

Incomplete and wants beginning.

**Beginning :**

* * * यद्यर्कबिम्बद्युति ।

शुक्रस्तद्द्विगुणं मुनिर्मलवपुर्लग्नस्थितस्स्यात्तयो-
र्दोषाणां शतलक्षमप्यपहरेल्लग्नस्थितो वाक्पतिः ॥
चरे चरांशलग्नेऽथ बुधेनेक्षितिसंयुते ।
दशमस्थे भूमिपुत्रे चौर्यकालः प्रकीर्तितः ॥

* * * *

प्रमोदाब्दे प्रमोदन्ते तथापि सुखिनो जनाः ।
प्रजापतिसमा नूनं बहुसस्यार्घवृष्टयः ॥
अत्रलम्भोमुजं शश्वत्स्वजनात्मभिस्सह (?) ।
अतिथिस्स्वजनैस्सार्धमन्नं बोभुज्यते मघुः ॥

* * * *

**Colophon :**

इति संवत्सरफलानि समाप्तानि ॥

* * * *

अहस्सङ्क्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितम् ।
रात्रौ सङ्क्रमणे भानोः दिनार्धे स्नानदानयोः ॥

* * * *

**Colophon :**

सकलतिथिनिर्णयस्समाप्तः ॥

पूर्वतोऽप्यपरतोऽप्यसङ्क्रमात् पूर्वकालघटिकास्तु षोडश ।
अपरत्र(र्ध)रात्रिसमयादनन्तरं सङ्क्रमे परदिनं हि पुण्यदम् ॥

**End :**

नीलमेघस्तदा ज्ञेयः कालमेघः आग्नेय्यां जातः कालमेघस्य लक्षणम् ॥

मध्यदेशे सुवृष्टिस्स्यान्निरन्तर्यं महाफलम् ।
भवन्ति सर्वधान्यानि कालमेघस्य लक्षणम् ॥

मेघस्योत्पत्तिः प्राच्यां दिशि जातः—

निरन्तरं महावर्षं मध्यदेशे महाजलम् ।
अशुभं सर्वलोकानां द्रोणमेघस्य लक्षणम् ॥

मेघस्योत्पत्तिरीशान्यदेशे—

मध्यवृष्टिर्मन्दसस्यं महावायुः प्रवर्तते ।
पुष्करं मेघमासाद्य सर्वमूलानि नाशयेत् ॥

---

(h) नरपतिजयचर्या.

NARAPATIJAYACARYA.

Foll. 111b—118b.

Same work as that described under No. 40 of M. Seshagiri Sastri's Report No. 2—vide pages 244–246 for extracts.

Breaks off in the fourth Adhyāya.

Foll. 118b—119b contain Varṇasvaracakra, Jīvasvaranāmākṣarasaṅkhyā, Nakṣatrasvaracakra and Dvādaśākhyasvaracakra.

---

(i) हिल्लाजातकम्.

HILLĀJĀTAKAM.

Foll. 119b—120b.

A treatise in horoscopy according to the system of the astrologer, Hillāja. The number of years of the Daśā of the Grahas is different from that given in the other treatises.

Incomplete.

**Beginning:**

कृत्तिकादित्रयं सूर्यः सोमो रुद्रचतुष्टयम् ।
मघादित्रितयं भौमो बुधो हस्तचतुष्टयम् ॥

अनूराधात्रयं सौरिर्गुरुः पूर्वचतुष्टयम् ।
धनिष्ठादित्रयं राहुः शेषः शुक्रप्रकीर्तिताः ॥

षट् सूर्यस्य दशा ज्ञेयाः शशिनो दश पञ्च च ।
अष्टावङ्गारके चैव बुधस्सप्तदश स्मृतः ॥

शनैश्चरे दश प्रोक्ता गुरुरेकोनविंशतिः ।
राहोर्द्वादश वर्षाणि भार्गवस्यैकविंशतिः ॥

**End:**

धनवृद्धिसुखं पूजा नानावस्त्रा वरस्त्रियः ।
प्राप्नोति विपुलां लक्ष्मीं कुजस्यान्तर्गते सिते ॥

Foll. 121*a*—135*b* give some passages with Telugu meaning dealing with Daśāntardaśā. Foll. 135*b*—137*a* give Yavanajātaka with Telugu meaning.

---

(*f*) ताजकम्.

TĀJAKAM.

Foll. 141*b*—147*a*. Foll. 147*b*—148 are left blank. Foll. 146*a* to 147*a* contain portions of the seventh and the sixth Adhyāyas.

A treatise on astrology. Similar to the work described under R. No. 420 ante.

Contains 1 to 8 Adhyāyas.

**Beginning:**

प्रणम्य सर्वेश्वरपादपद्मं ततो भवानीं गणनायकं च ।
करोति रम्यं फलमन्त्रहायनं भवन्ति तज्ज्ञाचिदितेन येन (?)॥

अथ वर्षप्रवेश . . फलानयनम्—

गताब्दवृन्दान्मुनिरवाभ्रचन्द्रे १०७००
दीर्घानभोव्योपगजैश्च भक्ताद् ।
त्रिधा फलं वारयुते फलानि स्युर्जन्मवारादियुतानि तानि ॥

* * * *

दिवादिलग्ने रविनायकोऽपि रात्रौ शशी जन्मविलग्नवश्ये ।
वर्षप्रवेशे तनुपश्च पश्चा(त्त)द्राशिनाथः कथितोऽधिकारे ॥
एषां बली लग्नविलोकनीयभेदे समर्थस्स च हायनेशः ।
वर्षाधिपे पूर्णबलेऽचिरा(मता)नि सिध्यन्ति कार्याणि निमीलितानि।
बलाबलज्ञानं विना कदाचित् विवेचनं नैव शुभाशुभस्य ॥
ततः प्रवक्ष्ये यवनानुसाराद्बलाबलं षड्गृहसंभवं च ।
त्रिकोणसंस्थे फलमन्त्रपादहीनं दलं स्वम्भविनोषिमित्रे ॥

* * * *

**Colophon:**

इति ताजके वर्षबलं संपूर्णम् ॥

**End:**

दिवा रविं चन्द्राद्विशोध्य लग्नं क्षिपेत् । रात्रौ दिराज्ये २. दिवा रविं शनेर्विशोध्य दशमभावे योज्यम् . रवि विदितः ३. दिवा गुरुं भ(र)वेर्विशोध्य लग्नं क्षिपेत् । राशिमसम्यक्ज्ञात्वा बुधैरपि ॥

**Colophon:**

इति समाध्याये अष्टमः ॥

---

## R. No. 2473.

Paper. 10¾ × 9¼ inches. Foll. 84. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Vēmūri Rāma Śāstrigāru of Narasapur, Kistna district.

**विधिविवेकः.**

**VIDHIVIVĒKAḤ.**

Foll. 1a—82b. Foll. 83—84 are left blank.

A treatise on the Pūrvamīmāṁsā dealing with the subjects mentioned in the Paricchēdas given below: by Kollūri Nārāyaṇa Śāstri, son of Accamāmbā and Sōmayāji. The author refers the reader to Nyāyaratnamālā for further details.

Complete in nine Paricchēdas:

१. शास्त्रारम्भविचारः.
२. काम्यनित्यविवेकः.
३. श्रुतिविनियोगविधिः.
४. लिङ्गादिविनियोगविधिः.
५. प्रयुक्तिचिन्ता.
६. क्रमप्रमाणनिरूपणम्.
७. विध्यधिकारनिरूपणम्.
८. अतिदेशविचारः.
९. अतिदेशबाधविचारः.

**Beginning:**

बोधादिशुकतेरबोधतिमिरं हृद्योगं . . . धारयन्
प्रज्ञावारिधिमुन्नतिं च गमयन् सोमस्सदोदेति यः ।
तं संसारसहस्ररश्मिजनितक्लेशापहं दक्षिणा-
मूर्तिं निर्मलयोगिचिन्त्यचरणाम्भोजं भजे शङ्करम् ॥
वन्दे श्रीदक्षिणामूर्तिं वन्दकाभीष्टदायकम् ।
अज्ञानवारकं मोक्षदायकं परमेश्वरम् ॥

स्वाध्यायोऽध्येतव्य इति विधिना विहितमध्ययनं स्वविधिप्रयुक्तमित्या-चार्यमतानुसारिणो वर्णयन्ति । गुरुमतानुसारिणस्तु सेतिकर्तव्यताकमध्ययनमध्या-

पनविधिप्रयुक्तमिति वर्णयन्ति प्रतिपादयन्ति । तथाहि — आचार्यककामस्याध्यापनविषयकं कार्यमिति अध्यापनविधितः प्रतीयते । तथाध्यापनमध्ययनमन्तरा नोपपद्यत इति अध्ययनं प्रयोजयति । तथाचाध्ययनस्याध्यापनविधिसिद्धिरेव प्रयोजनं प्रथमावगतत्वात्तस्याः । आचार्यकं हि अध्ययनानुष्ठानसमकालाध्यापनजन्यमित्यर्थज्ञानात्पूर्वभावि । अर्थज्ञानं स्वध्ययने निष्पन्ने मीमांसाश्रवणोत्तरभावितया ततः पश्चाद्भावित्वेनाविवक्षितार्थत्वाद्वेदस्यार्थविचारात्मकं शास्त्रमनारम्भणीयम् ।

* * * *

Colophon :

इति श्रीकोल्लूरिकुलतिलकसोमयाजितनयस्याम्बामाम्बागर्भसंभूतस्य कोल्लूरि नारायणशास्त्रिणः कृतौ विधिविवेकसमाख्यायां प्रथमः परिच्छेदः ॥

End :

न चैवमिह संभवति, अप्रयोजकत्वात् । न ह्यवघातस्य नियमादृष्टं प्रयोजनं . . . . . अनेनैव तत्स्वरूपे प्राप्ते नियममात्र . . . . . . . . . स्यागता । तथाच नियमादृष्टसिद्ध्यर्थमवघातानुष्ठानमितोऽधिकं न्यायरत्नमालायामनुसन्धेयम् ॥

Colophon :

इति नवमः परिच्छेदः ॥

इति श्रीकोल्लूरिनारायणशास्त्रिणः कृतौ विधिविवेकः समाप्तः ॥

---

R. No. 2474.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 40. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Tannōji Lakṣmīnārāyaṇa Sāstrigāru of Gunapūḍi, Bhimavaram taluk, Kistna district.

शैवोत्सवविधिः.

ŚAIVŌTSAVAVIDHIḤ.

Foll. 1a—38b. Foll. 39—40 are left blank.

Gives details of procedure relating to the performance of festivals in temples dedicated to the worship of God Śiva.

Incomplete.

Beginning :

आदौ कल्याणमूर्तिं च द्वितीयं चन्द्रशेखरम् ।
गङ्गाधरं तृतीयं च चतुर्थकमुमापतिम् ॥
पञ्चमं ताण्डवाधीशं षष्ठं कामान्तकं शिवम् ।

सप्तमं त्वर्धनारीशं दक्षिणामूर्तिमष्टमम् ॥
नवमे त्रिपुराधीशं मृगयात्रां समाचरेत् ।
प्रथमं पीठकं दद्यात् द्वितीये प्रभयान्वितम् ॥
तृतीये तु विमानं च चतुर्थे वृषभं पतिम् ।
पञ्चमे हयमारोप्य षष्ठे तु गजमारभेत् ॥
सप्तमे शिबिकायां तु अष्टम्यां तु रथोपरि ।
नवमं श्रीधरं चैव दशमे तीर्थसेवनम् ॥
शैवास्तु तीर्थं यान्यस्य कुट्टाणं चाङ्कुरार्पणम् ।
ध्वजाधिवासनं चैव भेरीकलशपूजनम् ॥
स्तम्भप्रतिष्ठा विधिवत् ध्वजस्यारोपणक्रिया ।
भेरीताडनदिक्पालकीर्तनं तद्बलिक्रिया ॥
उत्सवस्याङ्कुरोत्प्रस्य यागोपकरणग्रहः ।
कुण्डमण्टपनिर्माणं मन्थनं जातवेदसः ॥
वास्तुपूजा वास्तुहोमः पर्यग्निकरणं तथा ।
तीर्थाङ्कुरं च यागेशशैवाग्नि(ह)वनं शुभम् ॥
ततोऽक्षताभिषेकं च सायं प्रातर्हुतं बलिः ।
ग्रामप्रदक्षिणं कृत्वा देव्योर्यागेशदर्शनम् ॥
आनन्दनृत्तं कुर्याच्च कौतुकस्य च बन्धनम् ।
कामनार्थं ततस्तीर्थं पूर्णोत्सवविधिं तथा ॥
तैलाभ्यङ्गो महातीर्थं नैवेद्यपरमाहृतिम् ।
यागेश्वरोद्वासनं च महानैवेद्यविस्तरः ॥
विसर्जयेन्महामन्त्रान् लोकपालांस्तथैव च ।
छन्दयागं ततः कृत्वा उत्सवं तु समाचरेत् ॥
छन्दयागमित्युत्सवस्य षड्विंशतिरङ्गानि भवन्ति ।

* * * *

अत्र स्थिता परिषत् मदीयां विज्ञापनां समाकर्ण्य मम दिव्यकल्याणमहोत्सवपरिषद्दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्य, मम श्रीउमामहेश्वरयोः पाञ्चाह्निकध्वजारोहणदिव्यकल्याणमहोत्सवं कर्तुं योग्यतासिद्ध्यर्थं मम मृत्संग्रहणदिव्यकल्याणमहोत्सवं कर्तुं योग्यतासिद्धिरस्त्विति महान्तोऽनुगृह्णन्तु । . . .

पाञ्चाह्निकध्वजारोहणप्रत्यब्दकल्याणमहोत्सवं षड्विंशति(भि)रङ्गैः करिष्यमाण दिव्यकल्याणमहोत्सवाङ्गत्वेन शुभाङ्कुरारोपणाख्यं कर्म करिष्ये । तदङ्गत्वेन सदाशिवमुखोत्किरणकारणागमोक्तप्रकारेण सदाशिवाय विप्रैस्सह शैवशुद्धि पुण्याहवाचनं करिष्ये ।

* * * *

श्रीमत्कृष्णवेण्या गोदावरीमध्यदेशे सहस्रनदीनामतीरे प्राच्यारामग्रामनिवासश्रीमहेश्वरविवाहवेलायामहमिह भेरीसङ्घोषणं करोमि ।

**End:**

अथातस्संप्रवक्ष्यामि शिवोत्सवविधिं शृणु ।
शृणु वत्स यथान्यायमुत्सवं शान्तिसम्पदम् ॥
सर्वभूतहितार्थाय सर्वलोकहिताय च ।
ध्वजोत्थानावरोहान्तं वक्ष्यामि शृणु साम्प्रतम् ॥
नवाहमुत्तमं प्रोक्तं सप्ताहम्.

---

R. No. **2475.**

Paper. 10⅝ × 9¼ inches. Foll. 14. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of Rāja Śrī Mānavikrama Anujan Kuññuṇṇi, Pudiyakōvilagam, Calicut

दूतवाक्यचम्पूः.

DŪTAVĀKYACAMPŪḤ.

Foll. 1*a*—13*a*. Foll. 13*b*—14 are left blank.

A literary composition in prose and verse describing Kṛṣṇa's vain attempt as a mediator to bring about an amicable settlement between the Kauravas and the Pāṇḍavas.

Complete.

**Beginning:**

इत्थं वदत्येव तदा यदूनां वर्ये स धुर्यस्तरसा शिनीनाम् ।
वाणीं कृपाणीमिव तीक्ष्णधारां समाददे सात्यकिरात्तरोषः ॥
हा धिक् कष्टमिदं सतामपि कथं पापीयसी हन्त धी-
रस्मिन् धर्मसुतेऽपि कस्य रसना दोषं विवक्षेन्मृषा ।
अस्त्वेवं निजशिष्यवत्सलधियो नास्य प्रतिब्रूमहे
तं दुर्योधनमेव मे धनुरिदं वक्ता शरैरुत्तरम् ॥

* * * *

तदनु स भगवान् पञ्चरात्रप्रपञ्चितः पाञ्चालगिरं तां वाञ्छानुगुणा-मभिनन्दन्नितः परं निजप्रयत्नप्रकाशनेन माध्यस्थदीक्षाभङ्गमाशङ्कमानः तयो-रेव पयोधिगम्भीरचेतसोः पाञ्चालमात्स्याधिपयो . . . . . . . . . . . मध्यगामध्यगान्निजामेव नगरीम् ॥

* * * *

सुमहति बलषण्डे पाण्डवान् कौरवान-
प्युपगतवति पाञ्चालेरितस्तत्पुरोधाः ।
कुरुपुरमभियातः पाण्डवानां बभाषे
बलविभवमशेषं सन्धिवाञ्छां च चित्ते ॥

* * * *

तदनु तस्मात्प्रदेशात् मन्दहाससुन्दरतरवदनारविन्दसन्दर्शनकन्दलिता नन्दातिरेकमन्दीभूतगतिभिरर्मीभिः कौरवपुरीं पुरुषोत्तमः प्राविक्षत् ।

**End:**

दिष्ट्या चिरात्परिणतं रणमेव तावत्
निर्यान्तु भूमिपतयस्सह वाहिनीभिः ।
पश्यन्तु तत्र चरितानि पृथासुताना-
मित्यूचिवान् मधुरिपुर्निरगात्सभायाः ॥
अथ रथवरमश्वैः सैन्य(शैब्य)सुग्रीवमुख्यैः
धृतरथमधिरूढः क्षत्तुरालम्ब्य हस्तम् ।
अनुगतमखिलं तद्राजकं वारयित्वा
परिमितपरिवारः पार्थपार्श्वं प्रपेदे ॥

**Colophon:**

इति दूतवाक्यं समाप्तिमगमत् ॥

---

R. No. **2476**.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 24. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. obtained through the Sub-Magistrate of Kovvūru, Yernagūdem taluk, Kistna district.

**शैवपुराणम्.**

**SAIVAPURĀṆAM.**

Foll. 1*a*—23*a*. Foll. 23*b*—24 are left blank.

Contains extracts from many of the Adhyāyas of the Śaivapurāṇa. In many cases, only the colophons of the Adhyāyas are given. A list of subjects mentioned therein is given below :—

१. वामदेवागमनम्.
२. महदादिसृष्टिप्रसङ्गः.
३. भूतसृष्टिप्रसङ्गः.
४. जम्बूद्वीपकथनम्.
५. सत्यलोककथनम्.
६. Nil.
८. शिवलोकवर्णनम्.
९. नैमित्तिकप्रलयप्रसङ्गः.
१०. माहेश्वरस्तुतिः.
११. वराहावतारप्रसङ्गः.
१२. शङ्करसर्वमयत्ववर्णनम्.
१३. सदाचारप्रसङ्गः.
१४. शौचविधिप्रसङ्गः.
१५. गृहस्थधर्मकथनम्.
१६. दिवाचारप्रसङ्गः.
१७. कन्यालक्षणप्रसङ्गः.
१८. गृहस्थाचारप्रसङ्गः.
१९. वानप्रस्थसंन्यासधर्मः.
२०. क्षत्रियाचारप्रसङ्गः.
२१. वैश्याचारप्रशंसा.
२२ श्राद्धप्रशंसा.
२३. श्राद्धानर्हद्रव्यकथनम्.
२४. महादेवनन्दिकेश्वरसंवादसमाप्तिः.
२५. अम्बरीषचरितम्.
२६. नारदशापकथनम्.
२७. Nil.
२८. विष्णुशापमाप्तिः.
२९. सेतूपाख्यानम्.
३०. तपश्चर्या.
३१. कलावस्तूपाख्यानम्.
३२. मार्कण्डेयसात्त्विकप्रश्नः.
३३. शिवनामस्मरणमाहात्म्यम्.
३४. शोणोपाख्यानम्.
३५. सोमवारप्रसङ्गः.
३६ सोमवारव्रतब्राह्मणभोजनानन्तरेश्वरप्रादुर्भावकथनम्.
३७. सोमवारव्रतोद्यापनविधिः.
३८. यमगीता.
३९ संसारदूषणम्.
४०. पुरूरव ऊर्वश्युपाख्यानम्.
४१. do.
४२. जनकसमागमः.
४३. शुकजनकसंवादः.
४४—४५. Nil.
४६. स्वस्त्ययनस्तोत्रकथनम्.
४७. पुष्पादिप्रशंसा.
४८. द्रव्यशुद्धिप्रसङ्गः.
४९ भावशुद्धिः.
५०. राजवंशवर्णनम्.
५१. तृणबिन्दुनाभागाम्बरीषपृषध्रादिराजवंशकथनम्.

५२. व्यालानर्तरैवतचाक्षुषमन्विस्वाकुमान्धातृचरितम्.
५३. सगरचरित्रम्.
५४. भगीरथचरितम्.
५५. श्रीरामचरितम्.
५६. सूर्यवंशानुकीर्तनम्.
५७. निमिचरितम्.
५८. रघुकुलभूपकीर्तनम्.
५९. विश्वामित्रकथनम्.
६०. कुवलयाश्वचरितम्.
६१. शैवरजचरितम्.
६२. ययातिचरितम्.
६३. पुरुवंशानुकीर्तनम्.
६४. शन्तनुवंशानुकीर्तनम्.
६५. भविष्यद्वंशानुवर्णनम्.
६७. कलियुगप्रशंसा.
६८. शिवपूजाविधिकथनप्रपथनम्.
६९. पत्रपुष्पनैवेद्यकथनम्.
७१. क्षत्रियाद्यनुलोमकथनम्.
७२. अनेकजातिविचारकथनम्.
७३. सेवनाफलम्.

**Beginning:**

श्रीकण्ठं जगतामाद्यमादिमध्यान्तवर्जितम् ।
वन्दारुजनमन्दारं वन्दे कात्यायनीपतिम् ॥
ततस्स ऋच उद्धृत्य ऋग्यजुस्सामसंज्ञकम् ।
संहितात्रितयं चक्रे तथैवाथर्वणानि च ॥
पञ्चविंशतिसाहस्रं प्रत्येकं श्रुतिरुच्यते ।
तथा शाखाविभेदेन ताश्चाप्यल्पकृता द्विजैः ॥
अष्टादश पुराणानि सङ्क्षिप्य स महायशाः ।
कृतवान् श्लोकरूपेण गणेशस्तानि चालिखत् ॥
ब्राह्मं तु दशसाहस्रं पुराणं परिकीर्त्यते ।

* * * *

मत्स्येन मनवे प्रोक्तं मात्स्यं द्वादश कीर्तितम् ।
गारुडं गरुडाज्ज्ञातं द्व्यष्टकमिति विष्णुना ॥
ब्रह्माण्डं शतसाहस्रं तत्पुराणमिहोच्यते ।

सूतः—

पुरा महर्षयस्सर्वे नारदाद्या महौजसः ।
तीर्थयात्राप्रसङ्गेन प्रयागं समुपाययुः ॥
त्रिदशानां यथा विष्णुर्वर्णानां ब्राह्मणो यथा ।
यथा सरस्वान् सरसां मेरुश्शिखरिणां यथा ॥

* * * *

**Colophon:**

इत्यादिशैवे वामदेवमहर्षेरागमनं नाम(प्रथमः १ अध्यायः ॥

मार्कण्डेयः—

तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तत्कोटि योजनघनं बृहत्सलिलमध्यगम् ॥
तिर्यगूर्ध्वमधश्शाखं पञ्चाशत्कोटिविस्तृतम् ।
प्राणिनामाश्रयं नित्यं भूव्योमजलवा(चा)रिणाम् ॥
ब्रह्मा चतुर्मुखो भूत्वा विश्वसृष्टौ प्रवर्तते ।

**Colophon:**

इति महदादिसृष्टिप्रसङ्गो नाम १ (द्वितीयः) अध्यायः ॥

**End:**

वेत्रवेणुशलाकाभिः कुर्याच्छूर्पकटादिकम् ।
एवं च प्रतिलोमानां सङ्कराश्च भृगूद्वह ॥
चतुर्विंशतिभेदाश्च कथितास्ते यथातथम् ।
सर्वत्र सुखमेधन्ते सदा ज्येष्ठानुसारिणः ॥

**Colophon:**

इति श्रीशैवे अनेकजातिविचारकथनं नाम ७२ अध्यायः ॥

* * * *

सूत उवाच—

इत्यादिपुराणे श्रीशैवे शे(से)वनाफलकथनं नाम द्वि(त्रि)सप्ततितमोऽध्यायः ॥

---

R. No. 2477.

Paper. 10¾ × 9¼ inches. Foll. 32. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Śrīkṛṣṇacakravartyācārya of Kōtāndapaṭṭi, North Arcot.

प्रमेयमाला.

PRAMĒYAMĀLĀ.

A treatise in Viśiṣṭādvaita Vēdānta criticising some of the tenets of the Advaita Vēdānta: by Varadasūri of Vatsagōtra. The author quotes Kapardi and Dhūrtasvāmin. If the first stanza be taken to denote the author, then he may be identified with Naḍādūr Ammāḷ.

Deals with the following topics:—

१. अध्ययनविधिः.
२. ऐकशास्त्र्यसमर्थनम्.
३. अखण्डवाक्यार्थभङ्गः.
४. सर्वशरीरकत्वम्.
५. निर्विशेषवादिनामपशूद्रन्याया-दिविरोधापादनम्.
६. यतिलिङ्गसमर्थनम्.

**Beginning:**

नमः श्रीविष्णुचित्तार्यपदपङ्कजरेणवे ।
रामानुजमुनीन्द्रोक्तिरहस्यज्ञानहेतवे ॥
जगतामुपकाराय जातं यतिवरात्मना ।
प्रगुणीकृतसन्मार्गं भजामि पुरुषं परम् ॥
सञ्चेतोमधुकरवृन्दसेवनीयां सौरभ्यं श्रुतिशिरसस्समादधानाम् ।
वत्सानां कुलपतिरद्भुतं व्यकार्षीदम्लानां वरदगुरुः प्रमेयमालाम् ॥

मीमांसाया विधिप्राप्तत्वरागप्राप्तत्वविवेकार्थमध्ययनविधिर्निरूप्यते — किमध्ययनविधिरर्थज्ञानपर्यवसायी, आहोस्विदक्षरराशिग्रहणमात्रे पर्यवस्यति । अर्थज्ञानपर्यवसायीति पूर्वः पक्षः । तथाहि—अध्ययनविधेरक्षरराशिग्रहणमात्रपर्यवसायित्वे मीमांसाश्रवणस्य प्रवर्तकाभावादनारम्भणीया मीमांसा स्यात् । साङ्गाध्ययनात्प्रयोजनवदर्थापातप्रतीतेरुपपन्नो रागो मीमांसायाः प्रवर्तक इति चेन्नैतत् ॥

* * * *

ऐकशास्त्र्यस्य धर्मो हि विषयस्तस्य निर्णयः ।
फलं च तत्र वेदार्थः कृत्स्नो विषय इष्यते ॥
तन्निर्णयफलं चात्र तदैक्यादेकशास्त्रता ।
अर्थभेदात्कर्मभेदादन्योन्यं च विरोधतः ॥
शास्त्रभेदप्रसङ्गश्चेन्नैवमत्र प्रसज्यते ।
अध्यायपादषट्कषु प्रत्येकं भेद इष्यते ॥
अवान्तरार्थभेदेन शास्त्रभेदावहो न सः ॥
वृत्तिस्वामिकपर्दिभ्यां कृतयोर्व्याख्ययोर्द्वयोः ।
आपस्तम्बीयसूत्रार्थपरयोर्ह्येकशास्त्रता ॥

* * * *

तस्मान्नार्थविरोधो हि कर्मब्रह्मविचारयोः ।
ऐकशास्त्र्यमतः कर्मब्रह्ममीमांसयोः स्थितम् ॥

Colophon:

इत्यैकशास्त्र्यसमर्थनम् ।

नन्विदमैकशास्त्र्यमनुपपन्नं तद्युक्तं पौर्वापर्यं च, शारीरकावसेयस्याखण्डैकरसचिन्मात्रब्रह्मगोचरस्याविद्याकल्पितकर्मकर्तृसाधनफलादिविविधभेदावलम्बिना कर्मविचारेणानुपयोगात् ।

* * * *

Colophon:

इति प्रमेयमालायां निर्विशेषवादिनामपशूद्रन्यायादिविरोधापादनम् ।

ये तु विप्रलिप्सवो दुर्बलबुद्धयो वा कतिचित् स्वसिद्धान्तसाधनभूतमनाश्रमित्वमनादृत्य चरमाश्रमे स्थितान् परमहंसतां भावयन्तः तत्त्ववादान्वेषणमपि वितथयन्ति, तेऽपि यादवप्रकाशभस्करिप्रभृति(भि)र्विस्तरेण प्रतिक्षिप्ताः । परिहसिताश्च भास्करैः ।

* * * *

Colophon:

इति यतिलिङ्गसमर्थने प्रथमस्स्कन्धः ॥

End:

अन्यानपि स्वधर्मस्थांश्चालयिष्यन्ति ते कलौ ।
एकवेणुं समाश्रित्य जीवन्ति बहवो द्विजाः ॥
नरके रौरवे घोरे कर्मत्यागात् पतन्ति ते ।
तस्मात्तान्नालपेत् प्राज्ञो न निरीक्षेत चापि तान् ॥
आलोकनेन तेषां तु शुध्यन्ते भानुदर्शनात् ।
नग्नं वानुपनीतं वा यच्छ्राद्धे भोजयेद् द्विजः ॥
रेतोमूत्रपुरीषाणि स पितृभ्यः प्रयच्छति ॥

Colophon:

इति यतिलिङ्गसमर्थने तृतीयस्कन्धः ॥

इति वत्सकुलतिलकवरदसूरिविरचितायां प्रमेयमालायां यतिलिङ्गसमर्थनम् ॥

गुरवे वरदार्याय कुर्वीमहि नमस्क्रियाम् ।
यत्पादाम्बुजसेवा नस्सूते वेदान्तसम्पदम् ॥

## R. No. 2478.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 271. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Ampalakat Karuṇākara Menon of Chalapuram, Calicut.

Fol. 138b is left blank. Bound in two volumes.

### नाट्यशास्त्रम्, सव्याख्यानम्.

### NĀṬYAŚĀSTRAM WITH COMMENTARY.

A commentary on Bharata's Nāṭyaśāstra which work is described under No. 12999 of the D.C.S. MSS., Vol. XXII: by Mahēśvara Abhinavaguptācārya. The commentary is called Abhinavabhāratī.

Contains the Adhyāyas 1—19 complete; but wants the end of the 5th and the 7th Adhyāyas and the whole of the 8th Adhyāya.

**Beginning:**

यस्तन्मयान् हृदयसंवदनक्रमेण द्राक् चित्रशक्तिगणभूमिविभागभागी ।
हर्षोल्लसत्परविकारजुष करोति वन्देतमां तमहमिन्दुकलावतंसम् ॥
षड्त्रिंशकात्मकजगद्गगनावभाससंविन्मरीचिचयचुम्बितबिम्बशोभम् ।
षट्त्रिंशकं भरतसूत्रमिदं विवृण्वन् वन्दे शिवं श्रुतितदर्थविवेकि धाम ॥

विश्वबीजप्ररोहार्थमूलाधारतया स्थितम् ।
सर्वशक्तिमयं वन्दे धरणीरूपमीश्वरम् ॥

सद्विप्रकोक(तोत)वदनोदितनाट्यवेदतत्त्वार्थमर्थिजनवाञ्छितसिद्धिहेतोः ।
माहेश्वराभिनवगुप्तपदप्रतिष्ठः संक्षिप्तवृत्तिविधिना विशदीकरोति ॥

उपादेयस्य संपाठस्तदन्यस्य प्रतीकनम् ।
स्फुटव्याख्याविरोधानां परिहारस्सुपूर्णता ॥
लक्ष्यानुसरणं श्लिष्टवक्तव्यांशविवेचनम् ।
सङ्गतिः पौनरुक्त्यानां समाधानसमाकुलम् ।
सहृदश्चेत्ययं व्याख्याप्रकारोऽत्र समाश्रितः ॥

भरतमुनिरुचितदेवतानमस्कारपूर्वकमभिधेयगुणीभावेन प्रयोजनं मुख्य । त्वा प्रतिजानानो विशेषणद्वारेण गुरुपर्वक्रममर्यादितप्रतया चाभिधेयप्रयोजनतत्सम्बन्धान् दर्शयति ।

(मू)—

प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् ॥

(व्या) पितामहोऽत्र न पितुः पिता, महेश्वरश्च न राजादिरिति देवशब्दः। एतच्च नाशङ्कनीयम्, प्रसिद्धेः एको विजिगीषुः नाट्यप्रवर्तयितेति देवो भगवांस्त्वानन्दानिर्भरतया क्रीडाशीलः सन्ध्यादौ नृत्यतीति नाट्ये तदुपकारिणि च नृत्ते तदुपज्ञं प्रवृत्तिरिति तावेवात्राधिदैवतं गुरू चेति नमस्कार्यौ।

* * * *

दृश्यं श्रव्यं च यद्भवेत्। जग्राह पाठ्यमृग्वेदादित्यादेः ग्रन्थं प्रत्यसङ्गतत्वात् तस्मान्नाट्यं च तच्छास्त्रव्युत्पत्तिप्रदत्वात् प्रवक्ष्यामि व्याख्यास्ये। नाट्याख्यं वेदं लक्षणतो निरूपयिष्य इत्यर्थः। एतदप्यमनोरमम्—शब्दात्मताव्यतिरेकेण प्रवचनायोगान्नाट्यस्य चाशब्दात्मकत्वात्। निरूपणमात्रे च प्रवचने ग्रन्थस्यापि प्रवचनोपपत्तेः। नाट्यस्य च प्रोच्यमानतयैवालाक्षणिकबाह्यस्वरूपनिरासलाभे शास्त्रशब्दानर्थक्यप्रसङ्गात्। य इदं शृणुयान्नित्यं नाट्यवेदमिति शास्त्रान्ते यद्वक्ष्यते तस्यासङ्गत्यापत्तेः।

* * * *

उत्पत्त्यादिप्रश्नास्तु ये भविष्यन्ति ते नाट्याख्यवेदविषया न तु नाट्यवेदशास्त्रविषयाः। यतो नाट्यवेदः कथं ब्रह्मन्नित्यत्र नाट्यमेव वेदमिति व्याख्यास्यामः। एतच्च नाट्यवेदशास्त्रं ब्रह्मणोदाहृतं मह्यमुक्तम्। यद्वक्ष्यते—आज्ञापितो विदित्वाहं नाट्यवेदं पितामहात्। पुत्रानध्यापयामासेति। अत्र तु नाट्यस्य वेदः शास्त्रमिति समासोऽन्यथाध्यापनासंभवात्। तेन ब्रह्मप्रोक्तमेव मया यथापरिपाटि निरूप्यत इति यावत्। (. . . .) यदि हि नाट्यस्य वेदनं सत्तालाभो विचारश्च यत्र तन्नाट्यवेदशब्देन नाट्याश्रयरूपत्वं दशरूपकमित्युच्यते। वक्ष्यति—इतिहासो मया दृष्ट इति। अत्र पक्षे ब्रह्मणोदाहृतं प्रदर्शितोदाहरणं कृतं निदर्शनमित्यर्थः। अन्ये तु नटनीयमनुकरणं दशरूपकमेव नाट्यं तस्येदं शास्त्रं दशरूपकलक्षणमेव हीदम्। एवं दशरूपकं कविना कार्यम्। एवं च नटनीयमिति ग्रन्थकारतात्पर्याद्रसादीनां पदार्थानां तत्रैव पर्यवसानात्।

* * * *

(मू)—

जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥

* * * *

वाचि यत्नस्तु कर्तव्यो नाट्यस्यैषा तनुस्स्मृता ।
अङ्गनेपथ्यसत्त्वानि वाक्यार्थं व्यञ्जयन्ति हि ॥

* * * *

गीतिषु सामाख्येति न्यायात्तदाधारध्रुवापदयोजनमृग्वेदादेवेति दर्शयति । तत एव ध्रुवाध्याये वचनादत्रैव सङ्गृहीतम् । घनावनद्धरूपिसामगानक्रियाप्राणभूतकालसाम्यात्मकतालसामान्यस्वीकृतमत्रैव प्रविष्टम् । आध्वर्यवकर्मप्रधाने तु यजुर्वेदे अङ्गकर्मणां प्रदक्षिणगमनादिकम एव प्रथमं पठिष्यति । या ऋचः पाणिका इत्यादि । ततः सुषिरात्मकं चापि तोद्यं स्वरप्राधान्यात् । आथर्वणवेदे तु शान्तिकमारणादिकर्मसु नटस्येव तस्य ऋत्विजः प्रादुर्वैवर्ण्याद्यनुभवानां प्रजाशत्रुप्रभृति . . . . . न्नावधानग्रहणादिना लोहितोष्णीषादेः नेपथ्यस्य तेषु तेषु च कर्मसु विशिष्टप्रयत्नपुरुषसंपाद्यमानोऽवष्टम्भात्मनः सत्त्वस्य संभवात्ततोऽभिनयानामग्रहणम् । वाचिजस्त्वभिनयः पूर्वमेवोक्तः ।

* * * *

त्रिनेत्रपादाब्जसदास्तवोद्धसत्प्रसादभाक् स्फुटमिह नाट्यशासने ।
प्रवर्तितेयं हृदये महाधियां प्रकाशतामभिनवगुप्तभारती ॥

**Colophon:**

इति महामाहेश्वराभिनवगुप्ताचार्यरचितायामभिनवभारत्यां भारतीयनाट्यशास्त्रविवृतौ नाट्योत्पत्तिः प्रथमोऽध्यायः ॥

**End:**

पूर्ववृत्तानुचरितं कथं नाटकशब्दस्यार्थ इत्याह—यस्मात्स्वभावं सन्त्यज्येति । नट नताविति । नमनं स्वभावत्यागेन प्रह्वीभावलक्षणम् । ये त्वन्ये नट नृत्तावित्यादि पठन्ति । तन्मतेऽपीह नाटनं नटशब्दा . . . सूत्रेण व्युत्पादिते गृहीतव्य इति दर्शयति । साङ्गोपाङ्गा ये पदक्रमा गतिवैचित्र्याणि । एतच्च समस्तं नाट्याङ्गोपलक्षणं प्रयुज्यत इति नटैर्ज्ञायते चेति सामाजिकैस्तेनोभयोरपि नमनमुक्तमिति संभावनाकृतमौचित्यम् । मृदुशब्देति यदुक्तन्तस्य प्रयोजनमाह—भविष्यति । त्रेतायुगापेक्षया द्वापरे कलौ चेत्यर्थः । सुखार्थमित्यर्थव्यक्तिः स्वीकृता । एतदुपसंहरन्नन्यया सूत्रयन्नध्यायमध्यायान्तरेण सङ्क्रमयति—दशरूपविधाने चेति ।

द्विजवरतोतनिरूपितसन्ध्यध्यायार्थतत्त्वपठनेयम् ।
अभिनवगुप्तेन कृता शिवचरणाम्भोजमधुपेन ॥

**Colophon:**

इति महामाहेश्वरश्रीमदभिनवगुप्ताचार्यविरचितायां नाट्यवेदविवृतावभिनव-भारत्यामेकोनविंशोऽध्यायः समाप्तः ॥

निःशेषशब्दव्यवहारवृत्तिवैचित्र्यमभ्येति यतः प्रतिष्ठाम् ।
श्रोत्रात्मकं तत्परमेश्वरस्य वन्देतमां रूपमरूपधाम्नः ॥

Contains the following subjects:—

१. नाट्योत्पत्तिः.
२. मण्टपविधानम्.
३. रङ्गपूजनम्.
४. ताण्डवविधानम्.
५. पूर्वरङ्गादिविधानम्.
६. रसाध्यायः.
७. भावाध्यायः.
८. Eighth Adhyaya wanting.
९. आङ्गिकाध्यायः.
१०. चारीविकल्पः.
११. मण्डलाध्यायः.
१२. गत्यध्यायः.
१३. कक्ष्यावृत्तिधर्म्यभिधानम्.
१४. छन्दोऽध्यायः.
१५. वृत्तविधिः.
१६. लक्षणालङ्कारदेशगुणाध्यायः.
१७. काकुविधानम्.
१८. दशरूपविधानम्.
१९. वृत्तिसन्ध्यङ्गादिशरीरनिरूपणम्.

---

R. No. 2479.

Paper. 10¼ × 9¼ inches. Foll. 70. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Muhil Tavaḷi Vîrarâyan Uṇṇi Anujan Râja, Pudiyakôvilagam, Calicut.

अभिज्ञानशाकुन्तलव्याख्या—अन्वयबोधिनी.

ABHIJÑÂNAŚÂKUNTALAVYÂKHYÂ : ANVAYA-BÔDHINÎ.

Foll. 1*a*—69*a*. Foll. 69*b*—70 are left blank.

A commentary on the well-known drama, Abhijñâna Śâkuntala, of Kâlidâsa. The commentator's name is not given but he mentions Śrinivâsa, a prior commentator.

Breaks off in the third Act.

**Beginning:**

किंचन नीरदनीलं प्रणम्य रमया समुत्सुकं तेजः ।
अन्वयबोधिन्याख्यां व्याख्यां शाकुन्तलस्य रचयामः ॥

अथ खलु कालिदासनामा महाकविः दृश्यश्रव्यरूपेषु द्विविधेषु काव्येषु मध्ये दृश्यरूपमभिज्ञानशाकुन्तलं नाम काव्यविशेषं नाटकं चिकीर्षुस्तदादौ पूर्वरङ्गानां वक्तव्यत्वेऽपि तेषां प्रायेण क्रियारूपत्वात्तान्युपेक्ष्य तदङ्गेषु प्रधानभूतामाशीरूपां नान्दीं सूत्रधारवचनरूपतया निबध्नाति—या सृष्टिरित्यादिना या । स्रष्टुः आद्या सृष्टिः । या विधिहुतं हविः वहति । या होत्री ये द्वे कालं विधत्तः या श्रुतिविषयगुणा विश्वं व्याप्य स्थिता यां सर्वभूतप्रकृतिरित्याहुः यया प्राणिनः प्राणवन्तः प्रत्यक्षाभिः ताभिरष्टाभिस्तनुभिः प्रपन्नः ईशः वः अवत्विति योजना ।

या तनुः स्रष्टुः ब्रह्मणः आद्या आदौ भवा सृष्टिः । सृज्यत इति सृष्टिरिति कर्मव्युत्पत्त्यात्र सृष्टं वस्त्वभिधीयते । या ब्रह्मणः प्रथमसृज्यभूतेत्यर्थः । सृष्टिरिति कृत्यल्युटो बहुलमित्यत्र बहुग्रहणस्य सर्वकृद्व्यापित्वात् कर्मणि क्तिन् । यद्वा अकर्तरि च कारक इति सूत्रे संज्ञायामित्युपाधिवचनं प्रायिकम् । काशिकायां चकारस्य संज्ञाव्यभिचारार्थकत्वाङ्गीकारात् । अतस्संज्ञायामिवासंज्ञायामपि कर्मादिर्भवति । अत एव सम्बन्धमनुवर्तयिष्यत इति भाष्यग्रन्थं व्याकुर्वता कैयटेन सम्बध्यत इति सम्बन्धः कर्मणि घञिति व्याख्यायि । अतस्तदपवादत्वात् क्तिनोऽपि कर्मव्युत्पत्तिर्भवति । तस्मादेव स्मृतिरूप इति शङ्करभगवद्भाष्यं व्याकुर्वद्भिः टीकाविवरणकारादिभिः स्मर्यत इति स्मृतिरिति कर्मव्युत्पत्तिरङ्गीकृता । आदिसृज्यत्वमपामसाधारणो धर्मः ।

* * * *

**Colophon:**

इति शाकुन्तलव्याख्यायामन्वयबोधिन्याख्यायां प्रथमाङ्कविचारस्समाप्तः ॥

* * * *

**End:**

विदूषकः अथकिमिति । अथकिमित्यङ्गीकारे । निष्क्रान्तास्सर्वे । अत्र देवीप्रार्थनारूपावान्तरकथाकल्पनं राज्ञः सकाशाद्विदूषकापकर्षणार्थम् । तच्च गान्धर्वविवाहार्थमित्यवगन्तव्यम् ।

**Colophon:**

इति शाकुन्तलव्याख्यायामन्वयबोधिन्यां द्वितीयाङ्कविचारस्समाप्तः ॥

यमुनापुलिने पशुपालगणैः रममाणमलं कमलारमणम् ।
भजतां भजतां भवभीतिहरं परमं पुरुषं करवै शरणम् ॥

कविरिदानीं कथान्तरमारभमाणो वस्तुसङ्घटनार्थं विष्कम्भमारभते— ततः प्रविशतीति । यजमानशिष्यः यजमानशिष्यरूपधारी नटः कुशान् दर्भानादाय ।

* * * *

तथाहि । तवेति स्मरणं हृदयं न जान इति अभिप्रायापरिज्ञानाद्भयम् । हृदयपरिज्ञानाभावे कथं लेखः प्रेष्यत इति शङ्का । तव हृदयं स्थिरानुरागं वा नवेति वितर्कः । इत्यादि श्रीनिवासेनोक्तम् । विस्तरभयात्तल्लेखनान्नाद्रियते ।

---

R. No. 2480.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 510. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. T. V. Śaraṇyācarlu of Rāghavapuram, Ellore taluk, Kistna district.

Bound in 3 volumes.

दैवज्ञविलासः.

DAIVAJÑAVILĀSAḤ.

Foll. 1a–488b.

Same work as that described under Nos. 13434 and 13436 of the D.C.S. MSS., Vol. XXIV. By Kañcam Yallayārya.

Contains the Kālakhaṇḍa complete.

Fol. 489a contains the colophon of the Utpātakhaṇḍa and a portion in the beginning of the Kālakhaṇḍa. Fol. 489b contains Navagrahanamaskāra and Rāmamaṅgala. Fol. 490 contains Kōṭicakra. Fol. 491 contains information regarding the movements of the planets. Foll. 492 to 494 contain some Yantras dealing with magical charms. Foll. 495 to 505 contain with Telugu meaning some miscellaneous information relating to horoscopical matters. Foll. 506 to 510 contain Navagrahadaśāphala with Telugu meaning.

---

R. No. 2481.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 164. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Tiru Śrīnivāsavarada Tātācāryar of Villiyambākkam in the Chingleput district.

Bound in 2 volumes.

तत्त्वचिन्तामणिदीधितिव्याख्या — जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : JĀGADĪŚĪ.

A commentary on the Tattvacintāmaṇidīdhiti of Raghunātha Śirōmaṇi by Jagadīśa. Same work as that described under No. 4086 of the D.C.S. MSS., Vol. VIII.

Breaks off in the Siddhāntalakṣaṇa.

---

## R. No. 2482.

Paper. 10½ × 9¼ inches. Foll. 72. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Mudgala Veṅkaṭarāmayyagāru, Kōṭipalli, Gōdāvari district.

न्यायसुधाटिप्पणी.

NYĀYASUDHĀṬIPPAṆĪ.

Foll. 1*a*—71*a*. Foll. 71*b*—72 are left blank.

A commentary by Yadupati, disciple of Vēdēśatīrtha, on the Nyāyasudhā which work has been described under No. 4820 of the D.C.S. MSS., Vol. X.

Contains the first Pāda without beginning and end, the second Pāda without the end, and the third Pāda complete and breaks off in the fourth Pāda.

**Beginning :**

पर्यवसानं दर्शयति । अनेकपदात्मकवाक्येत्यादिना । सर्वत्रेति । लौकिकवाक्य इत्यर्थः । वाक्यान्तराणीति । आवां तत्र(अवान्तर)लौकिकवाक्यानीत्यर्थः । अत्र यथावस्थित एव सम्बन्ध इति स्वारस्यं ज्ञातव्यम् । एवं कार्यता च न काचित् स्यादिति अन्यानिवर्त्यपूर्वपक्षं दर्शयित्वाधुना इष्टव्युत्पत्तिरिष्यत इति अन्यानिवर्त्यपूर्वपक्षं दर्शयति—क्वचेति । वृद्धशब्दः व्युत्पन्नपरः । स्वार्थीनेति ।

* * * *

अन्ये तु निर्णयटीकयोः प्रवर्तकज्ञाने कृतिसाध्यत्वविशेषणमावश्यकमिति साभिप्रायः । सुधायास्तु कृतिसाध्यत्वस्य लिङाद्यर्थतायामेव वैयर्थ्येन प्रवर्तकज्ञानेऽपीत्यभिप्रायः । अत एव लिङाद्यर्थस्त्विष्टसाधनत्वमेवेति कर्मनिर्णये भगवत्पादीयं वचनमित्याहुः ।

* * * *

मान्त्रवर्णिकमेव च गीयते । यत्सत्यं ज्ञानमित्यादिना मन्त्रवर्णेन ब्रह्मोक्तं, तदेतदुपायभूतेन ब्राह्मणेन स्वप्राधान्येन गीयते ।

* * * *

Colophon :

इति श्रीमद्देवेशतीर्थपूज्यपादशिष्येण यदुपतिना विरचितायां सुधाटिप्पण्यां प्रथमाध्यायस्य द्वितीयः पादः ।

End :

किन्त्वव्याहृतस्येमौ विषयावित्यस्यैवातो नात्र स्त्रीलिङ्गप्रसक्तिरिति समाधानाभिप्रायमाहुः ॥

Colophon :

इति श्रीमद्देवेशतीर्थपूज्यपादशिष्येण यदुपतिना विरचितायां सुधाटिप्पण्यां प्रथमाध्यायस्य तृतीयः पादः ।

अन्यत्र प्रसिद्धेभ्य इति । प्रथमपादे समन्वितानां लोकत एवान्यत्र प्रसिद्धिः । एतत्पादीयानां च श्रुतिलिङ्गादिभिः सेति विवेक इत्यर्थः ॥

* * * *

आदित्यगतिः स्थाविरमुपावर्तते । तद्द्रव्यमस्ति । स चोक्तरीत्या नेतरदित्यपेक्षबुद्धिकारणसम्बन्धघटकतया कालस्सिध्यति । तदमी प्रयोगाः स्थविरादौ परत्वं तपनपरिस्पन्दविप्रकृष्टबुद्धिजन्यं तदनुविधायित्वात्ते च परिस्पन्दाः.

---

## R. No. 2483.

Paper. $10\frac{1}{4}\times 9\frac{3}{4}$ inches. Foll. 248. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Siṣṭla Veṅkaṭa Śastrigāru, Batavōlu, Gudivāda taluk, Kistna district.

Bound in 2 volumes.

ब्रह्मयामलम्.

BRAHMAYĀMALAM.

Foll. 1*a*—242*a*. Foll. 242*b*—247*b* give the contents of the work. Fol. 248 is left blank.

A treatise on Tantra and mysticism.

Gives details for the performance of various pacificatory ceremonies and for making gifts of various kinds considered efficacious in the curing of certain diseases, etc.

Contains the following Paddhatis:—

१. मृत्युहरच्छागदानपद्धतिः
२. कूश्माण्डफलगुप्तदानम्.
३. पुष्पगुप्तदानम्.
४. भूमिस्थतैलकुम्भदानम्.
५. उदरव्याधिहरनागदानम्.
६. वातरोगहरमृगदानम्.
७. शिशुमारदानम्.
८. कन्यावन्ध्यात्वहरसुवर्णफलदानम्.
९. तैलघटदानम्.
१०. शनिशान्तिः.
११. शिरोरोगहरकपिलदानम्.
१२. दन्तरोगहरसूर्यदानम्.
१३. ज्वरहरक्षीरकुम्भदानम्.
१४. सर्वारिष्टहरतिलपिष्टदुर्गादानम्.
१५. रोगप्रतिकृतिदानम्.
१६. सर्वरोगहरवीरभद्रबलिः.
१७. भौमवारजन्मनक्षत्रशान्तिः.
१८. मन्दवारजन्मर्क्षशान्तिः.
१९. शत्रुच्छेदनपरशुदानम्.
२०. ग्रन्थिरोगहरदुर्गादानम्.
२१. कालपुरुषदानम्.
२२. वक्रतुण्डदानम्.
२३. नवदुर्गादानपद्धतिः.
२४. वटुकभैरवदानम्.
२५. अघोरमूर्तिदानम्.
२६. सन्तानगोपालदानम्.
२७. राशिचक्रदानम्.
२८. दारिद्र्यहरधनमूर्तिदानम्.
२९. विविधज्वरहरपद्मदानम्.
३०. हनुमद्दानपद्धतिः.
३१. मृत्युहरमहिषदानम्.
३२. तैलकटाहदानम्.
३३. श्रीराममूर्तिदानम्.
३४. अभयङ्करदानपद्धतिः.
३५. पापपुरुषदानम्.
३६. सरस्वतीप्रतिमादानम्.
३७. अङ्गस्पन्दशान्तिः.
३८. सीराष्टाक्षरपद्धतिः.
३९. अष्टमातृकादानम्.
४०. मृत्युमहिषीदानम्.
४१. कृष्णमृगदानम्.
४२. अजादानम्.
४३. कृष्णाजिनदानपद्धतिः.
४४. कृत्रिमरोगहरागस्त्यदानम्.
४५. बन्धमोचनदुर्गादानम्.
४६. राज्यकारिबन्धमोक्षतिलपिष्टदुर्गादानम्.
४७. वशीकरणभुवनेश्वरीदानम्.
४८. समस्तभयहररथदानम्.
४९. लक्ष्मीमूर्तिदानम्.
५०. तिलपिष्टमृत्युदानम्.
५१. तिलपिष्टसूर्यप्रतिमादानम्.
५२. रजतरथदानम्.
५३. शिवमूर्तिदानम्.

५४. संवत्सरारम्भविधिः.

रुद्रयामले—

५५. मृत्युहरदानपद्धतिः.

५६. समस्तभयहरदुर्गादानम्.

५७. तैलघटदानपद्धतिः.

५८. कालपुरुषदानम्.

५९. कार्तवीर्यदानपद्धतिः.

६०. अलक्ष्मीहरलक्ष्मीदानम्.

६१. अलक्ष्मीदानपद्धतिः.

६२. छागदानपद्धतिः.

६३. कालापमृत्युहरतिलपिष्टयमदानम्.

६४. मृत्युहरमहिषदानपद्धतिः.

६५. हनुमद्दानम्.

६६. निरीक्षिताज्यदानपद्धतिः.

६७. राहुप्रीतिकरसीसदानम्.

६८. महाभयहरनारसिंहदानम्.

६९. वैश्वानरदानपद्धतिः.

७०. तैलकटाहदानपद्धतिः.

७१. अनडुद्दानपद्धतिः.

७२. सर्वरोगहरपद्मदानम्.

७३. दुर्गाबलिः.

७४. सन्तानगोपालदानपद्धतिः.

७५. सूर्यदेवताकस्वर्णपद्मदानम्.

७६. चन्द्रप्रीतिकररजतपद्मदानपद्धतिः.

७७. अङ्गारकदेवताकताम्रपद्मदानम्.

७८. बुधप्रतिमादानपद्धतिः.

७९. गुरुप्रीतिकरस्वर्णपद्मदानम्.

८०. शुक्रप्रीतिकररजतपात्रदानम्.

८१. शनिप्रीतिकरलोहपात्रदानम्.

८२. राहुप्रीतिकरदानम्.

८३. केतुप्रीतिदानपद्धति.

८४. सूर्यप्रतिमादानपद्धतिः.

८५. चन्द्रप्रतिमादानम्.

८६. अङ्गारकप्रतिमादानपद्धतिः.

८७. बुधप्रतिमादानम्.

८८. बृहस्पतिप्रतिमादानम्.

८९. शुक्रप्रतिमादानम्.

९०. शनिप्रतिमादानपद्धतिः.

९१. राहुप्रतिमादानपद्धतिः.

९२. केतुप्रतिमादानपद्धतिः.

९३. सूर्यशान्तिः

९४. चन्द्रशान्तिः.

९५. अङ्गारकशान्तिः.

९६. बुधशान्तिः.

९७. गुरुशान्तिः.

९८. शुक्रशान्तिः.

९९. शनिशान्तिपद्धतिः.

१००. राहुग्रहशान्तिः.

१०१. केतुग्रहशान्तिः.

१०२. ऋग्वेदप्रतिमादानपद्धतिः.

१०३. यजुर्वेदप्रतिमादानम्.

१०४. सामवेदप्रतिमादानम्.

१०५. अथर्वणवेदप्रतिमादानम्.
१०६. तत्संयोगहररुद्रमूर्तिदानम्.
१०७. तत्संयोगिहरशिवसहस्रनामानि.
१०८. महाकृष्णाजिनदानपद्धतिः.
१०९. दशावतारदानपद्धतिः.
११०. रौप्यधेनुदानपद्धतिः.
१११. अतिपातकहरतैलघटदानम्.
११२. अतिपातकहररजतवृषभदानम्.
११३. उपपातकहरदामोदरमूर्तिदानम्.
११४. मानसिकपापहरपरशुदानम्.
११५. सङ्कलीकरणहरविष्णुमूर्तिदानम्.
११६. गोविन्दप्रतिमादानपद्धतिः.
११७. अपात्रीकरणहरजनार्दनमूर्तिदानम्.
११८. जातिभ्रंशकरनारायणमूर्तिदानम्.
११९. प्रकीर्णहरमाधवमूर्तिदानम्.
१२०. दक्षिणामूर्तिदानपद्धतिः.
१२१. धर्ममूर्तिदानपद्धतिः.
१२२. पशुगमनजन्यपिशाचत्वहरयममूर्तिदानम्.
१२३. सर्वपापहरतिलपिष्टयममूर्तिदानम्.
१२४. कृष्णाजिनदानपद्धतिः.
१२५. रहस्यपापहरतिलस्रौद्रदानम्.
१२६. तिलपिष्टधेनुदानपद्धतिः.
१२७. तालव्यजनदानपद्धतिः.
१२८. जलपात्रिकादानपद्धतिः.
१२९. उपानद्दानपद्धतिः.
१३०. दध्यन्नजलकुम्भदानपद्धतिः.
१३१. पट्टवस्त्रदानपद्धतिः.
१३२. शिवाय दुकूलदानपद्धतिः.
१३३. अङ्गुलीयकदानम्.
१३४. हस्तवलयदानपद्धतिः.
१३५. सुवर्णयज्ञोपवीतदानम्.
१३६. कर्णाभरणदानपद्धतिः.
१३७. हरिहरप्रतिमादानपद्धतिः.
१३८. सूर्यप्रतिमादानपद्धतिः.
१३९. रामचन्द्रप्रतिमादानम्.
१४०. फलगुप्तदानपद्धतिः.
१४१. काकशान्तिः.

सायणीयपद्धतिः.

१४२. सर्वरोगहरदक्षिणामूर्तिदानम्.
१४३. सर्वरोगहराश्विनीप्रतिमादानम्.
१४४. आरोग्यदानपद्धतिः.
१४५. साधारणरोगप्रतिकृतिदानम्.

१४६. मृत्युहरकालप्रतिकृतिदानम्.
१४७. पापहरशतमानदानपद्धतिः.
१४८. राजयक्ष्मरोगस्यैकादशदानानि.
१४९. यक्ष्मशान्तिः.
१५०. राजयक्ष्महरक्षौमवस्त्रदानम्.
१५१. काशक्षयहररुद्रमूर्तिदानम्.
१५२. कुष्ठरोगस्य चतुर्दशदानम्.
१५३. तदर्थं सूर्यप्रतिमादानम्.
१५४. कुष्ठरोगहरवृषभदानम्.
१५५. पार्वतीपरमेश्वरप्रतिमादानम्.
१५६. श्वेतकुष्ठस्य पञ्च दानानि.
१५७. विसर्परोगहरसर्पप्रतिमादानम्.
१५८. ददुरोगहरोमामहेश्वरदानम्.
१५९. दद्रुरोगहरस्वर्णपद्मदानम्.
१६०. विस्फोटहरव्रताचरणम्.
१६१. अतिसारहरवह्निमूर्तिदानपद्धतिः.
१६२. ग्रहिणीरोगहरकृष्णधेनुदानम्.
१६३. मुखरोगनिदानम्.
१६४. मुखरोगहरस्वर्णगजदानम्.
१६५. अर्शोरोगहरस्वर्णधेनुदानम्.
१६६. घोरप्रतिकृतिदानम्.
१६७. गरुडप्रतिमादानम्.
१६८. नक्तान्धत्वहरगोपालदानम्.
१६९. कर्णरोगहरकम्बलदानम्.
१७०. बाधिर्यहरप्रकरणम्.
१७१. जिह्वारोगहरपद्धतिः.
१७२. वातरोगहरपद्धतिः.
१७३. शूलरोगहराणि.
१७४. शूलदानम्.
१७५. शूलरोगहरत्रिशूलम्.
१७६. हृद्रोगपरमोत्पाटनम्.
१७७. गुल्मरोगहरगणपतिप्रतिमादानम्.
१७८. प्रमेहहरस्वर्णदानम्.
१७९. महोदरहरमकरदानम्.
१८०. अश्मरीहरतिलपद्मदानम्.
१८१. कम्बलदानम्.
१८२. व्रणरोगहरस्वर्णगजदानम्.
१८३. विद्रधिहरस्वर्णवृक्षदानम्.
१८४. कण्ठरोगहररत्नदानम्.
१८५. शिरोरोगहरयज्ञोपवीतदानम्.
१८६. प्रस्वेदहरानि स्वर्णधेनुदानम्.
१८७. असृग्धरहररक्तधेनुदानम्.
१८८. अपस्मारहराणि.

१८९. विनायकप्रतिमादानम्.
१९०. ज्वरहराणि.
१९१. व्रणरोगहररत्नदानम्.
१९२. व्रणहरप्रकरणम्.
१९३. वन्ध्यात्वहरदानानि.
१९४. मूकत्वहरसरस्वतीदानम्.
१९५. जिह्वारोगहराणि.
१९६. अन्त्रवृद्धिहरनारायणप्रतिमादानम्.
१९७. ज्वरतर्पणक्रमः.
१९८. ग्रहिणीरोगहरकृष्णधेनुदानम्.

**Beginning:**

प्रणम्य शिरसा वाणीं गणेशं सिद्धिदायकम् ।
करिष्ये ग्रन्थमालोक्य ब्रह्मयामलपद्धतिम् ॥

तत्रादौ छागदानपद्धतिरभिधीयते—क्लेशकाले ग्रहदोषाद्युपद्रवकाले जन्मकर्माधाननक्षत्रग्रहयोरष्टमीचतुर्दशीद्वादशीपर्वसु भानुभौमभृगुवारेषु निपुष्करवर्जिते कर्तुश्चन्द्रबलोपेते देवालये नदीतीरे स्वगृहे वा शुद्धदेशे हस्तमात्रमितभूमिं गोमयेनोपलिप्य रङ्गवल्ल्यादि रचयित्वा तत्र कुशान् सर्षपांश्च संप्रकीर्य

* * * *

एवंगुणेत्यादि मम समस्तपापक्षयद्वारा महामृत्युपरिहारं समस्तभयनिवृत्तिं दुर्ग्रहग्रहणोद्भूतविस्मृत्युन्मादशान्तिं शरीरे वर्तमानसर्वरोगनिवृत्तिं त्रि . . .

* * * *

शातातपप्रोक्तप्रकारेण मृत्युहरच्छागदानं करिष्ये, तत्र छागपूजां ब्राह्मणपूजां च करिष्ये इति सङ्कल्प्य,

* * * *

**Colophon:**

इति मृत्युहरच्छागदानपद्धतिः ।

End:

तद्वदिति । तत्र होममन्त्रा रौद्राः तथाप्यत्र वैष्णवाः स्वस्वशाखोक्ता द्रष्टव्याः । तत्रेदं विष्णुरिति मन्त्रः, तद्विष्णोः, विष्णोर्नुकमिति द्वौ मन्त्राः समिच्चर्वाज्यहोमेषु क्रमेण ग्राह्याः । अत्र वैष्णवमन्त्रग्रहणे अयं हेतुः ।

---

R. No. **2484.**

Paper. 10¾ × 9¼ inches. Foll. 82. Lines, 20 in a page. Dêvanâgari. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. P. K. Mânavêdan Anujan Râja of Calicut.

कादम्बरीनाटकम्

**KÂDAMBARÎNÂṬAKAM.**

Foll. 1*a*—81*a*. Foll. 81*b*—82 are left blank.

A drama having for its plot the story of the Kādambarī, the well-known romance of Bhaṭṭa Bāṇa: by Narasiṁha, the younger brother of Viśvanātha and son of Gaṅgādhara and grandson of Siddhanātha. The author appears to have had a younger brother also, but his name is not stated.

Breaks off in the eighth Aṅka.

**Beginning :**

सौहित्यं विदधाति यस्सुमनसां शश्वत्प्रसन्नोदय-
स्सन्तो यं समुदाहरन्ति महतो देवस्य देहान्तरम् ।
यो भूयः प्रसरं विधूय तमसस्तन्नुच्छते ज्योत्स्नया
कल्याणं स करोतु वः कुमुदिनीमित्रः कलानां निधिः ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः) सानन्दम्.

रसिकः कविरद्भुता कथा पदगुम्फो ललितस्स्फुटो रसः ।
परिषद्गुणदर्शिनी वयं निपुणास्त्वत्किमितोऽपि नः प्रियम् ॥

नेपथ्याभिमुखं [1]परिवृत्य,

मारिष, किमद्यापि न सज्जीकृतानि पात्राणि? कियच्चिरमवेक्षतामयं नरशोणाचलनाथयात्रायां कादम्बरीदर्शनोत्सुकः सहृदयसमाजः.

(प्रविश्य पारिपार्श्वकः.)

आर्य किमुच्यते । ननु श्राव्य एवैष कादम्बरीनामा भट्टबाणस्य गद्यमयस्सूक्तिनिष्यन्दः । अथ पुनः कथमिममभिनिनीषते भावः ।

सू—नूनमिदमनाकर्णितं भवता । श्रूयतां तावत्—

उद्भूतभावरसमुज्ज्वलसंविधानं सङ्क्षेपवतां भवति कर्णरसायनं यत् ।
केनापि नाटकनिभात्कविना तदेव काव्यामृतं नयनयोः कृतमातिथेयम् ॥

पारिपार्श्वकः—सपरितोषम्, भाव यथैवम् ।

शक्यमिदानीं लब्धुं चन्दनतरुकुसुमसौरभानुभवः ।
पार्येत सोऽपि कर्तुं रसिकैः पुण्ड्रेक्षुफलरसास्वादः ॥

तदस्य वश्यवाचः कवेर्व्यपदेशज्ञापनेनानुगृहीतव्य एष जनः ।

सूत्र—एवं कथयामि—

जानाम्येव हि तद्भवान् कविकुलं सभ्यैर्यदभ्यर्हितं
नित्यं सन्निदधाति सा भगवती यस्मिन् गिरां देवता ।

---

[1] अवलोक्येति पाठान्तरम्.

तत्रासीत् किल सिद्धनाथतनयो गङ्गाधरः पण्डितो
बाहुश्रुत्यविशेषविश्रुतयशाः साहित्यसौहित्यभूः ॥
[1]तस्यैव मध्यमः पुत्रः नरसिंह इति कृतिकर्ता कृतेरस्याः ।
पारि—सप्रत्यभिज्ञम्. भाव, स्थाने खलु—[2]
अयं दशसु रूपकेष्वपि निरूढिमाढौ[3]किं तु
परं प्रभवतीति नो मनसि [4]मैवमूदद्भुतम् ।
सुधारसतरङ्गिणीसुरभिराशिरस्याग्रजः
क्षितौ सहृदयाग्रणीर्जयति विश्वनाथः कविः ॥
सू—तत्प्रयतस्व भूमिकापरिग्रहाय ।
पारि—यदादिशति भाव इति निष्क्रान्तः ।

* * * *

ततः प्रविशति कपिञ्जलः—अये महान् खलु गतः कालः.
स चन्द्रमास्सोऽपि च पुण्डरीकः पद्मालयायास्सहजन्मनौ द्वौ ।
अन्योन्यशापानुभवार्थमुर्व्यां जातौ युवानौ किल तावभूताम् ॥
विमृश्य, अहो, भगवतः सुगृहीतनाम्नः श्वेतकेतोः शाश्वते ब्रह्मणि परिनिष्ठितस्यापि भूयिष्ठं पुत्रवात्सल्यम् । यतः—
आकर्ण्य मया कथितं वृत्तं [5]तपोविरुद्धमपि ।
आयुष्यमस्य कुरुते किमपि विधानं सुसंहतामर्षः ॥

* * * *

स्मरणमभिनीय, नन्विदानीमाज्ञापितोऽहमाचार्येण—वत्स कपिञ्जल, पुण्डरीकस्य जननी कमलालयेयमेवालमस्य विधेः [6]रचितोपकरणसंभृतिषु । भवता तु वाजिनमयोनिजमिन्द्रायुधमेवानुप्रविश्य चन्द्रापीडमूर्तिश्चन्द्रमाः कादम्बरीप्रसङ्गाय प्रापणीयो वनं चैत्ररथम् । तदनु तदनुसारिणो वैशम्पायनकृतेस्त्वत्सुहृदोऽपि तामेव महाश्वेतां निमित्तीकृत्य मानुषाद्वपुषो निष्क्रमणं भविष्यतीति । तन्मयाप्येवमेव कर्तव्यम् ।

* * * *

**Colophon :**
प्रथमोऽङ्कस्समाप्तः ॥

---

[1] तस्यैव मध्यमः पुत्रो नरसिंह इतीरितः ।
विश्रुतस्स तु कर्तास्याः कृतेरित्यवधारय ॥ पाठान्तरम्.
[2] ढौकते.
पुत्रस्य तत्वतो रोधि.
[3] चोदमू इति पाठान्तरम्.
[4] शुभोदर्कसंविधाने भूतकङ्कणास्ते.

**Colophon:**

इति सप्तमोऽङ्कः ॥

**End:**

ततः प्रविशति वितंसहस्तो मातङ्गवकः ।

मा—दिट्ठिशि आएशेखु अंचूणि अअंमिशुतेशुआ ववागुलंपशालेमि ।

* * * *

चित्ररथः—कादम्बरी चन्द्रापीडहस्तेऽर्पयन्, जामातः! चन्द्रापीड! जगज्जीवातो! जैवातृक! यौतकत्वेदं गन्धर्वराज्यमपि(भि)वाचतां पूज्यः हंसः। महाश्वेतां पुण्डरीकस्य हस्तेऽर्पयित्वा, मया मदीयमाधिपत्यं हरिणीकृतं मान्याय ।

तारापीडः—कुमार, चन्द्रापीड, दिव्यात्मा सुकृतैर्मम त्वमुदभूः पुत्रं कलासु॥

---

R. No. 2485.

Paper. 10¾ × 9¾ inches. Foll. 80. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Kōmāṇḍūru Gōvindarājācāryulugāru of Vijayarāyi, Ellore taluk, Kistna district.

कुरुकेशगाथानुकरणम्.

KURUKĒŚAGĀTHĀNUKARAṆAM.

Foll. 1a—79a Foll. 79b—80 are left blank.

A rendering in Sanskrit stanzas of the Tamil work Tiruvāymoḷi of Śaṭhakōpa of Kurukāpuri who expresses therein his devotion to God Nārāyaṇa and His manifestations: by a son of Gōvinda of Kauśika-gōtra. The name here given for the work is not found in the MS.

Contains from the fourth Śataka to the end of tenth Śataka.

**Beginning:**

एकस्त्वाम्ये चलति जगती मुक्तवन्तस्समस्ताः

मानीलश्चाक्रमितचरणाभिन्नभाण्डैकपात्राः ।

भिक्षां वीक्षद्दहुजनमिह प्रेक्षयेयुस्स्वयंभो

श्रीमन्नारायणपदमतो जीवतान्वीक्ष्यशीघ्रम् ॥

आनीयोज्जीवितकरमिति प्रोच्य गां मुक्तवन्तः

स्वीयाः कान्तास्स्वयमिह समुत्सृज्य चान्योपभोगम् ।

उपचीव्रातपवनगता बाधिताश्शत्रुभिस्स्युः

स्वातक्षिप्रं रुचिरमकुटश्रीपतेः पादभक्ताः ॥

* * * *

मत्स्यैवेदं तरणकरणं चाधिकृष्णाङ्घ्रियुग्मं
श्रीमत्पुष्टावनिजकुरुकाश्रीशठारिप्रणीतम् ।
इत्थं श्रीमत्प्रमितवचसा सुप्रसिद्धे सहस्रे
प्रोज्जीवेयुर्दशकपठनात् ध्वस्तभेदा हि नूनम् ॥

* * * *

Colophon:

इति चतुर्थशतकम् ।

कल्याणाकरकौशिकान्वयसुधाकूपारकल्पद्रुमः
कल्पप्राभवकारिमारकरुणाकासारकादम्बकः ।
काणादादिकलाकलापकलनाकान्तारकण्ठीरवः
काव्यालङ्कृतिकोविदः कृतिमिमां [1]गोविन्दपुत्रोऽकरोत् ॥

End:

तृष्णा निर्हरणोपसङ्गतहरिं स्तुत्वा विरिंचिं हरं
निष्क्लेशप्रतिलब्धमुक्तिकुरुकाश्रीमच्छठारीरिति ।
अन्तायात्मनि भक्तिकारितसहस्रेऽस्मिन्नितीहोदिता-
श्चैतत्पङ्क्तिमभक्तिमूलदशकाभिज्ञा हि सर्वाधिकाः ॥

Colophon:

इति दशमशतके दशमदशकम् ।

---

## R. No. 2486.

Paper. 10⅜ × 9⅜ inches. Foll. 116. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Nilambūr Kōvilagam Rāja of Calicut.

### रघुवंशप्रकाशिका.

### RAGHUVAMŚAPRAKĀŚIKĀ.

Foll. 1a—115a. Foll. 115b—116 are left blank.

A brief explanatory commentary on the Raghuvaṁśa: by Aruṇagirinātha.

Contains the Sargas 7—19 complete.

Beginning:

अथ कुमारस्य कन्यारत्नलाभशेषभूतं विवाहादि वर्णयितुमुपक्रमते—अथेति । उपयन्त्रा वरेण युक्तामिति तस्याप्यादानमुक्तम् । उत्प्रेक्षा चेयम् । उपमा-

---

[1] रामानुजार्यौ.

पक्षे साक्षादित्यनुपयुक्तम् । देवसेना इन्द्रदुहिता । आदानेन राजन्यकाम्युत्थानशङ्कापि सूचिता । सेनेति । प्रह्वाश्चन्द्रादयः । भोज्यामिति ।

* * * *

**Colophon :**

इत्यरुणगिरिनाथविरचितायां रघुवंशप्रकाशिकायां सप्तमस्सर्गः ॥

**End :**

स्थविरसचिवैस्सार्धमिति । नयानयी भर्तृराज्यमिति यावत् कुमारोदयन्यासबुद्ध्या राज्यस्वीकार इति द्योतयता शौचं गर्भं दधाना देवी राज्यमशिषदित्युक्तः स च निर्वहणं कार्यः कुर्यान्निर्वहणेऽद्भुतमिति वचनात् ।

इत्थं विचित्रसरसेऽत्र मया प्रबन्धे
सन्दर्शितं विविधकाव्यनयप्रपञ्चम् ।
आलोच्य साधु परिबृंहितशेमुषीका-
स्सर्वत्र काव्यविषये विहरन्तु सन्तः ॥
एतत्प्रबन्धविवृतिव्यपदेशतो यच्छब्दार्थतत्त्वविततप्रविवेचनं नः ।
तत्सर्वमस्तु पदपङ्कजयोस्सपर्यास्सर्वात्मनस्सकललोकगुरोश्शिवस्य ॥

**Colophon :**

इति श्रीकण्ठपादपवित्रितस्यारुणगिरिनाथस्य कृतौ रघुवंशप्रकाशिकायामेकोनविंशस्सर्गः ॥

---

R. No. 2487.

Paper. 10⅝ × 9⅜ inches. Foll. 92. Lines, 20 in a page. Telugu. Good.

Transcribed from a MS. of M.R.Ry. Nandula Jagannātha Śāstrigāru of Pālakollu, Narsapur taluk, Kistna district

(a) ज्यौतिषकल्पद्रुमः.

JYAUTIṢAKALPADRUMAḤ.

Foll. 1a—34a.

A treatise on horoscopy. Similar to the work described under No. 13782 of the D.C.S. MSS., Vol. XXIV. There is no authority for the name given to this work excepting that it is so stated in the colophon.

Incomplete.

**Beginning :**

मातापितृभ्यां जगतो नमो वामार्धजानये ।
सद्यो दक्षिणदृक्पातसङ्कुचद्वामदृष्टये ॥

अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
तं नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥
शरणं करवाणि शर्मदं ते चरणं वाणि चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः कुरु मामम्ब कृतार्थसार्थवाहम् ॥

तनुभावः—

सवितरि तनुसंस्थे शैशवे व्याधियुक्तो
नयनगदसुदुःखी नीचसेवानुरक्तः ।
स भवति गृहमेधी धैर्ययुक्तो मनुष्यो
भवति विकलमूर्तिः पुत्रपत्नीविहीनः ॥
सततजनविरोधी जन्मरोगी शशाङ्के
तनुभवनगते चेद्वित्तपूर्णस्सुकेशः ।
बहुतरतनुभागे वीर्ययुक्तः सुदेही
भवति च यदि नीचश्चन्द्रमाः पापगो वा ॥

**End:**

श्रेष्ठो देवगुरुस्तु भास्करभृगू मध्यौ च मृत्युप्रदौ
भूजातार्कसुतौ बुधो मतिहरः सोमस्तु नाश्यप्रदः ।
ज्येष्ठावासवमुत्तरत्रयमथाम्भोनाथरोहिण्यपि
श्रेष्ठास्स्युर्विमतोदिता अथ शिशोर्विद्यासमारम्भणे ॥
मकरे माघसंयुक्ते उपनयनेन जीवति ।
माघे च फाल्गुने कुम्भे शतवर्षाणि जीवति ॥

**Colophon:**

इति ज्यौतिषकल्पद्रुमः ॥

---

(b) दैवज्ञकल्पद्रुमः, आन्ध्रटीकासहितः.

DAIVAJÑAKALPADRUMAḤ WITH TELUGU MEANING.

Foll. 34a—92a. Fol. 92b contains the name of the owner of the MS. from which this was copied.

A treatise on astrology dealing with the topics given below: by Vîrabhadrâvadhâni.

Contains the following Prakaraṇas :—

१. संवत्सरप्रकरण.
२. तिथिप्रकरण.
३. वारप्रकरण.
४ नक्षत्रप्रकरण.
५. योगप्रकरण.
६. करणप्रकरण.
७. मुहूर्तप्रकरण.
८. योगावयोगादिदोषप्रकरण.
९. गोचारप्रकरण.
१०. लग्नप्रकरण.
११. महादोषमहागुणप्रकरण.
१२. शुक्रास्तमयादिदोषप्रकरण.
१३. विवाहप्रकरण.
१४. रजस्वलासीमन्तादिप्रकरण.
१५. जातकर्मादिप्रकरण.
१६. अभिषेकादिप्रकरण.
१७. यात्राप्रकरण.
१८. वास्तुप्रकरण.

Complete.

Name of the scribe of the original MS: Bhaṭṭaprōlu Rāmacandrayya. Date of transcription of the original MS: Tuesday, the 7th day of the dark fortnight of the Puṣya month in the year Krōdhana.

**Beginning**:

दिश्याद्भद्रं नृसिंहो युगपदुदितसूर्येन्दुकोटिप्रकाशो
मध्येदुग्धाम्बुराशि द्विरसनपतिना छत्रितोद्भासिभोगः ।
प्रह्लादोदीरिताघस्तुतिव(द)नकृतप्रीतिरुत्तंसितेन्दुः
वामाङ्काध्यासिलक्ष्म्या पुलकमुकुलशाल्यङ्गयालिङ्गितो वः ॥
विद्वान्मौहूर्तिकानामधिकतरमुदे संहिता जातकानां
सारं सङ्गृह्य सम्यक् सुगममिममहं वीरभद्रावधानी ।
ग्रन्थ दैवज्ञकल्पद्रुममिति मितवर्णामितार्थं विदध्यां
यस्मिन् लब्धऽखिलार्थाः करतलकलिताः पूरुषैः प्रार्थनीयाः ॥
ब्राह्मं दैवं च पित्र्यं च मनुसवनजीवार्कचन्द्रर्क्षमानं
कान्त्या कं खेटचारे नवजनमृतसूत्यादिषु त्रिंशतानाम् ।
पित्र्यं शीतांशुवृत्तौ गुरुमितिरपि षष्ट्यब्दकेपुष्यक्षेमृक्षे-
राधुर्घटीरमान्ताविधिषु शशिमितिस्त(स)थायुष्यतोऽन्यत् ॥

* * * *

द्वौ द्वौ मासौ मृगाद्याः शिशिरत ऋतवः सौम्ययाम्यायनेऽन्त्येऽ-
होरात्रोब्दषट्चाशिरशरदि युगे सम्परीदान्विदाब्दाः(?) ।

बह्वृचर्केन्द्रात्यनेशाहलिगुरुसुरराजाग्रयस्त्वष्टृचाहि-
र्बुध्न्यः पित्राख्यविश्वेन्द्रमरयुगलदस्राभगोद्दयुगेशाः ॥

* * * *

Colophon:

इति श्रीवीरभद्रावधानिकृतौ दैवज्ञकल्पद्रुमे संवत्सरप्रकरणं संपूर्णम् ॥

End:

स्नानालङ्कारपाकारसशयनमलास्त्राणि विद्या च भुक्तिः
दुःखं दासं विवाहो धनमणिसुरपूजावघाता गृहे तु ।
कूपो रुद्रेन्द्रचन्द्रोऽप्यतिदिशि हित उष्ट्रेभयोस्तु ध्वजेभौ
पश्वश्वस्य ध्वजोक्षा ध्वजहरिवृषभा द्वारशय्यासनादेः ॥

* * * *

Colophon:

इति श्रीवीरभद्रावधानिकृतौ दैवज्ञकल्पद्रुमे वास्तुप्रकरणं समाप्तम् ॥

---

## R. No. 2488.

Paper. 10¼ × 9¼ inches. Foll. 119. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Kanasa Paidayyagāru of Pālakollu, Narasapur taluk, Kistna district.

### परशिवविश्वकर्मीयम्, आन्ध्रटीकासहितम्.

### PARAŚIVAVIŚVAKARMĪYAM WITH TELUGU ṬĪKĀ.

Foll. 1*a*—118*a*. Foll. 118*b*–119 are left blank.

The portion contained herein gives the details of the rites connected with the consecration of proper images in temples. The commentary in Telugu is by Kṛṣṇamācārya, probably son of Vēṅkaṭārya of Bhaṭṭar family.

Contains the following topics in the Adhyāyas noted against them:—

| | |
|---|---|
| ३३. तिथिवारनक्षत्रमुहूर्तविधिः. | १४ प्रतिष्ठागर्भन्यासविधानम्. |
| ३४. अङ्कुरार्पणविधिः | ४१. प्रतिष्ठाविधानरत्नविन्यासपीठस्थापनविधानम्. |
| ३५. (३९) जलाधिवासधान्याधिवासौ. | ४०. (४२) प्राणप्रतिष्ठाविधानम्. |
| ३६. अभिषेकविधिः. | ४३. लिङ्गनिर्णयः. |
| ३८. प्रतिष्ठाविधानवास्तुहोमौ. | |
| ३९. शान्तिहोममूर्तिहोमौ. | |

Date of copying of the original: Tuesday, the 13th day of the dark fortnight of the Phālguna month in the year Svabhānu.

**Beginning:**

शिलासङ्ग्रहणं वक्ष्ये सर्वलोकहिताय च ।
निष्कलं सकलं मिश्रं लिङ्गं त्रिविधकर्मणि ॥

*                    *                    *                    *

रत्नजं शैलजं चैव दारुजं धातुजं तथा ।
मृन्मयं सौधजं चैव षड्विधं बिम्बमुच्यते ॥

*                    *                    *                    *

शैलं चतुर्विधं ज्ञेयं रत्नं चाष्टविधं भवेत् ।
पञ्चधं दारुजं प्रोक्तं द्विविधं धातुरुच्यते ॥

*                    *                    *                    *

स्वर्णजं धनकामी तु विश्वकारी तु कांस्यजम् ।
ताम्रजं पुत्रकामी तु वर्चस्कामी तु पित्तलम् ॥
एतेषां सर्वयोग्यानामितरेषां च वर्जनम् ।
अन्यलोहेन संयुक्तं सर्वदोषकरं भवेत् ॥
एतानि लोहबिम्बानि ततो दारुजमुच्यते ।

*                    *                    *                    *

ध्वजस्तम्भम्—

द्विविधं च ध्वजस्तम्भं निर्मितो वर्धकीवरः ।
क्रमुकं नारिकेलं च वेणुं त्रिविधमुत्तमम् ॥

*                    *                    *                    *

नदीतीरे जलस्थाने पर्वताग्रेषु कानने ।
पुण्यक्षेत्रेषु शिल्पीन्द्रः शिलासङ्ग्रहमाचरेत् ॥
सुमुहूर्ते सुनक्षत्रे शुक्लपक्षे विशेषतः ।
तस्मिन् शुभदिने युक्तं कर्तव्यं शिलसङ्ग्रहम् ॥

*                    *                    *                    *

शङ्खदुन्दुभिनिर्घोषैर्जयवंशादिघोषणैः ।
पुण्याहवाचनं कृत्वा प्राणायामपुरस्सरम् ॥

*                    *                    *                    *

पायसापूपनैवेद्यं शिल्पिसन्तुष्टभोजनम् ।
नानाभरणसंयुक्तं वस्त्रगोभूधनैर्युतम् ॥

शिल्पी सन्तुष्टयत्नेन बिम्बसन्तुष्टिकं तथा ।
वर्धकी मूर्तिकैस्सार्धं निस्सन्देहो महान् भवेत् ॥

* * * *

लिङ्गं बिम्बं तथा बेरं प्रतिमाकारकौतुके ।
विग्रहं षड्विधं नाम एकैकं बहुधा भवेत् ॥

* * * *

शुद्धिस्तु प्रथमं द्रव्यं द्वितीयं सूत्रन्यासकम् ।
तृतीयं पुनः सीमन्तं मन्त्रन्यासं तु वर्धकी ॥
बिम्बं सर्वाङ्गनिर्माणं जातकर्म चतुर्विधम् ।
मूर्तिव्योमं ततः कृत्वा बलिं शान्तिश्च कर्म च ॥
पञ्चमं नामकरणं दैवतैः परिकीर्तिता ।
स्थापनं देवदेवस्य अन्नप्राशनषष्ठमम् ॥
ततः कुर्याच्च शिल्पीन्द्रः सन्तुष्टो भोजनं तथा ।
सप्तमं बालकर्म च शिशोर्होमं तु वर्धकी ॥
अष्टादशोपचाराणि पूजयेत्पुरुषसूक्ततः ॥

* * * *

**Colophon:**

इति परशिवविश्वकर्मणि वास्तुशास्त्रे तिथिवारनक्षत्रमुहूर्तविधानो (नाम द्वात्रिं)शोऽध्यायः ॥

**End:**

**Colophon:**

इति श्रीपरशिवविश्वकर्मकृतवास्तुशास्त्रे प्राणप्रतिष्ठा नाम चत्वारिंशोऽध्यायः ॥

अथ नयनोन्मीलनम्—

अथातस्सम्प्रवक्ष्यामि नयनोन्मीलनं क्रमात् ।
ब्रह्मा विष्णुश्च रुद्रश्च शक्तीनां सर्वदेवताः ॥
दृष्टिनिर्माणकाले तु सर्वमङ्गलघोषणैः ।
सुमुहूर्ते प्रयत्नेन शिल्पिदृष्टेश्च कारणम् ॥

* * * *

मूरे मध्ये च दूर्वे च ब्रह्मविष्णुहरांशकम् ।
ब्रह्मांशं चतुरंशं च अष्टांशं विष्णुभोगकम् ॥

पूर्वोक्तं चैव रुद्रांशं षोडशं . . . . . . . ।
द्वात्रिंशदंशं युक्तं हि चतुष्षष्टयंशसंयुतम् ॥
नपुंसकं भवेद्ब्राह्मं स्त्रीलिङ्गं विष्णुभोगकम् ।
पुंलिङ्गं रुद्रभोगं च त्रिविधं तत्र कल्पयेत् ॥
त्रिभागयुक्त तल्लिङ्गमष्टधा परिकीर्तितम् ।

* * * *

एवं लक्षणसंयुक्तमङ्कुशं सर्वदैविकम् ।
यावत्पाणिप्रमाणं तु तावत्पाश्व(श्)पदं(तं)तथा ॥
तद्द्वादशाङ्गुलादूर्ध्वं कार्याः पञ्च शिखाः क्रमात् ।

* * * *

अध्यात्मभट्टरकुलाम्बुधिपूर्णचन्द्रश्रीवेङ्कटार्यबुधपेनतनूभवेन (?) ।
श्रीशिल्पिशास्त्रस्य कृता सुटीका श्रीकृष्णमाचार्यसमाह्वयेन ॥

---

R. No. 2489.

Paper. 10¾ × 9½ inches. Foll. 318. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Nilambūr Kovilagam Rāja of Calicut.

Bound in two volumes.

पुराणसङ्ग्रहः.

PURĀṆASAṄGRAHAḤ.

Foll. 1a—317a. Foll. 317b—318 are left blank.

A work based on the various Purāṇas and the Rāmāyaṇa and dealing with the greatness of Viṣṇu and of his worship and narrating the chief incidents that occurred in His different incarnations on earth, such as the Matsya, Kūrma, Varāha, Narasiṁha, Vāmana, Paraśurāma, Rāma, Kalkya, etc., and on other important occasions.

Contains the Adhyāyas 1 to 38, 81 to 101, and 103 and 104 which deal with the following topics:—

१. जगत्स्वरूपकथनम्.
२. प्रलयावस्थानम्.
३. ब्रह्मोत्पत्तिः
४. स्वर्गकथनम्.
५. मधुकैटभवधः.
६. अमृतमथनम्.
७. जयविजयशापावाप्तिः.
८. हिरण्याक्षवधः.
९. दैत्यवरलाभः
१०. प्रह्लादोपदेशः.

११. प्रह्लादानुभवः.
१२. हिरण्यकशिपुवधः.
१३. वामनमहापुरुषोपाख्यानम्.
१४. त्रैविक्रमम्.
१५. हरिशब्दमाहात्म्यम्.
१६. कार्तवीर्यार्जुनवधः.
१७. राघवप्रादुर्भावाश्वमेधिकम्.
१८. सिद्धाश्रमनिवासः.
१९. गङ्गावतरणम्.
२०. सीताविवाहः.
२१. (अभिषेकविघातः वनवासश्च)
२२. (पादुकापट्टाभिषेकः)
२३. खरवधः.
२४. सीताहरणम्.
२५. (शबरीमोक्षप्रदानम्.)
२६. (हनुमतो लङ्काप्रवेशः.)
२७. (त्रिजटास्वप्नकथनम्.)
२८. (हनुमतः प्रत्यागमनम्.)
२९. (राघवादीनां समुद्रगमनम्.)
३०. (विद्युजिह्वेन मायारामप्रदर्शनम्)
३१. (अकम्पनादिवधः.)
३२. (कुम्भकर्णवधः.)
३३. (अतिकायादिराक्षसवधः.)
३४. (इन्द्रजिद्वधः.)
३५. (रावणवधः.)
३६. (रामपट्टाभिषेकः.)
३७. (लवणासुरवधराघवदीक्षा.)
३८. (कुशलवद्वारारामायणश्रवणम्.)
८१. (मायामोहावतारः)
८२. (कल्क्यवतारः.)
८३. (दुर्वासोमोक्षः.)
८४,८५. (विष्णुमाहात्म्यम्.)
८६. (अष्टाक्षरमहिमा.)
८७. (अम्बरीषाय सुदर्शनदानम्.)
८८. (एकादशीमहिम.)
८९. (ऊर्ध्वपुण्ड्रमाहात्म्यम्.)
९०. (विष्णुपञ्जरोपदेशः.)
९१. (नरकवर्णनजन्ममरणकथनम्.)
९२. ध्रुवोपाख्यानम्.
९३. (पुण्डरीकोपाख्यानम्.)
९४. (गजेन्द्रमोक्षः.)
९५. (अजामिलोपाख्यानम्.)
९६. (क्षत्रबन्धूपाख्यानम्.)
९७-९९. (पुण्यतीर्थमहिमा.)
१००. (योगतदङ्गलक्षणानि.)
१०१. (योगतदङ्गलक्षणानि.)
१०३. (अष्टाक्षरपूजाविधानम्.)
१०४. ब्रह्मप्रतिपादनम्.


**Beginning:**

येनाद्रिस्सप्तरात्रं कमलमिव करे गोपगोवृन्दगोपी-
रासारापातभीताः परतरकृपयाधारि विश्वेश्वरेण ।
उद्वीक्ष्यानन्ददृष्ट्या शतमखमदभित्स श्रिये सर्वदा मे
भूयाद्भूयोऽपि कृष्णस्सुरनरनिकरैरीड्यमानाङ्घ्रिपद्मः ॥

एकदा मुनयस्सूतं सुखासीनं हुताशयः ।
पप्रच्छुरादृता हृष्टाः श्रुत्वा भागवतामृतम् ॥
सूत सूत महाप्राज्ञ वद नो वदतां वर ।
यत्तु पृच्छाम सन्देहं त्वदुक्तेषु महामते ॥
अष्टादशपुराणानां कर्ता सत्यवतीसुतः ।
त्वयोक्तस्सर्ववेदज्ञो भारतस्यापि वै मुनिः ॥
प्रतिपाद्या भवेदेका देवता ह्येककर्तृके ।
दृश्यते मतभेदोऽत्र कथन्तदनु वर्णय ॥
प्रतिपाद्यो हरिः क्वापि शङ्करश्च चतुर्मुखः ।
रविः क्वापीति सन्देहो वर्तते हृदि सूतज ॥
कस्य प्रधानमित्येवं तद्भवान् वक्तुमर्हति ।
सर्वे चेज्जगदीशास्स्युः कथं सृष्टिः प्रवर्तते ।

* * * *

इति तेषां वचः श्रुत्वा प्रतिनन्द्य महामतिः ।
प्रत्युवाच ऋषीन् विप्राः शृणुध्वमिति सादरम् ॥
भवद्भिर्विदितं सर्वं वेदविद्भिर्महात्मभिः ।
तथापि पृष्टः प्रब्रूयां व्यासस्य वचनं यथा ॥
एक एव परो ह्यात्मा सर्वत्र प्रतिपाद्यते ।
नारायणाख्यो भगवान् कृष्णद्वैपायनोऽब्रवीत् ॥
सर्वेष्वेव पुराणेषु भारते च द्विजोत्तमाः ।
अन्येष्वपि च शास्त्रेषु भगवानेव कीर्त्यते ॥
स्वरूपाणामभेदेन रूपभेदोऽस्य कल्प्यते ।
एकस्यैवाप्रमेयस्य निरुपाधेरजस्य तु ॥
एको देवस्सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षस्सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥

* * * *

**Colophon:**

इति दशसहस्रिकायां संहितायां पुराणसङ्ग्रहे जगत्स्वरूपकथनं नाम प्रथमोऽध्यायः ॥

**End:**

श्रुत्वैतत्सकलं तस्मात्कुम्भयोनेर्महात्मनः ।
आमन्त्र्य तं समाप्याद्य तीर्थयात्रामिहागतः ॥

इत्युक्त्वा क्वणयन् वीणां प्रययौ स्वेच्छया मुनिः ।
श्रुत्वा शक्रोऽपि तत्सर्वं हृष्टोऽभूत् द्विजसत्तम ॥
य इदं शृणुयान्नित्यमाख्यानं पुण्यवर्धनम् ।
सर्वपापविनिर्मुक्तस्स्वर्गलोके महीयते ॥
वैष्णवेभ्यः पुराणेभ्यो मथित्वा नवनीतवत् ।
उद्धृत्य कथितं सर्वं सारं रामायणादपि ॥
य इदमखिलमादरेण भक्त्या पठति शृणोति च नित्यदा विमानी ।
स तु विमलमतिः प्रयाति विष्णोः परमपदं परमार्थभूतमेकम् ॥

**Colophon:**

इति पुराणसङ्ग्रहे दशसहस्रिकायां संहितायां ब्रह्मप्रतिपादनं नाम चतुरधिकशततमोऽध्यायः ॥

भगवत्स्वरूपकथनं, मत्स्यकूर्मवराहनरसिंहवामनजामदग्न्यराघवरौहिणेयवासुदेवमायामोहकल्क्यवताराः ब्राह्मणमोक्षः बलिप्रह्लादसंवादः क्षेत्रकथनमष्टाङ्गयोगलक्षणं ब्रह्मप्रतिपादनमिदं समाप्तम् ॥

---

## R. No. 2490.

**Paper.** 10¼ × 9¾ inches. Foll. 122. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Mānavikrama Anujan Kuññuṇṇi Raja of Calicut.

### उत्तररामचरितव्याख्या.

### UTTARARĀMACARITAVYĀKHYĀ.

Foll, 1*a*—121*b*. Fol. 122 is left blank.

A commentary on the drama Uttararāmacarita of Bhavabhūti, for which work see under No. 12500 of the D.C.S. MSS., Vol. XXI.

Breaks off in the seventh Act.

**Beginning:**

. . . . . रम्भेष्ववश्यानुष्ठेयस्येष्टदेवतानमस्कारस्य "गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः" इति वचनात् गुरुनमस्कारेणैव चरितार्थतां कविविषये पुनर्भारतीलक्षणाया देवताया विशेषतः प्रणन्तव्यतां चानुसन्धाय तदात्मिकां नान्दीसपर्यां सम्पादयति—

इदं गुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ।
वन्देमहि च तां वाणीममृतामात्मनः कलाम् ॥ इति ।

इदंगुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे, तां वाणीं वन्देमहि चेत्यन्वयः । इदंगुरुभ्यः इदानीन्तनेभ्यो गुरुभ्य इत्यर्थः । सुप्सुपेति समासः । पूर्वेभ्यश्चिरन्तनेभ्यो व्यासवाल्मीक्यादिभ्य इत्यर्थः । क्रियार्थेत्यादिना चतुर्थी । गुरून् प्रीणयितुमित्यर्थः । अन्यथा नमश्शब्दस्य वाको नमोवाक इति षष्ठीसमासे गुणीभूतस्य नमश्शब्दस्य निष्कृष्य सम्बन्धाभावात् । अत्र नमस्स्वस्तीत्यादिना चतुर्थी न भवति । अर्थात्समुच्चयः । वच परिभाषणे इत्यस्मात् घञ् । प्रशास्महे इच्छामः । नमोवाकं नमस्कारानभिलषाम इत्यर्थः । गुरुचरणपरिचर्यां मनसि सततं सम्भावयाम इति यावत् ।

* * * *

**Colophon:**

इति प्रथमोऽङ्कः ।

* * * *

**End:**

**Colophon:**

इति षष्ठोऽङ्कः ॥

अथ निखिलवस्तूनामुपसंहृतिरूपं निर्वहणसन्धिं वक्तुमुपक्रममाणो महाकविः अयमपश्चिमस्ते रामशिरसा पादपङ्कजस्पर्शः इत्यादिमाङ्कावसानोपक्षिप्तस्य जानकीलाभस्योपपत्तये तद्धेतुभूतदुर्यशःपरिहरणं नाट्यप्रयोगदर्शनद्वारा विधातुं रसानुरोधादङ्कमेवारभमाणः समनन्तरानीताङ्कावसाने शिशुकलहमाकर्ण्य समया इत्यत्र राजकुमारवाचकेन शिशुशब्देनैव सूचितं लक्ष्मणप्रवेशं कथयति—ततः प्रविशतीति ।

* * * *

कुतः पुनरस्य नृत्तविनोदनेनाधिकारितेत्यत्राह—राज्याश्रमेति । राज्यमेवाश्रमो राज्याश्रमः सज्जनरक्षात्मकतपोऽनुष्ठानस्थानम् । "रक्षायोगादयमपि तपः प्रत्यहं सञ्चिनोती"ति कालिदासवचनात् । तस्मिन्निवसनेऽपि । अनेन धर्माविरोधिषु अधिकारिता दर्शिता ।

The meaning of a stanza beginning अद्वैतं सुखदुःखयोः is explained in the remaining four leaves.

## R. No. 2491.

**Paper.** 10¾ × 9¼ inches. Foll. 24. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Jenneti Lakṣmīnārāyaṇa Śāstrigāru of Gunapūḍi, Bhīmavaram taluk, Kistna district.

विष्णुकल्याणमहोत्सवः.

VIṢṆUKALYĀṆAMAHŌTSAVAḤ.

Foll. 1a—23a. Foll. 23b—24 are left blank.

Gives according to the Pāñcarātrāgama the ritualistic details of the marriage festival celebrated for five days in every year of God Janārdhana of Rāmakṣētra, in Daṇḍakāraṇya and north-east of Śrīśaila.

The performance of this festival is considered efficacious in putting down difficulties of various kinds to the people of that place.

Complete.

**Beginning :**

अस्य देवदेवस्य भगवतो नारायणस्यागणितानेकदिव्यावतारस्यादिमध्यान्तरहितस्य सकलभुवनसंरक्षकस्य विचक्षणस्य सृष्टिस्थितितिरोभावानुग्रहकारकस्य श्रीमन्नारायणस्य

* * * *

श्रीशैलस्यैशान्यप्रदेशे दण्डकारण्ये बौद्धावतारे रामक्षेत्रे शालीवाहनशके चम्पकारण्यादिपुण्ययोर्मध्यदेशे

* * * *

लक्ष्मीसमेतश्रीजनार्दनस्वामिनः पञ्चाह्निकध्वजारोहणप्रत्यब्ददिव्यकल्याणमहोत्सवं सालङ्कृतकन्यादानं करिष्ये ।

शुकं भागवते व्यासं वेदे तत्त्वे च तद्गुरुम् ।
तत्पितामहमाचार्ये वन्दे श्रीकृष्णदेशिकम् ॥

अथ कर्ता आचार्यश्च मृदानयनानन्तरं मङ्गलस्नानं कृतवन्तौ भगवदालयमागत्य देवं पुरुषसूक्तेन संस्तूय, विशेषतोऽभ्यर्च्य, यागमण्टपे . . . . पीठे देवं संस्थाप्य तत्पुरतः कलशादीन् न्यस्य कल्याणमण्टपे सायन्तनसमये तदेव लग्नमित्यादि ब्रह्मघोषपूर्वकं पुण्याहं कुर्यात् । तत्रायं क्रमः—

प्राणानायम्य, शुभे मुहूर्ते अस्य देवदेवस्य भगवतः पुराणपुरुषस्य समस्तकल्याणगुणपरिपूर्णस्य

* * * *

अस्मिन् ग्रामे स्थितानां ब्राह्मणादीनां सर्वेषां चातुर्वर्ण्यानां च व्याधिचोरदुर्भिक्षानावृष्टिराजबाधादिसर्वोपद्रवशान्त्यर्थमस्य देवदेवस्य भगवतो

नारायणस्य भारद्वाजगोत्रस्य श्रीजनार्दनस्वामिनः मत्वब्दक्रियमाणपञ्चाह्निकध्वजारोहणदिव्यकल्याणमहोत्सवं कर्म करिष्यमाणस्तदङ्गं सर्वमङ्गलकारण—एकोनपञ्चाशद्विभागसहित . . . . अङ्कुरार्पणाख्यं कर्म करिष्यमाणः आदौ विष्वक्सेनस्य पूजां करिष्ये कलशाराधनं करिष्ये ।

* * * *

अस्य भगवतो देवदेवस्य भारद्वाजगोत्रस्य श्रीजनार्दनस्वामिनः पञ्चाह्निकध्वजारोहणदिव्यकल्याणमहोत्सवाङ्गत्वेन ध्वजपटासिद्ध्यर्थं ध्वजपटे सर्वदेवतावाहनं करिष्ये । तदङ्गं पताकद्वारकलशपूजां कुर्यात् । विष्वक्सेनपूजां पुण्याहं वाचयित्वा ऋत्विग्भिस्सह सर्ववाद्यसमायुक्तं सर्वालङ्कारयुक्तं श्रीकल्याणमण्टपं गत्वा ।

End:

पञ्च कुम्भान् धान्यराशौ संस्थाप्य, वारुणमन्त्रेणोदकं संपूर्य, गायत्र्याभिमन्त्र्य, प्राणानायम्य, सङ्कल्प्य श्रीलक्ष्मीनृसिंहप्रीत्यर्थं प्रातःकालषोडशोपचारपूजां करिष्ये । पुरुषसूक्तविधानेन षोडशोपचारान् कुर्यात्, मूलमन्त्रेण वा षोडशोपचारान् कुर्यादित्याह ब्रह्मा । एवं प्रकारेण चतुर्दिनेषु कृत्वा पञ्चमेऽहनि अवभृथं कुर्यादित्याह चतुराननः ॥

Colophon:

इति पञ्चरात्रप्रकरणम् ॥

---

R. No. 2492.

Paper. 10¼ × 9¼ inches. Foll. 40. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Nandula Jagannātha Śāstri of Pālakollu, Narasapur talūk, Kistna district.

जातकसारसङ्ग्रहः.

JĀTAKASĀRASAṄGRAHAḤ.

Foll. 1a—38b. Foll. 39—40 are left blank.

Same work as that described under No. 13712 of the D.C.S. MSS., Vol. XXIV.

Contains the first Paricchēda complete.

Name of the scribe of the original MS: Nandula Bucci Rāmanna. Date of transcription of the same: Friday, the 3rd of the bright fortnight of the Mārgaśira month in the year Sādhāraṇa.

R. No. 2493.

Paper. 10¾ × 9¼ inches. Foll. 320. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Mānavikrama Anujan Kuññuṇṇi Rāja of Paḍiññārekōvilagam, Calicut, Malabar district.

Bound in two volumes.

काशिकावृत्तिव्याख्या—प्रक्रियामञ्जरी.

KĀŚIKĀVṚTTIVYĀKHYĀ : PRAKRIYĀMAÑJARĪ.

Foll. 1a—318a. Foll. 318b—320 are left blank.

A commentary on the Kāśikāvṛtti, which work has been described under No. 1313 of the D.C.S. MSS., Vol. III : by Vidyāsāgara who salutes Guru Śvētagiri and God Śiva of Gōkarṇa. The commentator states that he has followed the commentary Nyāsa.

Contains from the beginning to the end of the fifth Adhyāya.

**Beginning :**

यो विश्वोऽकारवाच्यस्सकलविषयभुग्भ्रान्तितत्कारणाभ्यां
बद्धस्संस्कारमात्रप्रविरचित(त)नुस्तैजसश्चेति वाच्यः ।
प्राज्ञो ज्ञानैकबन्धुस्सुरनरसकल . . . . . . . .
. . . यस्तुरीयो विगलितशकलस्सोऽहमेवास्मि भूमा ॥
श्रीमच्चन्द्रशिखामणिर्गिरिसुताबिम्बाधरतेजोमणिः
शश्वद्विश्वविभासकामलमणिर्ब्रह्मादिचूडामणिः ।
कालव्यालविषोपशान्तिदमणिश्चिन्तामणिश्शङ्करो
जीयान्मोहविभेदवासरमणिर्गोकर्णभूषामणिः ॥
सरोजजन्मासनपद्महंसीं गिरीशकल्पद्रुमकल्पवल्लीम् ।
हरेरुरस्सागरलब्धगङ्गामुपास्महे कामपि देवतां ताम् ॥
आविरस्तु महस्तन्नो गौरीसन्ध्याघनोदितम् ।
अन्तरायतमोहन्तृ नरस्तम्बेरमाकृति ॥
आजाननिर्वाणमपि यत्प्रसादादाजानगीर्वाणगिरामपीष्टे ।
आजानगत्पूज्यतमं वरिष्ठं वन्दे मुनिं पाणिनिमादरेण ॥
अबोधपङ्काविलबोधनीरे यदीयवाचः कतकीभवन्ति ।
वन्दे मुनीन्द्रान् मुनिवृन्दवन्द्यान् श्रीमद्गुरून् श्वेतगिरीन् वरिष्ठान् ॥
न्यासकारवचःपद्मनिकरोद्गीर्णमम्बरे ।
सङ्गृह्णामि मधुमीत्या विद्यासागरषट्पदः ॥

स्ववृत्तावगौरवपरिहारार्थं गौरवोत्पादनार्थं च वृत्त्यन्तरेष्वसन्तं विशेषमशेषशब्दव्युत्पत्तिहेतुं वृत्त्यादिषु विप्रकीर्णतन्त्रस्य सारसङ्ग्रहरूपं वक्तुकामश्चिकीर्षितं प्रतिजानीते—वृत्ताविति । सूत्रार्थप्रधानो ग्रन्थो भट्टनन्पूरप्रभृतिभिर्विरचितो वृत्तिः । आक्षेपसमाधानपरो ग्रन्थो भाष्यम् । इह कात्यायनप्रणीतानां वाक्यानां पतञ्जलिप्रणीतं विवरणम् ।

* * * *

अनेन सूत्रार्थप्रधानत्वेन वृत्तित्वमुक्तम् । व्युत्पन्नानां शब्दरूपाणां सिद्धिः अस्तिता यत्र सा तथा । लक्ष्योपेतेति यावत् । काशीषु देशेषु भवा काशिका । काश्यादिभ्यष्ठञ्ञिठौ ।

* * * *

फलाभावेन वृत्तेरनारम्भमाशङ्क्यान्वर्थनामोच्चारणेन फलमाह—अथेति । आरम्भार्थोऽथशब्दः । शब्दानुशासनमधिकृतं वेदितव्यम् । अनुशिष्यन्ते संस्क्रियन्तेऽनेन शब्दा इति अनुशासनम् । शब्दानामनुशासनं शब्दानुशासनम् । साधुशब्दज्ञानं प्रयोजनमुक्तं भवति ।

* * * *

वर्णानामुपदेशः अकारादीनामुच्चारणम् । परिहरति प्रत्याहारार्थ इति । प्रत्याहारः अइउणित्यादिविशिष्टानुपूर्वीको विशिष्टानुबन्धकश्चाक्षरसमाम्नायः । प्रत्याह्रियन्ते संक्षिप्यन्ते अस्मिन् वर्णा इति तदर्थ उपदेश इत्यर्थः । अणादिसंज्ञाप्रत्याहारस्तदर्थ इति केचित् ।

* * * *

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्विद्यासागरमुनीन्द्रविरचितायां काशिकावृत्तिव्याख्यायां प्रक्रियामञ्जर्यां प्रथमस्याध्यायस्य चतुर्थः पादः ॥

**End:**

नाडीतन्त्र्योः स्वाङ्गे ।

बहुनाडिरिति । नाडीशब्दो जातिलक्षणङीषन्तः । उपसर्जनह्रस्वत्वम् । बहुतन्त्रीरिति । अवितृस्तृतन्त्रिभ्य ईः इति ईकारान्तस्तन्त्रीशब्दः । उपसर्जनह्रस्वत्वं तु न भवति स्त्रियाः प्रतिषेधो वक्तव्य इति वचनात् ।

निष्प्रवाणिभ्यश्च ।

प्रोयतेऽस्यामिति प्रवाणी । अधिकरणे ल्युट् कृत्यच इति णत्वम् ।

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्विद्यासागरमुनीन्द्रविरचितायां प्रक्रियामञ्जर्यां पञ्चमस्याध्यायस्य चतुर्थः पादः ॥

## R. No. 2494.

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 8. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Vāḍhrēvu Vīrannagāru of Pātakōta, Kotipalli, Gōdāvari district.

श्रृङ्गारचन्द्रिका.

ŚṚṄGĀRACANDRIKĀ.

Foll. 1*a*—6*a*. Foll. 6*b*—8 are left blank.

A collection of stanzas, mostly of erotic sentiment.

Incomplete.

**Beginning:**

नत्वाहं दक्षिणामूर्तिं वटमूलनिवासिनम् ।
श्रृङ्गारचन्द्रिकां वच्मि योगिचित्तं धुनोति या ॥

नेदं मुखं मृगवियुक्तशशाङ्कबिम्बं
नेमौ स्तनावमृतपूरितहेमकुम्भौ ।
नैवालकावलिरियं मदनास्त्रशाला
नैवेदमक्षियुगलं निगलं हि यूनाम् ॥

भ्रमर भ्रमता दिगन्तराले क्वचिदास्वादितमीक्षितं श्रुतं वा ।
वद सत्यमपास्य पक्षपातं यदि जातीकुसुमानुकारि पुष्पम् ॥

**End:**

घोराग्निदग्धो हृदि वल्लभो मे वसन् किमासीदिति दुःखितायाः ।
विलोचनस्यन्दिभिरश्रुपूरैः विश्वं नदीमातृकतामयासीत् ॥

---

## R. No. 2495.

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 78. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Nallān Cakravartula Narasiṁhacāryulu of Chodimella, Kistna district.

(*a*) नाडीनिर्णयः, सव्याख्यः.

NĀḌĪNIRṆAYAḤ WITH COMMENTARY.

Foll. 1*a*—8*a*.

A treatise in 27 stanzas on the science of feeling the pulse. The commentary is by Kṛṣṇasūri, son of Gōpālācārya of Sātulūri family. The colophon at the end of the commentary attributes the authorship of the text to Aśvinīdēva.

Complete.

**Beginning:**

श्रीहयग्रीवहंसो विसरतु मम मानसे सरसि ।
कलुषाणि यं हि भजतां सद्यश्शिथिलीकरिष्यन्ते ॥

(मू)—

आदौ समस्तरोगाणामष्टस्थानं परीक्षयेत् ।
रूपनाडीस्पर्शनेत्रशब्दवाङ्मूत्रजिह्व(ह्वि)काम् ॥

(व्या) लोके रोगार्तेषु विषये चिकित्सकानामौषधप्रयोगस्य रोगविशे . . . . . पूर्वकत्वात्तन्निर्णयस्यापि नाडीप्रसारभेदविषयज्ञानपूर्वकत्वात् नाडी बहुधा विलक्ष . . च्छः आदौ रो . . . . करूपाद्यष्टकपरीक्षामाह— आदौ समस्तरोगाणामिति । आदावित्यत्र हर्षसूचक आकार प्र . . . ति-वर्णादिशुद्धिः । तदुक्तं कविकण्ठपाशे—

प्रीतिमकारस्तनुते यदि न ब्रूते निषेधरूपार्थम् ।
आकारस्तु त्रि . . . . . यं क्रोधार्तिवाचको नो चेत् ॥

इति । समस्तरोगाणां समस्तेषु रोगेषु विषय इत्यर्थः ।

* * * *

(मू)—

नारीणां वामभागे च पुरुषाणां च दक्षिणे ।
करमूले पादमूले नाडी वहति दृश्यताम् ॥

(व्या) सामुद्रिकवत् वैद्यशास्त्रेऽपि स्त्रीपुरुषयोः हस्तादिभेदेन नाडीनिर्णयः कार्य इत्याह—करश्च . . . . . . . प्राण्यङ्गत्वादेकवद्भावः । तस्य मूलं कूर्परान्तःप्रदेशः । तस्मिन्नेवमेव पादमूले गुल्फयोः पूर्वभागे नाडी वहति प्रसरति । दृश्यतां चिकित्सकैः परीक्षतामित्यर्थः ।

**End:**

(मू)—

सुव्यक्तता निर्मलत्वं स्वस्थानस्थितिरेव च ।
अचञ्चलममन्दत्वं सर्वेषां शुभलक्षणम् ॥

(व्या) सुव्यक्तेति सुव्यक्तता स्फुटास्फुटत्वेन भासमानता निर्मलत्वं दोषराहित्यं स्वस्थानस्थितिः अन्यदीयस्थानमप्राप्यैव सर्वा . . नाडीनां स्वस्वस्थाने वृत्तिः अचञ्चलमित्यत्र भावप्रदाननिर्देशः च ञ्चल्या . व . अमन्दत्वं मान्द्यातिशयाभावः एतत्सर्व सर्वेषां रोगाणां शुभलक्षणं साध्यत्वरूपशोभनज्ञापकम् ।

**Colophon:**

इति श्रीसाबुर्द्धरिवंशपारावारराकासुधाकरायमाणस्य श्रीमद्गोपालाचार्यसूरेस्तनूजेन कृष्णसूरिणा विरचिता नाडीनिर्णयाख्याश्विनीदेवकृतसप्तविंशतिश्लोक्याख्या ॥

(b) वैद्यग्रन्थः, आन्ध्रटीकासहितः.

VAIDYAGRANTAH WITH TELUGU MEANING.

Foll. 8b—76a.

A treatise on medicine dealing chiefly with the preparation of medicines and with the purification of substances for medicinal purposes.

Wants the beginning and the end.

**Beginning:**

गोपुरयन्त्रलक्षणम्—

दुहनघटसमानं भाण्डवक्त्रं घटान-
स्सरसिजकलिकार्धेस्योर्ध्वसाम्येन बद्ध्वा ।
तदुपरि कुटिकादि स्थाप्य तन्मध्यरन्ध्रा-
द्द्रवति भवति यन्त्रं गोपुराख्यं बुधाख्ये ॥

लङ्घनलक्षणम्—

लङ्घनं त्रिविधं प्रोक्तं वातपित्तकफस्य च ।
औषधं तप्ततोयं स्याल्लघुभोजनमेव हि ॥
लङ्घनं तूपवासस्य लङ्घनं लघुभोजनम् ।
लङ्घनं चोष्णपानीयं लङ्घनं परमौषधम् ॥

• • • •

रसौषध याममात्रं मूलाख्यं घटिपञ्चकम् ।
नाडीचतुष्कं काषायं चूर्णाख्यं जीर्यते द्वयम् ॥
औषधं पञ्चमे देहे वातपित्तज्वरे सति ।
औषधं सप्तमे देहे श्लेष्मपित्तज्वरे सति ॥
अथ द्वन्द्वे नियुक्ते चेदौषधं नवमे दिने ।
दोषादिसन्निपातानां यथाकालं यथावधि ॥

• • • •

वातेषु खरपक्वं च पित्तेषु मृदुसंज्ञकम् ।
कफेषु मृदुपक्वं स्यादिति धन्वन्तरिस्मृतम् ।

• • • •

अथ द्रव्यशुद्धिप्रकारः—

रसशुद्धिप्रकारः ।

पारदं खल्वमध्ये तु शुद्धिं कुर्याद्भिषग्वरः ।
हरिद्राचूर्णसंयुक्तं मर्दयेत् घटिकाद्वयम् ॥

• • • •

सुवर्णभस्मक्रमः—

सुवर्णं रक्तमृत्स्ना च लिप्ता तत्पुटमाचरेत् ।
ततस्सूक्ष्मदलं कृत्वा तद्दले गाढलेपयेत् ॥
जम्बीररसहेमाक्षैः शरावयुगले क्षिपेत् ।
दलं गजपुटं कुर्यात्तद्भवेद्भस्मनिश्चयः ॥

**End:**

षड्गुणसिन्दूरम्—

हिङ्गुलोत्थरसं शुद्धं षड्गुणं गन्धकं तथा ।
काचकुप्यां विनिक्षिप्य वालुकायन्त्रपाचितम् ॥
चतुर्विंशतियामेन क्रमाग्नौ पाचयेत्ततः ।
ततः पल्लवरागं स्यात् गृहीत्वा मतिमान् भिषक् ॥
क्षयमेकादशं हन्ति पाण्डुरोगांस्तु पञ्चमम् ।
अर्शांश्च(र्शांसि) षट् प्रकाराणि ज्वरान् सौषष्टिकान् जयेत् ॥
चतुर्विंशतिपैत्त्यानि शूलान्येकविधानि च ।
षण्डत्वं वीर्यनष्टं च लिङ्गरोगान्यनेकशः ।
एते रोगा विनश्यन्ति षड्गुणा गन्धको रसः ॥

Foll. 76—77 contain some Telugu stanzas on medicine. Fol. 78 is left blank.

---

R. No. 2496.

Paper. 10¾ × 9¾ inches. Foll. 88. Lines, 20 in a page. Telugu. Good. Transcribed in 1917-18 from a MS. of M.R.Ry. Dēvarkoṇḍa Veṅkaṭarāmayyagāru, Kapilēśvarapuram, Gōdāvari district.

अपरकृष्णीयम्.

APARAKṚṢṆĪYAM.

Foll. 1a—86a. Fol. 86b is left blank. Foll. 87—88 give the table of contents of the work.

Same work as that described under No. 3523 of the D.C.S. MSS., Vol. VII. The correctness of the colophon at the end is not apparent. Name of the scribe of the original MS: Gadda Vēṅkaṭaśēṣudu. Date of copying of the same: 6th day of the dark fortnight of the Bhādrapada month in the year Saumya.

Treats of the following topics:—

१. आनन्दहोमः.
२. काम्यवृषोत्सर्जनम्.
३. एकोद्दिष्टप्रयोगः.
४. एकोद्दिष्टे ब्राह्मणाभावे विधानम्.
५. गौणकल्पविधानम्.
६. रुद्रगणनामानि.
७. मासिकपरिगणनम्.
८. नवश्राद्धसङ्कल्पः.
९. मुख्यसपिण्डीकरणकालः.
१०. आद्यैकोद्दिष्टेषु दशनियमवर्जनम्.
११. षोडशैकोद्दिष्टानां क्रमशः नामानि.
१२. रात्र्यां दहननिषेधः.
१३. कर्तृनियमः.
१४. अविभक्तद्रव्येण ज्येष्ठकर्तृकम्.
१५. नानाश्राद्धकालः.
१६. उदकुम्भादिश्राद्धवर्जनकालः.
१७. आब्दिकादितिथिनिर्णयः.
१८. एकोद्दिष्टस्य.
१९. एकोद्दिष्टादिविभ्राः.
२०. मातुरग्रे प्रमितायाम्.
२१. आमश्राद्धप्रसक्तेरन्येन कार्याणि.
२२. त्रैपक्षिकम्.
२३. त्रैपक्षिकादिनिषेधः.
२४. पानानां निषिद्धकालः.
२५. सपिण्डीकरणकालः.
२६. आहिताग्नेश्चेत् व्युत्क्रमसाविण्ड्यम्.
२७ मातृसापिण्डीकरणे विशेषः.
२८. अनुयायिनस्सापिण्ड्यम्.
२९. अग्नौ करणम्.
३०. ज्येष्ठः अग्निमान्.
३१. पाकारम्भप्रकारः.
३२. श्राद्धकर्तृभोक्तृनियमः.
३३. नामग्रहणकालः.
३४. ब्राह्मणसङ्ख्याश्राद्धविस्तरनिषेधः.
३५. वैश्वदेवावश्यकं श्राद्धभोक्तृब्राह्मणलक्षणम्.
३६. श्राद्धयोग्यपत्राणि.
आसनानि—
३७. भोजनपात्राणां च निषेधः.
३८. आपस्तम्बशाखिनां सपिण्डीकरणं श्राद्धद्वयम्.
पवित्रलक्षणम्.
३९. भोजनसमये एकवस्त्रनिषेधः.
४०. जयादिरहितकर्म.
४१. हस्तदत्तनिषेधः.
४२. भोक्तृनिषेधद्रव्यम्.
४३. अर्घ्यसंयोगः. पिण्डसंसर्गः.
४४. गौणसपिण्डीकरणम्.
४५. नाम्ना पिण्डं देयम्.
४६. पितृसापिण्ड्यसङ्कल्पः.

४७. अनुगमनायास्सपिण्डीकरणम्.
४८. स्त्रीणामनुगतिः अग्निप्रवेशः.
४९. अनुगमनविधिः.
५०. पत्न्यै मध्यमपिण्डप्राशनम्.
५१. सोदकुम्भम्.
५२. अकृतसपिण्डीकरणविषयः.
५३. नित्यश्राद्धे नियमवर्जनम्.
५४. संवत्सरविमोकः.
५५. श्राद्धद्वयसंपातः.
५६. श्राद्धयुग्मम्.
५७. सङ्कल्पश्राद्धम्.
५८. पारणभिक्षा.
५९. महालयः.
६०. महालयवर्ज्यम्.
६१. शस्त्रहतयज्ञाः.
६२. तर्पणपितावाहनक्रमः.
६३. अलभ्ययोगाः.
६४. मायाव्यतीपातः.

**Beginning**:

अत्रापि पूर्ववत्त्यागं कृत्वा, सुक्स्रुवावग्नौ प्रहृत्य परिषिच्य, अजोऽस्यजास्मदघाद्द्वेषाऽशीति अजं घासं प्राश्नीयात् अयं विन्ध्यस्योत्तरवासिनां विषयः। क्षत्रियादिविषयं वा। यवोऽसि यवयास्मद्या—द्वेषांसीति यवोदनं प्राश्नाति। सर्वे देशवासिनः त्रैवर्णिका यवोदनमेव। अथवा पक्त्वावश्यं ज्ञातयः प्राश्नन्ति। कर्ता सपिण्डश्चेद्यवोदनं तैस्सह नि न यजुषा प्राश्नाति। सपिण्डश्चेदध्वर्युः प्राश्नीयात्। अत्रैकादशेऽहनि नवश्राद्धं दत्वा स्वस्त्ययनं कृत्वा वृषोत्सर्जनं कुर्यात्।

* * * *

अथ मतान्तरोक्तगौणकल्पो लिख्यते—

मुख्ये विद्यमाने गौणस्य किं प्रयोजनमित्यत आह—

कल्पसूत्रकारिकाकारो मुख्यकल्पो मुनीरितः।
मतान्तरेण केनापि गौणकल्पोऽथ कल्पितः॥ इति॥

किंच—

श्रौतस्मार्तप्रयोगेषु मुख्यगौणौ प्रकीर्तितौ।
मुख्यं कर्तुमशक्तानां गौणवृत्तिरुदाहृता॥

यथा—

मुख्यो गौणश्च शास्त्रार्थः श्रौते स्मार्ते च कर्मणि।
मुख्यकर्मण्यशक्तानां गौण एव विधीयते॥ इति॥

वचनबलान्मुख्यगौणयोः शास्त्रयोरसमानधर्मत्वेनापि समानवत्तदुभयमादरणीयम्। तस्मान्मुख्यमुक्त्वा गौणमप्युच्यते। आद्यमासिकप्रयोगः—

प्रयोगचन्द्रिकायाम्—अथाद्यमासिकमेकोद्दिष्टेन कुर्यात्तत्रायं प्रयोगः ।

स्वाम्यागमनपर्यन्तं . . . . . . ।

**End :**

भर्त्रागमनपर्यन्तं न कुर्यादौर्ध्वदेहिकम् ॥

अथ . . . वसुपत्वं भर्तुस्तस्यास्त्वनुत्तरम् ।

पतिना सह सापिण्ड्यविधिरेष प्रशस्य(ते) ॥

कुर्युश्चेन्मृतभर्तृका यदि मृता पुत्रा स्वभर्त्रैव ता

सापिण्ड्यं विधवा मृता . . . . . . . ।

**Colophon :**

अपरकृष्णीयं समाप्तम् ॥

---

R. No. **2497.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 40. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Drōṇamrāju Venkaṭācalapati Rao gāru of Pūlla, Kistna district.

उपनिषत्सारसङ्ग्रहः, सव्याख्यः.

UPANIṢATSĀRASAṄGRAHAḤ WITH COMMENTARY.

Foll. 1*a*—39*b*. Fol. 40*a* contains the name of the owner of the MS. from which this was copied. Fol. 40*b* is left blank.

Same work as that described under R. No. 2182 ante.

---

R. No. **2498.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 42. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Ampalakot Karuṇākara Menon, Chālapuram, Calicut.

औमापतम्.

AUMĀPATAM.

Foll. 1*a*—41*b*. Fol. 42*a* contains the name of the owner of the MS. from which this was copied. Fol. 42*b* is left blank.

A treatise on music, vocal and instrumental, Tāla, dancing, etc., as revealed by Īśvara to Pārvatī.

Complete.

Treats of the following subjects:—

१. नाददेहोत्पत्तिः.
२. ग्रामप्रस्तारलक्षणम्.
३. जीवजातिप्रस्तारः.
४. जातिप्रस्तारः.
५. स्वरनामप्रस्तारः.
६. स्वराधिकारः.
७. श्रुतिप्रस्तारः.
८. मूर्च्छनाक्रमः.
९. मूर्च्छनागेयप्रकरणम्.
१०. मूर्च्छनामण्डललक्षणम्.
११. शुद्धरागलक्षणम्.
१२. रागप्रस्तारः.
१३. रूपलक्षणम्.
१४. मठिलक्षणम्.
१५. कूर्मरूपादिध्रुवालक्षणम्.
१६. देवलोकध्रुवालक्षणम्.
१७. ध्रुवालक्षणम्.
१८. त्रिपदालक्षणम्.
१९. अड्डुताललक्षणम्.
२०. सुडादिगीतलक्षणम्.
२१. वेणुलक्षणम्.
२२. वीणालक्षणम्.
२३. मातृकादिप्रबन्धः.
२४. चश्चत्पुटादिशब्दतालाध्यायः.
२५. मेरुप्रस्तारलक्षणम्.
२६. षोडशकोष्ठमेरुप्रस्तारः.
२७. मार्गप्रसादशुद्धप्रसादलक्षणम्.
२८. चक्रादिपञ्चतालप्रस्तारः.
२९. ताललक्षणम्.
३०. मद्दललक्षणम्.
३१. आवुनादिलक्षणम्.
३२. अष्टविधनृत्यकथनम्.
३३. शिरोभेदलक्षणम्.
३४. अङ्गाभिनयलक्षणम्.
३५. हस्तभेदलक्षणम्.
३६. कुण्डलिशब्दप्रबन्धः.
३७. रसभावलक्षणम्.
३८. प्रबन्धभेदः.

**Beginning:**

प्रणिपत्य महेशानी शम्भुमासीनमन्तिके ।
पप्रच्छ तत्त्वतो ब्रूहि नादांस्त्वद्रूपसंभवान् ॥

ईश्वर उवाच—

भूतोत्पत्तिं प्रवक्ष्यामि देहोत्पत्तिं च पार्वति ।
विना तयोः परिज्ञानं सम्यक् ज्ञानं न बुध्यते ॥
महाप्रलयकालेऽपि सर्वभूतापहारिणि ।
आकाशनादयोर्नास्ति सूक्ष्मयोः क्षयसङ्गमः ॥

कावेव भुवनस्यास्य कारणं सकलस्य च ।
बाह्याभ्यन्तरयोर्देवि नाद उत्पत्तिकारणम् ॥
यत्र नादस्य संभूतिस्तत्र तालो विजृम्भते ।
नादात्मकमिदं देवि सर्वं तालमयं जगत् ॥
आश्रितश्रितमाकाशस्तत्सङ्घट्ट[न]समुद्भवः ।
सङ्घट्टघटितस्तालस्तस्मादाकाशभूतजः ॥
ईश्वरं संश्रितो वायुस्तत्संयोगसमुद्भवः ।
हरिनामा समुत्पन्नस्तालोऽयं वायुभूतजः ॥
अग्निं समाश्रितो रुद्रस्तत्सङ्घात्पावकेश्वरम् ।
तालस्तद्भूतनाम्नासौ जातिरित्यभिधीयते ॥
अम्भो नारायणं प्राप्तं तयोस्संसर्गसंभवः ।
महोद्भव इति ख्यातस्तालो यज्जलदैवतः ॥
धातारमाश्रिता धात्री तन्मेऽद्यावसमुद्भवः ।
प्रख्यातनामा भुवने तालोऽयं कमलोदरः ॥
महच्छरीरमापन्नमेतैस्तालैश्च पञ्चभिः ।
मूलादुर्व्यान्तरुव्यस्तो द्विसप्ततिसहस्रधा ॥

* * * *

ग्रामाज्जातिस्वरस्तस्याः स्वरेभ्यः श्रुतिसंभवः ।
श्रुतिभ्यो मूर्च्छनास्ताभ्यस्तानो रागोदयस्ततः ॥
शब्दकालाश्रयस्तालः स्वरतालाश्रया श्रुतिः ।
ग्रामस्य जातिस्वरयोः श्रुतिमूर्च्छनयोरपि ॥
तथा तानस्य रागस्य देवि मूलं स्वरस्स्मृतः ।
प्रसूने गन्धवल्लभा श्रुतयस्स्वरमण्डले ॥
विवेक्तुं नैव शक्यन्ते देवैः किमुत मानुषैः ।
स्वरश्रुतिविवेकं तु को जानाति मया विना ॥

* * * *

**Colophon:**

इत्यौमापते गीतशास्त्रे नाददेहोत्पत्तिः प्रथमोऽध्यायः ॥

**End:**

इति गणप्रस्तारः ।

मङ्गलकौशिकी—पपापमापपासारीगापागाधासासनीनिधापमागरिमाममगारि ।

वेलवल्ली—रिरिससरिरिगमगरीरिगमगरीरिमामपपममगारिधससससरिमपाधमपधागागम ।

मालवश्री—सानीधाससादीधानीसनिधपमगरिसरी ।

**Colophon:**

उमापतीयं समाप्तम् ॥

---

R. No. **2499.**

Paper. 10¾ × 9¼ inches. Foll. 88. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of the Rāja of Chirakkal, Malabar district.

सरस्वतीकण्ठाभरणव्याख्या.

SARASVATĪKAṆṬHĀBHARAṆAVYĀKHYĀ.

A commentary on the Sarasvatīkaṇṭhābharaṇa of Bhōjarāja, which work is described under No. 12962 of the D.C.S. MSS., Vol. XXII: by Bhaṭṭanarasiṁha.

Breaks off in the fifth Paricchēda, the subjects treated of being—

१. काव्यगुणदोषकथनम्.
२. शब्दालङ्कारकथनम्.
३. अर्थालङ्कारकथनम्.
४. उभयालङ्कारकथनम्.
५. रसयोगस्वरूपकथनम्.

**Beginning:**

हरेरम्बुरुहोद्भूत(द्भूतैः)कीर्णं केसररेणुभिः ।
भुवनोत्पत्तिकेदारं तं वन्दे नाभिपल्वलम् ॥
भोजक्षितिपतिरचितं कण्ठाभरणं सरस्वत्याः ।
चष्टे भट्टनृसिंहः . . . . . . . ॥

आरिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थं कृतमभिमताम्बु . . . . . . . . . ध्वनिरनक्षरश्शब्दः । अक्षरात्मको वर्णः वाचकत्वशक्त्युपहितो वर्णाकारः पदम् । . . . . . योग्यतोपेतः पदसमभिव्याहारो वाक्यम् । तदिदमास्पदानामाश्रयाणामभिव्यक्तिस्थानानां चतुष्टयं यस्यास्तामुपास्महे इति केचित् ।

* * * *

उक्तं च हरिणा—

स्वरूपज्योतिरेवान्तस्सूक्ष्मा वागनपायिनी ।
अविभागात्तु पश्यन्ती मध्यमास[इत्ति]निबन्धना ॥
पदवर्णात्मिका सैव व्यवहाराय कल्पते ॥ इति ।

अथ श्रोतृप्रवृत्त्यर्थं विषयप्रयोजनसम्बन्धान् दर्शयति—निर्दोषमिति । काव्ये हेयानां दोषाणामुपादेयानां च गुणालङ्काररसानां लक्षणमस्य प्रबन्धस्य विषयः । तल्लक्षणयुक्तकाव्यपारम्पर्येण फलम् । सम्बन्धलक्षणयोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धः । लक्षणफलयोश्च हेतुहेतुमद्भावः इति । हेयाः काव्य इत्यत्र हेय इत्यनेनैव दोषसामान्यस्य सहृदयोद्वेजकत्वं सूचितम् ।

* * * *

Colophon:

इति भट्टनरसिंहकृतायां सरस्वतीकण्ठाभरणव्याख्यायां प्रथमः परिच्छेदः ॥

Colophon:

इति श्रीभट्टनरसिंहविरचितायां सरस्वतीकण्ठाभरणव्याख्यायां चतुर्थः परिच्छेदः ॥

एवमलङ्कारयोगमुक्त्वा रसावियोगं पदं रसस्वरूपं तदुपयोगं च तावदाह—रस इति । . . . . रस्यते यैरनुकूलवेदनीयतया दुःखमपि सुखत्वेनाभिमन्यते येन रसिकैरलङ्क्रियते येन शृङ्गमुच्छ्रयो रीयते स खलु तादृशोऽस्ति ।

* * * *

अतर्कितागतदृष्टे वधूर्नतामरिगुरुपुरतः खिद्यते गलितेभ्यो हर्षविदलद्भ्यो वलयेभ्यः । रणेति । रमित्वा पदं विगतो यदोपगूहितुं प्रतिनिवृत्तः अहं प्रोषितपतिका तत्क्षणं संवासीवहो तवहिअस भविष्यत्पथिकस्य जाया अप्रश्नजीवितधारणा.

---

## R. No. 2500.

Paper. 10¾ × 9¼ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1917–18 from a MS. of Śrī Nilambūr Kōvilagam Raja of Malabar.

## त्रिपुराविंशतिः, सव्याख्या.

## TRIPURĀVIMŚATIḤ WITH COMMENTARY.

Foll. 1*a*–27*a*. Fol. 27*b* contains the name of the owner of the MS. from which this was copied. Fol. 28 is left blank.

A hymn of 20 stanzas in praise of the Goddess Tripurā: by Laghubhaṭṭāraka. The commentator is Rāghavānanda.

Complete.

**Beginning:**

विश्वातीतचिदेकविग्रहवती विश्वात्मिकापीहया
भाति ध्वस्तभिदात्मनैस्सुकृतिभिर्या शश्वदासेव्यते ।
विश्वासेन हृदाहमित्यवतु सा संसारदुःखान्वितान्
अन्यत्राशरणान् गृहीतचरणानस्मान्महेशप्रिया ॥

(व्या)—श्रीमल्लघुभट्टारकः स्वयं निर्व्याजसमाराधितगुरुवरचरणकटाक्षवीक्षणक्षणलब्धपरशक्तिपातापरनामधेयः परसंविदात्मैक्यबोधसिद्धपरसंविदात्मभावः प्रक्षीणाशेषदोषपाशपटलः प्रादुर्भूतपरमनिर्वृतिः परेषामप्यनया परदेवतातत्त्वविभूतिविभाविता[न]विशेषप्रकाशिन्या स्तुत्या परसंविद्भावो भूयादिति तदज्ञानाज्जन्मादिमरणान्तदुःखसागरे निमग्नानां जनानामात्म(द)ष्टान्तेनावलोक्यानुकम्पाकुलहृदयस्तेषामाशिषमाशासानः स्तुतिं प्रस्तौति ।

(मू)—

ऐन्द्रस्येव शरासनस्य दधती मध्येललाटं प्रभां
शौक्लीं कान्तिमनुष्णगोरिव शिरस्यातन्वती सर्वतः ।
एषासौ त्रिपुरा हृदि द्युतिरिवोष्णांशोस्सदाहस्थिता
च्छिन्द्यादस्सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी ॥

(व्या)—ऐन्द्रस्येवेति । आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति प्रथमपठिते आशीर्वादे इहादावौचित्यसरणिमनुसरति । वस्तुनिर्देशः तच्छेषतयैव क्रियते । न चास्य स्तोत्ररत्नस्य मन्त्रदेवतारूपो विषयश्च प्रकाश्यते । आशीर्वादेन प्रयोजनं च ।

* * * *

सर्वाधिकारत्वेनास्य स्तोत्रतन्त्रस्यात्यन्तगुह्यत्वं भूरिफलत्वं च भागीरथीभारत्यादिप्रवाहादिवदाविष्कृतं भवति ।

* * * *

यस्तु नात्महन्ता भवति एतच्च पूर्वसूरिभिः सङ्क्षेपविस्तराभ्यां भूयशो विवृतमपि स्वशुद्धपद्धतिमध्यासीनेन राघवानन्दनाम्ना मुनिमुख्येन लोकनिषेवितमपि भागीरथीभारत्याद्यमिदानीन्तनैर्यथा स्वशुद्धये निषेव्यते तथा सङ्क्षेपविस्तराभ्यां यथाशक्ति विमृश्यते ।

* * * *

स्तोत्रस्यास्य त्रिपुरासंविद्विषयत्वेन स्वयं मन्त्रमयत्वेन च सद्भिरभ्यसनीयत्वख्यापकः एकविंशः । गुरुदेवताप्रसादबलेनैवाल्पश्रुतादप्यस्मत्तो बुद्धिपूर्वं झटिति निर्भयमाविर्भूतत्वादेतदागमवत् स्वतः प्रमाणत्वेन ग्राह्यं सद्भिरितीत्थं समर्थ्यते । एष स्तोत्रार्थसर्वस्वसंक्षेपः ।

**End:**

(मू)—

सावद्यं निरवद्यमस्तु यदि वा किं वानया चिन्तया
स्तोत्रं नूनमिदं पठिष्यति जनो यस्यास्ति भक्तिस्त्वयि ।
सञ्चिन्त्यापि लघुत्वमात्मनि इदं सञ्जायमानं हठात्
त्वद्भक्त्या मुखरीकृतेन रचितं यस्मान्मयापि ध्रुवम् ॥

(व्या)—

सावद्यं निरवद्यमिति । भैरवपत्नि त्रिपुरे इति सम्बोधनमत्रापि ग्राह्यम् । इदं सावद्यं सदोषं यदि वा निर्दोषमस्तु ।

* * * *

स जन इदं स्तोत्रं पठिष्यति नूनं निश्चितमेतत् । तदपि कुतः । यस्मादात्मनि मयि भवत्याः स्तोत्रमन्त्रवचनोद्यते । अतो हेतोः सञ्जायमानशक्त्यार्थकरणोद्यमात्तदेव ।

**Colophon:**

इति विंशतिव्याख्यानं समाप्तम् ॥

---

R. No. 2501.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 56. Lines, 20 in a page. Telugu and Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Mallampalli Mallikārjuna Śāstri of Masulipatam, Kistna district.

कुमाराभ्युदयचम्पूः.

**KUMĀRĀBHYUDAYACAMPŪḤ.**

A literary composition in prose and verse describing the boyhood of God Subrahmanya, the destruction of Tārakāsura, and the marriage of Valli with the former. The name of the author is not given.

Complete in three Stabakas.

**Beginning :**

श्रीगौर्यालोकसाकूतदरहासप्रभाङ्कुराः ।
जयन्तु दक्षिणामूर्तेर्मेधाविद्याप्रदायिनः ॥
श्रीशादित्रिदशेश्वरैस्त्रिभुवनं त्रातुं भयात्तारक-
क्रव्यान्मुख्यभरात्पराकृतिधरस्संप्रार्थयद्भिर्वृतः ।
आयान्तं सममात्मधामसमया गौर्या सुतेक्षोत्कया
चन्द्रं चन्द्रिकयेव दृक्सुभगया पश्यन्कुमारश्शिवम् ॥
तेजोभिर्वपुषस्सहस्रदिनकृत्प्रस्फाररोचिःपुष-
स्सर्वाशाः परिभासयन्तमधिकत्वौपम्यदूरेतरम् ।
धामैतत्किमिति प्रसारि परितस्सत्रासचित्रं जनै-
रुत्प्रेक्षा सह निर्निमेषनयनाम्भोजद्वयैरीक्षितम् ॥

* * * *

अथ कमनीयरुचिगणरत्नसानुग्रहतारकतया सुमेरुरिवानन्तमणिप्रभाति-
रोचिकनकविलसदभ्रङ्कतया विन्ध्याचल इव

* * * *

यो महोक्षस्तं वाहनवरमारूढे सकलजगदवनादिकृत्यप्रौढे सर्वमङ्गला-
समेते तस्मिञ्छिवे नेदिष्ठे सति धात्रीणां बहुलानां कराङ्गुलीरवलम्ब्य बहुला
संसत्येव षोढाभिन्नो गूढात्मा

* * * *

सौजन्यधन्यतमेन चाकारेण सविधं विविधं चरन् लीलयागण्यलावण्य-
सुकुमारः कुमारः पित्रोश्शिवयोस्तोषं पुपोष । ततः

उत्सङ्गदेशतो भर्तुरवतीर्य महेश्वरी ।
सुतप्रेम्णालिलिङ्गैकव्यामेनोमा षडर्भकान् ॥
द्विषड्बाहुः षडास्योऽभूद् द्विपादेकतनुस्ततः ।
बभावेकोऽर्भकस्सोऽब्दो मासत्वंयनभाग्यथा ॥
एकां तनुं पुनरुपेत्य गुहं वसन्त-
मेकां तनुं नतनयप्रियतातिरेकात् ।

साश्चर्यमोदहृदया सदया महिम्ना
चाघ्राय मूर्ध्नि गिरिजा सुतमालिलिङ्ग ॥
* * * *

**Colophon:**

इति प्रथमस्तबकः ।

**End:**

गिरिशो निजावासं कैलासमभ्येत्य भङ्गमङ्गललक्षणालङ्कृतरत्नखचितदिव्यावरोधे महामणिसौधे देवमुनिगणादित्तनाथमणिमयं महापीठमयमलञ्चकार । ततः ।

मघवदुहितृयुक्तः शम्भुसूनुः कुमारः
सदसि सकलदेवैर्भासुरायां महार्थैः ।
दिवि शरदमलायां रोहिणीयोगभाजो
नयनसुभगमूर्तेः प्राप चन्द्रस्य लक्ष्मीम् ॥

**Colophon:**

इति श्री . . . . . . तृतीयस्तबकः ॥

---

R. No. **2502.**

**Paper.** 10¼ × 9¾ inches. Foll. 78. Lines, 20 in a page. **Dēvanāgari.** Good.

Transcribed in 1917–18 from a MS. of M.R.Ry. Mānavikrama Anujan Kuññuṇṇi Rāja of Padiññārekōvilagam, Calicut.

Foll. 64—65 are left blank.

**पाणिनिसूत्रम् —सवृत्ति.**

PĀṆINISŪTRAM WITH VṚTTI.

The grammatical Sūtras of Pāṇini (Aṣṭādhyāyī) followed by a brief commentary.

Breaks off in the fourth Pāda of the second Adhyāya and wants the beginning and the end in the first Pāda of the third Adhyāya.

**Beginning:**

प्रणम्य साम्बं गिरिशं . . . द्वैपायनं द्वावपि भारती च ।
तं पाणिनिं वृत्तिकृतं च मूर्ध्ना सङ्क्षिप्य सम्यक् विलिखामि वृत्तिम् ॥

अथ किमर्थो वर्णानामुपदेशः । प्रत्याहारार्थम् । प्रत्याहारो लाघवेन शास्त्रप्रवृत्त्यर्थः ।

अइउण् ।

अइउ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवत्येकेनोरण् रपर इत्यकारेण ।

ऋलृक् ।

ऋलृ इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते ककारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं त्रिभिः । अकस्सवर्णे दीर्घ इत्यकारेण, इको यणचीतीकारेण, उगितश्चेत्युकारेण ।

* * * *

एकस्मान्ङञणवटा द्वाभ्यां षश्त्रिभ्य एव कणमाः स्युः ।
ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यश्शलौ षड्भ्यः ॥

वृद्धिरादैच् ।

वृद्धिशब्दः संज्ञात्वेन विधीयते प्रत्येकमादैचां वर्णानाम् । आश्वलायनः, औपगवः, शालीयः । वृद्धिप्रदेशा मृजेर्वृद्धिरित्येवमादयः ।

अदेङ् गुणः ।

गुणशब्दः संज्ञात्वेन विधीयते प्रत्येकमदेङां वर्णानाम् । तरिता, भवन्ति । गुणप्रदेशो मिदेर्गुण इत्यादि ।

* * * *

Colophon:

इति प्रथमस्याध्यायस्य प्रथमः पादः ॥

* * * *

Colophon:

इति द्वितीयस्याध्यायस्य तृतीयः पादः ॥

द्विगुरेकवचनम् ।

द्विगुस्समासः एकवचनं भवति । द्विग्वर्थ एकवद्भवति । पञ्चपूली । द्विग्वर्थस्यैकत्वादनुप्रयोगेष्वेकवचनं भवति । पञ्चपूलीयं शोभनेति ।

End:

देवयज्वा । आपृच्छ्यः । प्रतिषीव्यः । ब्रह्मवाद्यः । भाव्यः । स्ताव्यः । उपचाय्यपृडम् । हिरण्य इति वक्तव्यम् । हिरण्यादन्यत्रोपचेयपृडमेव ।

---

R. No. 2503.

Paper. 10¼ × 9¾ inches. Foll. 162 Lines, 20 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Tiru Śrinivāsavarada Tātācāriyar of Villiyambākkam, Chingleput district.

नारदीयसंहिता.

NĀRADĪYASAMHITĀ.

Foll. 1a—160b. Fol. 161 gives the contents of the work. Fol. 162 is left blank.

This forms one of the Saṁhitās of the Pāñcarātrāgama and herein Bhṛgu is made to relate to Atri what Nārada taught to Gautama.

Deals with the following subjects in 30 Adhyāyas :—

१. प्रस्तावनाध्यायः.
२. आराधनविधानम्.
३. चतुर्मूर्तिलक्षणविधानम्.
४. द्वादशमूर्तिलक्षणविधानम्.
५. मत्स्यादिमूर्तिलक्षणविधानम्.
६. मुद्रालक्षणम्.
७. दीक्षाविधानम्.
८. मण्डललक्षणविधानम्.
९. दीक्षालक्षणविधानम्.
१०. अभिषेकविधानम्.
११. समाचारविधिः.
१२. हविर्विधानम्.
१३. प्रतिमास्वरूपविधानम् incomplete.
१४. प्रासादलक्षणविधानम् wants beginning.
१५. प्रतिमाप्रतिष्ठालक्षणम्.
१६. मण्टपादिप्रतिष्ठास्थापनम्.
१७. जीर्णसंस्कारविधिः.
१८. ध्वजारोहणविधिः.
१९. महोत्सवविधिः.
२०. स्नपनविधिः.
२१. पुष्पादिविधानम्.
२२. प्रतिनिधिविधानम्.
२३. पवित्रारोहणविधिः.
२४. फलभेदविधिः.
२५. प्रायश्चित्तविधिः.
२६. महाहविर्विधानम्.
२७. यागोपकरणविधिः.
२८. सर्वदेवतास्थापनविधिः.
२९. निषेकादिश्मशानान्तविधिः.
३०. कालाध्यायः.

**Beginning:**

आश्रमे स्वे समासीनं भृगुं मुनिवरैर्वृतम् ।
विष्णुभक्तिपरैश्शान्तं वासुदेवैकयाजिनम् ॥
अत्रिरागत्य पप्रच्छ ज्ञानं भागवतं शुभम् ।

अत्रिः—

तपसा महतोग्रेण तप्तोऽहं नैमिशेऽनिशम् ।
बहून्यब्दसहस्राणि भवबन्धविमुक्तये ॥
तदा तत्राभवद्वाणी वैष्णवी सत्यवादिनी ।
तपसानेन चोग्रेण किं यज्ञैस्तीर्थसेवया ॥
तपोज्ञाने(ते)परे तत्त्वे वासुदेवपरो भव ।

पञ्चरात्रविधानेन सार्थकेन तु कर्मणा ।
भृगुं हि गत्वा पृच्छ त्वं ज्ञानं भागवतं शुभम् ॥

भृगुः—

गौतमेन पुरा पृष्टो नारदो मुनिपुङ्गवः ।
संहिता दुर्लभा या तु भुक्तिमुक्तिफलप्रदा ॥
मुनीनामाश्रमावासे गौतमे मुनिभिर्वृते ।
कालेऽस्मिन्नारदः स्वर्गात् ब्रह्मपुत्रो महामुनिः ॥
नियोगाद्देवदेवस्य विष्णोरद्भुतकर्मणः ।
आजगामाश्रमपदं गौतमस्य महात्मनः ॥

* * *

नारदः—

त्वदन्यं च न पश्यामि पात्रं ज्ञानस्य सुव्रत ।
वैष्णवोऽसि महाभाग त्वयाप्तं च तपः परम् ॥
एवमेव महाविष्णौ भवतो ज्ञानसिद्धये ।
तस्माद्ददामि ते ज्ञानं पञ्चरात्राख्यमुत्तमम् ॥
दिव्यमन्त्रक्रियोपेतं वेदगर्भं च शाश्वतम् ।
लब्धं मया पुरा विष्णोर्वासुदेवात्सनातनात् ॥
अनाख्येयमिदं ज्ञानं यस्य दीक्षा न विद्यते ।

गौतमः—

आचक्ष्व मम देवर्षे दीक्षां तां वैष्णवीं पराम् ।
यस्यां कृतायां ज्ञानेऽस्मिन्नधिकारश्च जायते ॥
एवमुक्तस्तु भगवान् नारदो मुनिपुङ्गवः ।
ततो विधाय विधिना दीक्षां पापप्रणाशिनीम् ॥
पूजितो विधिना तेन वक्तुं समुपचक्रमे ।
शृणु गौतम वक्ष्यामि ज्ञानं परममद्भुतम् ॥
ज्ञानकर्मसमायुक्तं कैवल्यैकफलं महत् ।
त्रैवर्गिकसमायुक्तं वर्णाश्रमसमन्वितम् ॥
अनेकसिद्धिसंयुक्तं परमार्थविनिर्णयम् ।
संहारसृष्टिसंयुक्तं यागभेदसमन्वितम् ॥
इदं तन्त्रमशेषेण श्रोतुं वक्तुं न शक्यते ।
तस्मात्सारमुपोद्धृत्य वक्ष्यामि हितकाम्यया ॥

श्रोतव्यं यतचित्तेन विधिना तत्त्वयाधुना ।
महत्येव जगत्यस्मिन् निरालोकेऽतिगह्वरे ॥
निर्मर्यादे निराभासे निष्प्रपञ्चे निरालये ।
* * * *
स वासुदेवो भगवान् श्वेतवर्णश्चतुष्कलः ।
चतुर्बाहुस्स्वयं भूत्वा संक्षिप्यात्मतनुं पुनः ॥
आकृष्य तु स्वकाद्देहात् सङ्कर्षणमजीजनत् ।
स सङ्कृष्टशरीरत्वात्सङ्कर्षण इति स्मृतः ॥
* * * *

**Colophon:**

इति श्रीपाञ्चरात्रे नारदीयसंहितायां प्रस्तावनाध्यायो नाम प्रथमोऽध्यायः ॥

गौतमः—

आराधनं सुरेशस्य वासुदेवस्य मे वद ।
तथान्येषां च देवानां संक . . नां समासतः ॥
येन सिद्धिं व्रजेन्मन्त्रे दीक्षितो वैष्णवो नरः ।
आराधनं प्रवक्ष्यामि निस्सन्दिग्धमपि स्मृतम् ॥
अधिकारत्वमापन्नो दीक्षासमयपूर्वकम् ।
नित्यमाराधयेद्येन विधिना तन्निबोध मे ॥
स्नानाद्यं पूर्वयजनं पूर्वं तत्कथयामि ते ।
मृत्सिक्ताङ्गोमयं तोय्यं तिलपुष्पकुशाक्षतान् ॥
यथाकामन्तु सङ्गृह्य व्रजेद्धस्त्रादिकं तदा ।
कूपस्नानं न कुर्वीत नद्यादौ स्नानमाचरेत् ॥

**End:**

एतत्पवित्रं पापघ्नमेतत्पुण्यतमं महत् ।
सर्वदुःखप्रशमनं सुखदं पापनाशनम् ॥
तन्त्रेणानेन वं . . . सर्वान् कामानवाप्नुयात
यस्मिन्ननेन मार्गेण पूजितो विष्णुरव्ययः ॥
तद्राजा विजयी भूत्वा सार्वभौमो भविष्यति ।
द्विजास्सर्वे तु सुखिनस्सस्यपूर्णा वसुन्धरा ।
उपद्रवैश्च रहिता वर्धते च दिनेदिने ॥

अनेन नारदीयेन तन्त्रेण द्विजसत्तम ।
पूजयेद्देवदेवेशं पञ्चरात्रेण सिद्धये ॥
एवमुक्त्वात्रये(?) सर्वं भृगुरन्तरधीयत ।
अत्रिस्तदाप्रभृत्येवमिष्ट्वा विष्णुं सनातनम् ॥
भूतं भव्यं भविष्यच्च(च्च)सकलज्ञानमाप्तवान् ।
आस्थाय वैष्णवीं भक्तिं मुनीनामधिपो भवेत् ॥

**Colophon:**

इति श्रीपाञ्चरात्रे महोपनिषदि नारदीयसंहितायां कालाध्यायो नाम त्रिंशोऽध्यायः ॥

---

R. No. **2504.**

**Paper.** 10¾ × 9¼ inches. Foll. 14. Lines, 20 in a page. **Dêvanâgarî. Good.**

Transcribed in 1917-18 from a MS. obtained through the Sub-Magistrate of Kovvuru, Kistna district.

**भाषिकसूत्रम् , सभाष्यम्.**

**BHÂṢIKASŪTRAM WITH BHÂṢYAM.**

**Foll. 1a—13a. Fol. 13b contains the name of the owner of the MS. from which this was copied. Fol. 14 is left blank.**

The Sūtras of Kâtyâyana dealing with the Svaras (accents) of the Śatapathabrâhmaṇa of the Śuklayajurvêda, followed by a commentary written by Ananta, son of Bhâgîrathî and Nâgadêva; a follower of the Vâjasanêya Saṁhitâ.

Complete.

**Beginning:**

वन्दे कृष्णं सदानन्दं भक्तकल्पमहीरुहम् ।
यच्छायामाश्रितैर्लभ्यं नरैरर्थचतुष्टयम् ॥
कुपिताहिप(ति)च्छायासमीकृत्यापरं सखम् ।
सेवन्ते तत्पदं धीरास्तमनन्तं भजेऽन्वहम् ॥
याज्ञवल्क्यमुनिं नत्वा कात्यायनमुनीनपि ।
व्याख्यास्ये भाषिकं सूत्रं कात्यायनमुनीरितम् ॥

मन्त्रलक्षणभिन्नत्वाच्छतपथब्राह्मणस्य तु ।
तल्लक्षणाय मुनिना प्रणीतं भाषिकं खलु ॥

तस्येदमादिमं सूत्रम्—

अथ ब्राह्मणस्वरसंस्कारनियमः ॥

अथशब्दः आनन्तर्यार्थः । अथ मन्त्रलक्षणप्रणयनानन्तरं शतपथब्राह्मणस्वरसंस्कारनियमः क्रियत इति सूत्रशेषः । मन्त्रलक्षणानन्तर्यं चास्य भाषिकलक्षणस्य सूत्रकारग्रस्थानादेव ज्ञा(यते) । तथाहि वक्ष्यति जात्याभिनिहितक्षैप्रप्रश्लिष्टाश्चेति सूत्रेण पूर्वसिद्धं जात्यादिकमनूद्य भाषिकसंज्ञा तया स्वरितानुदात्तावनूद्य (ब्रा)ह्मणे उदात्तं विधास्यति । तेन तदुपजीव्यत्वात्तदानन्तर्यमेतस्य साधूक्तम् ।

द्वौ—

ब्राह्मणे अनु(उ)दात्तानुदात्तौ द्वावेव स्वरौ वेदितव्यौ ।

* * * *

**Colophon:**

इति भाषिकसूत्रभाष्ये प्रथमकण्डिका समाप्ता ॥

**End:**

तान एव स्वरो भवति । द्विरभ्यासश्शास्त्रपरिसमाप्त्यर्थः । इति शब्दः शास्त्रवेदिनामभ्युदयसूचनार्थः । तदेते श्लोका भवन्ति ।

* * * *

एकं (च)ब्राह्मणं सम्यक् स्वरार्थं ज्ञानपूर्वकम् ।
योऽधीते वेदवित्स स्यादन्यथा स्थाणुरुच्यते ॥
अम्बा भागीरथी यस्य नागदेवात्मजस्सुधीः ।
तेनानन्तेन विहितं भाषिकं सूत्रमुत्तमम् ॥
अनेन(न)प्रीयतां देवो रमानाथस्सदा मम ।
ब्रह्मादिवन्दितं देवं पद्मो देवशिखामणिः ॥
वचनप्रसूनमाला (सा)नन्ताख्येन सूरिणा रचिता ।
प्रियतां हृदय(ये)सदये कमलामहिलेन पुरुषेण ॥

**Colophon:**

इति श्रीमत्प्रथमशाखिना नागदेवभट्टात्मजेन श्रीमदनन्तभट्टेन विरचितं भाषिकसूत्रभाष्यं समाप्तम् ॥

R No. 2505.

Paper. 11 × 9¼ inches. Foll. 140. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Dēśamaṅgalam Manakkal, Dēśamaṅgalam, near Shoranur, Malabar district.

तन्त्रसङ्ग्रहव्याख्या.

TANTRASAṄGRAHAVYĀKHYĀ.

Foll. 1a—139b. Fol. 140 is left blank.

A metrical commentary on the Tantrasaṅgraha described under No. 13426 of the D.C.S. MSS., Vol XXIV. In the colophon at the end of each Adhyāya, the commentator states that the commentary has been written in accordance with what was explained by a Brahman of Parakrōḍa village.

Contains the first four Adhyāyas.

**Beginning:**

कारणभूतो जगतां वारणवदनस्स विजयतां देवः ।
भक्तजनप्रत्यूहप्रशमनपटुचरितसर्वस्वः ॥
करकमलकलितपुस्तकवराभयाक्षस्रजं विशुद्धाङ्गीम् ।
मौलिलसच्चन्द्रकलां त्रिलोचनां भारतीं वन्दे ॥
यत्तन्त्रसङ्ग्रहं नाम पूर्वैः प्रकरणं कृतम् ।
हितायाल्पधियां तस्य पद्यैर्व्याख्या विलिख्यते ॥

हे विष्णो इति—

मृत्तिकायां यथा भाति कृत्स्नं कुम्भघटादिकम् ।
नारायणे तथा भाति जगदेतच्चराचरम् ॥
जगत्कारणता तस्य निर्विवादा स्थिता ततः ॥
ज्योतिष्ट्वं ज्योतिषां तस्य ज्ञेया भगवदुक्तितः ।
यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ॥

* * * *

श्रुतिचोदितकर्माङ्गभूतकालावबोधिनः ।
शास्त्रस्यास्य तदङ्गस्य कालज्ञानं प्रयोजनम् ॥
कालो यतः परिच्छेद्यो ज्योतिश्चक्रे ग्रहभ्रमात् ।
भचक्रसप्तविंशांशे चन्द्रचारादजादितः ॥
अश्विन्यादीनि भानि स्युस्तत्र तत्प्रमितार्कतः ।
त्रिंशांशिचन्द्रचारेण तिथयः प्रतिपन्मुखाः ॥

तन्निर्गमाच्च नक्षत्रतिथ्याद्यन्तौ प्रकीर्तितौ ।
एवमन्येऽपि कालांशा वेद्या भ्रमवशात्तयोः ॥
स्वदेशे प्रतिपच्छेदो भग्रहोन्नमनादिना ।
* * * *
प्रत्यहं भ्रमणं प्रत्युङ्मुखं दृष्टं द्युचारिणाम् ।
परतोऽथ स्वतस्तेषां प्राङ्मुखं चानुमीयते ॥
भगोलं भ्रामयेन्नित्यं प्रत्यक्प्रवहमारुतम् ।
तद्वशादेव तत्स्थानि ग्रहर्क्षाणि मुहुर्मुहुः ॥
अतः प्रत्यङ्मुखं तेषां भ्रमणं परतो मतम् ।
ज्योतिश्चक्रे यदा येन नक्षत्रेण युतो ग्रहः ॥
कालान्तरे पुनस्तस्मात्संयुक्तोऽन्येन दृश्यते ।
* * * *

**Colophon:**

इत्येष परक्रोडावासद्विजवरसमीरितो योऽर्थः ।
स तु तन्त्रसङ्ग्रहस्य प्रथमेऽध्याये मया कथितः ॥

**End:**

वृत्तमध्ये तमोबिम्बं स्वमार्गे सर्वदा लिखेत् ।
स्पर्शमध्येष्टमोक्षादिदर्शयेत्तत्र सुस्फुटम् ॥
तमोबिम्बाद्बहिर्भूतं दृश्यमिन्दो न तद्गतम् ।
हनुभेदाः पार्श्वभेदास्तत्र भेदान्तराण्यपि ॥
करामलकवत्सर्वं दर्शयेत विचक्षणः ॥
इत्येष परक्रोडावासद्विज(वर)समीरितो योऽर्थः ।
स तु तन्त्रसङ्ग्रहस्य प्रोक्तोऽध्याये चतुर्थेऽभूत् ॥

**Colophon:**

तन्त्रसङ्ग्रहस्समाप्तः ॥

---

R. No. **2506.**

Paper. 10¾ × 8¾ inches. Foll. 50. Lines, 20 in a page. Dēvanāgarī and Kanarese. Good.

Restored in 1917–18 from the Library MS. which is described under No. 13381 of the D.C.S. MSS., Vol. XXIII.

**सूपशास्त्रम्, कर्णाटकटीकासहितम्.**
**SŪPAŚĀSTRAM WITH KANARESE MEANING.**

Foll. 1a—8a. Foll. 8a—50b contain the same work but in Kanarese language.

Same work as that described under No. 13381 of the D.C.S. MSS., Vol. XXIII.

Incomplete.

---

R. No. 2507.

Paper. 10⅞ × 9⅜ inches. Foll. 46. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1917-18 from the MS. described under No. 12464 of the Descriptive Catalogue.

अम्बुजवल्लीपरिणयम्.

AMBUJAVALLĪPARIṆAYAM.

Foll. 1a—38a. Foll. 39—40 are left blank.

Same work as that described under No. 12464 of the D.C.S. MSS., Vol. XXI.

Complete.

---

R. No. 2508.

Palm-leaf. 15⅞ × 1½ inches. Foll. 182. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1917-18 from M.R.Ry. Prasannācār of Tiruppāṟkaḍal, North Arcot district.

Foll. 56b—83b and 153b are left blank.

चम्पुभारतविवृतिः.

CAMPUBHĀRATAVIVṚTIḤ.

A commentary on the Campubhārata of Anantabhaṭṭa which work has been described under No. 12233 of the D.C.S. MSS., Vol. XXI: by Kumāra Tātārya alias Aparyāptāmṛta who learnt the Divyaprabandha from Vēṅkaṭavarada of Lakṣmīkumāra family and Vēdānta from Śrīnivāsa Tātārya of Śrīvatsa family. He was the disciple and probably also the son of Vēṅkaṭakṛṣṇārya who was the great grandson of Lakṣmīkumāra Tātārya of Śrīśaila family.

Complete in 12 Stabakas.

**Beginning :**

तरुणाम्बुजाभचरणाम्बुजद्वयप्रवणानतस्य करुणाम्बुवारिधिः ।
शरणं ममास्तु तरुणेन्दुसुन्दरः फणिसार्वभौमधरणीश्वरो विभुः ॥
वन्दे करिगिरिवरदं मन्देतरसुन्दरं सुखावाप्त्यै ।
भिन्दानमानतैनस्तं दातारं समग्रगुणधीरम् ॥

वादान्तराश्रया धीर्मोदान्तःस्वान्तचिन्तितश्रीशः ।
खेदान्तरायवैरी वेदान्ताचार्यसद्गुरुर्जीयात् ॥

विद्यागुरुं नमस्कुर्मस्तातयार्यगुरूत्तमान् ।
वत्सान्ववायदुग्धाब्धिकौस्तुभाभरणोपमान् ॥

अनन्ताख्येन कविना कृतं यच्चम्पुभारतम् ।
तनोमि विवृतिं तस्य बालानां सुखबुद्धये ॥

अत्र कविः चिकीर्षितस्याविघ्नपरिसमाप्तये स्वेष्टदेवतानमस्कारलक्षणं मङ्गलमाचरति—कल्याणमिति । वेतण्डरत्नं गजश्रेष्ठः नः कल्याणं विधत्तामिति सम्बन्धः । कीदृशं तत् करटयोः गण्डयोः मदधुन्यां मदजलप्रवाहे लोलाश्चलाः ये(याः)कल्लोलमालाः तरङ्गपङ्क्तयस्तासु खेलतां क्रीडतां लोलम्बानाम् ।

• • • •

**Colophon :**

इति श्रीशठमर्षणकुलतिलकरमाकुमारताताचार्यवंशजेन लम्भिततन्नाम्ना केनचिद्विदुषा विरचितायां चम्पुभारतविवृतौ प्रथमस्तबकः ॥

**End :**

एवंविधः धर्मतनूजः मुदा सन्तोषेण चिरं चिरकालं प्रजाः गोपायति स्म रक्षति स्म । अत्र प्रथमविशेषणेन शौर्यं, द्वितीयेन दातृत्वं, तृतीयेन नीतिज्ञत्वं, तुरीयेण दयालुत्वं, पञ्चमेन सत्यवादित्वं, षष्ठेन राज्यपालनसामर्थ्यं, सप्तमेन चक्रवर्तित्वज्ञापककिरीटधारित्वं चास्य प्रतिपाद्यते । शेषेण न्यायेन प्रजापालनं च प्रतिपाद्यते इति भावः ।

**Colophon :**

इति श्रीशैलकुलजलधिकौस्तुभायमानरमाकुमारताताचार्यप्रपौत्रश्रीवेङ्कटकृष्णार्यचरणकमलचञ्चरीकवरेण श्रीवत्सकुलजलधिमुक्ताफलायमानकविवादिकेसरिवरश्रीनिवासताताचार्यमहागुरुकरुणाकटाक्षलब्धनिखिलवेदान्तरहस्यतत्त्वार्थेन तच्चरणकमलविन्यस्तसमस्तात्मभरेण श्रीमद्रमाकुमारकुलजलधिसंभूतश्रीमद्वेङ्कटवरदार्यमहागुरुवरलब्धद्राविडाम्नायहृदयेन कुमारताताचार्यापरनामधेयेनापर्याप्तामृतदासेन विरचितायां चम्पुभारतविवृतौ द्वादशस्तबकः ॥

R. No. 2509.

Paper. 13¾ × 6¾ inches. Foll. 110. Lines, 20 in a page. Dēvanāgari Good.

Purchased in 1917-18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Panjab.

तत्त्वानुसन्धानम्, सव्याख्यानम्.

TATTVĀNUSANDHĀNAM WITH COMMENTARY.

The text is a treatise bearing on the Advaita Vēdānta. The subjects dealt with herein are—

१. मायापञ्चीकरणादिनिरूपणम्.
२. ब्रह्मादिनिरूपणम्.
३. स्मृतिप्रामाण्यादिनिरूपणम्.
४. मुक्तिस्वरूपभेदनिरूपणम्.

The author of the text as well as of the commentary is Mahādēvasarasvatimuni, disciple of Svayamprakāśānandasarasvatī. The commentary is called Advaitacintākaustubha.

Complete in four Paricchēdas.

**Beginning:**

(व्या) यः परात्मा जगत्सृष्ट्वा प्रविवेश पुनः स्वयम् ।
तं कृष्णं प्रत्यगात्मानं वन्दे गोपीमनोहरम् ॥

यस्य प्रसादादहमद्वयात्मा विश्वं समस्तं मयि कल्पितं च ।
तं सर्वलोकैकगुरुं सदा श्रीस्वयंप्रकाशं मुनिमानतोऽस्मि ॥

गुरूणां चरणाम्भोजं प्रणिपत्य निरन्तरम् ।
तत्कृपालेशतोऽद्वैतचिन्ताकौस्तुभमारभे ॥

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नसमाप्तिकामनया गुरुप्रसादलभ्यं तत्त्वानुसन्धानलक्षणं मङ्गलमाचरन्नर्थात् प्रेक्षावत्प्रवृत्त्यङ्गमभिधेयादि सूचयन् "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यै ते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इत्यादिश्रुत्या गुरुभक्तेस्तत्त्वानुसन्धानं प्रत्यन्तरङ्गसाधनत्वावगमात् स्वगुरुं नमस्करोति—ब्रह्मेति ।

(मू) ब्रह्माहं यत्प्रसादेन मयि विश्वं प्रकाशितम् ।
श्रीमत्स्वयंप्रकाशाख्यं प्रणौमि जगतां गुरुम् ॥

(व्या) यस्य गुरोः प्रसादेन ब्रह्माहं तं गुरुं प्रणौमीति सम्बन्धः । अत्र ब्रह्मशब्देन मायाविनिर्मुक्तमखण्डचैतन्यमभिधीयते । अहंशब्देन स्थूलसूक्ष्म-

कारणशरीरविनिर्मुक्तं प्रत्यक्चैतन्यं लक्षणया प्रतिपाद्यते । ब्रह्माहंशब्दयोः सामानाधिकरण्यात् ।

* * * *

तस्मात्प्रयोजनप्रमाणयोरभावात् मङ्गलाचरणमनुपपन्नमिति । अत्रोच्यते, ग्रन्थारम्भे मङ्गलाचरणमवश्यं कर्तव्यम् । न च तत्र प्रमाणाभावः, अनुमितश्रुतेरेव प्रमाणत्वात् । न चानुमानासम्भवः, शिष्टाचारत्वेन तदनुमानात् । तथाहि—मङ्गलं वेदबोधिताभीष्टोपायताकमलौकिकाविगीतशिष्टाचारत्वाद्दर्शादिवत् । मङ्गलत्वं नाम विघ्नोत्सारणासाधारणकारणत्वमतो नाश्रयासिद्धिः । अलौकिकत्वं नामान्वयव्यतिरेकप्रमापितत्वम् ।

* * * *

एतेन प्रपञ्चमिथ्यात्वमपि सूचितम् । तत्रानुमानमपि व्यावहारिकः प्रपञ्चो मिथ्या, दृश्यत्वात् शुक्तिरूप्यवदित्यादि मिथ्यात्वसाधकं द्रष्टव्यम् । शुक्तिरूप्यमग्रे निरूपमिष्यते । ततश्च ब्रह्मात्मैक्यमुपपन्नमिति भावः ।

**End:**

(व्या) भिन्नतया स्वेष्टदेवतामपि न पश्यामीत्याह—यदुकुलेति । तत्र हेतुमाह—परमसुखेति.

(मू) यदुकुलवररत्नं कृष्णमन्यांश्च देवान्
मनुजपशुमृगादीन् ब्राह्मणादींश्च जाने ।
परमसुखसमुद्रे मज्जनात्तन्मयोऽहं
गलितनिखिलभेदः सत्यबोधैकरूपः ॥

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपाद-शिष्यभगवन्महादेवसरस्वतीमुनिविरचिते तत्त्वानुसन्धानं समाप्तम् ।

(व्या) उपासकानां हार्दस्य तमसो विनिवर्तकम् ।
श्रीकृष्णस्य गलेऽद्वैतचिन्ताकौस्तुभमर्पितम् ॥
अध्यारोपापवादोन्मृदितजडतनुर्द्वैतहेतुः परात्मा
स्वाम्नायान्तैकगम्यः श्रुतिमतिसहितध्यानयोगेन भेदे ।
क्षीणे साक्षात्कृतोऽसौ मुनिवरनिकरैश्शुद्धसत्त्वैरुदारै-
र्मुक्तैर्गम्यो मुकुन्दो यदुकुलतिलकः श्रेयसे भूयसेऽस्तु ॥

जिज्ञासितव्यो विमलान्तरङ्गैरानन्दविज्ञानसदेकरूपः ।
वेदान्तवेद्यो यतिवर्यगम्यो गोपीजनेशः प्रदिशत्वभीष्टम् ॥
वाणीति वेदवचनानि वदन्ति देवीं
यामात्मयोनिगृहिणीं हृदये स्मरामि ।
यच्चिन्तया सकलशास्त्रकृतो भवन्ति
तामानतोऽस्मि सततं प्रणतेष्टदात्रीम् ॥
दुरन्तसंसारमहाम्बुराशेः समुद्धृतो येन दयालुनाहम् ।
महत्तमं तं पुरुषोत्तमं श्रीस्वयंप्रकाशं गुरुमानतोऽस्मि ॥
नामानि रूपाणि निरस्य वेदो यद्बोधयेन्नित्यनिरस्तमोहम् ।
साक्षिस्वरूपं परिपूर्णरूपमहं तदेवास्मि विमुक्तगम्यम् ॥

**Colophon :**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपाद-शिष्यभगवन्महादेवानन्दसरस्वतीमुनिवर्यचूडामणिविरचिते तत्त्वानुसन्धानव्याख्याने अद्वैतकौस्तुभे चतुर्थः परिच्छेदः ॥

समाप्तोऽयं ग्रन्थः ॥

---

R. No. **2510.**

Paper. 13¾ × 6¼ inches. Foll. 79. Lines, 19 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

Foll. 1*a* and 79*b* are left blank.

सिद्धान्तमुक्तावली, सव्याख्या.

SIDDHĀNTAMUKTĀVALĪ WITH COMMENTARY.

Same work as that described under R. No. 1346 ante with a commentary which is called Siddhāntadīpikā and is by Nānādīkṣita, disciple of Prakāśānanda, the author of the text. The commentator salutes his Gurus Prakāśānanda, Rāghavēndrayati, Nṛsiṁha and Śaṅkarācārya.

Complete.

**Beginning :**

(व्या) विश्वेशं ढुण्ढिराजं जगदुदयकृतं शारदां सूत्रकारं
व्यासं चाचार्यवर्यं त्रिभुवनविदितं शङ्करं भाष्यकारम् ।

आनन्दान्तप्रकाशानुभवपदपदं सद्गुरुं श्रीनृसिंहं
वन्दे विद्यानिधानं शमदमनिरतं राघवेन्द्रं यतीन्द्रम् ॥
यच्छिष्यशिष्यसन्दोहव्याप्ता भारतभूमयः ।
वन्दे तं यतिभिर्वन्द्यं प्रकाशानन्दमीश्वरम् ॥
सिद्धान्तमौक्तिकश्रेणीप्रकाशाय प्रदीपिका ।
क्रियते परपक्षौघध्वान्तध्वंसप्रवर्तनी ॥

शिष्टाचारपरिप्राप्तं मङ्गलमाचरन्निरूपणीयं प्रतिजानीते—अद्दष्टद्वयमिति ।

(मू) अद्दष्टद्वयमानन्दमात्मानं ज्योतिरव्ययम् ।
विनिश्चित्य श्रुतेस्साक्षाद्युक्तिस्तत्राभिधीयते ॥

तत्रादौ मङ्गलं तत्त्वानुस्मरणरूपं सूचयन्नभिधेयप्रयोजने साक्षात्प्रतिपाद्य कर्तव्यं प्रतिजानीते—

(व्या) देहादिभ्य आत्मनो व्यावर्तनायाव्ययमिति पदम् । आत्मनि प्रमाणसत्त्वासत्त्वाभ्यामनात्मत्वासत्त्वशङ्कां पराकर्तुं ज्योतिरिति विशेषणम् ।

* * * *

तत्रादाविति । तत्र कर्तव्ये ग्रन्थे आदौ कर्तव्यं प्रतिजानीते इत्यन्वयः । प्रतिज्ञोत्तरं निरूपणीयस्य युक्तत्वात् । न च मङ्गलाननुष्ठानप्रयुक्तदोषः, तत्त्वानुस्मरणरूपस्य मङ्गलस्य कृतत्वात् । तद्वाचकपदाभावदोषपरिहारायाह—सूचयन्निति । तत्त्वं ब्रह्म ।

* * * *

तदुक्तं भाष्यकारैः । ब्रह्मात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते इति । न च तर्ह्यात्मज्ञानप्रतिष्ठैव युक्तेः फलं नानन्द इति वाच्यम्, साक्षात्परम्पराभ्यामुभयफलत्वाविरोधात् । साक्षात्फलं प्रतिष्ठा । परम्पराफलमानन्दः । अभिधेयवत् । यथात्र साक्षादभिधेयं युक्तिः । परम्परया तु ब्रह्मात्मैक्यमत एवाह ।

End:

(मू) तस्माद्यथोक्तब्रह्मात्मैकत्वविज्ञानेन कृतकृत्यो भवतीति नात्र विवदितव्यमिति ।

प्रकाशानन्दयतिना कृतिना स्वात्म[वि]शुद्धये ।
सिद्धान्तमुक्तावल्येषा रचिता रन्ध्रवर्जिता ॥

अद्वैतानन्दसन्दोहा सत्यज्ञानादिलक्षणा ।
नारायणसमासक्ता श्रिया सापत्न्यदूषिता ॥
शृणु प्रकाशरचितां सद्द्वैततिमिरापहाम् ।
वादीभकुम्भनिर्भेदसिंहदंष्ट्राधरीकृताम् ॥
वेदान्तसारसर्वस्वमज्ञेयमधुनातनैः ।
अशेषेण मयोक्तं तत्पुरुषोत्तमयत्नतः ॥
स्नातं तेन समस्ततीर्थसलिले सर्वापि दत्तावनि-
र्यज्ञानां च कृतं सहस्रमखिला देवाश्च संपूजिताः ।
संसाराच्च समुद्धृतास्स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ
यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीज्ञानानन्दपूज्यपादशिष्यश्रीप्रकाशानन्दविरचिता सिद्धान्तमुक्तावली समाप्ता ॥

(व्या) इतिशब्दो ग्रन्थसमाप्तौ । एवं ग्रन्थस्यावान्तरप्रयोजनमाह— शृणु प्रकाशेति । तादृक् सिंहदंष्ट्रा अधरीकृता ययेत्यर्थः । एतेन वादिविजयार्थिभिरपीयमभ्यसनीयेति भावः । शेषमतिरोहितार्थम् ॥

नानादीक्षितसंज्ञेन विदुषेयं विनिर्मिता ।
सिद्धान्तमौक्तिकश्रेणीदीपिकात्मप्रकाशिका ॥
विदितसकलवेद्यैर्नं प्रशंसन्ति लोके
ग्रथितमपि महद्भिः किं पुनर्मादृशेन ।
इति विफलतमेऽस्मिन् व्याख्येऽहं प्रवृत्तः
स्वमतिविमलताय क्षन्तुमर्हन्ति सन्तः ॥
यदज्ञानादिदं भाति यज्ज्ञानाच्च प्रलीयते ।
ब्रह्म स्यां तदहं नित्यं नित्यसंवित्सुखाद्वयम् ॥
अधिकार्युपविश्रेशमियं सिद्धान्तदीपिका ।
निर्मिता राजतां शश्वत्सदानन्दप्रदायिनी ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकार्यश्री काशानन्दपूज्यपादशिष्यश्रीनानादीक्षितविरचिता वेदान्तसिद्धान्तमुक्तावलीटीका सिद्धान्तदीपिका समाप्ता ॥

## R. No. 2511.

Paper. 12⅜ × 6 inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

Fol. 1*a* contains the name of the work and 20*b* is left blank.

**कौषीतक्युपनिषदारण्यकम्, सव्याख्यानम्.**

**KAUṢĪTAKYUPANIṢADĀRAṆYAKAM WITH COMMENTARY.**

Same text as that described under No. 415 of the D.C.S. MSS., Vol. I, Part III. The commentary herein found is by Śaṅkarānanda, disciple of Ānandātmapūjyapāda.

Complete.

**Beginning:**

आनन्द आत्मा स्थिरजङ्गमानामस्त्यत्र चित्रस्तमहं प्रणम्य ।
कौषीतकीब्राह्मणमात्मविद्यां पदावलोकात्मकटीकरोमि ॥

समधिगतमेतन्निघर्षणादीनां कर्मणां तैजसस्य द्रव्यस्यादर्शादेः शुद्धिहेतुत्वम् । तथाचाग्निहोत्रादीन्यश्वमेधान्तानि कर्माणीति तैजसस्यान्तःकरणस्य शुद्धिहेतूनि विविदिषासाधनत्वस्य श्रुतितोऽप्यवगमाच्च ।

* * * *

तत्र ब्रह्मविद्यायाः सगुणाया अपि महद्भिर्गौतमश्वेतकेत्वादिभिरप्यमानित्वादिगुणैर्गुरुमुखादेवावगतिः कृता । ततस्ततोऽमानित्वादिगुणैराधुनिकैरप्यधिकारिभिस्सगुणा निर्गुणा च ब्रह्मविद्यावगन्तव्येत्येतदर्थमाख्यायिका । चित्रः चित्रनामा कश्चित् त्रैवर्णिकः ह किन्न(ल)वै प्रसिद्धः । श्रुतेस्तत्कालीनानां च । गाङ्ग्यायनिः गाङ्ग्यस्य युवापत्यं गाङ्ग्यायनिः । यक्ष्यमाणः कश्चित् ज्योतिष्टोमादिकं यागं करिष्यमाणः आरुणिमरुणस्यापत्यं वव्रे तदस्यसप्तदशान्यतमर्त्विक्त्वेन वरणं चक्रे त्वं मे प्रधानभूतो याजयिता भवेति । सः गाङ्ग्यायनिना चित्रेण वृतः आरुणिः ह प्रसिद्धः ।

**End:**

(मू)—स्वाराज्यं पर्येति य एवं वेद य एवं वेद ॥

**Colophon:**

इत्यारण्यके चतुर्थोऽध्यायस्समाप्तः ॥

(व्या)—

सर्वं न सर्वस्य हितं प्रियं वा व्यवस्थितं येन लभामहेदा(ऽद्):।
प्रिया हितास्तेन विमुक्तिभाजां पदावलोका विहितास्ततोऽमी ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृतौ कौषीतकिब्राह्मणोपनिषद्दीपिकायां चतुर्थोऽध्यायस्समाप्तः ॥

---

R. No. **2512.**

Paper. 12½ × 6 inches. Foll. 437. *Lines*, 15 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

Foll. 1*a*, 220*b*, 221*a*, 301*b*, 302*a*, 414*b*, 415, 416, 436*b* and 437 are left blank.

सङ्क्षेपशारीरकम्, सव्याख्यानम्.

SAṄKṢEPAŚĀRĪRAKAM WITH COMMENTARY.

Same text as that described under R. No. 1558(*a*) ante. By Sarvajñātman, disciple of Dēvēśvarapūjyapāda. The commentary is called Anvayārthaprakāśikā and was written by Rāmatīrtha, disciple of Kṛṣṇatīrtha. The commentator says that he has consulted a prior commentary called the Siddhāntadīpa which has been described under R. No. 1558(*b*) ante.

Complete.

**Beginning:**

यस्माद्विश्वमुदेति येन विविधं संजीव्यते लीयते
यत्रान्ते गगने घना इव महामायिन्यसङ्गेऽद्वये ।
सत्यज्ञानसुखात्मकेऽखिलमनोऽवस्थानुभूत्यात्मनि
श्रीरामे रमतां मनो मम सदा हेमाम्बुजे हंसवत्
यच्चैतन्यमनन्यसिद्धममलं प्राणेन योगात्मना
साकं नादमयीं तनुं तनुतरां बिभ्रत् क्रमेणोद्गताम् ।
वागीशे स्फुटवर्णतामुपगतं सर्वार्थविद्योतनं
वेदाख्यं तदहं गतोऽस्मि शरणं रामाभिधानं महत् ॥
यादिक्षान्तविनिर्मिताङ्गविभवा यस्याः प्रसन्नेक्षण-
प्रान्तालोकनवर्त्मगः कविवरः सञ्जायते तत्क्षणात् ।
या वीणावरपुस्तकाक्षवलयदोर्भिश्चतुर्भिर्युता
सा वाणी हृदये मुखे वसतु मे सर्वार्थसन्दर्शिनी ॥

यस्सर्वश्रुतिमौलिपद्मनिकरं दोधूयमानं महा-
वादिव्रातसमीरणैः स्वकृतसत्सूत्रावनद्धं स्थिरम् ।
चक्रेऽनेकविनेयतोयनिभृतं विष्णोः पदैकायनं
वेदव्यासगिरेरिताय मुनये तस्मै नमो विष्णवे ॥
येनाद्वन्द्वमखण्डमक्षयपदं प्रादर्शितं पापहं
भाष्यग्रन्थनिबन्धनैः श्रुतिशिरोवाक्यार्थविद्योतिभिः ।
नित्यो यत्र समस्तसद्गुणगणस्तं शङ्कराचार्यगी-
र्विख्यातं मुनिमौलिलालितपदद्वन्द्वं सदा तं श्रये ॥
यत्पादद्वयवन्दनेन सकला दोषा विनष्टाः क्षणा-
द्यद्धस्ताम्बुजसङ्गमेन शिरसि श्रीः प्रादुरासीन्मम ।
यद्वक्त्रोदितवेदमौलिवचनस्याकर्णनेनात्मन-
स्तत्त्वाज्ञानमलीयताशु तमहं वन्दे हरिं श्रीगुरुम् ॥
यैर्व्युत्पादित आदरेण कृपया ग्रन्थप्रचारो धिया
ये हर्षान्मम नूतनानपि बहुग्रन्थान्विशन्त्यश्रमाः ।
येऽस्मत्यत्युपकारनिःस्पृहधियस्तुष्यन्ति पुण्यैषिण-
स्तानुद्दिश्य नमस्करोमि मनसा नान्यद्विधातुं क्षमः ॥
सङ्क्षेपशारीरकमादरेण तदर्थबोधाय यथामनीषम् ।
विविच्यते तत्कृपयन्तु सन्तः श्रमं मदीयं समुदीक्षमाणाः ॥
प्रसन्नगम्भीरमवेक्ष्य भाष्यं तदर्थजिज्ञासुहिते प्रवृत्तः ।
सर्वज्ञनामा मुनिरातनोत्सत्पद्यौघबन्धैः प्रथितं प्रबन्धम् ॥
तस्याहमत्रर्जुपथेन सम्यक् पदान्वयार्थं प्रकटीकरोमि ।
सिद्धान्तदीपोक्तिमवेक्ष्य मूलशास्त्रश्रुती मूलनिबन्धनं च ॥

इह हि सर्वज्ञात्मगिरा प्रसिद्धनामा महामुनिरखिलश्रुतिमौलितत्त्वार्थवि-
चारशास्त्रस्य श्रीमच्छारीरकाभिधस्य श्रीवेदव्यासमहामुनिकृतसूत्रसन्दर्भात्म-
कस्य भगवत्पादाभिधानश्रीमच्छङ्कराचार्यकृतभाष्यप्रकटीकृतार्थस्याप्यतिगम्भी-
रस्य सङ्क्षेपतस्तात्पर्यार्थजिज्ञासूननुपलभ्य तदनुग्रहाय श्रीमच्छारीरकशास्त्र-
प्रकरणवार्तिकमारभमाणस्तत्राविघ्नपरिसमाप्तिप्रचयगमनशिष्टाचारपरिपालनफलं
विशिष्टशिष्टाचारानुमितस्मृतिश्रुतिप्रमाणकस्वेष्टदेवतानुसन्धानात्मकं मङ्गला-

चरन्नर्थाच्छास्त्रीयाभिधेयप्रयोजने दर्शयति श्रोतृप्रवृत्तिसिद्धये—अनृतजडेत्यादिना पद्यत्रयेण । अयं ग्रन्थः शास्त्रं च भवति प्रकरणं च वार्तिकं च यतो वक्ष्यति—श्रीमच्छारीरकार्थप्रकटनपटुताशालि शास्त्रम् ।

* * * *

मुरारेः परमपदमभिष्टवीमीत्यन्वयः । मुरनाम्नोऽसुरस्य हन्ता श्रीकृष्णो मुरारिरिति सर्वपुराणेषु प्रसिद्धम् । सर्वजगत्पालनाय कृतावतारो भगवान् विष्णुरेवेति च तत्रैव निर्णीतम् ।

* * * *

जडमिति तदभिधीयते यत्स्वव्यवहारे स्वविलक्षणस्वभावं प्रकाशं नियमे नापेक्षते । यथा घटपटादि स्वविलक्षणस्वभावं चित्प्रकाशं स्वप्रतिबद्धव्यवहारेऽपेक्षते । अनृतं च तज्जडं चेत्यनृतजडम् । न हि जाड्यमनृतत्वं व्यभिचरति ।

* * * *

**Colophon:**

(मू.)—

इति श्रीदेवेश्वरपूज्यपादशिष्यसर्वज्ञात्ममहामुनेः
कृतौ शारीरप्रकरणसंक्षेपशारीरके प्रथमोऽध्यायः ॥

इति श्रीकृष्णतीर्थशिष्यरामतीर्थकृतायां संक्षेपशारीरकटीकासमन्वयार्थप्रकाशिकायां समन्वयाभिधः प्रथमोऽध्यायः ॥

**End:**

सिद्धान्तदीपं पुरतो निधाय वेदान्तमन्तर्गृहसन्निविष्टम् ।
सङ्क्षेपशारीरकरत्नपुञ्जं प्रकाशमादाय मया विविक्तः ॥
सर्वज्ञात्ममुनिप्रणीतममलं सङ्क्षेपशारीरकं
दृष्टान्तर्विभवं पुरस्कृतमहासिद्धान्तदीपार्चिषा ।
उक्त्यायार्थविभागतः प्रतिपदं सम्बन्धविद्योतनी
व्याख्या तस्य सतां मनःप्रियकरी व्याख्यातृचित्तोत्कसः ॥
नमोऽस्तु तस्मै रामाय ह्यनन्तज्योतिषे सते ।
वायुनेव तृणं येन विचेष्टेन(?) प्रजापिपः ॥
नमस्तेभ्यो गुरुभ्योऽस्तु येषां सन्निधिमात्रतः ।
ममान्तस्तिमिरं ध्वस्तं बाह्यं ध्वान्तं रवेरिव ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णतीर्थशिष्यरामतीर्थविरचितायां संक्षेपशारीरकटीकायामन्वयार्थप्रकाशिकायां चतुर्थोऽध्यायस्समाप्तः ॥

---

R. No. **2513.**

Paper. 12¼ × 5¾ inches. Foll. 88. Lines, 14 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

Foll. 1*a* and 88*b* are left blank.

देवीमाहात्म्यम्, सव्याख्यानम्.

DĒVĪMĀHĀTMYAM WITH COMMENTARY.

Same text as that described under No. 2444 of the D.C.S. MSS., Vol. IV, Part I. The commentary is by Haridāsa, son of Viṣṇuśarman and Malladēvī and grandson of Satkūmiśra who was the son of Jyēṣṭha of Lābhapura.

Contains 1 to 13 Adhyāyas complete.

**Beginning:**

वन्दे मदनगोपालं विद्यातत्त्वार्थदायकम् ।
सर्वविघ्नापहर्तारं दातारं भक्तिसम्पदाम् ॥

आसील्लाभपुराभिधाननगरे रुद्रान्वये काश्यपो
ज्येष्ठस्सर्वकलाकलापविदुषां ज्येष्ठाभिधानो द्विजः ।
आराध्य त्रिपुरां पुरारिचरणाम्भोजप्रसादोल्लस-
त्सम्पत्प्रीणितभूसुरः सुरपतिस्पर्धासमिद्धादरः ॥

तस्याभूत्तनयः प्रभूतविनयस्सद्धर्मकर्मप्रियः
सत्कूमिश्र इति प्रसिद्धमहिमा भक्तौ प्रसक्तस्सताम् ।
येनाराधि पुरा पुरारिनगरे विष्णुस्सतृष्णं चिरा-
द्येन प्राप स विश्वभूषणमणिं श्रीविष्णुदासं सुतम् ॥

वेदाचारपरः पुराणचतुरस्सत्सम्प्रदायाग्रणीः
शश्वद्ब्राह्मणदेवसेवनरतः प्राज्ञातिथेयप्रथः ।
ज्योतिश्चक्रविचारचञ्चरमतिः कालज्ञचूडामणिः
सर्वोर्वीशकिरीटकोटिकषणोन्मीलन्नखेन्दुद्युतिः ॥

तस्यात्मजो हरिहरार्चनलब्धबुद्धि-
विद्याविनोदमुदितो हरिदासमिश्रः ।

प्रासूत यं सुचरिता किल मल्लदेवी
द्वैपायनाख्यमिव सत्यवती मुनीन्द्रम् ॥
विष्णुदासतनूजेन हरिदासेन धीमता ।
विरच्यते यथाबुद्धि देवीमाहात्म्यदीपिका ॥

प्रारिप्सितनिर्विघ्नसमाप्तिमुद्दिश्य नमस्क्रियावस्तुनिर्देशलक्षण मङ्गलमाचरति । श्रीवेदव्यासप्रोक्तमार्कण्डेयपुराणान्तर्गतदेवीमाहात्म्यं क्रौष्टुकिनामा शिष्यः शिरसा प्रणम्य मार्कण्डेयमपृच्छत् । हे भगवन्निह खलु भूतले अनेके मनवो भूतास्तेषां मध्ये सावर्णिरष्टमो मनुर्बभूव । स च भगवत्याः प्रभावात् कीदृगभवदिति श्रोतुमिच्छामि । मार्कण्डेयः कथां कथयितुमुपक्रमते

* * * *

सावर्णिरिति । सूर्यतनयः सावर्णिश्चतुर्दशमनुमध्ये यो मनुः कथ्यते तस्य मनोरुत्पत्तिं विस्तराद्वदतो मम मुखान्निशामय, हे शिष्य दत्तावधानस्सन् पश्य जानीहि वा ।

* * * *

**Colophon:**

इति श्रीमिश्रविष्णुश(र्मा)र्मात्मजश्रीमिश्रहरिदासविरचितायां देवीमाहात्म्यदीपिकायां मधुकैटभवधः प्रथमोऽध्यायः ॥

**End:**

इति प्रकारेण यथाभिलषितं यथाभिमतं दत्वा सद्यः तत्कालमन्तर्हिता बभूव अन्तर्धानमगात् । कथंभूता देवी । ताभ्यां सुरथसमाधिभ्यां भक्त्याभिष्टुता अभिनुता । एवं देव्या इति । क्षत्रियर्षभः क्षत्रियश्रेष्ठः सुरथः एवं प्रकारेण देव्याः भगवत्यास्सकाशात् वरं लब्ध्वा प्राप्येह राज्यमनुभूय ततः शरीरं त्यक्त्वा सूर्यात् सावर्णिर्नाम मनुः राजा भविता भविष्यतीत्यर्थः ॥

**Colophon:**

इति श्रीविष्णुशर्मात्मजश्रीहरिदासरचितायां देवीमाहात्म्यटीकायां त्रयोदशः समाप्तिमगमत् ॥

---

R. No. 2514.

Paper. 12½ × 5½ inches. Foll. 71. Lines, 14 in a page. Dêvanâgari. Good.

Purchased in 1917–18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

Foll. 1a and 71b are left blank.

श्राद्धविवेकः.

ŚRĀDDHAVIVĒKAḤ.

A treatise giving certain details connected with the performance of the Śrāddha ceremony: by Mahōpādhyāya Rudradhara. The subjects dealt with herein are given below:—

१. श्राद्धस्वरूपभेदादिकथनम्.

२. अधिकारादिप्रथमक्रियानिरूपणम्.

३. एकादशाहादिसपिण्डनकथनम्.

४. सपिण्डनकालव्यवस्थोत्तरक्रिया.

Complete.

Name of the copyist: Sushucayaraya(?). Date of transcription:— Thursday, the 10th day of the bright fortnight of the Phālguna month in the year 1815 (Vikrama Samvat).

**Beginning:**

प्रसीदतु स नो हरिस्त्रिदशवैरिसीमन्तिनी-
नवीनविधवाजनव्रतविधानदीक्षागुरुः ।
यदीयपदपङ्कजस्मरणवीतसर्वैनसः
पुनर्भवगतागतं जहति वीतमोहा बुधाः ॥
चिरन्तनानेकनिबन्धसिद्धः सुसंप्रदायानुगतः स्फुटार्थः ।
नत्वा हरिं रुद्रधरेण सम्यक् वितन्यते श्राद्धविवेक एषः ॥

श्राद्धं नाम वेदबोधितपात्रालम्भनपूर्वकः प्रमीतदेवताकस्त्यागविशेषः । तच्छ्राद्धमिह स्वरूपभेदेतिकर्तव्यताकथनेन मन्त्रनिर्णयविहितनिषिद्धदेशकालद्रव्यब्राह्मणादिकथनेन च विविच्यते । तत्रादौ सङ्क्षेपतः स्वरूपभेदः कथ्यते—तत्र बृहस्पतिः—

नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं तथैव च ।
पार्वणं चेति मनुना श्राद्धं पञ्चविधं स्मृतम् ॥

एतद्विवृतं भविष्यपुराणे—

अहन्यहनि यच्छ्राद्धं तन्नित्यमिति कीर्तितम् ।
वैश्वदेवविहीनं तदशक्तावुदकेन तु ॥
एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते ।
तदप्यदैवं कर्तव्यमयुग्मान् भोजयेद् द्विजान् ॥

कामाय विहितं काम्यमभिप्रेतार्थसिद्धये ।
पार्वणेन विधानेन तदप्युक्तं खगाधिप ॥

* * * *

श्राद्धारम्भे प्रथमं श्राद्धीयद्रव्यसेकः । तत्र—
नाप्रोक्षितं स्पृशेत्किञ्चिच्छ्राद्धे दैवे च कर्मणि ॥

इत्यत्र न स्पृशेन्न दद्यादित्यर्थः । अनेन वाक्येन प्रोक्षणप्राप्तौ तत्र पुण्डरीकाक्षोच्चारणेनेति कचिन्निबन्धे लिखितम् । पुण्डरीकाक्षस्मरणेनेति कचित् ।

* * * *

**Colophon:**

इति श्राद्धविवेके प्रथमः परिच्छेदः ॥

**End:**

ओं देवताभ्य इति त्रिः पठेत् ।
प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥ इति ॥

पठित्वा विष्णुं स्मरेत । नित्यश्राद्धीयमन्नं ब्राह्मणाय प्रतिपादयेत् । जले वा क्षिपेत् ॥

**Colophon:**

इति श्राद्धविवेक उत्तरक्रियापरिच्छेदश्चतुर्थः ॥
इति महोपाध्यायश्रीरुद्रधरकृतः श्राद्धविवेकस्समाप्तः ॥

---

R. No. 2515.

Paper. 12⅝ × 5⅜ inches. Foll. 164. Lines, 12 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

Foll. 61*a*, 92 and 139 are left blank.

**ब्रह्मसूत्रम्, सभाष्यम्.**

**BRAHMASŪTRAM WITH BHAṢYA.**

Same work as that described under No. 5092 of the D.C.S. MSS., Vol. X. The commentary is by Śrīkaṇṭhaśivācarya.

Wants the first two Sūtras; otherwise complete.

R. No. 2516.

Paper. 12¼ × 6⅝ inches. Foll. 5. Lines, 17 in a page. Dēvanāgarī. Good.

Purchased in 1917-18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

मनीषापञ्चकम्, सव्याख्यानम्.

MANĪṢĀPAÑCAKAM WITH COMMENTARY.

Same work and commentary as those described under No. 4706 of the D.C.S MSS., Vol. IX. The text is by Śaṅkarācarya and the commentary called Madhumañjarī was written by Bālagōpālēndramuni.

Complete.

**Colophon:**

मनीषापञ्चकस्यैवं कृता टीका मनोहरा ।
बालगोपालेन्द्रनाम्ना मुनिना मधुमञ्जरी ॥

R. No. 2517.

Paper. 12⅜ × 6¼ inches. Foll. 6. Lines, 13 in a page. Dēvanāgarī. Good.

Purchased in 1917-18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

ईशावास्योपनिषत्, सटीका.

ĪŚĀVĀSYŌPANIṢAT WITH ṬĪKĀ.

Same text as that described under No. 300 of the D.C.S. MSS., Vol. I, Part III. The commentary is by Brahmānanda Sarasvatī.

Complete.

The date 1872 Saṁvat given at the end is apparently that of the MS.

**Beginning:**

(मू)—

ईशावास्यमिदं सर्वं . . . कस्यचिद्धनम् ॥

(टी)—

येनात्मना परेणेशा व्याप्तं विश्वं चराचरम् ।
सत्यज्ञानस्वरूपेण तदेवाहं सदात्मकम् ॥
ईशावास्यादयो मन्त्रा न कर्मप्रतिपादकाः ।
अखण्डैकरसे शुद्धे ब्रह्मण्येव समन्विताः ॥
कर्मसम्बोधका वेदा न च ते ब्रह्मबोधकाः ।
इति मीमांसकाः प्राहुस्तन्न सत्यं कथंचन ॥

अकर्मशेषमात्मानं निर्गुणं प्रकृतेः परम् ।
अशरीरं सदा मुक्तं नित्यं शुद्धस्वभावकम् ॥
सत्यं ज्ञानमनन्तं च निष्फलं निष्क्रियं ध्रुवम् ।
बोधयन्ति यतस्सत्यं सर्वे वेदाष्षडङ्गकाः ।
अत एव हि ते मन्त्रा ब्रह्मतत्त्वप्रबोधकाः ॥
ईशा ईशेन संव्याप्तं त्रैलोक्यं सचराचरम् ।
वासितं भवनं सर्वं सम्यगेवं श्रुतिर्जगौ ॥

* * * *

इत्येको मन्त्रो व्याख्यातः ॥

**End:**

(मू.)—

हिरण्मयेन पात्रेण . . . पुरुषस्सोऽसावहम् ॥

(टी)—

द्वारं विना कथं गन्तुं शक्यते ब्रह्म तत्परम् ।
सत्यलोकस्य चात्मानं सूत्रभूतं सनातनम् ॥

* * * *

इति वाक्यं यतश्शान्ति सत्यं ब्रह्मैव केवलम् ।
ब्रह्म सत्यं परं ज्ञात्वा मुच्यते जन्मबन्धनात् ॥
इति सप्तदशो मन्त्रस्समासेन निरूपितः ।
सत्यस्य परमं सत्यं ब्रह्म सत्यं च पातु माम् ॥
ईशावास्यरहस्यं तु ब्रह्मानन्दविनिर्मितम् ।
ब्रह्मानन्दमयं ज्ञात्वा मुच्यते सर्वबन्धनात् ॥

**Colophon:**

इति श्रीब्रह्मानन्दसरस्वतीकृतं ईशावास्यरहस्यं समाप्तम् ॥

संवत् १८७२.

---

R. No. 2518.

Paper. $12\frac{5}{8} \times 6\frac{1}{4}$ inches. Foll. 31. Lines, 18 in a page. Dêvanāgari. Slightly injured.

Purchased in 1917-18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

Foll. 1*a* and 31*b* are left blank.

श्रुतिसारसमुद्धरणम्, सव्याख्यम्.

**SRUTISARASAMUDDHARAṆAM WITH COMMENTARY.**

An introductory treatise in Tōṭaka metre on the Advaita Vēdānta: by Tōṭakacarya. The commentary is called Tōṭakatattvadipika and is by Saccidānandayōgi, disciple of Pūjyapādayōgindra.

Complete.

**Beginning:**

(व्या)—

विलसच्चितिबलतः स्फुरदखिलः स्वकतमसा
परिनिर्मितविपुलद्वयविहितस्वकमहिमा ।
व्यवहारिकवपुषा विधिवचनादिकविषयो
मम मानसनिलयो हरिरवताज्जगदखिलम् ॥

श्रीकृष्णं प्रत्यगात्मानं भक्त्या नत्वा गुरूनपि ।
टीकामहं करिष्यामि तोटकश्लोकगामिनीम् ॥

(मू)—

त्रैलोक्यनाथहरिमीड्यमुदारसत्त्वं शक्रेस्तनूजतनयं परमेष्ठिकल्पम् ।
जीमूतमुक्तविमलाम्बरचारुवर्णं वासिष्ठमुग्रतपसं प्रणतोऽस्मि नित्यम् ॥

(व्या) त्रैलोक्यनाथहरिमित्यादिना आद्यश्लोकेनेष्टदेवतागुरुनमस्कारव्याजेन प्रारिप्सितस्य प्रकरणस्य विषयसम्बन्धप्रयोजनानि सूचयति । ननु प्रकरणं नाम शास्त्रैकदेशसम्बद्धं शास्त्रं कार्यान्तरे स्थितमिति स्मरणात् एकप्रयोजनप्रतिनिबद्धार्थजातस्य कार्त्स्न्येन प्रतिपादको ग्रन्थः शास्त्रमिति हि शास्त्रलक्षणं शारीरकशास्त्रैकदेशसम्बद्धं चेदं प्रकरणं श्रुतिसारसमुद्धरणाख्यं निर्गुणब्रह्मैक्यप्रतिपादकासाधारणन्यायमात्रप्रतिपादकत्वात्, समन्वयाविरोधसाधनफलार्थचतुष्टयप्रतिपादकत्वे सत्यपि

• • • •

वेदान्तशास्त्रस्य प्रत्यगात्मना प्रतिपाद्यप्रतिपादकलक्षणस्सम्बन्धो विषयश्चानन्यसाधारणतया निर्दिष्टो भवति । एवमस्य श्लोकस्य प्रकरणारम्भापेक्षितविषयसम्बन्धप्रयोजनकथनतात्पर्यमुपवर्णितम् । इदानीमक्षरयोजना । त्रैलोक्यनाथहरिं प्रणतोऽस्मीति सम्बन्धः । कथम्भूतमिति विशेषणाकाङ्क्षायामन्यत्सर्वं सम्बध्यते । ईड्यं स्तुत्यं वेदान्तैः प्रतिपाद्यमित्यन्ययोगव्यवच्छेदेन विषयनिर्देशः । तथा वेदान्तैः प्रतिपाद्यमेवेत्ययोगव्यवच्छेदेन सम्बन्धनिर्देशोऽप्यत्रैव द्रष्टव्यः ।

• • • •

सकलं मनसा क्रियया जनितं समवेक्ष्य विनाशितया जगत(:)।
निरविषत कश्चिदतो निखिलादविनाशिकृतेन न लभ्यमिति ॥

**End:**

(व्या) गुरुभक्तिवद्भगवद्भक्तिरप्यात्मज्ञानस्यान्तरङ्गसाधनमिति दर्शयितुं विराड्रूपं नारायणं नमस्करोति—भूः पादाविति ।

(मू)—

भूः पादौ यस्य खं चोदरमसुरनिलश्चन्द्रसूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तव्यमब्धिः ।
अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यै-
श्चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नतोऽस्मि ॥

**Colophon:**

इति श्रीतोटकाचार्यविरचितं तोटकच्छन्दः समाप्तम् ॥

तं विष्णुं नमामीति योजना । विष्णुं व्यापनशीलं त्रिभुवनवपुषं त्रिभुवनमेव वपुर्यस्य तम् । कीदृग्विशिष्टमित्याकाङ्क्षायां विशिनष्टि, भूः पादावित्यादिना पद्भ्यां भूमिरिति श्रुतेः । यस्य विष्णोः पादौ भूः यस्योदरं खमाकाशं यस्यासुः प्राणः अनिलो वायुर्यस्य नेत्रे चन्द्रसूर्यौ यस्य कर्णौ दिशः यस्य शिरो द्यौः यस्य मुखमपि दहनः अग्निः यस्य वास्तव्यमब्धिः

* * * *

त्रिभुवनवपुषमीशं नियन्तारं सहस्रशीर्षेत्यादिश्रुतिसिद्धं विष्णुं मुमुक्षुरहं नमामीत्यर्थः ॥

**Colophon:**

इति श्रीभगवत्पूज्यपादयोगीन्द्रशिष्येण सच्चिदानन्दयोगिना रचिता तोटकतत्त्वदीपिका समाप्तिमगमत् ॥

---

R. No. 2519.

Paper. 12¾ × 4¾ inches. Foll. 68. Lines, 12 in a page. Dēvanāgarī. Good.

Purchased in 1917-18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

Fol. 1*a* contains Caturthicandramantra and 68*b* is left blank.

आचारादर्शः.

ĀCĀRĀDARŚAḤ.

Deals with the religious rites and duties of the followers of the Vājasanēyasaṁhitā of the white Yajurvēda.

Complete.

Date of copying: Monday, the fullmoon day of the bright fortnight of the Pauṣa month in Samvat 1814

**Beginning:**

दीक्षितो रणयज्ञेषु विबुधानन्ददायिषु ।
हरिरब्धिसुतावक्त्रसोमपीथी पुनातु वः ॥
अहोरात्राश्रितो धर्म इह वाजसनेयिनाम् ।
निबध्यते निबद्धो यो धर्मशास्त्रनिबन्धि(न्द्ध)भिः ॥

तत्र मनुः—

ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥

ब्राह्मो मुहूर्तः सन्ध्यापूर्वदण्डद्वयात्मकः । तन्मूलान् धर्मार्थहेतुक्रियानिमित्तकान् । वेदतत्त्वार्थमिति तत्त्वपदमपन्यायप्रतीतार्थवारणार्थम् । वेदतत्त्वार्थो ब्रह्मेत्येके ।

* * * *

सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुख इति देवलवचनं नादर्तव्यम् "मन्वर्थविपरीता या स्मृतिस्सा न हि शस्यते" इति बृहस्पतिवचनात् । अथवा मानवदिवापदं प्रातर्मध्याह्नपरमिति न विरोधः ।

* * * *

अथ कातीयस्नानप्रयोगः—

यथोक्तमृत्तिकामार्द्रं गोमयं कुशान् कृष्णतिलान् सुरभिपुष्पाण्यादाय सुमना नद्यादिकं गत्वा नदीतीरे शुचौ देशे पृथक् स्थापयेत् । ततः पाणिपादं प्रक्षाल्य कुशहस्तो बद्धशिखी आचामेत् ।

**End:**

वसिष्ठः—अपि च पाठके प्रवचने विज्ञायन्ते अथ श्वो . . . . . मिन्द्रदत्तो वर इति ।

समूलवचनाभोगो मीमांसान्यायनिर्मलः ।
पुराणे य . . . . . आचारे दर्पणः कृतः ॥

दुरुक्तमणिसूक्तं मे मन्वादिवचनाश्रितम् ।
अपि . . . . . . . . . . . . . . ॥

**Colophon:**

. . . . . . . . कृत आचारादर्शः ॥

---

R. No. 2520.

Paper. 12¾ × 5⅝ inches. Foll. 32. Lines, 14 in a page. Dēvanāgarī. Good.

Purchased in 1917-18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

सौन्दर्यलहरी, सटीका.

SAUNDARYALAHARĪ WITH COMMENTARY.

A commentary on the Saundaryalaharī of Śaṅkarācārya which work is described under No. 10850 of the D.C.S. MSS., Vol. XIX; by Rāmaṭhakkura, son of Sūrya of Dīrghaghōṣa family and king of Mithila. This commentary is called Candrikā.

Complete.

**Beginning:**

विभ्यन्निर्जरवैरितर्जनवरं चण्डीसमुद्दंशुकं
स्तौमि स्तुत्यस(म)मेयगात्रनिभृतं चञ्चत्कपोलोल्वणम् ।
चण्डीरिङ्गणचारुवक्त्रकमलं देवं मुदा भैरवं
योगिध्येयमखण्डचित्ताविलसद्ब्रह्मैकरूपं परम् ॥
यथामति मतं ज्ञात्वा मुनीनां भावितात्मनाम् ।
दीर्घघोषकुलोत्पन्नो मैथिलो मिथिलाधिपः ॥
[श्री]सूर्यसूनुरमेयात्मा करोति लहरीवृतिम् ।
बालबोधविबोधाय बुधानां परितुष्टये ॥
श्रीशङ्करकृतां पुण्यां सौन्दर्यलहरीस्तुतिम् ।
व्याख्यातुमारभे भक्त्या क्षन्तुमर्हन्तु सूरयः ॥

ननु कथं परमहंसपरिव्राजकाचार्यस्य परिवर्जितसकलविषयसुखस्य परमात्मविदः श्रीशङ्करभगवतो भवान्याःसौन्दर्यवर्णने प्रवृत्तिरनौचित्यादिति चेत्

• • • •

परमशिष्टशिरोमणिः परमात्मानुसन्धानरूपमङ्गलमारचयति--शिवश्शक्त्येति ।

**End:**

एवं सविस्तरां कृतां स्तुतिं बहुधा सम्बोधयन् भवानीं श्रावयति ।

निधे नित्ये स्मेरे (. . .) स्तुतिमिमाम् ॥

हे निधे भक्तेभ्योऽपेक्षितदानेऽपि पद्मादिनिधिवदरिक्तधने इति नित्यं स्मयते इति नित्यस्मेरा । तत्सम्बोधनम् ।

देवानामभेदबुद्ध्या मुक्तिरेव स्वरूपस्तुतिभावनयाद्यमिति सौहित्यनृभिः सुखदायिनी स्मृता । अग्निसूर्ययोर्यथैक्यं यथा तथेति । अग्निर्ज्योतिरिति स्तुतौ प्रसिद्धतया नाधिकतरमिति व्याख्यातम् ॥

कृतेयं कविना केलिटीका परमदुर्लभा ।

न मन्त्रा लिखिता यस्यां तस्यां सर्वोपरि स्थिता ।

यथारुचि रुचेः श्रेष्ठा सेवनीया शिवेप्सया ॥

रामार्थं रामचन्द्रेण चन्द्रिका प्रकटीकृता ।

**Colophon:**

इति श्रीमन्महामहोपाध्यायविदुषेन्द्रभट्टारकशिरोमणिश्रीरामठक्कुरविरचितेयं भवानीस्वरूपसौन्दर्यलहरीटीका बालबोधानुसारिणी समाप्तेति ॥

---

R. No. **2521.**

Paper. 11¾ × 5¼ inches. Foll. 3. Lines, 10 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Bhajau Lal, book-seller, Amritsar, Punjab

**व्याकरणपदनिर्वचनखण्डनम्.**

**VYĀKARAṆAPADANIRVACANAKHAṆḌANAM.**

A treatise discussing the meaning ascribed to the expression Vyākaraṇa and criticising certain views. The author is Vācaspatibhaṭṭācārya alias Mahācārya of Karula family.

Complete.

Name of the copyist: Viṣṇutattvavidyatīrtha.

**Beginning:**

रामचन्द्रपदद्वन्द्वं नत्वा व्याकृतिखण्डनम् ।

कुरुल्य(करुला)न्वयचन्द्रेण महाचार्येण तन्यते ॥

किमिदं व्याकरणत्वम्, साधुशब्दानुशासकत्वम् । साधुशब्दानुशासकत्वमित्यत्रानुशासनं नाम किम्? प्रकृतिप्रत्ययकल्पनम् । तत्र किमिदं प्रत्ययत्वं

नामार्थप्रत्यापकत्वं ज्ञानविशेषत्वं वा सङ्केतशब्दत्वं वा प्रकृतेः परतः प्रयुज्यमानत्वं वा । तत्र न प्रथमः प्रकृतावतिव्याप्तेः । न द्वितीयः घटज्ञानादावपि वैयाकरणानां प्रत्ययत्वप्रसङ्गात् । न तृतीयः प्रकृतावतिव्याप्तेः । न चतुर्थः बहुजादावव्याप्तेः । विभाषा सुपो बहुच् पुरस्तातु—इति सूत्रे विधीयमानबहुच्प्रत्ययेऽव्याप्तिः । किञ्च द्वितीयपक्षे ज्ञानसमवेतो वा ।

**End:**

पदसंस्कारत्वं व्याकरणत्वं, वाक्यसंस्कारत्वं वा । प्रथमलक्षणे किमिदं पदत्वं नाम सुप्तिङन्तं पदं प्रत्येकं तदन्तस्य पदत्वेऽतिव्याप्तिः ।

• • • •

पदस्य च खण्डितत्वाद्वाक्यलक्षणान्तरस्यानिर्वचनात् तन्निर्वचने व्याकरणे तदनुपयोगात् । नहि तादृशानां संस्कारः ॥

**Colophon:**

इति श्रीमहोपाध्यायकरुलान्वयचन्द्रश्रीवाचस्पतिभट्टाचार्यविरचितो व्याकरणखण्डनग्रन्थस्समाप्तः ॥

---

R. No. **2522.**

Paper. 10⅜ × 6¼ inches. Foll. 14. Lines, 14 in a page. Dēvanāgarī. Good.

Purchased in 1917-18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

Fol. 1a is left blank.

देवीमाहात्म्यपूर्वाङ्गम्, सव्याख्यानम्.

DEVĪMĀHĀTMYAPŪRVĀṄGAM WITH COMMENTARY.

The text forms the preliminary portion of the Dēvīmāhātmya and is described under No 2444 of the D.C.S. MSS., Vol IV, Part II. The commentary herein added is by Nārāyaṇabhaṭṭa.

Contains the Kavaca, the Argaḷa and the Kīlaka Stōtras.

Date of copying (Kavaca): Tuesday, the 13th } day of the bright
Date of copying (Kīlaka): Friday, the fullmoon }
fortnight of the Jyēṣṭha month in Saṁvat 1841.

**Beginning:**

व्या—

नमस्सकलकल्याणभाजनाय पिनाकिने ।
नमो लक्ष्मीनिवासाय देवतायै गिरां नमः ॥

ममाहमिति कत्थन्ते मोहिता यस्य मायया ।
दुर्ज्ञेयया सुरैस्सर्वैस्तं वन्दे कमलापतिम् ॥
श्रीकृष्णकृपया देवी विद्यारूपेण भासते ।
कृपया परमेशस्य विद्या सर्वजगन्मयी ॥
काहं मन्दमतिः क्वायं सप्तशत्या गुणार्णवः ।
तथापि हरिणादिष्टो ब्रूहि(ही)ध्येऽर्थमणि वरम् ॥
गृहीतेऽर्थमहारत्ने ग्रथते टीकिकास्रजः ॥
हसन्तु दुर्जना दृष्ट्वा मा हसन्तु बरा जनाः ।

(मू.)—श्रीनारद उवाच—

यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥

(व्या)—अत्र सकललोकहितायावतीर्णो भगवान्नारदः श्रीनारायणकलया तद्धर्मपरायणश्च स्वनाम्ना प्रकटितपञ्चरात्राद्यागमोऽपि विष्णुमायाचरितं ज्ञातुमिच्छन् संसारिणां सर्वजनानां सर्वाभीष्टावाप्तयेऽविद्याकृतक्लेशमोहदुःखादिसन्तरणाय ब्रह्माणमपृच्छत् ।

* * * *

तत्रादौ श्रोतृवक्तृशुद्ध्यर्थं देव्या बीजरूपाणि अष्टनामान्यादावेव कथयति । पश्चाद्देव्याः कवचम् । तत्रादौ नामान्येव दर्शयति । प्रथममिति द्वाभ्याम् ।

(मू.)—

प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारिणी ।
तृतीयं चण्डघण्टेति कूष्माण्डेति चतुर्थकम् ॥

Colophon:

इति श्रीनारायणभट्टविरचिता देवीकवचस्तोत्रटीका संपूर्णा ॥

(मू.)—

प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥

* * * *

Colophon:

इति श्रीब्रह्मोक्तदेवीकवचस्तोत्रं संपूर्णम् ॥

Colophon:

इत्यर्गलास्तोत्रं सम्पूर्णम् ॥

(व्या)—ननु पाठकः किं लभेत्तत्राह—वरं श्रेष्ठं सम्पदः वरं प्राप्नोति वरं मनोरथं वा ।

व्याख्यातं तु मया स्तोत्रमर्गलाख्यं यथामति ।
नत्वा देवीं विष्णुमायां प्रार्थये मोहनुत्तये ॥
ब्रह्मणा विष्णुना चैव शम्भुना स्वार्थसिद्धये ।
स्तुता शक्रादिभिर्देवैः ऋषिभिस्तत्त्वदर्शिभिः ॥
पुराणवेदसिद्धान्तशास्त्रस्मृतिशुभागमैः ।
श्रीकृष्णचरणाम्भोजे भक्तिं मह्यं ददातु सा ॥

**Colophon:**

इति श्रीअर्गलास्तोत्रविर(वृति): समाप्ता ॥

**End:**

इदानीं यथामति कीलकं विवृत्य टीकाकारः प्रार्थयते—

त्वत्प्रसादान्नृणां देवि सर्वमैश्वर्यमुद्भवेत् ।
मम भूयात्तदैश्वर्यं कृष्णपादाब्जसेवनात् ॥

**Colophon:**

इति नारा(यणभट्ट)विरचितकीलकविवरणं समाप्तम् ॥

---

R. No. 2523.

Paper. 10¾ × 4¼ inches. Foll. 126. Lines, 10 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

**ज्योतिर्विदाभरणव्याख्या.**

**JYŌTIRVIDĀBHARAṆAVYĀKHYĀ.**

A commentary on the Jyōtirvidābharaṇa of Kālidāsa—which is a treatise on astrology dealing with the topics shown below. The commentator is Bhāvaratna, son of Bāhlā and Māṇḍaṇa and disciple of Mahimaprabhasūri of the Paurṇamīyagaccha. The commentary is called Sukhabōdhikā and was written at Śrīpattana (Śrīnagar) in Śaka 1633 (current). He states that he quotes in the commentary works like Abhidhānacintāmaṇi, Hēma, Anēkārtha, Haimakōśa, Mahīyakōśa, Anēkārthadhvanimañjari, etc. In the Praśasti given in the Ulwar Catalogue, page 182, the succession of teachers that preceded Mahimaprabhasūri is mentioned as well as the date of the commentary which runs thus: Sunday, the 3rd day of the bright fortnight of the month of Vaiśākha in Vikrama Saṁvat 1767 (expired).

Contains the following topics :—

१. मानाध्यायः.
२. तिथिवारफलम्.
३. भद्रादिकरणाध्यायः.
४. पर्वाध्यायः.
५. ग्रहगोचाराध्यायः.
६. उत्पाताध्यायः.
७. गर्भाधानादिसंस्काराध्यायः.
८. जैनमताद्यावरणम्.
९. विद्यारम्भवर्णनाध्यायः.
१०. राजसत्ताध्यायः.
११. प्रयाणाध्याय (incomplete).

**Beginning :**

श्रीमान् पार्श्वजिनोऽतिशेषकगणं प्राप्तः प्रभुः पूर्णगीः
द्राक(गुत्)क्षिप्तचलत्कुयोगकमठप्रौढिः प्रजानां पुरः ।
सत्कीर्त्यानकनादपूरितजगत्साकल्य इष्टार्थदो
गीर्वाणेश्वरसेवितो विजयते विश्वैकचिन्तामणिः ॥
नत्वा गुरुं गिरमपीभमुखं च खेटान्
श्रीकालिदासकविशक्रविनिर्मितस्य ।
ज्योतिर्विदाभरणनामवरागमस्य
सन्तन्यते गुरुकृपासुखबोधिकेयम् ॥
श्रीपत्तने प्रवरपौर्णिमिकाह्वगच्छे-
ठंठेरपाठकशुभाश्रयसंश्रितानाम् ।
श्रीयुक्तपूज्यमहिमप्रभसूरिराज्ञां(ज)-
शिष्येण भावमुनिना मयका यथावित् ॥ युग्मम् ।

अथ ग्रन्थारम्भे ग्रन्थकृत् श्रीकालिदासकविशक्रो वसन्ततिलकावृत्तेन समुचितेष्टदेवतानमस्काररूपमङ्गलमाचरन्ननुबन्धचतुष्टयमाह—रैभ्येति । ननु इति ग्रन्थारम्भे, निश्चितं वा । यदुक्तम्— ननु निश्चये विरोधे च क्षमायां मासिकाक्षये । पक्षान्तरे च स्वीकारे प्रारम्भे प्रश्नतर्कयोरिति विश्वप्रकाशवृहट्टी . . नके । अहं कालिदासनामा कविः गिरं नत्वा प्रणम्य जनघनव्यवहारसिद्धौ जनानां विप्रादीनां घनो गात्रं तस्य व्यवहारः । गर्भाधानसंस्कारादारभ्यान्त्यसमयं यावदनेन व्यवहारेण व्यवह्रियते तदेप्सितं स्यादिति कथनात् । तस्य सिद्धौ सम्यक्फललाभाय ।

* * * *

ज्योतिर्विदाभरणनाम्नि ग्रन्थे ग्रथ्नामि गुम्फयामीत्यन्वयः । ज्योतिः ज्योतिषं विदुरिति ज्योतिर्विदो दैवज्ञास्तेषामाभरणं भूषणमिव भूषणं तन्नाम यस्यासौ तस्मिन् ।

* * * *

व्यवहारसिद्धाविति प्रयोजनं सूचितम् । ज्योतिर्विद इत्यधिकारिणस्सूचिताः । ज्योतिर्विदन्तीति ज्योतिर्विदस्तेषामाभरणेत्यादि पदस्यानया व्युत्पत्त्या प्रतिपाद्यप्रतिपादकभावः सम्बन्धः सूचितः । प्रतिपाद्याः पदार्थाः प्रतिपादको ग्रन्थ इति दिक् ।

* * * *

यद्यप्यस्य ग्रन्थस्य वृत्त्याद्युपजीवनेन दृष्टम्, तथापि श्रीमतां सर्वस्वसमयपरसमयविदां श्रीमहिमप्रभसूरीश्वरगुरूणां प्रसादावलम्बनान्ममैष उपक्रमः । अत्र हि मया अभिधानचिन्तामणिः हैमोऽनेकार्थः हैमशेषकोशः महीपकोशः अनेकार्थध्वनिमञ्जरी नानाविधैकाक्षरकोशः शब्दरत्नाकरनाम शब्दप्रभेदः हैमलिङ्गानुशासनं हैमबृहद्वृत्तिः धातुरत्नाकरवृत्तिरित्यादिग्रन्था यथामति स्मृताः । अतो ह्यल्पकमतिना विभ्रमो न कार्यः । सुधिया तु स्खलतां विहाय शोध्यः । तत्र तावच्छब्दबुद्धिस्मृतये किञ्चिच्छब्दविवेको लिख्यते—

आश्लेषा हस्ता श्रवणा तिथिः तारा स्वातिरेते शब्दाः पुंस्त्रीलिङ्गाः तारकं त्रिलिङ्गः । उडुः स्त्री क्लीबलिङ्गः । अश्वयुक् स्त्रीलिङ्गः । मृगशिरः पुंक्लीबलिङ्गः शतभिषक् जातः स्त्रीलिङ्गः पौष्णे ज्योतिषे क्लीबे रूढम् । मासः ।

* * * *

अथ प्रथमं नवधा मानमाह—सौरमिति । सौरं सूर्यसम्बन्धि मानम् । चकारः समुच्चयार्थः । सावनकं तदेव सूर्यसम्बन्धि अयनांशसहितं मानम् । ऐन्दवं चन्द्रसम्बन्धि मानम् । आर्क्षं भसम्बन्धि मानम् ।

* * * *

अथ त्रिंशद्दिनैस्सूर्यस्य मासस्स्यात्तया तेन षण्मासेन देवानां दिनम् । तैस्त्रिंशन्मितैर्दिनैर्मास इत्यादि । एवं सर्वेषामपि स्वकीयमानेन ज्ञेयम् ।

* * * *

अत्रोदाहरणम्—यथा शाको १६२२ द्विस्थाने स्थाप्यः । उपरि सप्तभिर्गुणिते जातं ११४३१. पश्चादधःस्थापितशाकः विंशत्या गुणितः ३१६६०. तदा एवं जातः एनं षष्ट्या विभज्य लब्धे ९४४२०. सप्तघ्नशाके संयोज्य जातं ११९७५ । २०.

* * * *

**Colophon:**

इति श्रीपौर्णमीयगच्छाधिराजभट्टारकपुरन्दरश्रीमहिमप्रभसूरीश्वरचरणसरोरुहचञ्चरीकायमाणभावरत्नविरचितायां कालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकायां मानाध्यायः प्रथमः ॥

* * * *

गच्छे श्रीमहिमप्रभाख्यसुगुरोः श्रीपौर्णमीयाभिधे
शिष्यस्सूरिवरस्य माण्डणसुतो यो भावरत्नाह्वयः ।
प्राग्वाटकुलसमुद्भवस्स कृतवाञ्छ्रीपत्तने पत्तने
छन्दो व्याकरणाभिधास्मरणतोऽलङ्कारयुक्तामिमाम् ॥

* * * *

**Colophon:**

इति श्रीज्योतिर्विदाभरणस्य सुखबोधिकायां राजसभाध्यायो दशमः ॥

**End:**

अथ राजसभामाश्रित्य प्रयाणं स्यादतो वंशस्थेन प्रयाणाध्यायसन्धानमाह—अथेति । अथानन्तरं किलेत्यवधारणे बृहत् प्रौढम् । समं तुल्यं न्यूनाधिकविकल्पमित्यर्थः । मितं लघु । इति त्रिविधप्रयाणं भवेत् ।

* * * *

यस्मिन्मासि दिने वर्षे ग्रहशुद्धिः प्रदृश्यते ।
तत्रोद्वाहं शुभं प्राहुरब्दशुद्धिरकारणात् ॥
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशवर्षा भवेत्कन्या द्वादशे तु रजस्वला ॥
प्राप्ते चैकादशे वर्षे . . . . . . . . ।

---

## R. No. 2524.

Paper. $9\frac{3}{4} \times 5\frac{1}{4}$ inches. Foll. 7. Lines, 18 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

चमत्कारचिन्तामणिः, हिन्दीव्याख्यासहितः.

CAMATKĀRACINTĀMAṆIḤ WITH HINDI COMMENTARY.

A treatise on horoscopy describing the nature of the influence exerted by the planets on the fortune of a person as ascertainable from the relative positions they occupy in his horoscope.

Contains the following topics :—

१. सूर्यलाभफलम्.
२. चन्द्रलाभफलम्.
३. भौमलाभफलम्.
४. बुधलाभफलम्.
५. गुरुलाभफलम्.
६. शुक्रलाभफलम्.
७ शनिलाभफलम्.
८. राहुलाभफलम्.
९. केतुलाभफलम्.

Complete.

Name of the scribe : Munimāyasāgara. Date of copying : Thursday, the 6th day of the bright fortnight of the Caitra month in Saṁvat 1788.

**Beginning :**

न चेत्खेचराः स्थापिता किं भचक्रे न तेभ्योऽष्टगाः स्थापिताः किं ग्रहेन्द्रैः ।
अलाभादितः स्पष्टता कोऽत्र हेतुः फलैरेव सर्वं ब्रुवे तानि तस्मात् ॥

* * * *

तनुस्थो रविस्तुङ्गयष्टिर्विधत्ते मनस्सन्तपेद्दारदायादवर्गात् ।
वपुः पीड्यते वातपित्तेन नित्यं स वै पर्यटन् ह्रासवृद्धिं प्रयाति ॥
धने यस्य भानुस्स लाभाधिकस्स्याच्चतुष्पद् सुखं सद्व्यये स्वत्वयाति ।
कुटुम्बेकलिङ्गायिते जाययादि क्रिया निष्फलाङ्गानुरालस्यहेतो (?) ॥

* * * *

**Colophon :**

इति श्रीसूर्यभावफलम् ॥

**End :**

दधीचे पुरे खेटहारात्पुराणां गणाच्छ्रीहरस्स्थापितः स्थानपालाः ।
द्विजौ चित्स्करासुन्दरालश्च जन्म नृपाणामृषिर्नाम चिन्तामणीयः ॥
त्रिषष्ठायलाभे विधुर्दुर्जनेन सहस्राणि रिष्टानि नश्यन्ति सम्यक् ।
असद्भावगे युग्मबालानुजातो जनः केवलं राहुणा भूमिपालः ॥

* * * *

**Colophon :**

इति श्रीचमत्कारचिन्तामणी [काव्य] सम्पूर्णा ॥

---

R. No. **2525.**

Paper. 9¼ × 4¼ inches. Foll. 3. Lines, 9 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

Foll. 1a and 3b are left blank.

अर्धोदयपूजादानविधिः.

ARDHŌDAYAPŪJĀDĀNAVIDHIḤ.

On details connected with the gifts to be made and the worship to be conducted on the important occasion of Ardhōdaya, viz., the newmoon day of the Pauṣa or Māgha month coinciding with Sunday, Śravaṇa-nakṣatra and Vyatīpāta Yōga—vide No. 3099 of the D.C.S. MSS., Vol. VI.

Complete.

At the end the following date is given which is probably the date of copying:—Wednesday, the 3rd of the bright fortnight of the Pauṣa month in 1771.

**Beginning:**

प्रभासखण्डे अर्धोदयपूजनदानविधिर्लिख्यते—

पौषमाघस्यामावास्या सूर्यश्रवणसंयुता ।
व्यतीपातो भवेद्यत्र स वा अर्धोदयः स्मृतः ॥
निश्यर्धोदयसंज्ञस्तु महानर्धोदयो दिवा ।
दिवा वा यदि वा रात्रौ यदा अर्धोदयो भवेत् ॥
तदैव पुण्यकालस्स्यान्नात्र कार्या विचारणा ।
सर्वं गङ्गासमं तोयं सर्वे व्याससमा द्विजाः ॥
बालो वृद्धो जडो धीमान्न प्रत्याख्येयाः प्रयत्नतः ।
ग्रहणं कोटिसूर्यस्य चन्द्रस्य दश कोटयः ॥
अर्धोदयशतांशेन न समं पुण्यमेतयोः ।

• • • •

तत्र दानविधिं वक्ष्ये वित्तशाठ्यविवर्जितम् ।
चतुःषष्टिपलं कांस्यमय वा द्वात्रिंशकं भवेत् ॥
न न्यूनं षोडशपलात्कार्यं पात्रं प्रयत्नतः ।
कर्षमात्रं सुवर्णं वा तदर्धं वा तदर्धतः ॥

**End:**

न हि नित्यं हि संवासः कस्य चित्केन चित्सह ।
दत्वा दानं च विप्राय अष्टौ पादाननुव्रजेत् ॥
आशिषं प्रतिगृह्याथ ब्राह्मणं च विसर्जयेत् ।

**Colophon:**

इति प्रभासे अर्धोदयविधिस्समाप्तः ॥

अद्य सुवर्णपायसादिपात्रदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं यथा नामगोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे ।

---

R. No. 2526.

Paper. 9¾ × 5¼ inches. Foll. 10. Lines, 16 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

Fol. 1*a* is left blank.

## त्रिपुरसुन्दरीस्तोत्रम्, सव्याख्यानम्.

## TRIPURASUNDARĪSTŌTRAM WITH COMMENTARY.

Same text as that described under R. No. 2500 ante, but the commentary herein is different and is by Haridāsa, son of Viṣṇudāsa. This commentary is called Mantrarājārthadīpikā. It is stated in the introduction of the commentary that the text was the inspired production of an uneducated lad of eight years.

Complete.

Date of copying: Sunday, the 10th day of the dark fortnight of the Vaiśākha month in Saṁvat 1836.

**Beginning:**

(व्या) श्रीमन्मदनगोपालं नत्वा तत्त्वार्थदायकम् ।
सर्वविघ्नापहन्तारं दातारं सर्वसम्पदाम् ॥
विष्णुदासतनूजेन हरिदासेन धीमता ।
विरच्यते यथाबुद्धि मन्त्रराजार्थदीपिका ॥

स्वसभायामुपविष्टेन केनचिद्राज्ञा दूरदेशान्तरागतः सर्वशास्त्रज्ञः पण्डितः विद्याविशेषोत्कर्षं पृष्टः । शीर्षे स्वहस्तकमलविन्यास[माज्ञा]मात्रेण सर्वथा निरक्षरस्यापि शिशोर्गङ्गातरङ्गानुसारिणीं तात्कालिकामिनवकाव्यकर्तव्यतामाह । ततश्च सद्यो भूपभ्रूक्षेपचालनेन राजपुरुषैरुपाहृतः अष्टमवर्षदेशीयो बालकः संस्नाप्य वस्त्रालङ्कृतः पुरस्तादुपवेश्य मस्तके दक्षिणहस्तं दत्त्वा वदेति विदुषा राज्ञे भाषितः । अनेन कर्मक्षमां मन्त्रगर्भामैन्द्रस्येवेत्येकविंशतिकाव्यमयीं नवकोटिकात्यायनीस्तुतिं व्याजहार तस्य च स्तुतो मन्दमतित्वादनुकम्पया (!) । टीकान्तरमवलोक्य यथामति वयं हरिदासपण्डिताः कुर्मः ।

(मू) ऐन्द्रस्येव शरासनस्य दधती मध्येललाटं प्रभां
शौक्लीं कान्तिमनुष्णगोरिव शिरस्यातन्वती सर्वतः ।
एषासौ त्रिपुरा हृदि द्युतिरिवोष्णांशोः सदाहा स्थिता
छिन्द्यान्न(ह)स्सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी ॥

(व्या) ऐन्द्रस्येति । एषासौ बुद्धौ प्रत्यक्षा प्रत्यक्षरूपा त्रिपुरा देवी त्रिभिः पदैर्विशेषणैः सहसा शीघ्रमेव वो युष्माकमघं पापं च्छिन्द्यात् विनाशयेत् । त्रीणि पुराणि नगराणि यस्याः सा स्वर्गे मर्त्ये पाताले चेत्यर्थः ।

**End:**

(व्या) सावद्यमिति ।

(मू) सावद्यं निरवद्यमस्तु यदि वा किं वानया चिन्तया
नूनं स्तोत्रमिदं पठिष्यति जनो यस्यास्ति भक्तिस्त्वयि ।
सञ्चिन्त्यापि लघुत्वमात्मनि दृढं संजायमानं
हठात् त्वद्भक्त्या मुखरीकृतेन रचितं यस्मान्मयापि ध्रुवम् ॥

इदं स्तोत्रं सावद्यं सदोषमस्तु । यदि वा यद्वा निरवद्यं निर्दोषमस्तु । अथवानया चिन्तया किं कोऽत्र परमार्थः ।

• • • •

त्वद्भक्त्या मुखरीकृतेन भक्तिरसचलाद्वाचालेन कथंभूतं लघुत्वं सञ्जायमानम् उत्पद्यमानम् । न खलु भगवतीस्तुतिकरणे मम शक्तिसमुल्लासः । किन्त्वद्भुतपरमानन्दन(र)सपरवशेन मया देवी स्तुतेत्यर्थः ॥

**Colophon:**

इति श्रीमिश्रहरिदासविरचिता मन्त्रराजार्थदीपिका समाप्ता ॥

---

R. No. 2527.

Paper. $9\frac{1}{2} \times 5\frac{3}{4}$ inches. Foll. 13. Lines, 8 in a page. **Dêvanâgarî.** Good.

Purchased in 1917–18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

Foll. 1*a* and 13*b* are left blank.

**दण्डकम्.**

DAṆḌAKAM.

Gives certain Mantras taken from the Vâjasanêyasamhitâ of the White Yajurvêda. These Mantras relate to—

| | |
|---|---|
| सप्ति(मित्)होमः. | वेदादिस्थापनम्. |
| नवग्रहप्रत्यधिदेवतास्थापनम्. | पूर्णाहुतिः. |
| पञ्चलोकपालस्थापनम्. | वैश्वानरस्तुतिः. |
| नक्षत्रस्थापनम्. | अमृताभिषेकः. |

Complete in three Adhyāyas.

**Beginning:**

पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्र पूतस्ययत्कामः पुने तच्छकेयम् । चित्पतिर्मापुनातु ।

* * * *

**Colophon:**

इति प्रथमोऽध्यायः ।

* * * *

**Colophon:**

इति सप्ति(मित्)होमः द्वितीयोऽध्यायः ॥

**End:**

तिष्ठ ब्रह्मणस्पते देवयन्तस्तेमहे उत्प्र(पप्र)यन्तु मरुतः सुदानव इन्द्र प्राशूर्ध्व(र्भ)वा सच । गच्छ गच्छ सुरश्रेष्ठ मात्म संसारवाहनम् । गच्छ ब्रह्मादयो देवा आगच्छन्तु हुताशनम् ॥

**Colophon:**

इति श्रीदण्डकं समाप्तम् ॥

---

R. No. 2528.

Paper. $9\frac{1}{2} \times 5$ inches. Foll. 24. Lines, 10 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

वाक्यसुधा, सटीका.

VĀKYASUDHĀ WITH COMMENTARY.

This is the text written by Śaṅkarācārya, of which a commentary is described under R. No. 1357 ante. The commentary herein is different and the name of the commentator is not given.

Complete.

**Beginning:**

नमो रामाय देवाय सच्चिदानन्दमूर्तये ।
कृष्णाय गुरवे . . . शङ्कराचार्यमूर्तये ॥
नामरूपात्मविश्वाख्यपङ्को यत्राम्र ईक्ष्यते ।
तद्वाक्यसुधयाऽऽप्लाव्य निष्पङ्कं तत्त्वमीक्ष्यताम् ॥
पदार्थबुद्धिर्वाक्यार्थज्ञानहेतुरिति स्थितेः ।
आदौ पदार्थबुद्ध्यर्थः परिच्छेदः प्रवर्तते ॥
वाक्यं तत्त्वमसीत्यादि पृथक् ब्रह्मैक्यबोधकम् ।
त्वं पदार्थ इह प्रत्यक् तत्पदार्थो महेश्वरः ॥

तत्रादौ वाक्यसुधाख्यं प्रकरणमारभमाणो भगवान् भाष्यकारस्त्वम्पदार्थं व्युत्पादयति । रूपं दृश्यमित्यादिभिः पञ्चभिः श्लोकैः । तत्राद्योऽयं वस्तुसङ्ग्रहश्लोकः—

(मू)—

रूपं दृश्यं लोचनं दृक् तद्दृश्यं दृक् (दृक्तु)मानसम् ।
दृश्या धीवृत्तयस्साक्षी दृगेव न तु दृश्यते ॥

रूपं नीलपीतादि यत्प्रसिद्धं तद्दृश्यं दृश्य दृष्टिवृत्तिव्याप्यमित्येतदविवादमित्यर्थः । का पुनः सा दृग्यया रूपं व्याप्यते इत्यपेक्षायामाह—लोचनं दृगिति । यल्लोचनं नेत्रेन्द्रियं सा दृगित्येतदपि प्रसिद्धमेव। नेत्रान्वयव्यतिरेकानुविधायित्वाद्रूपज्ञानस्येत्यर्थः । एतावता पुत्र आत्मा जायात्मेत्याद्यतिप्रकृतात्मदृष्टिर्बाह्यविषयाभिनिविष्टा प्रच्याविताः । तेनैव देहात्मबुद्धिरपि व्युदस्ता ।

**End:**

एवमात्मधर्माणामध्यारोपमुपपाद्यापवादप्रकारमाह—

प्रातिभासिकजीवस्य लये स्युर्व्यावहारिके ।
तल्लये सच्चिदानन्दाः पर्यवस्यन्ति साक्षिणि ॥

सुषुप्तिमोक्षयोः क्रमेण लीयमानप्रातिभासिकव्यावहारिकजीवगताः सच्चिदानन्दाः साक्षिशब्दनिर्दिष्टे प्रत्यक् ब्रह्मणि पर्यवस्यन्ति । शैत्यादय इव फेनतरङ्गगतास्तयोर्लये समुद्रे नान्यत्र ते सन्तीत्यर्थः ॥

**Colophon:**

इति वाक्यसुधाप्रकरणटीका समूलं समाप्तम् ॥

The scribe adds—

भाद्रपदमासे कृष्णपक्षे तिथावेकादश्यां रविवारादिसंयुतायां वर्षे १८२३ सम्पूर्णतामगात् ॥

---

R. No. 2529.

Paper. 8¼ × 5 inches. Foll. 11. Lines, 18 in a page. Dēvanāgarī. Good.

Purchased in 1917-18 from M.R.Ry. Bhajan Lal, book-seller, Amritsar, Punjab.

Fol. 1*a* is left blank.

जीवत्पितृकविभागव्यवस्थासारसङ्ग्रहः.

JĪVATPITṚKAVIBHĀGAVYAVASTHĀSĀRASAṄGRAHAḤ.

A treatise explaining the principles governing the mode of division by a father, while living, of his self-acquired and ancestral property among his sons. By Madhusūdana, a Brahman of Sārasvata class and son of Vrajarāja Gōsvāmin of Lavapura (Lahore). The author states that this is a summary of his bigger work on the subject, viz., Jīvatpitṛkavibhāga.

Contains the following subjects:—

१. स्वार्जितविभागव्यवस्था.

२. पितृकृतपैतामहधनविभागव्यवस्था.

Complete.

**Beginning:**

श्रीव्रजराजं पितरं नत्वा मधुसूदनेन या पूर्वम् ।
जीवत्पितृकविभागे धर्म्या रीतिर्यथाशास्त्रम् ॥
संक्षेपेण निबद्धा तस्या अपि सारसङ्ग्रहः क्रियते ।
सुखबोधाय नराणां . . . . मधुसूदनेनैव ॥
तत्र प्रमाणयुक्तीनां जिज्ञासा स्याद्यदा तदा ।
जीवत्पितृकविभागे द्रष्टव्यं मत्कृते सर्वम् ॥

तत्र प्रथमं जीवता पित्रा कर्तव्यः स्वार्जितविभागः स्थावरास्थावरसाधारणस्वार्जितविभागे पितैव प्रभुः । तत्र पिता स्वयं यावदधिकमिच्छति तावदेवार्धमर्धतोऽप्यधिकं वा गृहीत्वा चतुर्थाश्रममङ्गीकृत्य सर्वस्वधनमगृहीत्वा वा स्वभक्ताय ज्येष्ठाय मानवर्धिने किंचिदधिकं दत्वा शेषं सर्वं सर्वेभ्यस्समेभ्यः स्वपुत्रेभ्यस्समं विभजेत् ।

**Colophon:**

इति श्रीलवपुरवासिसारस्वतवंशावतंससकलशास्त्ररहस्याभिज्ञश्रीगोस्वामिव्रजराजात्मजेन गोस्वामिमधुसूदनशर्मणा विरचितः स्वार्जितविभागव्यवस्थासारसङ्ग्रहः.

**End:**

जामातुः पूर्वपत्न्यां मृतायां पुनर्विवाहितायां पत्न्यामेकः पुत्रो जातस्तदापि तस्यां भूमौ जामातुरेव स्वामित्वं न तु दौहित्रैस्सा भूमिः परावर्तयितुं शक्यते। जामातुर्मरणानन्तरं चोभयपत्नीगर्भजानां पुत्राणां तत्र तुल्योऽधिकारः एवं स्थावरेतरधनेऽपि व्यवस्था।

**Colophon:**

इति श्रीलवपुरवासिसारस्वतवंशावतंससकलशास्त्ररहस्याभिज्ञश्रीगोस्वामिव्रजराजात्मजेन गोस्वामिमधुसूदनशर्मणा विरचितः पितृकृतपैतामहधनविभागव्यवस्थासारसङ्ग्रहः ॥ समाप्तश्चायं जीवत्पितृकविभागव्यवस्थासङ्ग्रहः ॥

संवत् १९२०.

---

## R. No. 2530.

Palm-leaf. 17 × 1½ inches. Foll. 122. Lines, 7 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. P. Veṅkaṭācāryar of Vijayarāyi, Kistna district.

(a) परमवैदिकसिद्धान्ततत्त्वरत्नाकरः.

PARAMAVAIDIKASIDDHĀNTATATTVARATNĀKARAḤ.

Foll. 1a—115b

A treatise establishing the superiority of Viṣṇu over other gods and justifying the customs and sacraments relating to Śrī-Vaiṣṇavism in accordance with the Viśiṣṭādvaita Vēdānta. The genealogy containing the names of the important Śrī-Vaiṣṇava teachers is given in the beginning. The author is apparently a disciple of Śrinivāsa of Prativādibhayaṅkara family.

Complete.

Contains the following Taraṅgas:—

१. परतत्त्वनिर्णयः.

२. श्रुतिस्मृतिपुराणागमादिसङ्कुचानामबोधकसात्त्विकादिविभागप्रमाणम्.

३. शिष्टजनानुष्ठितसदाचारप्रमाणम्.

४. सर्वजगत्कारणत्वोपास्यत्वमोक्षप्रदत्वादिरूपासाधारणधर्मविशिष्टश्रियःपतिप्रतिपादकप्रमाणम्.

५. ब्रह्मरुद्राद्युत्पत्त्यादिबोधकप्रमाणम्.

६. ब्रह्मरुद्राद्युपासकजनस्य लब्धफलबोधकप्रमाणम्.

७. सात्त्विकराजसतामसविभागजनकप्रमाणम्.

८. असुरजनमोहनहेतुकतामसराजसपुराणाद्युत्पत्तिहेतुकप्रमाणम्.

९. असुरजनमोहनहेतुकजगत्कृतकलाविशेषबोधकप्रमाणम्.

१०. आपत्कालिकसर्वदेवकर्तृकरुद्राश्रयणादिशङ्कापरिहारः.

११. श्रीविष्णुपरत्वाङ्गीकारानन्तरकालावश्यकर्तव्यधर्मबोधकप्रमाणम्.

१२. दशविधवैष्णवविशेषलक्षणादिप्रमाणकथनम्.

१३. गोभूदानादिप्रतिग्रहार्हसत्पात्रनिर्णयप्रमाणम्.

१४. श्रीभगवदवतारजयन्त्येकादशीनिर्णयादिबोधकप्रमाणम्.

१५. तप्तशङ्खचक्राद्यङ्कनधारणविषयकप्रमाणम्.

१६. अनन्यश्रीविष्णुभक्तब्राह्मणाद्यावश्यकीभूतहरिद्राचूर्णसहितश्रीहरिक्षेत्रस्थश्वेतमृद्वल्मीकहरिपादाकृतिच्छिद्रोर्ध्वपुण्ड्रधारणप्रतिपादकश्रुतिस्मृतिपुराणागमादिरूपप्रमाणम्.

१७. परमवैदिकश्रीवैष्णवलब्धमोक्षस्थानभूतपरमपदनिरूपकप्रमाणम्.

१८. शैवपाशुपतजैनादिमतविहिततिर्यक्पुण्ड्रधारणतन्निषेधादिबोधकप्रमाणम्.

**Beginning:**

श्रीपतिं पद्मजाराध्यमिक्ष्वाकुकुलदैवतम् ।
पूर्वदेशिकनिक्षेपं वन्दे श्रीरङ्गनायकम् ॥
अहमेव परं तत्त्वमिति तत्त्वप्रकाशकम् ।
श्रीहस्तिगिरिनाथं तं वन्दे वरदराड्विभुम् ॥
श्रीमच्छेषाचलावासं शेषाभीष्टफलप्रदम् ।
वन्दे ह्यस्मत्कुलाधीशं श्रीनिवासं जगद्गुरुम् ॥
श्रीनिधिः करुणाम्भोधिर्दिव्यसौन्दर्यवारिधिः ।
श्रीयादवाद्रिनाथो नस्सम्पत्पुत्रस्सदावतु ॥
विष्णुचित्तात्मजां गोदां गोपिकाचरितप्रताम् ।

श्रीरङ्गराजमहिषीं वन्दे श्रियमहर्निशम् ॥
विष्वक्सेनांशसंभूतं कुरुकापुरनायकम् ।
वन्दे द्राविडवेदान्तकर्तारं शठशासकम् ॥
श्रीमद्रामानुजगुरुं श्रीभूतपुरनायकम् ।
वन्दे शेषांशसम्भूतं श्रीशतत्त्वप्रकाशकम् ॥
श्रीशैलनाथपादाब्जभृङ्गं यतिशिखामणिम् ।
रामानुजांशसम्भूतं वन्दे वरवरं मुनिम् ॥

इत्यच्युतश्रीशठकोपयतिवरवरमुन्यस्मदाचार्यस्तुतिः । अथ ग्रन्थादिमङ्गलाचरणश्लोकाः—

श्रीनिवासं दयावासं श्रितसर्वार्थदायिनम् ।
सर्वकारणकर्तारं सेवेऽहं सेव्यमच्युतम् ॥
श्रीशं श्रियं च सेनेशं शठकोपगुरुं भजे ।
नाथपद्माक्षरामांश्च यामुनं पूर्णलक्ष्मणौ ॥
गोविन्दभट्टवेदान्तिकलिजित्कृष्णनामकान् ।
लोकार्यशैलनाथार्यवरयोगिमुनीन् भजे ॥
वरयोग्यादयो ये च ये च श्रीवत्सवंशजाः ।
तान् सर्वदेशिकान् सेवे श्रीनिवासावधीनहम् ॥
श्रीवत्सवंशतिलकं श्रितपारिजातं
श्रीदेवराजसुतवन्दितपादपद्मम् ।
तत्पुत्रसेवितमुखाम्बुरुहं शरण्यं
श्रीश्रीनिवासगुरुवर्यमहं भजामि ॥

अथ परतत्त्वनिर्णयनामकप्रथमतरङ्गः—एतद्ग्रन्थसारांशश्लोकषट्कः ।

य एव हि परं तत्त्वं मोक्षदातेति गीयते ।
स वै सद्भिरुपास्यो हि तर्तुं संसारसागरम् ॥
तदाराधनकर्माणि तद्ध्यानादिक्रियास्तथा ।
कर्तव्यास्तत्कृपाप्त्यर्थं वर्णाश्रमविधानतः ॥
तस्य चिह्नानि धार्याणि तद्रूपप्राप्तये सदा ।
श्रुतिस्मृतिपुराणादिप्रसिद्धानि हि नित्यशः ॥

श्रीशस्स एव परमशिष्टाचारप्रमाणतः ।
स एव कर्मस्वध्यक्षः जगत्स्थित्यन्तहेतुकः ॥
उपास्यस्सर्वजगतां ब्रह्मरुद्रेन्द्रनायकः ।
मोक्षप्रदश्च सर्वेषां परमव्योम्नि संस्थितः ॥
ब्रह्मरुद्रादयो देवा ह्यनुपास्या मुमुक्षुभिः ।
न हि मोक्षार्थदातारः किन्तु त्रैवर्गिकास्सदा ॥
श्रीविष्णुबोधका ये तु श्रुतिस्मृत्यागमादयः ।
ते शुद्धास्सात्त्विकाः प्रोक्ता मुमुक्षुजनसेविताः ॥
धर्मादिबोधका ये तु श्रुतिस्मृत्यागमादयः ।
रजोगुणप्रधानास्ते ह्युपेक्ष्या वै मुमुक्षुभिः ॥
रुद्रादिबोधका ये तु श्रुतिस्मृत्यागमादयः ।
तमोगुणप्रधाना हि परित्याज्या मुमुक्षुभिः ॥
तस्माच्छ्रीशकृपाप्त्यर्थं शङ्खचक्रादिलाञ्छनम् ।
विप्रराजन्यविट्शूद्रैर्धार्यं छिद्रोर्ध्वपुण्ड्रकम् ॥
भस्मरुद्राक्षलिङ्गाद्या न धार्या ब्राह्मणैस्सदा ।
वैष्णवैश्च विशेषेण कष्टे प्राप्तेऽपि दुर्लभे ॥
भस्मरुद्राक्षलिङ्गाद्यास्सदा धार्या शिवद्विजैः ।
जैनैः पाशुपतैश्शैवैश्शाक्तैः कापालिकैस्तथा ॥
इत्याद्यर्थास्सप्रमाणास्सदाचार्यप्रमाणतः ।
वर्ण्यन्तेऽत्र मया पूर्वदेशिकोक्तिमनुस्मृता ॥
अनन्तशास्त्रसारार्थमेकीकर्तुं समुद्यतः ।
साहसं तु मम श्रीशः पितेव क्षन्तुमर्हतु ॥
परमवैदिकसिद्धान्ततत्त्वरत्नाकरे ह्यमी ।
परत्वनिर्णयाद्याश्च तरङ्गास्सम्भवन्ति हि ॥
पुराणस्मृतिगीतादिसङ्ग्रहया दश चाष्टकम् ॥
तरङ्गास्तु समुद्भूताः श्रीशतत्त्वमहाम्बुधेः ।

इति ग्रन्थसारांशस्समाप्तः ॥

अथ निर्विशेषचिन्मात्रं ब्रह्म ब्रह्मरुद्रादिपरत्वनिरसनपूर्वकश्रियःपतिपरत्वनिर्णयसमर्थनघट्टः—

श्रीमाध्वादिपूर्वाचार्यकृतग्रन्थेषु निर्विशेषचिन्मात्रवादिमतादिनिरसनपूर्वकश्रीविष्णुपरतत्त्वस्य शतसहस्रप्रमाणतस्सिद्धान्तितत्वात्स एवार्थोऽत्र सङ्क्षेपेण तत्तन्मतनिरसनपूर्वको निर्णीयते । केचन निर्विशेषचिन्मात्रमेव परं ब्रह्मेति वदन्ति । केचन ब्रह्मरुद्रादयः परं तत्त्वमिति वदन्ति । एते सर्वे अखिलवेदवेदान्ताः निर्विशेषचिन्मात्रब्रह्मचतुर्मुखरुद्रपरा इति । तस्मात्त एव परं तत्त्वमिति यद्वदन्ति तदयुक्तम् । तथा हि —

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥ इति ।

ओमित्येकाक्षरं ब्रह्मेति । ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्निति । ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधस्स्मृतः । यस्तं वन्दे विष्णुमोङ्कारवाच्यमित्यादिप्रमाणैः प्रणवशब्दवाच्यो हरिः । तत्प्रतिपादकहरिशब्दः सर्ववेदोपक्रमोपसंहारकाले प्रणवेन समानाधिकरणतया सहोच्चार्यमाणस्सन् नारायणपरा वेदा नारायणपरा मखा इत्यादिभिः सर्वे वेदा श्रीहरिप्रतिपादका इति वदन्ति । अत एव

वेदाक्षराणि यावन्ति पठितानि द्विजोत्तमः ।
तावन्ति हरिनामानि कीर्तितानि न संशयः ॥ इति ।

वेदाक्षराणि हरिनामान्येव एतस्मिन्नर्थे संशयो न कर्तव्य इत्युक्तम् । न तु निर्विशेषचिन्मात्रब्रह्मचतुर्मुखरुद्रनामानीत्युक्तम् । हरिशब्दः ब्रह्मरुद्रादिपर इति ।

* * * *

**Colophon:**

इति श्रीपरमवैदिकसिद्धान्ततत्त्वरत्नाकरे परतत्त्वनिर्णयनामकप्रथमस्तरङ्गः ॥

**End:**

ब्रह्मशब्दवाच्यः श्रियःपतिरिति स एवोपास्य इति । तदधिदेवताकश्रुतिस्मृत्याद्युक्तहरिद्राचूर्णसहितश्वेतमृत्स्नाचितच्छिद्रोर्ध्वपुण्ड्रतप्तशङ्खचक्राङ्कनादियुक्तानां सर्वचेतनानां तदुपासकानां जगद्व्यापारपुनरावृत्त्यादिरहितमोक्षपरमसाम्यापत्तिरित्ययमेव परमवैदिकसिद्धान्त इति राद्धान्तितः । उपक्रमितार्थश्चोपसंहृतः सर्वं समञ्जसम् ॥

श्रीरामानुजगुरुं श्रीभूतपुरनायकम् ।
वन्दे शेषांशसम्भूतं श्रीशतत्त्वप्रकाशकम् ॥

**Colophon** :

इति श्रीपरमवैदिकसिद्धान्ततत्त्वरत्नाकरे शैवपाशुपतजैनादिमतजनविहि-
ततिर्यक्पुण्ड्रधारणतन्निषेधादिबोधकप्रमाणाख्यो ष्टादशस्तरङ्गस्समाप्तः ॥
समाप्तोऽयं ग्रन्थः ॥

Foll. 116—118 give the contents of the work.

---

(*b*) गुरुपरम्परा.

GURUPARMPARĀ.

Foll. 119*a*—121*b*. Fol. 122*a* contains a stanza which Aṇṇan used to write in his letters. Fol 122*b* is left blank.

Gives the genealogy of the Gurus or spiritual teachers of the Prativādibhayaṅkara family beginning with Śrinivāsaguru.

Complete.

**Beginning** :

श्रीवत्सवंशकलशाम्बुधिपूर्णचन्द्रं श्रीश्रीनिवासगुरुवर्यतनूजरत्नम् ।
तत्पादपङ्करुहसंश्रयणात्तबोधं श्रीवेङ्कटार्यगुरुमन्वहमाश्रयामः ॥
श्रीवत्सवंशसरसीरुहतिग्मभानुं श्रीवेङ्कटार्यतनयं श्रितपारिजातम् ।
श्रीमच्छठारिगुरुवर्यपदाब्जभृङ्गं श्रीश्रीनिवासगुरुमन्वहमाश्रयामः ॥

**End** :

श्रीवादिभयकृत्पौत्रतत्पादाब्जनिषेवणम् ।
अनन्तार्यगुरोः पुत्रं रामानुजगुरुं भजे ॥

---

R. No. 2531.

Palm-leaf. 17½ × 1¾ inches. Foll 44. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1917-18 from M.R.Ry. P. Veṅkaṭācaryar of Vijayarāyi, Kistna district.

(*a*) अलङ्कारसङ्ग्रहः.

ALAṄKĀRASAṄGRAHAḤ.

Foll. 1*a*—25*a*. Foll 25*b* and 26*a* contain Aṣṭadalapadmabandhōddhāraślōkas. Fol. 26*b* is left blank.

A brief treatise on poetics and rhetoric.

Contains the following Prakaraṇas :—

१. नायकप्रकरण.
२. काव्यप्रकरण.
३. नाटकप्रकरण.
४. रसप्रकरण.
५. दोषप्रकरण.
६. गुणप्रकरण.
७. शब्दालङ्कार.
८. अर्थालङ्कार.
९. मिश्रालङ्कार.

**Beginning:**

रसप्रधानाश्शब्दार्था गुणालङ्कारवृत्तयः ।
रीतयश्चेयती शास्त्रप्रमेयं काव्यपद्धतिः ॥

महाकुलीनत्वादिनायकगुणाः—

महाकुलीनतौज्ज्वल्यं माहाभाग्यमुदारता ।
तेजस्विता विदग्धत्वं धार्मिकत्वादयो गुणाः ॥

तदेषां स्वरूपम्—

महाकुलीनता नाम कुले महति सम्भवः ।
रूपसम्पन्नदेहत्वमौज्ज्वल्यं परिकीर्त्यते ॥
विश्वम्भराधिपत्यं यत्तन्माहाभाग्यमुच्यते ।
यद्विश्राणनताच्छील्यमौदार्यं तन्निगद्यते ॥

* * * *

गुणीभूतव्यङ्ग्यं मध्यमं काव्यमष्टविधं निरूप्यते—तथाचोक्तं काव्यप्रकाशे—

अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।
सन्दिग्धतुल्यप्राधान्ये काकाक्षिप्तमसुन्दरम् ॥ इति ॥

**End:**

क्षीरनीरनयाद्यत्र सम्बन्धस्स्यात्परस्परम् ।
अलङ्कृतीनामेतासां सङ्करस्समुदाहृतः ॥

यत्र क्षीरनीरन्यायेनालङ्काराणां मिथस्सम्बन्धस्सङ्करः तस्याङ्गाङ्गिभावेन सन्देहेनैकवाचकानुप्रवेशेन च त्रैविध्यम् ॥

**Colophon:**

इति मिश्रालङ्कारः ॥

Foll. 27a—36b contain commentaries on certain select stanzas taken from standard works, such as the Kumārasambhava, the Naiṣadha, and the Kirātārjunīya, etc.

(b) चाटुश्लोकाः.

CATUŚLŌKĀḤ.

Foll. 37a—42a. Fol. 42b is left blank.

An anthological collection of witty stanzas.

Incomplete.

**Beginning:**

यन्नाभीसरसीरुहान्तरपुटे भृङ्गायमाणो विधिः
यद्वक्षः कमलाविलासभवनं यच्चक्षुषी चेन्दिनौ ।
यत्पादाब्जविनिस्सृता सुरनदी शम्भोश्शिरोभूषणं
यन्नामस्मरणं दुनोति दुरितं पायात्स वः केशवः ॥

* * * *

अथ विप्रस्तुतिः—

ये देवामृतपूर्णचन्द्रवदना ये तथ्यरत्नाकराः
यैर्मन्त्रैरभिमन्त्रितास्सुरवरास्तिष्ठन्ति दावादिषु ।
यद्वेदान्तविभूषणेन मुदितस्संशोभते श्रीपति-
स्ते कुर्वन्तु मनोरथान् द्विजगणाः पुष्णन्ति यैरेव तु ॥

**End:**

वार्ता च कौतुकवती विमला च विद्या
लोकोत्तरं परिमलं च कुरङ्गनाभिः ।
तैलस्य बिन्दुरिव वारिणि दुर्निवार-
मेतत्त्रयं प्रसरति स्वयमेव लोके ॥

Foll. 43 to 44 contain the names of certain Telugu families together with the places where they are found.

---

R. No. **2532.**

Palm-leaf. 16 × 1¾ inches. Foll. 63. Lines, 5 in a page. Telugu. Slightly injured.

Purchased in 1917-18 from M.R.Ry. P. Vĕṅkaṭācāryar of Vijayarāyi, Kistna district.

चरमोपायनिर्णयः.

CARAMŌPĀYANIRṆAYAḤ.

Foll. 1a—61b. Foll. 62 and 63 refer to some Taniyan stanzas with the names of those who composed them.

A treatise laying down in accordance with Viśiṣṭādvaita Vĕdānta that self-surrender to God is the best means of attaining salvation.

Contains the following topics :—

१. अर्चावतारोपकारकत्वम्.
२. कर्मज्ञानभक्तियोगाः.
३. आत्मापहारदोषः.
४. सदाचार्यलक्षणम्.
५. आचार्यान्तराश्रयणम्.
६. भगवन्नैवेद्यग्राह्यत्वम्.
७. दुर्जनसंसर्गवर्जनम्.

Wants eight leaves in the beginning.

**Beginning:**

(शक्ति)मानप्यशक्तो वा धनवानपि निर्धनः ।
श्रुतवानपि मूर्खश्च यो धर्मे विमुखो जनः ॥
आयुषः क्षीणमेकोऽपि न लभ्यं स्वर्णकोटिभिः ।
न वृथा यदि नीयेत कुतो हानिस्ततोऽधिकः ॥

श्रीगीतायाम्—

उद्धरेदात्मनात्मानमात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥

श्रीविष्णुपुराणे—

बाल्ये क्रीडनकासक्ताः यौवने विषयोन्मुखाः ।
अज्ञा नयन्त्यशक्ताश्च वार्धके समुपस्थिते ॥

* * * *

एवमन्यत्राप्यनेकत्र विग्रहविशिष्टस्यैव गमनागमनदर्शनपरिरम्भसंभाषणादिसंभवप्रदर्शनेन कारुण्यसौशील्यादिकल्याणगुणगणस्फुरणेन स्वसन्निधिमात्रेणैव पशुपक्षितृणतापर्यन्तस्य प्रपञ्चस्य स्वविषयप्रावण्यजननेन मुक्तिहेतुत्वाच्च स्वरूपतोऽपि रूपस्यैवोपकारकत्वं सुव्यक्तमेव । अत्र यद्यप्यविशेषेण स्वरूपतोऽपि रूपस्यैवाधिकत्वमुक्तं तथापि पर(म)व्यूहयोर्नित्यमुक्तैर्भोग्यत्वाद्विभवानां च तद्देशतत्कालवर्तिभिः कैश्चिदेवानुभाव्यत्वादन्तरात्मनश्च योगिजनमात्रगोचरत्वादर्चावतारस्यैव सुलभत्वेन सर्वाधिकारित्वमिति वेदितव्यम् । तदुक्तमाचार्यैः ।

* * * *

अस्य संश्रयणस्य सर्वाधिकारित्वं श्रुत्यैव प्रदर्शितम् । यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशतीति । सुमदिति आश्रितानुद्दिश्य सुतरां माद्यतीति वा सुमत्, यद्वा अप्रार्थितैव मदयति हर्षयति आश्रितानिति सुमत् ।

* * * *

अनेन भगवान् लक्ष्मीविशिष्ट एवोपास्य इति गम्यते । एवंभूताय विष्णवे ददातीति आत्मात्मीयं समर्पयति दाञ् दान इत्युक्तत्वात् । इदमात्मसमर्पणं सर्वाधिकारमिति तत्र प्रपञ्च्यते ।

**End:**

अल्पश्रुतानल्पमतीनल्पायुष्कांश्च मानुषान् ।
कलौ समीक्ष्य वेदानां बाहुल्यं च महामुनिः ॥
शाखासहस्रं वेदानां गाथारूपं विधास्यति ।
द्राविडब्रह्मविद्या सा तस्मात्प्रोक्ता महामुने ॥

तत्रैव—

संस्कृतश्रुतयो यद्वद्द्राविडश्रुतयस्तथा ।
नित्यास्तद्वत्प्रणीयन्ते . . . . . कलौ ॥
यो वेद्यः संस्कृतद्राविडनिगमगणैर्यो जगज्जन्महेतुं
शंसन्तो येन संक्षिप्त(क्षेपित)मिदमखिलं शेषभूतं च यस्मै ।
यस्मात्किञ्चिन्न तत्त्वं परमिति पदयोर्यस्य . . गा-
रसन्तो यस्मिन्नमन्ते स जयति जगति श्रीयुतो रङ्गधुर्यः ॥

---

R. No. 2533.

Palm-leaf. 15 × 14 inches. Foll. 83. Lines, 11 in a page. Telugu. Injured.

Purchased in 1917-18 from M.R.Ry. P. Veṅkaṭacāryar of Vijayarāyi, Kistna district.

(a) ज्यौतिषमञ्जरी.

JYAUTIṢAMAÑJARĪ.

Foll. 1a—8a.

Similar to the work described under No. 13815 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

**Beginning:**

आदौ नामनक्षत्रविवेकः—

चू चे चो ला अश्विनी । ली लू ले लो भरणी । आ ई ऊ ए कृत्तिका

* * * *

ताराबलमाह—

जन्मनक्षत्रमारभ्य नित्यभान्तं च गण्यते ।
नवसङ्ख्या हरेद्भागं नव ताराः प्रकीर्तिताः ॥

जन्मसम्पद्विपत्क्षेमप्रत्यक्साधननैधनम् ।
मित्रं परममित्रं च नव ताराः प्रकीर्तिताः ॥

* * * *

ताराबाहनफलम्—

मयूरश्च मनस्तापं हयो लाभार्थसम्पदौ ।
मेषस्तु कलहं प्रोक्तं राज्यप्राप्तिं गजस्तथा ॥
वायसः कार्यनाशं च जम्बुकस्सुखमेव च ।
सिंहो रणभयं चैव वैनतेयस्सुखं बहु ॥
हंसश्च कार्यविभ्रंशं वाहनादिफलं लभेत् ।

* * * *

सङ्क्रान्तिफलमाह—

जन्मतारादिसङ्क्रान्तिकालभान्तं विगण्यते ।
सप्तभिर्गणनं कृत्वा भागितं वसुसङ्ख्यया ॥
तच्छेषेण फलान्याहुस्सङ्क्रान्तेश्च मनीषिणः ।
रोगो लाभं तथाध्वानं बन्धनं धनमेव च ॥
ऐश्वर्यमर्थलाभं च नृपपीडा यथाक्रमम् ॥

**End:**

ग्रहगतिनिर्णयमाह—

अर्कयुक्तश्चोरितस्स्यात् द्वितीये शत्रुगो भवेत् ।
रवेस्तृतीय . . . . गति . . . चतुर्थके ॥
पञ्चमेऽप्यथवा षष्ठे किञ्चिद्वक्रा . . . . ।
सप्तमाष्टमयोर्स्थादतिवक्रगतिर्भवेत् ॥
नवमे दशमे भानोः खेटानां कुटिला गतिः ।
एकादशे द्वादशे च शीघ्रा शीघ्रतरा क्रमात् ॥
रविसंयुतखेटस्य गतिरस्ताह्वया भवेत् ॥

---

(*b*) उडुदशाप्रदीपिका.

UḌUDAŚĀPRADĪPIKĀ

Foll. 8*a*—13*b*.

Slightly different from the work described under R. No. 1618 (*b*) ante, where the work contains more than 11 Paricchēdas. Here it is stated to be complete in 11 Paricchēdas.

Contains 1—11 Paricchēdas.

**Beginning:**

पराशरमुनिं नत्वा तद्धोरांशं निरीक्ष्य च ।
वक्ष्याम्युडुदशामार्गं पूर्वशास्त्रानुसारतः ॥
सप्तविंशतितारणां दस्रादीनां पृथक् पृथक् ।
पादैश्चतुर्भि . . . . . . . . प्रतिष्ठितम् ॥
प्राक्प्राग्गतोडु चक्रं तदष्टोत्तरशताङ्घ्रिकम् ।
प्रत्यङ्मुखं चलत्येव मेरोर्नित्यं प्रदक्षिणम् ॥
नवाङ्घ्रिरूपिणस्तत्र मेषाद्या राशयस्स्मृताः ।
महास्तदीश्वरास्तैस्तु कालावस्था प्रदृश्यते ॥
भूगोले जायमानानां तत्कालोडुग्रहस्थितेः ।
गुणानुरूपवृत्तत्वं सूच्यसूचकभावतः ॥
ज्योतिश्शास्त्रे विनिश्चित्य कारिकं फलमीरितम् ।
इष्टानिष्टपरिज्ञानादनिष्टस्य प्रशान्तये ॥
इष्टसाधनसिद्ध्यर्थमुपायोऽयं प्रदर्शितः ।

* * * *

**Colophon:**

इति संज्ञापरिच्छेदः ।

**End:**

एषा मासदशा प्रोक्ता ज्योतिश्शास्त्रे कचिद्बुधैः ।
अनुक्तमन्यतो ग्राह्यं ग्रहगोचारजं तथा ॥
प्रश्नेऽपि जन्मसमये विवाहे चार्तवेऽपि च ।
प्रयाणादिषु कालेषु लग्नादेव फलं वदेत् ॥
ज्योतिश्शास्त्रानुसारेण फलविज्ञान(शालिनः) ।
बुद्धिरेव प्रसादेन दैवज्ञस्य स्फुटा भवेत् ॥

**Colophon:**

इत्युडुदशाप्रदीपिकायां मासदशादिफलकथनं नामैकादशः परिच्छेदः ॥
समाप्तोऽयं ग्रन्थः ॥

---

(e) जातकार्णवदीपिका.

**JĀTAKĀRṆAVADĪPIKĀ.**

Foll. 14a—18b.

On the influence which the planets exert on the life-incidents of a person so far as they may be judged by the relative positions they occupy in his horoscope. The author is Veṅkaṭayajvan.

Complete, dealing with the following subjects :—

| | |
|---|---|
| १. भावसाधनम्. | ६. इष्टकष्टनिर्णयः. |
| २. दृष्टिबलसाधनम्. | ७. आयुर्दायः. |
| ३. स्थानबलम्. | ८. रिष्टभङ्गः. |
| ४. दिक्कालबलसाधनम्. | ९. दशान्तर्दशासाधनम्. |
| ५. चेष्टानिसर्गाधवशिष्टबलसाधनम्. | १०. प्रकीर्णकः. |

**Beginning :**

जन्मनि प्रश्नकाले वा विवाहादिषु कर्मसु ।
छायायन्त्रोपकरणैः तत्काले तु स्फुटाङ्कने ॥
सिद्धान्तद्वयप्रकारेण ग्रहान् भावांश्च साधयेत् ।
तद्ग्रहाणां बलं ज्ञात्वा शुभपापेष्टकष्टताम् ॥
भावस्य च ग्रहस्थित्या योगेन फलमीरयेत् ।
स्फुटैरेव ग्रहैरायुर्दशाभेदं च कल्पयेत् ॥
युगपद्भिन्नहेतुभ्यां विरुद्धफलसंभवे ।
बाध्यबाधकविज्ञानं प्रकीर्णेन प्रसाधयेत् ॥
स्वदेशविषुवच्छायां तया चरविनाडिकाः ।
लङ्कोदयेषु संस्कृत्य स्वोदयानि च साधयेत् ॥
अयनांशं विनिश्चित्य सायनार्केष्टकालतः ।
स्वोदयैस्साधयेल्लग्नं स्फुटं भावांस्ततः क्रमात् ॥

अथ लग्नादिस्फुटक्रमः—

तत्कालसायनरवेः स्वोदयघ्नैष्यभागकान् ।
विभज्य त्रिंशता लब्धं विनाडीमपि शोधयेत् ॥

* * * *

**Colophon :**

इति भावसाधनं नाम प्रथमोऽध्यायः ॥

**End :**

पूर्वोत्तरशुभत्वे तु शुभमेव हि मध्यमम् ॥
पापमध्यगतं चापि पापकल्पं शुभं स्मृतम् ।

इत्येष सम्प्रदायार्थो हौरिकज्ञानसिद्धये ॥
प्रकीर्णकः प्रकथितः श्रीमद्वेङ्कटयज्वना ।

**Colophon:**

इति जातकार्णवदीपिकायां प्रकीर्णाध्यायो दशमः ॥

---

(*d*) सर्वार्थचिन्तामणिः.

SARVĀRTHACINTĀMAṆIḤ.

Foll. 18*b*—22*b*.

Same work as that described under R. No. 912 (*c*) *ante*. By Veṅkaṭēśa, son of Appayārya.

Contains the Saṁjñādhyāya complete.

---

(*e*) जातकचन्द्रिका.

JĀTAKACANDRIKĀ.

Foll. 23*a*—24*b*.

Complete.

Same work as that described under No. 13676 of the D.C.S. MSS., Vol. XXIV, but with the colophon:

इति श्रीपराशरहोरायां जातकचन्द्रिका समाप्ता ॥

---

(*f*) सामुदायिकफलनिर्णयः.

SĀMUDĀYIKAPHALANIRṆAYAḤ.

Fol. 25.

Similar to the work described under No. 13768 of the D.C.S. MSS., Vol. XXIV.

Complete.

**Beginning:**

षडर्कस्य दशेन्दोश्च सप्त भूमीसुतस्य तु ।
राहोरष्टादश समा गुरोः षोडश वत्सराः ॥
एकोनविंशतिस्सौरेः ज्ञस्य सप्तदश स्मृताः ।
केतोस्सप्त भृगोरब्दा विंशतिः कृत्तिकादितः ॥
रव्याद्युक्तग्रहाणां च दशा ज्ञेयाः क्रमात्पुनः ।
एकैकस्य तु भस्यैकग्रहः प्रोक्तो दशाधिपः ॥

**End:**

क्रूरराशिगताः पापाः शत्रुभिश्च निरीक्षिताः ।
स्वदशायां कष्टदाः स्युरन्ये भुक्त्यन्तरान्तरे ॥
स्थानं चैवाधिपत्यं च दृष्टि योगं शुभाशुभम् ।
परिचिन्त्य ग्रहाणां तु वाच्यं तत्तद्दशाफलम् ॥

**Colophon:**

इति सामुदायिकदशाफलनिर्णयस्समाप्तः ॥

---

(*g*) केरलीयम्.

KERALĪYAM.

Fol. 26.

A treatise on horoscopy as prevailing in the Kerala country. Contains the Jīvakadhyāya.

**Beginning:**

जन्मकाल . . . . . र्णं तु जीवकम् ।
वक्ष्यामि जीवकाध्यायं मुनीनां मतसंग्रहात् ॥
स्वक्षेत्रे तुङ्गराशौ वा मित्रभे जीवकः खगः ।
केन्द्रस्थश्शुभसन्दृष्टो लग्ननाथश्शुभान्वितः ॥
लग्नाधिपः केन्द्रयुतो जीवकः शुभवर्गगः ।
वीर्ययुक् शुभवर्गस्थश्चाष्टमस्थोऽपि जीवकः ॥

**End:**

बलिनश्शुभवर्गस्था जीवकास्स्युर्न संशयः ।
सर्वेषां शुभखेटानां शुभवर्गस्थितिर्यदि ॥
केन्द्रस्थितिर्बलाधिक्यं जीवकत्वप्रयोजकम् ।
एवं हि जीवकाध्यायः केरलीये मुनीरितः ॥
विज्ञाय दुष्टयोगानां दौर्बल्यं परिचिन्तयेत् ॥
प्राभवे जीवकस्यात्र जातको जीवति ध्रुवम् ॥

**Colophon:**

इति केरलीयजीवकाध्यायस्समाप्तः ॥

---

(*h*) जातकचन्द्रिकाव्याख्या.

JĀTAKACANDRIKĀVYĀKHYĀ.

Foll. 27*a*—34*b*.

Slightly different from the commentary described under No. 13682 of the D.C.S. MSS., Vol. XXIV, wherein see for the beginning.

Complete.

**End:**

परस्परदशायामिति ।

परस्परयोश्शनिशुक्रयोः स्वभुक्तौ स्वान्तर्दशायां सूर्यजभार्गवौ शनिशुक्रौ शुभाशुभं विशेषणव्यत्ययेन प्रदिशेताम् । शुक्रमहादशायां शनिभुक्तौ शुक्रो विशेषफलं दद्यात । शनिमहादशायां शुक्रभुक्तौ शनिर्विशेषफलं ददाति । इतरयोगेषु यथायोगं प्रयच्छतीति सम्बन्धार्थः ॥

**Colophon:**

पराशरीव्याख्यानं सर्वकल्पीयं समाप्तम् ॥

The scribe adds अप्पन् नैनार्येण लिखितम् ।

Fol. 35 contains Lagnanirṇaya, etc.

---

(i) जातकचन्द्रिकाव्याख्या—शरदागमः.

JĀTAKACANDRIKĀVYĀKHYĀ : ŚARADĀGAMAḤ.

Foll. 36*a*—52*b*.

A commentary on the Jātakacandrikā of Kālidāsa which is a treatise on horoscopy. The commentary is called Śaradāgama and is by Appasūri.

Contains the following Prakaraṇas:—

१. संज्ञाप्रकरणाध्यायः.
२. राजयोगप्रकरणार्थः.
३. आयुःप्रकरणार्थः.
४. अन्तर्दशाफलप्रकरणार्थः.

**Beginning:**

अप्पाभिधश्च नृहरिः प्रथ . . . . . .
. . . . . . पादसरसीरुहकिङ्करोऽहम् ।
व्याख्यां करोमि शरदागमनामधेयां
श्रीकालिदासकृतजातकचन्द्रिकायाः ॥

अध्येतव्यायाः जातकचन्द्रिकायाः पूर्वव्याख्यासु सतीष्वपि तासामनभिप्रायबोधकत्वात्पुनः स्पष्टं व्याख्यां कर्तुमुद्युक्तः प्रथमं तावत्पञ्चप्रकरणानां मध्ये संज्ञाप्रकरणं व्याकुर्वे । तत्र तावत् ग्रन्थकर्ता भगवान्

कालिदासः ग्रन्थस्य पारम्पर्यरूपाभीष्टसिद्धये प्रथमश्लोकेन सारस्वतोपाधिविशिष्टामुपास्ते—सिद्धान्तमिति। किंचिदद्वितीयं महः तेजः आत्मचैतन्यमित्यर्थः। परमेष्ठिनः परमे लोकविशेषे तिष्ठतीति तथोक्तश्चतुर्मुखः तस्य शुद्धान्तमवरोधम्। शुद्धान्तश्चावरोधश्चेत्यमरः। अन्तःपुरजनमित्यर्थः। उपास्महे -महावाक्यादिरूपसरस्वत्यामेवाभिव्यक्तत्वात्तदवच्छेदे चोपासनां कुर्म इति यावत्। शुद्धान्तमित्याकाङ्क्षयाम् औपनिषदम् उपनिषदां सम्बन्धिनां सिद्धान्तः निष्कृष्टार्थः। ओमिति ब्रह्मेति, सर्वं खल्विदं ब्रह्मेति, चत्वारि वाक् परिमिता पदानीति, न तस्य कार्यं करणं न विद्यते।

* * * *

**Colophon:**

इति श्रीजातकचन्द्रिकाव्याख्यायां शरदागमसमाख्यायां संज्ञाप्रकरणार्थः प्रथमोऽध्यायः॥

**End:**

अशुभश्चेद्विशेषशुभं ददातीत्यभिप्रायः। उक्तविशेषपुरस्सरं महादशाधिपस्य मुक्तौ पूर्वानुगुण्येन फलपर्यन्तसम्बन्धिपरधर्ममुक्तिरेव स्वफलद इति प्रकरणपरमार्थः॥

**Colophon:**

इति श्रीअप्पसूरिविरचितायां जातकचन्द्रिकाव्याख्यायां शरदागमसमाख्यायामन्तर्दशाफलप्रकरणश्चतुर्थस्समाप्तः॥

The scribe adds—

श्रीमान् प्रतिवादिभयंकरं अप्पन् नैनाराचार्येण लिखितम्।

---

(j) तिथिचक्रम्.

TITHICAKRAM.

Foll. 53a—56a.

Same work as that described under R. No. 205 (of Telugu part) ante. Incomplete.

---

(k) गणकानन्दम्.

GANAKĀNANDAM.

Foll. 56b—59b.

Similar to the work described under R. No. 457 (b) ante.

The author is Sūrya, son of Bālāditya, and the work was written between Śaka 1309 and 1369.

Contains Madhyagrahādhikāra and Grahasphuṭādhikāra. Name of the copyist: Appan Nainārācārya.

**Beginning:**

आनन्दं ब्रह्म चिद्रूपमजाच्युतशिवात्मकम् ।
नित्योदयमुनिस्तुत्यं बालादित्याह्वयं न(नु)मः ॥
बालादित्यसुतस्सूर्यस्सूर्यसिद्धान्तसंमतम् ।
वक्ष्येऽहं गणकानन्दं गणकानन्दकारणम् ॥
एकाशीतिर्हता षष्ट्या गजवेदसमन्विताः ।
प्रभवाद्यब्दसंयुक्ता भवेयुः कलिवत्सराः ॥
गजवेदशराम्भोधि ४५४८ हीनं तत्करणाब्दकम् ।
चैत्रस्यादौ भृगोर्वारे भास्कराद्या यथाक्रमम् ॥

शर्वभूपद्युक्षगुणा ११,१६,५१,३. रुद्राष्टाङ्गार्णवामराः ११,८,४६,३३.
व्योमार्कनरवषड्वेदाः ०,१२,२०,४६, शैलेन्द्वर्काब्धिसागराः ७,१,१२,४४.

* * * *

**Colophon:**

इति श्रीसूर्यकृते तन्त्रे गणकानन्दे मध्यग्रहबोधार्थः प्रथमोऽध्यायः ॥

**End:**

कृष्णपक्षचतुर्दश्याः पश्चिमार्धक्रमेण तु ॥
मृगादिराशियुक्तस्त्रा विंशत्या कर्कटादयः ।
दिवारात्रिप्रमाणं स्याद् द्विनिघ्ना कलिकान्विता ॥

**Colophon:**

इति ग्रहस्फुटाधिकारः ।

रविः स्वशाखाग्नि ३६० शशी च ऋक्षैः २७.
कुजश्च दिक्छैल ७१० बुधोऽष्टनागैः ८८ ॥
भृगुर्जनालोचनभक्तलब्धं २२.
ग्रहेषु युक्तो नवनर्णहंसहात् ॥

* * * *

नत्वा भूमिसुरान् ब्रवीम्यृजु लघु स्पष्टं च तारावलिं
कल्याद्यब्दगुणादि . . . . . गुणो मासान्वितोऽधोगुणः ।
व्यष्टैकैः १८२ र्युगबाणगोऽर्ध ५८१४ फलयुक्त्रिंशद्गुणाहर्युतो
द्विष्टोब्धीन्द्र १४४ गुणस्त्रिखाक्षिनव ९२०३ हृच्चुक्रोथुसद्युसितात् ।
रात्यर्थं.

(*l*) सूर्यसिद्धान्तः.

SŪRYASIDDHĀNTAḤ.

Foll. 60*a*—75*b*.

Same text as that described under No. 13512 of the D.C.S. MSS., Vol. XXIV, but with an additional stanza and different colophon in the end.

Complete.

इति शाकल्यसंहितायां प्रथमप्रश्ने सूर्यमयसंवादे श्रीसूर्यसिद्धान्ते सूर्यग्रहणाध्यायः पञ्चमः ॥

* * * *

सृष्ट्यादिप्रलयान्तकालकलनामानप्रभेदः क्रमात्
चारश्च द्युसदां द्विधा च गणितं पश्चात्तथा चोत्तराः ।
बोधिष्ये ग्रहसंस्थितेश्च कथनं यन्त्रादियन्त्रोच्यते
संसिद्धान्त उदाहृतोऽत्रगणितस्सम्यक् प्रबन्धे बुधैः ॥

**Colophon:**

इति शाकल्यसंहितायां द्वितीयप्रश्ने सूर्यमयसंवादे श्रीसूर्यसिद्धान्ते मानाध्यायश्चतुर्दशः ॥

इदं श्रीमत्प्रतिवादिभयङ्करं अप्पनय्यनाराचार्येण विलिखितम् ॥

Foll. 76—80 contain some astronomical stanzas.

---

(*m*) नक्षत्रनिघण्टुः.

NAKṢATRANIGHAṆṬUḤ.

Fol. 78*a*.

Same work as that described under No. 13797 of the D.C.S. MSS., Vol. XXIV.

Complete.

---

(*n*) राशिनिघण्टुः.

RĀŚINIGHAṆṬUḤ.

Foll. 78*a* and *b*.

Same work as that described under No. 13882 of the D.C.S. MSS., Vol. XXIV.

Complete.

---

(*o*) ग्रहनिघण्टुः.

GRAHANIGHAṆṬUḤ.

Fol. 78*b*.

Same work as that described under No. 13854 of the D.C.S. MSS., Vol. XXIV.

Complete.

---

(p) भावनिघण्टुः.

BHAVANIGHANṬUH

Foll. 78b—79a.

Same work as that described under No. 13869 of the D.C.S. MSS., Vol. XXIV, but with a different colophon.

Complete.

**Colophon :**

इति स्थाननिघण्टुस्समाप्तः ॥

---

(q) भावनिघण्टुः.

BHĀVANIGHANṬUḤ.

Fol. 79.

Same work as that described under No. 13870 of the D.C.S. MSS., Vol. XXIV, wherein see for the beginning.

Complete.

**End :**

द्वादशान्त्यो व्ययो रिप्फ आलोको भाववर्गकः ।
त्वाक्षीणो नरको नाशो भावोऽयं द्वादशः स्मृतः ॥

**Colophon :**

इति भावनिघण्टुस्समाप्तः ।

---

(r) कारकनिघण्टुः.

KĀRAKANIGHANṬUḤ.

Fol. 79b.

Similar to the work described under No. 13633 of the D.C.S. MSS., Vol. XXIV.

Complete.

**Beginning :**

आत्मा प्रभावशक्तिश्च पितृचिन्ता रवेः फलम् ।
मनो बुद्धिप्रसादं च मातृचिन्ता च चन्द्रमाः ॥
भ्राता भृत्यगणो भूमिर्भौमेनैव विचिन्तयेत् ।
प्रज्ञा च कर्मविज्ञानं बुधेनैव विचिन्तयेत् ॥

**End:**

तटाकारामविश्रामान् राहुर्मातामहं भवेत् ।
केतोः पितामहश्चिन्ता बहुदानश्च मोक्षदः ॥

**Colophon:**

इति कारकनिघण्टुस्समाप्तः ॥

---

(*s*) ग्रहनिघण्टुः.

GRAHANIGHAṆṬUḤ.

Fol. 79*b*. Fol. 80 contains some mathematical tables with stanzas.

Same work as that described under No. 13655 of the D.C.S. MSS., Vol. XXIV, but with slightly different readings.

Complete.

**Beginning:**

शशी सोमश्शशाङ्कश्च इन्दुश्चन्द्रः कलानिधिः ।
राजा विधुस्सुधांशुश्च यम एकजनस्तथा ॥

**End:**

निधिर्ग्रहश्च खण्डं च रन्ध्रो भावश्च लब्धकः ।
आकाशं गगनं शून्यमन्तरिक्षं मरुत्पथम् ॥

* * * *

**Colophon:**

इति संज्ञानिघण्टुस्समाप्ता ॥

---

R. No. **2534**.

Palm-leaf. 12¼ × 1¼ inches. Foll. 80. Lines, 5 in a page. Telugu. Good.

Purchased in 1917–18 from M.R.Ry. P. Veṅkaṭācāryar of Vijayarāyi, Kistna district.

Fol. 80 is left blank.

रामानुजचरितचुलकम्.

RĀMĀNUJACARITACULAKAM.

Gives the genealogy and greatness of Rāmānujācārya and incidentally of the spiritual teachers beginning with God Viṣṇu and ending with Rāmānuja. The genealogies of the later line of teachers, such as Vānamāmalai Mutt, Doḍḍayācārya, Ahōbilam Mutt and Munitraya line of teachers are also given. By Rāmānujadāsa, a disciple of Vānamāmalai Mutt.

The work is said to have been based on the Guruparamparā written in 6 and 12 thousand Granthas (in Maṇipravāḷa Tamil).

Complete.

Name of the copyist: Prativādibhayaṅkaram Appalācārya of Kairagiri. Date of transcription: Monday, the 11th day of the bright fortnight of the Phālguna month in the year Pramāti.

**Beginning:**

षड्द्वादशसहस्रेषु ख्यातमाचार्यवैभवम् ।
लिख्यते सारमुद्धृत्य पीयूषमुदधेरिव ॥

श्रीश्रियःपतिः निखिलहेयप्रत्यनीककल्याणैकतानः अवाप्तसमस्तकामः अनन्तकोटिब्रह्माण्डनायकः आदिमध्यान्तशून्यः सर्वेश्वरश्चेतनोज्जीवनार्थं "लक्ष्म्या सह हृषीकेशो देव्या कारुण्यरूपये"त्यादिप्रकारेणावततार परव्यूहविभवान्तर्याम्यर्चावतारूपेण । तेषु परत्वमण्डाद्बहिर्वर्तते । केन प्रकारेणेत्यपेक्षायां विरजायाः परं सत् परनामादिशून्ये कुण्ठो नास्ति वैकुण्ठ इत्यादिप्रकारेण नाशादिरहिते पञ्चोपनिषन्मये सकलवस्तुपरिपूर्णे श्रीवैकुण्ठे श्रीभूमिनीलाद्यनेकसहस्रस्त्रीपरिवृतः अनन्तगरुडविष्वक्सेनकुमुदकुमुदाक्षजातकर्णशङ्कुकर्णभद्रजयविजयसर्वनेत्रगजाननप्रभृतिभिरनुभाव्यः स्फुरत्किरीटाङ्गदहारकण्ठिकाद्याभरणविशेषैर्युक्तः अनन्तकोटिरविप्रकाशः

* * * *

पराङ्कुशपरकालादिदशसूरिस्तुतमष्टोत्तरशतम् । एतेषु प्रधानानि ।

श्रीरङ्गमङ्गलमणिं करुणानिवासं श्रीवेङ्कटाद्रिशिखरालयकालमेघम् ।
श्रीहस्तिशैलशिखरोज्ज्वलपारिजातं श्रीशं नमामि शिरसा यदुशैलदीपम् ॥

इत्यादिश्लोकप्रकारेण पुष्पत्यागभोगज्ञानमण्टपसंज्ञितानि क्षेत्राणि । तेष्वपि प्रधानं साक्षात्परमपदतया विदितं श्रीरङ्गस्थलम् । कावेरी विरजा सेयं वैकुण्ठं रङ्गमन्दिरमित्यादिप्रकारेण साक्षात्परमपदतया विदितम् । श्रीरङ्गस्थलस्य राजा परमपदनाथः श्रीरङ्गनाथः। एतादृशश्रीरङ्गनाथस्य जन्म फाल्गुने मासि । नक्षत्रं रेवती ।

* * * *

श्रीरत्नाभरणं तेजः श्रीरङ्गेशयमाश्रये ।
चिन्तामणिमिवोद्वान्तमुत्सङ्गेऽनन्तभोगिनः ॥
मीने श्रवणनक्षत्रे कृतावतरणं विभुम् ।
विष्णुमादिगुरुं लक्ष्म्या मन्त्ररत्नप्रदं भजे ॥

* * * *

तुलायां श्रवणे जातं काञ्च्यां काञ्चनवारिजात् ।
द्वापरे पाञ्चजन्यांशं सरोयोगिनमाश्रये ॥

* * * *

मिथुने स्वातिजं विष्णो रथांशं धन्विनः पुरे ।
प्रपद्ये श्वशुरं विष्णोर्विष्णुचित्तं पुरश्शिखम् ॥

* * * *

**Colophon:**

इति रामानुजार्यसुचरित्रचुलके प्रथमः परिच्छेदः ॥

श्रीमद्वेदमार्गप्रतिष्ठापनाचार्यपरमहंसपरिव्राजकाचार्योभयविभूतिनायकभगवद्रामानुजार्यस्य वैभवो वर्ण्यते—

तुण्डीरमण्डले काञ्च्या ईशान्यभागे श्रीपेरुम्बूदूरिति ग्रामो वर्तते। तत्रासूरिकुलजो हारीतसगोत्रशिखामणिः केशवदीक्षितः अनपत्यः बृन्दारण्ये कैरविणीतीरे पार्थसारथिसन्निधौ पुत्रकामेष्टिं चकार। भगवानपि लोकजनानुग्रहेच्छयानन्तरं नागराजं त्वं केशवार्यपुत्रो भूत्वा जनान् वशीकुरुष्वेति नियोजयामास। अनन्तोऽपि भगवदाज्ञां शिरसा धृत्वा तथैव करोमीति कलियुगे एकोनत्रिंशत्तु(दु)त्तरचतुस्सहस्रादूर्ध्वं "धीर्लब्धा ते" इत्यादिश्लोकप्रकारेण पिङ्गलसंवत्सरचैत्रमासि सप्तमीगुरुवासरे आर्द्रानक्षत्रे पूर्वपक्षे अवततार ।

* * * *

निगमान्तगुरुभिरपि यतिराजसप्तती—

प्रथयन् विमतेषु तीक्ष्णभावं प्रभुरस्मत्परिरक्षणे यतीन्द्रः ।
अपृथक्प्रतिपन्नयन्मयत्वैर्ववृधे पञ्चभिरायुधैर्मुरारेः ॥

* * * *

यो नित्यमच्युतपदाम्बुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धो रामानुजस्य चरणौ शरणं प्रपद्ये ॥

जन्मपद्यम्—

मेषार्द्रसंभवं विष्णोर्दर्शनस्थापनोत्सुकम् ।
तुण्डीरमण्डले शेषमूर्तिं रामानुजं भजे ॥

अयं तु पञ्चविंशत्युत्तरशतवर्षादूर्ध्वं दुर्मतिसंवत्सरमाघशुद्धदशम्यां परमपदं जगाम ।

* * * *

**Colophon:**

इति श्रीघानाचलसम्प्रदायवता श्रीरामानुजदासेन विरचिते श्रीरामानुजसुचरितचुलके तृतीयः परिच्छेदः ॥

**End:**

गोपालदेशिकपदाब्जमधुव्रतस्य प्रज्ञाविरक्तिकरुणामृतसद्गुणाब्धेः ।
वेदान्तलक्ष्मणमुनेः श्रितभागधेयं पादारविन्दयुगलं शरणं प्रपद्ये ॥

अनन्तरमेतस्य ज्येष्ठभ्रातुः पुत्रस्य वेङ्कटकृष्णदेशिकस्य पद्यम्—

वेदान्तलक्ष्मणमुनीन्द्रकृपात्तबोधं वेदान्तदेशिकपदाम्बुजभृङ्गराजम् ।
श्रीनैध्रुवान्वयकुलार्णवपूर्णचन्द्रं श्रीवेङ्कटोपपदकृष्णगुरुं भजामि ॥

**Colophon:**

इति श्रीरामानुजसुचरितचुलके चतुर्थः परिच्छेदः ॥

---

R. No. **2535.**

Palm-leaf. $17\frac{3}{4} \times 1\frac{1}{2}$ inches. Foll. 34. Lines, 6 in a page. Telugu. Good.

Purchased in 1917–18 from M.R.Ry. P. Veṅkaṭācaryar of Vijayarāyi, Kistna district.

भागवतव्याख्या.

BHĀGAVATAVYĀKHĀ.

Foll. 1*a*—29*b*.

A commentary on the Bhagavata. The name of the commentator is not given.

Contains the first Adhyāya of the first Skandha. Wants the beginning and the end.

**Beginning:**

अस्य चिदचित्प्रपञ्चस्य जन्मादि जन्म आदिर्यस्य तज्जन्मादि सृष्टिस्थितिप्रलयाः । अत्र तद्गुणसंविज्ञानो बहुव्रीहिरवसेयः। तेन सृष्टिस्थितिप्रलयानां ग्रहणम् । अत्र सृष्टिस्थितिप्रलयमिति समाहारसमासः । यतः यस्मात्परमात्मनः । यत इति हेतौ पञ्चमी । हेतुत्वं चोपादानत्वनिमित्तत्वोभयरूपम् । तदैक्षत । बहु स्यां प्रजायेयेत्यादिश्रुतिभिरुपपादितम् ।

**End:**

भवौषधादिति । भवस्य संसाररोगस्यौषधान्निवर्तकादित्यर्थः । यद्वा भवस्य कुलस्य वैराग्यस्येति यावत् । औषधप्रापकादित्यर्थः । यद्वा भवः संसारे जन्म तस्यौषधान्निवर्तकादित्यर्थः । श्रोत्रमनोऽभिरामा ।

Fol. 30 contains Grahaṇabhōjanaviṣaya, 31*a* Gaulipaṭanaśānti and 31*b* is left blank. Foll. 32*a*—33*a* contain Rakṣōghnamantras and 33*b*—34 Darśatarpaṇamantra. Fol. 34*b* is left blank.

---

R. No. **2536.**

Paper. 7¾ × 6¼ inches. Foll. 60. Lines, 19 in a page. Telugu. Good.

Purchased in 1917–18 from M.R.Ry. P. Vēṅkaṭācāryar of Vijayarāyi, Kistna district.

(*a*) सिद्धान्तकौमुदी.

SIDDHĀNTAKAUMUDĪ.

Foll. 2*a*—8*b*. Fol. 1 is left blank.

Same work as that described under No. 1354 of the D.C.S. MSS., Vol. III.

Breaks off in the Acsandhi.

---

(*b*) तर्कसङ्ग्रहव्याख्या—लघुबोधिनी.

TARKASAṄGRAHAVYĀKHYĀ—LAGHUBODHINĪ.

Foll. 9*a*—50*b*. The remaining leaves are left blank.

A commentary on the Tarkasaṅgraha of Annambhaṭṭa which work is described under No. 4143 of the D.C.S. MSS., Vol. VIII; by Raṅgadēśika of Bṛndāvana and an occupant of Gōvardhana Pīṭha.

Complete.

**Beginning:**

नत्वा श्रीमद्धयग्रीवं सर्वविद्याधिदैवतम् ।
कुर्वे बालप्रबोधार्थं न्यायार्थलघुबोधिनीम् ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नसमाप्तिप्रयोजनं शिष्टाचरितं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नन् शिष्यावधानार्थं चिकीर्षितं प्रतिजानीते—निधायेति। अवश्यकर्तव्यत्वप्रकारकज्ञानानुकूलव्यापारः प्रतिपूर्वकज्ञाधात्वर्थः । विश्वेशं जगन्नियन्तारं जगद्रक्षकमिति यावत् । इदं सृष्टिसंहारयोरप्युपलक्षणम् । अर्थद्वयवक्तव्यैकदेशोक्तिरुपलक्षणम् । निधाय ध्यात्वा । गुरुवन्दनं विद्यागुरुवन्दनम् । तर्कसङ्ग्रहः तर्क्यन्ते प्रतिपाद्यन्त इति तर्काः द्रव्यादिपदार्थाः तेषां सङ्ग्रहः सङ्क्षेपेण कथनं क्रियत इत्यर्थः ।

**End:**

ग्रन्थकरणप्रयोजनं स्यात्यर्थं स्वनाम चाह—कणादेति श्लोकेन । न्यायमते न्यायेन गौतममतं विवक्षितम् । बालाः तदनभिज्ञा इति । अस्य बालव्युत्पत्तिरेव प्रयोजनमिति सिद्धम् ॥

**Colophon:**

इति पदवाक्यप्रमाणज्ञगोवर्धनपीठाधिकृतश्रीवृन्दावननिवासि श्रीरङ्गदेशिकप्रणीता लघुबोधिनी समाप्तिमगमत् ॥

---

R. No. 2537.

Paper. 12½×4¼ inches. Foll. 11. Lines, 14 in a page. Dēvanāgarī. Good.

Purchased in 1917-18 from M.R.Ry. P. Vēṅkaṭācaryar of Vijayarāyi, Kistna district.

वादसुधाकरः.

VĀDASUDHĀKARAḤ.

Foll. 1*b*—11*a*. Foll. 1*a* and 11*b* contain the name of the work.

Similar to the work described under No. 3921 of the D.C.S. MSS., Vol. VIII. By Kṛṣṇācārya, son of Dēvidatta.

Complete.

At the end of the MS. it is stated that this work was printed in Kāśi in Saṁvat 1942.

**Beginning:**

शाब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।
इति वात्सल्यवान् विश्वतद्रूपं पातु माधवः ॥
कोलाहलोऽत्र कुधियां न प्रत्यूहो विवेकिनाम् ।
कल्दिोषो रमानाथदासमीष्टे न वीक्षितुम् ॥

आख्यातस्य कृतौ शक्तिर्न तु कर्तरि । कृत्याश्रयत्वमेव हि कर्तृत्वं, तच्च कृतिरूपमित्यनन्तकृतीनां शक्यतावच्छेदकत्वे गौरवादिति तार्किकाः । नचैवं रथो गच्छतीत्यादावचेतने रथे कृतेर्बाधादाश्रयत्वादौ लक्षणायां लक्ष्यतावच्छेदकगौरवेण साम्यमिति वाच्यम् । अतिरिक्तशक्तिकल्पनापेक्षया क्लृप्तायां शक्तिसम्बन्धरूपलक्षणायां गौरवाभावात् । ननु लक्षणाश्रयणे कथं वर्तमानत्वादीनामन्वयः, युगपद्वृत्तिद्वयानभ्युपगमादिति चेन्न । शक्तताव‌च्छेदकलक्ष्य(क्षण)तावच्छेदकयोर्भेदात् । लट्त्वेन हि वर्तमानत्वे शक्तिः । लकारत्वेन लक्षणेति ।

**End:**

आधुनिकनाम्नां सङ्केतादौ प्रयोगस्तु भ्रान्त्यैव कृतं कुर्यादित्यादि नियमात् । असाधुशब्दानां त्वानन्त्यान्न शक्तत्वम् । अर्थबोधस्तु साधुस्मरण-

द्वारा । अव्युत्पन्नानां तु शक्तिभ्रमाद्बोधः । अन्ये त्वाहुः— बोधकतारूपा शक्तिरपभ्रंशेष्वपि दुर्वारैव ॥

**Colophon:**

इति श्रीमद्देवीदत्तात्मजरामसेवकतनूद्भवकृष्णाचार्यकृतौ वादसुधाकरस्समाप्तिमि(म)यात् ॥

वाराणसीप्रसादस्य नियोगेन प्रयत्नतः ।
काशीसंस्कृतमुद्रायामङ्कितोऽयं शिलाक्षरैः ॥

इति वादसुधाकरः समाप्तः ॥

---

R. No. 2538.

Paper. 8¾ × 6¼ inches. Foll. 57. Lines, 16 in a page. Telugu. Injured.

Purchased in 1917-18 from M.R.Ry. P. Vênkaṭâcâryar of Vijayarâyi, Kistna district.

साहित्यचूडामणिः.

SÂHITYACÛḌÂMAṆIḤ.

Foll. 1a—51a. Foll. 51b—57b are left blank.

A treatise on figures of speech: by Sîtârâmapaṇḍita, son of Râmasûri and Kṛṣṇamma of Bhâradvâjagôtra and of Tiganara family.

Contains the following subjects:—

१. नायकगुणस्वरूपनिरूपणम्.
२. औपम्यगर्भालङ्कारविधिः.
३. अर्थालङ्कृतिः.
४. संसृष्टिसङ्करौ (incomplete).

Wants the beginning.

**Beginning:**

दैत्यान्मर्दयितुं मुदा यदुकुले . . . . ॥
रूपसम्पन्नदेहत्वमौज्ज्वल्यं परिकीर्त्यते ॥

यथा—

सौन्दर्यं समवेक्ष्य सारसदृशस्सन्त्यक्तलज्जाभरे-
गोप्योऽनङ्ग . . . . . कलालापाः कलापाञ्चिताः ।
आधावन्ति नितान्तचारुरशनाराजज्झणत्कङ्कणा
. . . . . . निजपुत्रमित्रदयितावासःप्रपथाः पथि ॥
विश्वम्भराधिपत्यं यत्तन्न . साम्यमुच्यते ॥

यथा—

दिक्चक्रवालनृपमण्डलदेवदैत्य-

लोकेशयक्षगरुडो(रगसिद्ध)सङ्घाः ।

प्रोद्यत्किरीटमणिमूर्धभि . . . . . .

श्रीकृष्णदिव्यपदपीठमुपाश्रयन्ते ॥

* * * *

Colophon:

इति श्रीसकलभुवनपवित्रभारद्वाजगोत्रावतंसतीगनरान्वयसिन्धुसुधाकरेण चतुस्तन्त्रपारावारपारीणश्रीमहोपाध्यायरामसूरिसूनुना कृष्णाम्बागर्भशुक्तिमुक्ताफलेन सकलमन्त्रकलाकोविदेन श्रीसीतारामसनीषिणा विरचिते श्रीमद्यदुकुलतिलकगुणधामनि साहित्यचूडामणिनामन्यलङ्कारशास्त्रे नायकगुणस्वरूपनिरूपणं नाम प्रथमं प्रकरणम् ॥

End:

Colophon:

इति श्रीसीतारामसनीषिणा विरचिते साहित्यचूडामण्यलङ्कारशास्त्रे ऽर्थालङ्कृतिस्संपूर्णा ॥

अथ संसृष्टिसङ्करा निरूप्यन्ते—

यथा लौकिकालङ्काराणां हिरण्मयानां मणीनां पृथक्सौन्दर्यहेतूनामप्यन्योन्यसम्बन्धे चारुत्वातिशयो दृश्यते, तथैव काव्यालङ्काराणां रूपकादीनां मिथस्सम्बन्धेन सौन्दर्यातिशयः प्रतीयते ।

* * * *

यथा वा—

शुम्भत्कुम्भीन्द्रसान्द्रस्फुटकटनिकटप्रस्रवद्दानधारा-

घोरा नाराचपूरप्रचुरतरमहाकीलकीलाकुलाशा ।

अभ्राद्भ्रातिशुभ्रभ्रमणघनघनारावसंव(रप)धिरावा

जाताजा(धा)ताभिधूलीपटलपरिवृता जैत्रयात्रा मुरारेः ॥

अत्रापि पूर्ववत्संसृष्टिः ।

---

R. No. 2539.

Palm-leaf. 18, 17 × 1½ inches. Foll. 56. Lines, 7 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. P. Veṅkaṭacāryar of Vijayarāyi, Kistna district.

Foll. 22 and 23 are left blank.

(a) प्रसङ्गाभरणम्.

PRASAṄGĀBHARAṆAM.

Foll. 1a—33b.

Same work as that described under R. No. 1580 ante, wherein see for the beginning.

Incomplete.

**End:**

दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता ।
अभ्यासेन न लभ्यन्ते चत्वारस्सहजा गुणाः ॥

ऋणं याच्ञा च वृद्धत्वं चोरचो(ना)रदरिद्रता ।
लोभश्च भुक्तशेषश्च अष्ट कष्टाः प्रकीर्तिताः ॥

**Colophon:**

इति पण्डितराजीयश्लोकास्समाप्ताः ॥

Foll. 34a—46b contain some Ṛks on Āśīrvāda. Fol. 47 contains Sadācāryalakṣaṇa.

---

(b) वेदान्तविषयः.

VEDĀNTAVIṢAYAḤ.

Foll. 48a—53b.

A treatise bringing out certain points relating to Śrī-Vaiṣṇavism in accordance with the Viśiṣṭādvaita Vedānta.

Incomplete.

**Beginning:**

सकलवेदसारसङ्ग्रहः प्रणवः—

प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः ।
वाङ्मयं प्रणवस्सर्वं तस्मात्तं वा समभ्यसेत् ॥
ओङ्कारप्रभवा वेदा ओङ्कारप्रभवास्स्वराः ।
ओङ्कारप्रभवं सर्वं जगत्स्थावरजङ्गमम् ॥
आद्यं तु त्र्यक्षरं ब्रह्म त्रयी यत्र प्रतिष्ठिता ।
स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् ॥

अकारस्य जगदुत्पत्तिस्थितिसंहारकर्ता विष्णुर्वाच्यः ।

यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्तीति ।

विष्णोस्सकाशादुद्भूतं जगत्तत्रैव च स्थितम् ।
स्थितिसंयमकर्तासौ जगतोऽस्य जगच्च सः ॥

विष्लृ व्याप्तावित्यस्माद्धातोर्नुप्रत्ययः विष्णुशब्दः व्यापकवस्तुवाची । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थितः ।

* * * *

शेषित्वं नाम स्वशेषभूतसमस्तवस्त्वाहितातिशयाधानद्वारत्वम् । तस्य स्वामित्वाद्भेदः । एते चत्वारो गुणा आश्रितकार्यापादकाः । अयं द्वयाख्यमन्त्रः कठवल्ल्यामुपनिषत्प्रतिपाद्यः । सत्यं तद्द्वयं सकृदुच्चारो भवति । श्वेताश्वतरे श्रूयते—यो ब्रह्माणं विदधाति पूर्वम् ।

**End:**

शाखानामुपरि स्थितेन मनुना मूलेन लब्धात्मक-
स्सत्ताहेतुसकृज्जपेन सकलं कालं द्वयेन क्षिपन् ।
वेदोत्तंसविहारसारथिदयागुम्भेन विस्रम्भित-
स्सारज्ञो यदि कश्चिदस्ति भुवने नाथस्स . . . स्स नः ॥
पञ्चाङ्गाढ्याः पञ्चसंस्कारयुक्ताः पञ्चार्थज्ञाः पञ्चमोपायनिष्ठाः ।
ते वर्णानां पञ्चमा(:)चाश्रमाणां विष्णोर्युक्ताः पञ्चकालप्रपन्नाः ॥

---

(c) पूर्वाचार्यगुरुपरम्परा.

PŪRVĀCĀRYAGURUPARAMPARĀ.

Foll. 54a—55a.

Gives the Taniyan stanzas relating to the line of early Teṅgalai Śrī-Vaiṣṇava teachers.

Complete.

**Beginning:**

श्रीशैलेत्यारभ्य प्रणतोऽस्मि नित्यमित्यन्तं श्लोकगुरुपरम्परा ।

अस्मद्देशिकमस्मदीयपरमाचार्यानशेषान् गुरून्
श्रीमल्लक्ष्मणयोगिपुङ्गवमहापूर्ण(र्णौ) मुनिं यामुनम् ।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये ॥

* * * *

नमः श्रीशैलनाथाय कुन्तीनगरजन्मने ।
प्रसादलब्धपरमप्राप्यकैङ्कर्यशालिने ॥

स्वयमाहूय शैलेशः गुरवेऽर्थप्रदानतः ।
लब्धोदारविदं कुरकुलोत्तमगुरुं भजे ॥

**End:**

श्रीरत्नाभरणं तेजः श्रीरङ्गेशयनाश्रये ।
चिन्तामणिमिवोद्धान्तमुत्सङ्गेऽनन्तभोगिनः ॥

**Colophon:**

इति पूर्वाचार्यतनियास्समाप्ताः ॥

---

(*d*) अष्टश्लोकी.

ASṬAŚLOKĪ.

Fol. 55.

Same work as that described under R. No. 171(*d*) ante.

Complete.

---

(*e*) पञ्चायुधस्तोत्रम्.

PAÑCĀYUDHASTOTRAM.

Fol. 56.

Same work as that described under R. No. 173 (*f*) ante.

Complete.

---

## R. No. 2540.

Palm-leaf. 17¾ × 1½ inches. Foll. 60. Lines, 7 in a page. Telugu. Good.

Purchased in 1917–18 from M.R.Ry. P. Vēṅkaṭācāryar of Vijayarāyi, Kistna district.

Fol. 1 contains Pāṇinisūtrapatraviṣaya.

(*a*) सिद्धान्तकौमुदीसङ्ग्रहः.

SIDDHĀNTAKAUMUDĪSAṄGRAHAḤ.

Foll. 2*a*—35*b*. Foll. 20*b* and 24*b* are left blank.

A brief summary of the Siddhāntakaumudī.

Contains from the Acsandhi (wants beginning) to the Apatyādhikāra of the Taddhita portion in the Pūrvārdha and the first to the third conjugation, Uṇādi in the Uttarārdha and the Dhātupāṭha.

**Beginning:**

आये । अर्वाङ् । क वोऽश्वाः । रथानां नयेराः । सुधी उपास्य इति स्थिते स्थानत आन्तर्यादीकारस्य यकारः, सुध् य् उपास्य इति स्थिते अन(चि च) इति धकारस्य द्वित्वम् । झलामिति धकारस्य दकारः । (संयोगान्तस्य लोपः) इति यलोपे प्राप्ते यणः प्रतिषेधो वाच्य इति यलोपनिषेधे यणो मयो द्वे इति धकारयकारयोः द्वित्वविकल्पाच्चत्वारि रूपाणि । एकधमेकयं द्विधं द्वियं द्विध-मेकयमेकयं द्विधम् । उदा—सुध्युपास्यः, मध्वरिः ।

* * * *

वर्तमाने लट् । लः कर्मणि च भावे चाकर्मकेभ्यः । तिप्तस्झिसिप्थस्थ । लः परस्मैपदम् । तङानावात्मनेपदम् ।

* * * *

**Colophon:**

इति जुहोत्यादयः ।

**End:**

तुल्य भावरणे श्वेताश्वतरगालोडितकाह्वरकाणामश्वतरेतकलोपश्च । श्वेताश्वादीनां चतुर्णामश्वादयो लुप्यन्ते णिङ् च धात्वर्थे ॥

इति चुरादयः ॥

---

(*b*) ब्रह्मसूत्रम्.

BRAHMASŪTRAM.

Foll. 36*a*—44*a*. Fol. 44*b* is left blank.

Same work as that described under No. 4649 of the D.C.S. MSS., Vol. IX.

Complete.

---

(*c*) लिङ्गानुशासनम्.

LIṄGĀNUŚĀSANAM.

Foll. 45*a*—48*a*. Fol. 48*b* is left blank.

Same work as that described under No. 1495 of the D.C.S. MSS., Vol. III.

Complete.

---

(*d*) फिट्सूत्राणि.

PHIṬSŪTRĀṆI.

Foll. 49*a*—50*a*. Fol. 50*b* is left blank.

A grammatical treatise dealing with the accentuation of the Pratipadikas (bases of words) : by Śāntanavācārya.

Contains 1—4 Pādas complete.

**Beginning :**

फिषोऽन्त उदात्तः । प्रातिपदिकं फिट् तस्यान्त उदात्तः स्यात् । पाटलापालङ्काम्बासागरार्थानाम् । एतदन्तानामन्त उदात्तस्स्यात् । गेहार्थानामस्त्रियाम् । गुदस्य च । अन्त उदात्तः स्यान्न तु स्त्रियाम् । ध्यपूर्वस्य स्त्रीविषयस्य ।

*      *      *      *

**Colophon :**

इति फिट्सूत्रेषु प्रथमः पादः ।

**End :**

निपाता आद्युदात्ताः । उपसर्गाश्चाभिवर्जम् । एवादीनामन्तः । वाचादीनामुभावुदात्तौ । चादयोऽनुदात्ताः । यथेति पादान्ते । प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः । शेषं सर्वमनुदात्तम् ॥

**Colophon :**

इति शान्तनवाचार्यप्रणीतेषु फिट्सूत्रेषु तुरीयः पादः ॥

---

(*e*) रुक्मिणीपरिणयचम्पूः

RUKMIṆĪPARIṆAYACAMPUḤ

Foll. 51*a*—60*a*. Fol. 60*b* is left blank.

A literary work in prose and verse dealing with the marriage of Rukmiṇī with Lord Kṛṣṇa : by Vāṅkaṭācārya, son of Naināracārya of Prativādibhayaṅkara family.

Incomplete.

**Beginning :**

स्मृत्वा श्रीजलनाथ(झषमूर्तिमन्त)मपरं नत्वा भृशं कामठं
धृत्वा वक्षसि दीप्यमानकिटिनं कृत्वा नमो नारसीम् ।
धृत्वा वामनभार्गवौ नयनयोर्हृत्वापि रामौ गले
स्तुत्वा बौद्धव(सु)कल्किनौ वितनुते ग्रन्थो महान् कर्हिचित् ॥

*      *      *      *

कृत्वा नमो मात्स्यरूपान् नत्वा व्यासादिछान्दसान् ।
रुक्मिणीपरिणयं नाम चम्पुरारभ्यते मया ॥

* * * *

यो वादिभीकरकुले समभूदभिज्ञो
नैनार्यसंज्ञविशदीकृवदिब्बहौघः ।
तद्भूषितोऽखिलवियत्तलपुत्रपौत्रैः
अद्य प्रकाशते(यति)सर्वगुणोपपन्नैः ॥
तस्याभवद्वेङ्कटनामपुत्रस्सत्त्वैर्गुणैर्दीपितगात्रसारः ।
तस्यात्मजोऽरिक्तकलाविशेषो धैर्येण गद्यं रचयितुकामः ॥
ब्रह्माज्ञया क्षत्रियधर्मगोप्ता रै(व)त्यनामा भुवि सुप्रसिद्धः ।
बालामदाद्रेवतिमात्मपुत्रीं पुराश्रुतं खल्विति तामुपाये ॥

* * * *

जित्वाखण्डलदेववृन्दनिवहान् भोक्तुं यदा प्राहर-
द्रम्यं देवधनं प्रदीप्तममृतं वीनां पतिर्धीमतिः ।
सोऽयं श्रीपतिराजचैद्यनृपतीन् जित्वा प्रतापोन्नता-
नग्राहीद्रतिभर्तृदीपिततनुं भैमीं तथा सुन्दरीम् ॥

ततः । इति कथितवृत्तान्तः अभिमन्युसुतोऽभिलाषातिशयेन पुनस्तद्वृत्तान्तमत्यन्तमीक्षणश्रुतिपुटयोरानन्दरसाश्रुपूरयित्रीं तां सविस्तरेण श्रोतुकामः हे तपस्विन् पुरा खलु मधुसूदनो मधुवासर ।

* * * *

धैर्येण पृच्छयमानो व्यासात्मजस्स विदितमेव कथां वैशंद्येन वक्तुमुपचक्रमे ।

अस्ति प्रशस्तसुभटैकनिकेतनाम्ना
वैदर्भदेशमणिराशिगताग्ररत्नः ।
गानैकलोलरसिकैरनिगीयमानः
कौण्डिन्यनामनगरी रसिकैकभूमिः ॥

* * * *

तस्यां नगर्यामभिजातवंश्यो भीष्मेति नाम्ना भुवि सुप्रसिद्धः ।
एकेन दोष्णा परिपालयन् रसामन्येन कीर्तिं धरणास्तधीमतिः ॥

* * * *

तेषां स्वसा रुक्मिणिनामधेया पुत्री च भीष्मक्षितिपस्य धीमतः ।
वैदर्भराज्ञां विशदान्ववायं पवित्रमाकर्तुमजायत श्रीः ॥

**End:**

मीनाक्षी तव(दिव्य)सूनृतगुणान् संस्तूय दत्त्वा बहून्
हारान् मे विमलान् सुदर्शनधरस्सानन्दमभ्यागतः ।
दैत्यादित्यसमो . . गणयन् संभूय दर्पोन्नतं
वैवाहं स करिष्यसे च स हरन् त्वत्पूर्वकर्मादिकान् ॥
तदनन्तरमसौ वैदर्भपुष्यप्यभाषत ।

---

R. No. 2541.

Palm-leaf. 14⅜ × 1½ inches. Foll. 135. Lines, 9 in a page. Telugu. Slightly injured.

Purchased in 1917-18 from M.R.Ry. P. Vēṅkaṭācāryar of Vijayarāyi, Kistna district.

Fol. 135*b* is left blank.

प्रक्रियादीपिका.

PRAKRIYĀDĪPIKĀ.

A short commentary on the Aṣṭādhyāyī of Pāṇini following the order of the original: by Appan Naināryа, son of Vēṅkaṭārya of Śrīvatsagōtra and of Prativādibhayaṅkara family.

Complete.

**Beginning:**

श्रीशं हरिं गुणनिधिं नत्वा वेदान्तवेदिनम् ।
प्रक्रियादीपिकां तावत्करोमि विदुषां मुदे ॥
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥
अप्पन्नैनार्यवर्येण वेङ्कटार्यस्य सूनुना ।
प्रक्रियादीपिका सेयं कृता वात्स्येन धीमता ॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

अइउण्, ऋऌक्, एओङ्, ऐऔच्, हयवरट्, लण्, ञमङणनम्, झभञ्, घढधष्, जबगडदश्, खफछठथचटतव्, कपय्, शषसर्, हल्, इति[म]त्याहारसूत्राण्यणादिसंज्ञार्थानि । एषामन्त्या इतः, लण् सूत्रे अकारश्च । हकारादिष्वकार उच्चारणार्थः ।

वृद्धिरादैच् ।
आदैच वृद्धिसंज्ञस्स्यात् ।

यणः प्रतिषेधो वाच्यः । यणो मयो द्वे वाच्ये । मय इति पञ्चमी यण इति षष्ठीति पक्षे यकारस्यापि द्वित्वम् । तदिह धकारयकारयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि । एकधमेकयम् । द्विधं द्वियम् । द्विधमेकयमेकधं द्वियम् ।

अदेङ् गुणः ।

अत् एङ् च गुणसंज्ञस्स्यात् ।

* * * *

**Colophon:**

इति प्रक्रियादीपिकायां प्रथमाध्याये प्रथमः पादः ॥

**End:**

नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् ॥

उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात् । गार्ग्यादिमते स्यादेव ।

अ अ ।

विवृतमनूद्य संवृतोऽनेन विधीयते । अस्य चाष्टाध्यायी सम्पूर्णां प्रत्यसिद्धत्वात् शास्त्रदृष्ट्या विवृतत्वमस्त्येव ।

**Colophon:**

इति प्रक्रियादीपिकायामष्टमाध्याये चतुर्थः पादः ।

अप्पनैनार्यवर्येण कृता प्रक्रियदीपिका ।
समाप्तिमगमत्सम्यग्बालविज्ञानदीपिनी ॥
वात्स्येन वेङ्कटा[चा]र्यस्य पुत्रेणामितधीमता ।
कृतेयं ज्ञानदीपाय सदा विजयतेतराम् ॥

श्रीमद्वात्स्यान्वयपयःपारावारसुधाकरेण वादिमत्तेभकण्ठीरवकण्ठलुण्टाकेन श्रीमद्वेङ्कटार्यपादकमलचञ्चरीकेण श्रीमत्परवादिभयङ्करवंशमुक्ताफलेन अप्पनैनार्याभिधश्रीविष्णवदासेन कृता प्रक्रियादीपिका समाप्ता ॥

---

R. No. **2542.**

Palm-leaf. 15¾ × 1½ inches. Foll. 178. Lines, 7 in a page. Telugu. Good.

Purchased in 1917–18 from Sarasvati club, Vijayarayi, Kistna district.

विषयवाक्यदीपिका.

VIṢAYAVĀKYADĪPIKĀ.

By Raṅgarāmānujasvāmin. Same work as that described under No. 5001 of the *D.C.S. MSS.*, Vol. X.

Complete, but wants the beginning.

---

R. No. **2543**.

Palm-leaf. 16¾ × 1⅝ inches. Foll. 194. Lines, 8 in a page. **Telugu.** Good.

Purchased in 1917-18 from M.R.Ry. P. Veṅkaṭācāryar of Vijayarāyi, Kistna district.

(*a*) उपनिषदः, सव्याख्याः.

UPANIṢADAḤ WITH COMMENTARY.

Foll. 1*a*—92*b*.

A collection of the Upaniṣads together with commentaries thereon written in accordance with the Viśiṣṭādvaita Vēdānta: by a disciple of Śrīnivāsa of Śrīvatsagōtra.

Contains the following Upaniṣads and breaks off in the Taittiriyōpaniṣad:—

| Fol. | | Fol. | |
|---|---|---|---|
| 1*a*. | ईशावास्योपनिषत्. | 52*b*. | मुण्डकोपनिषत्. |
| 5*a*. | केनोपनिषत्. | 72*a*. | माण्डूक्योपनिषत्. |
| 10*b*. | कठोपनिषत्. | 81*a*. | तैत्तिरीयोपनिषत्. |
| 34*a*. | प्रश्नोपनिषत्. | | |

**Beginning**:

(मू)—

ईशावास्यमिदं सर्वं . . . . कस्य स्विद्धनम् ॥

(व्या) ॥ वेदानुद्धृत्य यः पूर्वं ब्रह्मणे प्रददौ हरिः ।
मत्स्यमूर्तिमहं वन्दे सोमकासुरसूदनम् ॥
श्रीशं श्रियं शठारातिं भाष्यकारादिदेशिकान् ।
पूर्वान् वन्दे गुरून् वात्स्यान् श्रीनिवासावधीनहम् ॥
श्रीरङ्गनायकं देवं स्तुत्वा व्याख्यां करोम्यहम् ।
ईशोपनिषदो व्याख्यां करोमि बुधसम्मताम् ॥

अत्रेदं तत्त्वम् । एकमेवाद्वितीयं ब्रह्मेति श्रुत्या सजातीयविजातीयस्वगतभेदशून्यं परं ब्रह्मेति, तदीक्षत्यादिगुणरहितमिति, माया चाविद्या च स्वयमेव भवतीति, तदेव मायाविद्योपाधिकं सदीश्वरभावं जीवभावं च जगामेति, रज्जुरेषा न सर्प इत्यध्यारोपापवादरूपब्रह्म सत्यं जगन्मिथ्येत्याप्तोक्तवाक्य-

अन्यज्ञानेनानादिजीवेश्वरत्वादिरूपब्रह्मभ्रान्तिर्निवर्तेत इत्यविद्यानिवृत्तिरेव मोक्षः नान्य इत्ययमेव परमार्थ इत्यद्वैतिनां मतानुवादः। यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति

* * * *

तद्विष्णोः परमं पदमित्युक्तपुनरावृत्तिरहितशाश्वतवैष्णवपरब्रह्मलोकं प्राप्नुवन्तीति श्रीवैष्णवानां राद्धान्तानुवादः।

अत्रेदं विचार्यते—

उपक्रमोपसंहारावभ्यासापूर्वताफलम्।
अर्पणं च . . च लिङ्गं तात्पर्यनिर्णये॥

इत्युपक्रमोपसंहाराभ्यासाद्यनुगुणतया शिष्टाचारानुगुणतया च पक्षपात विना परमार्थपरतत्त्वनिर्णयः।

* * * *

ईशा ईष्टे इतीट् तेन सर्वनियन्त्रा भगवता विष्णुना जगत्यां भूमौ विद्यमानं यत्किंचिदिदं जगद्वर्तते तत्सर्वं वास्यं व्याप्यं धार्यं चेत्यर्थः। अल्पत्वास्थिरत्वादिहेतुना त्यक्तेन तेन जगतोपलक्षितस्सन् भुञ्जीथाः। भगवदुपासनायोग्यदेहधारणानुकूलं यथा तथा भोग्यवर्गं भुञ्जीथा इत्यर्थः।

* * * *

**Colophon:**

इति दशविधोपनिषदन्तर्गतईशावास्योपनिषत्प्रतिपदार्थदीपिकायां व्याख्यायां प्रथमावतारिका समाप्ता॥

**End:**

तद्विज्ञाय प्राणस्य सर्वभूतोत्पत्तिहेतुक(त्व)मिति ज्ञात्वा नारायणात्प्राणो जायत इति प्राणस्योत्पत्तिदर्शनात् तस्य ब्रह्मत्वे सन्दिहानः पुनरेव वरुणं पितरमुपससार पुनरपि वरुणसमीपं विधिवत् गत्वा, अधीहि भगवो ब्रह्मेति हे भगवन्नाचार्य ब्रह्म परब्रह्मोद्दागिति।

* * * *

सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिता। य एवं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।

**Colophon:**

इति षष्ठोऽनुवाकः॥

(b) विशिष्टाद्वैतसमर्थनम्.

**VIŚIṢṬĀDVAITASAMARTHANAM.**

Foll. 93a—105b.

A treatise written in support of the Viśiṣṭādvaita Vēdānta as propounded by Rāmānuja, Viṣṇucitta, Varada, Vyāsa and others.

Complete.

**Beginning:**

निसर्गभिदुरोऽपि सन् निखिलचेतनाचेतनात्
समस्तजगदात्मकस्सकलशब्दवाच्यस्स्वयम् ।
अशेषवपुरुज्ज्वलो हृतसमस्तहेयाकृति-
स्स मे भवतु केशवः शुभगुणाश्रयः श्रेयसे ॥
जगद्ब्रह्माद्वैतं जलहुतवहाद्वैतसदृशं
प्रकृत्या भिन्दाने प्रकृतिपुरुषेशाह्वय इति ।
त्रिदण्डव्याजेन स्थितिमभिदधत्तत्त्वविषयां
जगत्या जीवातुस्स जयति यतीनां परिवृढः ॥

सर्वेषां वेदान्तवाक्यानां विशिष्टाद्वैत एव तात्पर्यम् । तथाहि—कानिचिच्छास्त्राणि स्वरूपभेदं प्रतिपादयन्ति—प्रधानक्षेत्रज्ञपतिर्गुणेशः क्षरं प्रधानममृताक्षरं हरिः । क्षरात्मानावीशते देव एकः । द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति । समाने वृक्षे पुरुषो निमग्नो ।

* * * *

अग्निर्माणवक इत्यादिवदद्वैतव्यवहारस्य क्वचि(त्क)त्वे औपचारिकत्वम् । तस्माद्दण्डी कुण्डली वासस्वी देवदत्त इत्यादौ दण्डकुण्डलादिपदानामिवाद्वैतशास्त्रेण प्रमाणसिद्धप्रकारिभेदानुपमर्देन प्रकारभूतचेतनाचेतनवाचिशब्दानां तत्प्रकारिपर्यन्तत्वमाश्रित्य प्रकार्यद्वैत एव तात्पर्यमभ्युपगन्तुं युक्तम् । ननु विषमोऽयं दृष्टान्तः । छत्रकुण्डलादिपदानां मतुप्प्रत्ययान्तत्वेन तद्विशिष्टपुरुषपर्यन्तत्वं युक्तम् ।

**End:**

एवं चेप्यत इति पदमप्याश्रयासिद्धिपरिहारार्थत्वेन सार्थकमित्यभेदमिथ्यात्वमेवैतद्ग्रन्थप्रतिपाद्यमिति सिद्धम् । तस्मान्निर्विशेषस्वरूपाभेदसाधकमानाभावात् बाधकप्रमाणसद्भावाच्च सजातीयविजातीयादिसकलभेदविशिष्टं

ब्रह्मैव तत्त्वमिति सिद्धम् ॥

पूर्वाचार्यतृणीकृते बलवता प्राप्तोपरोधश्चिरं
मायावादिजनेन माधवदयारूपैस्तमश्छेदकैः
श्रीरामानुजविष्णुचित्तवरदव्यासादिभिर्देशिकै-
स्तत्त्वज्ञैरुपदर्शितोऽयमनघस्त्वय्यन्तघण्टापथः ॥

**Colophon:**

विशिष्टाद्वैतसमर्थनाख्योऽयं ग्रन्थस्संपूर्णः ॥

पशुशून्यः प्रकृतिस्तद्वान्विकृतिरुच्यते ।

The scribe adds—

अप्पन्नैनार्येण लिखितोऽयं ग्रन्थस्सुसंपूर्णं विदन्तु सुधियः ॥

---

(c) सिद्धान्तचिन्तामणिः.

SIDDHĀNTACINTĀMAṆIḤ.

Foll. 106a—152a.

A treatise investigating whether Brahman is the material or efficient cause of the Universe and coming to the conclusion that he is both the efficient and material cause: by Śrīnivāsācārya, son of Tātācārya and Lakṣmāmbā and brother of Aṇṇayārya of Śrīśaila family.

Complete.

**Beginning:**

ध्येयं सतां सर्वपदाभिधेयं मेयं श्रुतीनामपि भागधेयम् ।
सन्त्यक्तहेयं चिदचित्स्वकायं ब्रह्माद्वितीयं प्रणमाम्यमेयम् ॥
यतिपतिमानमामि निगमान्तगुरुं
प्रणमामि हृदाश्रये मम पितामहमण्णगुरुम् ।
पितरमभिप्रणौमि मम भाष्यगुरून्कमला-
निलयमखीश्वरान् सकरुणांश्च(णान्छ)रणं कलये ॥
सिद्धान्तचिन्तामनुभूय भूयः सैद्धान्तिकं वर्त्म न ये विदन्ति ।
सिद्धान्तचिन्तामणिमेनमादावादाय ते तत्त्वपदं विदन्तु ॥

इह खलु भगवान् बादरायणो मुनिरौपनिषदः पुरुष इत्यादिश्रौतासाधारणनिर्देशे वेदान्तैकवेद्यतयावगतं परं ब्रह्म, अथातो ब्रह्मजिज्ञासेति जिज्ञास्यतया प्रतिज्ञाय तदवच्छेदकापरिज्ञाने जिज्ञास्यस्य दुरवगमत्वात्तदवगमाय तद्विजिज्ञासस्वेति श्रुतौ निर्दिष्टप्रतिनिर्देशकेन तच्छब्देन यतो वा इमानीत्यादि-

पूर्ववाक्यप्रतिपन्नस्याभिन्ननिमित्तोपादानस्वरूपकारणत्वस्यैव जिज्ञास्यतावच्छेदकताप्रतिपत्तेरिहापि तदेव तदवच्छेदकं दर्शयितुं जन्माद्यस्य यत इत्यसूत्रयत् ।

* * * *

मोक्षहेतुभूतज्ञानविषयतावच्छेदकस्य काल्पनिकत्वायोगात् । अत एव प्रपञ्चमिथ्यात्वपक्षोऽपि निरस्तः । चिदचिदात्मकप्रपञ्चस्य तस्याप्युपादानकारणतावच्छेदककोटिप्रवेशेन पारमार्थिकत्वावश्यंभावात् । असत्यात्सत्यासिद्धेरन्यत्र विस्तरेण निरस्तत्वात । स्यादेतत्—न निमित्तत्वमुपादानत्वं चैकस्य संभवति तयोर्भिन्नाश्रयत्वात् । अत एव हि समवायिकारणभेदघटितं निमित्तकारणलक्षणं न्यायविदो वदन्ति ।

**End:**

सर्वोपादानत्वादिनिमित्तकनारायणादिशब्दव्यपदेश इत्यादिकं सूक्ष्मया दृश्यावधातव्यम् । एवमन्यान्यपि प्रमाणानि भाष्यविद्भिरनुसन्धेयानीति ब्रह्म जगतो निमित्तमुपादानं चेति प्रामाणिकः पन्था इति सर्वमवदातम् ॥

अभिमतसकलार्थानर्थिते(तृ)भ्यो ददद्भ्यः
किमपि हितमिहास्ति प्रस्तुतं वस्त्वयापि ।
सकलसुजनबन्धौ सत्त्वषाड्गुण्यसिन्धौ
भगवति भर एषः भापितो वाग्भरेण ॥
निगमशिखराक्रीडक्रीडानिरूढनिजाशया
विविध . . . कान्तकण्ठालुण्टाकपाकपयोभराः ।
यतिपतिवचःश्रद्धानिर्भरैकधुरन्धरा-
स्ततमिह सह क्षन्तुं सन्तो भवन्तु दयामयाः ॥
कौण्डिन्यश्रीनिवासाध्वरिवरकृपयाप्यप्रजानुग्रहेण
श्रावं श्रावं सुसेव्यं यतिपतिवचसां भावनिष्ठानुभावः ।
शुद्धं सिद्धान्तचिन्तामणिमिममतनोच्छ्रीनिवासो विलासा-
देनं गृह्णन्तु सन्तः प्रतिकथकमतच्छेदमोदाय भूयः ॥
श्रीशैलान्वयवार्धिमन्दरमणिः श्रीतातयार्याग्रणी-
र्लक्ष्माम्बा च सहाण्णयार्यमखिना प्रासूत यं सादरम् ।
तेन श्रीनिधिनामकेन विदुषा सिद्धान्तचिन्तामणिः
कृप्ता लुप्तपरोक्तयुक्तिनिकरो जीयात्सतां भूतये ॥

The scribe adds—

अप्पन्नैनार्यवर्येण वात्स्येन लिखितं त्विदम् ।

कोदण्डे मासि सप्तम्यां समाप्तिमगमत्वरम् ॥

Fol. 152(*b*) contains some Vēdāntic passages.

---

(*d*) अष्टादशभेदनिर्णयः

AṢṬĀDAŚABHĒDANIRṆAYAḤ.

Foll. 153*a*—159*b*.

Same work as that described under No. 5195 of the D.C.S. MSS., Vol. XI, but with an additional stanza in the end.

Complete.

द्विविधाचार्यदृष्टार्थरीतिरित्थं यथामति ।

वात्स्यश्रीरङ्गनाथेन दिव्यात्रेण प्रदर्शिता ॥

The scribe adds—

अप्पन्नैनार्यवर्येण लिखितेयं परं मुदा ।

श्रीविङ्कटार्यतनयप्रथितप्रियवादिना ॥

Foll. 159*b*—162 contain the explanatory meaning of Mithyātva, Avidyā, Ātmāśraya, Anyōnyāśraya, Cakraka, Karmayōga, Bharanyāsa, etc. Fol. 161*b* is left blank.

---

(*e*) पञ्चनिर्णयः.

PAÑCANIRṆAYAḤ.

Foll. 163*a*—166*b*.

Similar to the work described under No. 3124 of the D.C.S. MSS., Vol. VI. This work is based upon the views expressed in the Daśanirṇaya of Tōḷappar. Contains Jayantīnirṇaya (including Kṛṣṇajayanti, Śrīrāmanavami, Nṛsiṁhajayanti) Ēkādaśinirṇaya, Kṛttikādīpanirṇaya, Upākarmanirṇaya and Sthālīpākanirṇaya.

Complete.

**Beginning:**

श्रीपतिश्रीचमूनाथश्रीशठारिमुनीश्वरान् ।

नाथकञ्जाक्षरामाख्ययामुनेयमुनींस्तथा ॥

पूर्णं यतीन्द्रगोविन्दपराशरगुरूत्तमान् ।

वेदान्ति कलिजित्कृष्णद्वयं लोकार्यदेशिकान् ॥

श्रीशैलेशगुरुं सौम्यजामातृमुनिपुङ्गवम् ।
स्वाचार्यमस्मजनककृपालोलदृगञ्चलम् ॥
मच्छेषत्वशरण्यत्वप्राप्यमेकस्वरूपिणम् ।
प्रणम्य तेषां कृपया संक्षेपेणाति सुस्फुटम् ॥
दशनिर्णयसिद्धान्तरीत्या वक्ष्ये यथामति ।
जयन्त्येकादशीदीपारोपोपाकर्मपार्वणान् ॥
क्रमेण सुखबोधार्थं विशिष्टाद्वैतिनां सदा ।

अथ श्रीकृष्णजयन्तीनिर्णयः—

सिंहस्थेऽर्के नभोमासि नभस्ये वा विशेषतः ।
अष्टमी रोहिणीयुक्ता जयन्ती सा प्रकीर्तिता ॥
यत्किञ्चित्सप्तमीयुक्ता अष्टमी कृत्तिकायुता ।
रोहिणी वा परित्याज्या निष्कामैर्वैष्णवोत्तमैः ॥

**End:**

कस्मिंश्चिच्छिवना(दीशान)बलिं कुर्यादिति हि निश्चयः ।
सर्वस्थालीपाकविधिस्सम्यगुक्ता मयाधुना ।
दशनिर्णयमालोच्य तथा अन्यान् बहूनपि ॥
तत्तदर्थान् समुद्धृत्य सुखबोधार्थमेकदा ।
लिखितात्र दुरुक्तादीन् क्षन्तुमर्हन्ति साधवः ॥

**Colophon:**

इति पञ्चनिर्णयस्समाप्तः ॥

Foll. 166b—167a contain Vijayadaśamīnirṇayaślōkas. Foll. 167b—169b are left blank.

---

(*f*) जयन्तीनिर्णयः.

JAYANTĪNIRṆAYAḤ.

Foll. 170a—171a.

Similar to the work described under Nos. 3117, 3138 and 3146 of the D.C.S. MSS., Vol. VI. Taken from the Agastyasaṁhitā.

Contains Rāmajayanti, Nṛsiṁhajayanti and Kṛṣṇajayanti.

**Beginning:**

श्रीरामजयन्तीनिर्णयः अगस्त्यसंहितायाम्—

नवम्याराधनं कुर्यान्मेषे प्राप्ते तु पूषणि ।
वैष्णवैर्विविधैस्सर्वैर्न मीने-वृषभे तथा ॥

मासे चैत्रेऽथ वैशाखे यदा मेषं गते रवौ ।
जयन्त्याराधनं कुर्यान्न मीने वृषभे तथा ॥
सिंहे मेषे च संप्राप्ते ह्यष्टमी नवमी तथा ।
उपोष्या वैष्णवैस्सर्वैर्न तु कर्कटमीनयोः ॥
* * * *

दशानिर्णये—

एकस्मिन् सिंहमासे चेद्यदि जन्माष्टमीद्वयम् ।
तयोत्तरा जयन्ती स्यात्पूर्वा जन्माष्टमी स्मृता ॥
जन्माष्टमी जयन्ती च द्विधैव परिकीर्तिता ।
सिद्धा जन्माष्टमी प्रोक्ता शुद्धा स्यान्नवमीयुता ॥

**End:**

जयन्तीकौतुकमपि मध्याह्ने तु समाचरेत् ॥
नृकेसरिजयन्त्यां च शठजिज्जन्मतारकौ ।
उत्सवद्वितयं कुर्यान्मध्याह्ने तु विशेषतः ॥

---

(g) एकादशीनिर्णयः.

EKĀDAŚĪNIRṆAYAḤ.

Foll. 171a—172b.

Similar to the work described under No. 3105 of the D.C.S. MSS., Vol. VI.

Complete.

**Beginning:**

अरुणोदयवेलायां दशमी मिश्रिता भवेत् ।
सुराबिन्दुसमायुक्तं गङ्गातोयं यथा तथा ॥
विद्धाप्येकादशी त्याज्या परतो द्वादशी न चेत् ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणा ॥
* * * *

अरुणोदयकाले तु दशमी यदि दृश्यते ।
सा विद्धैकादशी तत्र पापमूलमुपोषणम् ॥
दशमीशेषसंयुक्ता यदि स्यादरुणोदये ।
नैवोपोष्यं प्रयत्नेन तद्दिनैकादशीव्रतम् ॥

**End:**

इनोदये द्वादशी च दिनद्वययुता यदि ।
तिथौ प्राक् पारणा स्मार्तैर्विना शेषं तु वैष्णवैः ॥

---

(h) एकादश्यादिदिनकर्तव्यश्राद्धनिर्णयः.

ĒKĀDAŚYĀDIDINAKARTAVYAŚRĀDDHANIRṆAYAḤ.

Foll. 172b—180b.

Gives, with authoritative quotations, directions for the time of the performance of the Śrāddha ceremony if it happens to fall on the Ēkādaśī or eclipse days.

Incomplete.

**Beginning:**

पाद्मे—

एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत् ।
तद्दिनं तु परित्यज्य द्वादश्यां तत्समाचरेत् ॥

स्कान्दे—

एकादशी यदा नित्या श्राद्धं नैमित्तिकं भवेत् ।
अपदानं तदा कुर्यात् द्वादश्यां श्राद्धमाचरेत् ॥
एकादश्यां त्रयोदश्यां यच्छ्राद्धं परिवत्सरे ।
द्वादश्यामेव तत्कार्यं विष्णुधर्मपरायणैः ॥

* * * *

ग्रस्तोदये भवेदिन्दौ दिवाश्राद्धं न कारयेत् ।
रात्रावपि तदा कुर्यात् प्रत्यब्दं मुनिरब्रवीत् ॥
श्राद्धकालेषु सर्वेषु श्राद्धं कुर्याद्दिवैव हि ।
कचिद्रात्रौ प्रकुर्वीत ग्रहणे पुत्रजन्मनि ॥

**End:**

कपिञ्जलसंहितायाम्—

पितुर्दशाहमध्ये तु संप्राप्ते हरिवासरे ।
पिण्डदानं न कुर्वीत न तिलोदकसत्क्रियाम् ॥

Foll. 180b—182b contain Smṛtivacanas relating to Vijayadaśami, the taking of food on Jayanti, etc.

(i) तत्त्वसारः.

TATTVASĀRAḤ.

Foll. 183a—191a. Fol. 191b is left blank.

By Varadarāja of Vatsagōtra. Same work as that described under No. 4902 of the D.C.S. MSS., Vol. X, together with the colophon which is given below.

Complete.

**Colophon:**

इति वत्सकुलतिलकवरदराजसूरिविरचिततत्त्वसाराख्यं प्रकरणं संपूर्णम् ॥

The scribe adds—

श्रीमद्वेङ्कठदासेनाप्पन्नैनार्येण लिखितं सम्पूर्णम् ॥

---

(j) वेदान्तसिद्धान्तकौमुदी.

VĒDĀNTASIDDHĀNTAKAUMUDĪ.

Foll. 192a—193a. Foll. 193b and 194 are left blank.

A treatise investigating the nature and characteristics of Cit, Acit and Īśvara in accordance with the Viśiṣṭādvaita Vēdānta.

Contains the Cit-Paricchēda only.

**Beginning:**

भाष्यकारं प्रणम्याहं कृष्णाख्यं च गुरूत्तमम् ।
कुर्वे वेदान्तसिद्धान्तकौमुदीं विदुषां मुदे ॥

सकलवेदान्तप्रसिद्धानि तत्त्वानि त्रीणि—चिदचिदीश्वरभेदात् । . . . . मुख्यम् । तच्च द्विविधम्—धर्मिधर्मभेदात् । तत्र धर्मी जीवः तदाश्रितं ज्ञानं धर्मः । चित्त्वं चेतनत्वं, तच्च ज्ञानाश्रयत्वे सति अणुत्वम् ।

**End:**

तत्स्वरूपात्मकत्वे उक्तदोषतादवस्थ्यात् । अतिरिक्तत्वे सत्यत्वे अद्वैतभङ्गः असत्यत्वे स्वरूपनिवृत्तिरेव स्वस्य मोक्ष इत्यायातम् । तथाचालं मोक्षोपयोगितया ज्ञानादिसंपादनेनेति सङ्क्षेपः ॥

**Colophon:**

इति वेदान्तसिद्धान्तकौमुद्यां चित्परिच्छेदः समाप्तः ॥

अचित्परिच्छेदः.

---

R. No. 2544.

Palm-leaf. 7¾ × 1⅝ inches. Foll. 70. Lines, 7 in a page. Telugu. Good.

Purchased in 1917-18 from M. R. Ry. Dēvakaruṇi Subba Rao Avargal, Satyanārāyaṇapēṭa, Ellore, Kistna district.

(a) स्मृतिसारसमुच्चयः.

SMṚTISĀRASAMUCCAYAḤ.

Foll. 1a—32b.

Similar to the work described under No. 2811 of the D.C.S. MSS., Vol. V.

Breaks off in the Dattaviṣaya.

**Beginning :**

यमापस्तम्बसंवर्तकात्यायनबृहस्पतिः ।
पराशरव्यासशङ्खलिखितौ दक्षगौतमौ ॥
शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्तकाः ।

अथ तर्पणविधिरुच्यते—

पितृतर्पणं द्विविधम्—नित्यं नैमित्तिकं चेति । तत्र वर्गद्वयोद्देशेन कारुण्योद्देशेन च वसुरुद्रादित्यराहित्यं जलमात्रेणाहरहः कर्तव्यतया विहितं नित्यतर्पणम् ।

तथा च याज्ञवल्क्यः—

सवर्णेभ्यो जलं देयं नासवर्णेभ्य एव च ।
नामगोत्रस्वधाकारैः प्रत्यहं तर्पयेत् सुधीः ॥

इति । खिलसंहितायामपि—

तर्पयेत् त्रीन् पितृनादौ ततश्चैव तु मातरम् ।
सापत्न्यमातरं पश्चात् पितामह्यादिकाः क्रमात् ॥

आदिशब्दान्मातामह्यादीनामपि सङ्ग्रहः । तथान्यत्रापि—

**End :**

अनेन दौहित्रादीनामपुत्रस्य मातामहस्य कर्माधिकारोऽस्तीति निश्चितम् । दौहित्रं न प्रतिगृह्णीयान्न ज्येष्ठं पुत्रं दद्यादित्यनेन स्मृतिविरुद्धत्वान्न प्रतिग्राह्यः ।

द्विजत्वं चान्यगोत्रेण भवेदज्ञानतो यदि ।
जन्मगोत्रं यदा ज्ञातं संस्कुर्यात्तेन तं पुनः ॥

---

(b) स्मृतिसङ्ग्रहः.

SMṚTISAṄGRAHAḤ.

Foll. 33a—63a. Fol. 63b is left blank.

Similar to the work described under No. 2808 of the D.C.S. MSS., Vol. V.

Breaks off in the Dattaviṣaya.

**Beginning:**

अथ गर्भिणीपतिधर्माः—

गर्भिण्या यदभिप्रेतं तद्दद्यात्पतिरञ्जसा ।
अन्यथा दोषमाप्नोति तस्मात्कार्यं प्रियं स्त्रियः ॥

केशान् मासत्रयादूर्ध्वं धारयेद्गर्भिणीपतिः ।
पुंसो भार्या गर्भिणी यस्य चासौ सूनोश्चौलं क्षौरकर्मात्मनश्च ।
गेहारम्भस्तम्भसंस्थापनं च वार्धिस्नानं दूरयात्रां न कुर्यात् ॥

अन्यत्र च—

क्षौरं शवानुगमनं नखकृन्तनं च श्राद्धं च वास्तुकरणं पथि देवयात्रा ।
उद्वाहनाम्बुधिजलप्लवनोपभोगमायुःक्षयं ददति गर्भिणिकापतीनाम् ॥

* * * *

अथ मूढे वर्ज्यान्युच्यन्ते—

चौलोपनयने चैव विवाहोद्यापने तथा ।
वेदारम्भं गृहारम्भं महारुद्रं तथैव च ॥

देवतानां प्रतिष्ठा च गोदानं स्नानकं(च)यत् ।
व्रतप्रारम्भणं चैव नववध्वाः प्रवेशनम् ॥

* * * *

रात्रौ भोजनकाले तु यदि दीपो विनश्यति ।
पाणिभ्यां पात्रमादाय मनसा भास्करं स्मरेत् ॥

दृष्ट्वा तदा पुनर्दीपं तदन्नं भोजयेन्नरः ।
पुनरन्नं न भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत् ॥

**End:**

अपुत्रस्य पितृव्यस्य भ्रातृणामग्रजन्मनाम् ।
तस्य तेषां च पत्नीनां श्राद्धं पितृवदाचरेत् ॥

सापत्न्यमातुर्भार्याया ज्येष्ठभ्रातृपितृव्ययोः ।
प्रत्याब्दिकं तु कर्तव्यं नष्टे कर्तरि वै तथा ॥

ज्येष्ठभ्रातुश्च भार्यायास्सापत्नीमातुराब्दिकम् ।
पुत्रैरपि यथा कार्यं नष्टे कर्तरि वै तथा ॥

(c) अघविवेचनम्.

AGHAVIVĒCANAM.

Foll. 64a–69a. Foll. 69a and 69b. contain stanzas relating to the worship of God in Dhanurmāsa. Fol. 70 is left blank.

By Rāmacandrādhvaryu, son of Ananta Sōmayājin of Bhāradvāja-gōtra. Same work as that described under No. 3006 of the D.C.S. MSS., Vol. V.

Complete.

---

R. No. **2545.**

Palm-leaf. 15¼ × 1½ inches. Foll. 184. Lines, 10 in a page. Telugu. Much injured.

Purchased in 1917–18 from M.R.Ry. Subrahmaṇyagāru of Ellore, Kistna district.

ब्रह्मसूत्रविवरणम्—शिवदर्पणम्.

BRAHMASŪTRAVIVARAṆAM : ŚIVADARPAṆAM.

A short commentary on the Brahmasūtras written in accordance with the views of Nīlakaṇṭhaśivācārya and of Appayadīkṣita as expressed in his works, viz., Śivādityamaṇidīpikā (a commentary on the Nīlakaṇṭhabhāṣya), ten Prakaraṇas like Śivatattvavivēka, five Stōtras like Brahmatarkastava, etc. The author is apparently connected with Brahmavidyādhvarin, son of Nṛsiṁha and Bhavānī and the author of Virōdhabhañjanī, Rāmāyaṇavyākhyā; but as the leaves are broken, nothing more can be made out.

Incomplete.

**Beginning :**

. . . . . . . . |
. . . . . शिवस्सोऽवतात् ॥
मुक्तचै चिन्त्यो . . . . . |
. . . . . . . . ॥
. . स्तात्पर्यलिङ्गान्वयनिगमगणैस्सचि . . |
. . . . . साक्षाद्भवानीसुतः श्रीमद्वेङ्कट . . ॥
विरोधभञ्जनीव्याख्या वाल्मीकिये विभाविता ।
कृत्स्नं रामायणं . . . . . . . ॥
. . . भ्रातृगणोऽपि दिग्जयपरस्सा वेङ्कटाम्बा प्रसूस्सोऽयं . . . ॥
. . . .

परमकारुणिकः श्रीकण्ठशिवावतारः श्रीकण्ठशिवाचार्यो भगवता बादराय-णेन . . . . . निषत्तात्पर्यनिर्णायकन्यायग्रथनरूपाणि ब्रह्मसूत्राण्यालोच्य लोकानुजिघृक्षया . . . . त्वमकटनाय . . . . . . . धिकारिणामनु-ग्रहाय च श्रीमतः साम्बशिवस्य प्रेरणया स्वयमद्वैतविद्याचार्येणापि सदाशिवा-द्वैतस्याद्वैताविरोधं . . . . . . . वतारेणाप्पयदीक्षितवर्येण शिवादित्यमणि-दीपिकाटीकाशिवतत्त्वविवेकप्रभृतीनि दश प्रकरणानि ब्रह्मतर्कस्तवादीनि पञ्च स्तोत्राणि . . . . . . . . . शिवभक्तानां प्रमोदाय च यावत्तद्ग्रन्थसारसं-ग्रहेण नवीनकुमतानुवर्तिसमारोपितसकलकलुषनिरस . . . . . . . . . . . . . . . . . . . स्याद्वैताविरोधं च जन्माद्यधिकरणे तदनन्यत्वाधिकरणे च समर्थ . . . . . . . . . . . . . . . . . . . . . .

शब्दापरोक्षधीभङ्गः श्रवणे कृतिसाधनम् ।
कर्मभिश्चित्तवैमल्यं सगुणब्रह्मचिन्त्यता ॥
शिवस्यैवैतदात्मत्वं . . . . . . ।
. . . . . शिवाद्वैते विज्ञेयार्थास्त्रयोदश ॥
जन्मादिपञ्चकं लक्ष्मसप्रकारध्रियै(व)तत् ।
अखण्डार्थत्वमन्याद्दगद्वैत्युक्तं त्वशोभनम् ॥
. . . . . . . चिदचिन्मेलनं जगत् ।
आद्यात्र पञ्चमी हेतावेककोटिश्च संशयः ॥
लक्ष्माव्यवस्थयाक्षेपस्सिद्धान्तस्तद्व्यवस्थया ।
. . . . . . . . . शिवे तामसताहतिः ॥
पुराणेषु च सा न्यायैर्गीताद्यन्तेशद्दष्टितः ।
अष्टादशार्था जन्मादिनयोक्ताः शिवदर्शने ॥
. . . . . . . . . . . . . . ।
शास्त्रयोनित्वनीतौ तु चत्वारोऽर्था विवेचिताः ॥
सिद्धे व्युत्पत्तिरास्थेया . . . . . . ।
समन्वयनये ज्ञेयाः षडर्थाः शैवदर्शने ॥

एवं तदनन्तरमपि सङ्ग्रहीष्यामः—

. . . . . . . . . . . . . . . . . . . . . . . . .

वीयभाग्यवशेन परमशिवकरुणासमुद्रशीकरलेशवशात् काम्यनिषिद्धवर्जं नित्यनैमित्तिकप्रायश्चित्तरूपाणि ।

* * * *

भाष्यदीपिकयोः स्पष्टम् । यद्यप्यथशब्दस्यानन्तर्यार्थत्वेऽन्यसमानेऽपि धर्मविचारस्य तन्निर्णयद्वारा धर्मानुष्ठानहेतुत्वेन क्लृप्तत्वात् कथं तदानन्त . . . . . . . . . . . . नन्तर्येण ।

* * * *

छान्दोग्ये—

तद्धैतद्ब्रह्मा प्रजापतये उवाचेत्यादिन्तिमखण्डे आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य . . . . . . . . . . विदध-दात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्याहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यस्स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते . . वं वर्तमान . . . . पर्यन्तब्रह्मलोकप्राप्तिरूपमोक्षश्रवणात् ज्ञानावरुद्धस्य मोक्षस्य कर्ममात्रेणोत्पत्त्ययोगात् । तथात्वे त्वनित्यत्वप्रसङ्गाच्च ।

End:

कथं निर्विशेषतारूपं शुद्धाद्वैतं परमसिद्धान्तो भाष्यकाराणामित्यत्रेदं भाष्यवचन . . . . . . . चतुर्मतारीयः . . . . . . . संग्रहः ।

जन्मादि ब्रह्मलक्ष्म श्रुतमिति प्रणतस्तेन किं चोपलक्ष्यं
(सज्ज्ञाना)नन्दमुख्यं खलु तदभिमतं तत्र तत्रान्य . . ।
तद्वाक्येष्वेव ताराविनिगमविहता . . . . . .
. . . . . . . . ति समुदये कर्तृता नोपपन्ना ॥
. . . . . . . भवति भवमुखा यस्य नामाष्टकं च
स्पष्टं तं पार्वतीशं गमयति शिव एवेति मन्त्रोऽपि तानि ।
सज्ज्ञानानन्द . . . . . . . . पञ्चकृत्वोपलक्ष्य
स्तत्र श्रौत . . . . . . . . . . . . ॥
एकं मन्त्रं बहूनां . . . . . . . . . . . मैं
को वा ब्रूते स एव स्वयमुपहरते बोधमेषामितीदम् ।
प्रत्येकं कारणोक्तिप्रकरणमखिलं स्वार्थसात्कर्मकामा-
स्तिष्ठन्त . . . . विधिहरिगिरिशा . . . ॥

Colophon:

इति शिवदर्पणे जन्माद्यधिकरणं समाप्तम् ॥

R. No. **2546**.

Paper. 8¾ × 6¼ inches. Foll. 48. Lines, 18 in a page. Telugu. Good.

Purchased in 1917–18 from M.R.Ry. Viśvanātha Śāstri, Jagannāthapuram, Kistna district.

(a) बालात्रिपुरसुन्दरीमन्त्रः.

BĀLATRIPURASUNDARĪMANTRAḤ.

Fol. 1.

Slightly different from the work described under No. 6746 of the D.C.S., MSS., Vol. XIII.

Complete.

**Beginning:**

अस्य श्रीबालापरमेश्वरीमहामन्त्रस्य दक्षिणामूर्तिऋषये नमः, पङ्क्तिश्छन्दसे नमः, बाला परमेश्वरी देवता; ऐं बीजं, क्लीं शक्तिः सौः कीलकं, मम श्रीबालापरमेश्वरीप्रसादसिध्यर्थे जपे विनियोगः ।

**End:**

मनुः—ऐं क्लीं सौः सौः क्लीं ऐं यथाशक्ति जपं कृत्वा श्रीबालाम्बायै समर्पयेत् ॥

---

(b) बालाहृदयम्.

BĀLAHṚDAYAM.

Foll. 1b–3a.

Similar to the work described under No. 6775 of the D.C.S. MSS., Vol. XIII.

Complete.

**Beginning:**

देवदेव महादेव विरूपाक्षाय ते नमः ।
बालाया हृदयं मन्त्रं वद मे परमेश्वर ॥

ईश्वर उवाच—

बालाया हृदयं मन्त्रं गुह्याद्गुह्यतरं तथा ।
एतच्छ्रवणमात्रेण मन्त्रसिद्धिमवाप्नुयात् ॥

**End:**

आं ह्रीं क्रों शक्तिरूपिणि एहि एहि आं ह्रीं क्रों सन्निधिं कुरु कुरु आं ह्रीं क्रों सौः मम शक्ति मम हृदये चिरं तिष्ठ तिष्ठ हुंफट् स्वाहा ॥

वन्ध्याया मार्जयेदङ्गे बालाया हृदयेन च ।
ततो वन्ध्या पुत्रवती षण्मासाद्भवति ध्रुवम् ॥

बालाया हृदयेनैव त्रिसप्तमभिमन्त्रितम् ।
पिबेत्पयश्चेदुदये वन्ध्या पुत्रवती भवेत् ॥
कृत्रिमेषु च रोगेषु नानाभयसमुद्भवे ।
त्रिसप्तमन्त्रितैस्तोयैस्सद्यो निर्मलमाप्नुयात् ॥
नित्यमष्टोत्तरं जप्त्वा बालाया हृदयं मनुः ।
चिन्तितं संभवेद् देवि नात्र कार्या विचारणा ॥

**Colophon:**

इति श्रीरुद्रयामले उमामहेश्वरसंवादे बालाहृदयं संपूर्णम् ॥

---

(c) बालात्रिपुरसुन्दरीकवचम्.

BĀLĀTRIPURASUNDARĪKAVACAM.

Foll. 3a—4a.

Similar to the work described under No. 6736 of the D.C.S. MSS., Vol. XIII.

Complete; as found in the Bhairavayāmala.

**Beginning:**

श्रीपार्वत्युवाच—

देवदेव महादेव भक्तानां प्रीतिवर्धन ।
सर्वविस्त्वं महादेव(वी)कवचं कथयस्व मे ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि कवचं देवि दुर्लभम् ।
अप्रकाश्यं परं गुह्यं साधकाभीष्टसिद्धये ॥

* * * *

वाग्भवं पातु शिरसि कामराजं तथा हृदि ।
शक्तिबीजं सदा पातु नाभौ गुह्ये च पादयोः ॥
ऐं क्लीं सौः वदने पातु बाला सर्वार्थसिद्धिदा ।

**End:**

इदं तु कवचं देव्याः श्रीविद्यां यो जपेद्बुधः ।
संप्राप्नोति फलं तस्य शिवसायुज्यमाप्नुयात् ॥

**Colophon:**

इति श्रीभैरवयामले उमामहेश्वरसंवादे बालात्रिपुरसुन्दर्यम्बादिव्यश्री-रमणपादुकार्पणमस्तु ॥

(*d*) बालामालामन्त्रः.

BĀLĀMĀLĀMANTRAḤ.

Foll. 4*a*—5*a*.

Similar to the work described under No. 6772 of the D.C.S. MSS., Vol. XIII.

Complete; as found in the Rudrayāmala.

**Beginning:**

अस्य श्रीबालापरमेश्वरीमहामन्त्रस्य दक्षिणामूर्तिऋषिः, गायत्री छन्दः, श्रीबालापरमेश्वरी देवता, ऐं बीजं, क्लीं शक्तिः, सौः कीलकं मम बालाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

ओं नमो भगवति बालापरमेश्वरि अयुतसहस्रकोटिरुद्रगणसेविते ।

**End:**

मम वशं कुरु कुरु ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः हुं फट् स्वाहा ॥

**Colophon:**

इति श्रीरुद्रयामले उमामहेश्वरसंवादे बालामाला समाप्ता ॥

---

(*e*) बालास्तवराजः.

BĀLĀSTAVARĀJAḤ.

Foll. 5*a*—6*a*.

Same work as that described under No. 10802 of the D.C.S. MSS., Vol. XIX.

Complete; as found in the Bhairavayāmala.

---

(*f*) बालात्रिपुरसुन्दरीपटलम्.

BĀLATRIPURASUNDARĪPAṬALAM.

Fol. 6. Fol. 7 contains Vāgvādinījapavidhi.

A Paṭala of Rudrayāmala.

Contains the Mantrōddhāra and the Yantrōddhāra.

**Beginning:**

श्रीपार्वत्युवाच—

देवदेव महादेव यद्यहं प्रेयसी तव ।
पटलं त्रिपुरादेव्या यथा तत्त्वप्रकाशय ॥

ईश्वर उवाच—

अथातस्संप्रवक्ष्यामि देवि गुह्योत्तमोत्तमम् ।
यस्य विज्ञानमात्रेण साधको भैरवो भवेत् ॥

मन्त्रोद्धारं प्रवक्ष्यामि यथा तच्छृणु सादरम् ।
वाग्भवं प्रथमं प्रोक्तं द्वितीयं कामराजकम् ॥

**End:**

विलिख्य यन्त्रं देवेशि बालायास्सर्वकामदम् ॥

इति यन्त्रोद्धारः ॥

पुरश्चर्याविधिः—

पुरश्चर्याविधानं स्यात्साधकानां प्रसिद्धये ।

* * * *

जपाद्दशांशं हवनं तद्दशांशेन तर्पणम् ।
मार्जनं तद्दशांशेन तद्दशांशेन भोजनम् ॥

**Colophon:**

इति श्रीरुद्रयामले उमामहेश्वरसंवादे श्रीबालात्रिपुरसुन्दरीपटलं समाप्तम् ॥

---

(*g*) बालात्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रम्.

BĀLĀTRIPURASUNDARYAṢṬŌTTARAŚATANĀMA-STŌTRAM.

Foll. 7*b*—8*b*.

Similar to the work described under No. 9156 of the D.C.S. MSS., Vol. XVII.

Complete.

**Beginning:**

श्रीपार्वत्युवाच—

देवदेव महादेव विश्वेश प्राणवल्लभ ।
श्रुतिस्मृतिपुराणानां रहस्यं त्वन्मुखाच्छ्रुतम् ॥

ऐहिकामुष्मिकफलं केन वा भक्तवत्सल ।
वक्तुमर्हस्यशेषेण सर्वं निखिलमादितः ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि सुन्दरि प्राणवल्लभे ॥

* * * *

ओङ्कारिणी औंविवह्निरम्बिका आदिरूपिणी ।
कङ्काली खड्गधारिण्यै गीता घण्टारवप्रिया ॥

**End:**

यमुना शर्वरी देवी क्षेत्रिणी भुवनेश्वरी ।
त्रिवर्णा त्रिपुरा बाला प्रणमामि सरस्वती ॥

**Colophon:**

इति श्रीबालात्रिपुरसुन्दर्यष्टोत्तरशतनामावलिस्समाप्ता ॥

---

(*h*) बालात्रिपुरसुन्दरीसहस्रनामस्तोत्रम्.

BĀLĀTRIPURASUNDARĪSAHASRANĀMASTŌTRAM.

Foll. 8*b*—15*b*.

Same work as that described under No. 9146 of the D.C.S. MSS., Vol. XVII, but the additional stanzas found in the end are given below.

Complete.

सर्वरोगप्रशमनं सर्वोपद्रवनाशनम् ।
सर्वरक्षाकरं देवि सर्वकार्यार्थसाधकम् ॥
सर्वकर्महरं चापि सर्वयोगीश्वरीमयम् ।
* * * *
महावश्यकरं चापि महासुखकरं परम् ॥

---

(*i*) बालाम्बिकाकल्पः, सटीकः.

BĀLĀMBIKĀKALPAḤ WITH COMMENTARY.

Foll. 15*b*—28*a*. Fol. 28*b* is left blank.

This forms the eighth Taraṅga of the Mantra-Mahōdadhi and deals with details relating to the conduct of worship of the Goddess Bālā.

Complete.

Name of the copyist: Holla Laccappa Śāstri. Date of transcription: Sunday, the 9th day of the bright fortnight of the Caitra month in the year Hēvilambi.

**Beginning:**

अथ बालां प्रवक्ष्यामि मन्त्री संसेवया धृ(द्रु)तम् ।
बृहस्पतिः कुबेरश्च जायते विद्यया धनैः ॥
दामोदरश्चन्द्रयुता आद्यं वाग्बीजमीरितम् ।
विदि(षि)र्वासवशान्तीन्दुयुतं कामाभिधं वरम् ॥
सङ्कर्षणविसर्गाढ्यः भृगुस्तार्तीयमीरितम् ।
त्रिबीजा गदिता बाला जगत्त्रयविमोहिनी ॥

अस्यार्थः। बालामन्त्रमाह—अथेति। दामोदर इति। चन्द्रयुतो बिन्दुयुतः ऐं वागिति संज्ञा यस्य। विधिः कः। वासवशान्तीन्दुयुतः क ई बिन्दुयुतः। क्लीं। भृगुः सः सङ्कर्षणः जातेन विसर्गेण च युतः सौः।

* * * *

दक्षिणामूर्तिसंज्ञश्च मुनिश्चन्द्रः कमात्स्मृतम्।
देवता त्रिपुरा बाला मध्यान्त्ये शक्तिबीजके॥

टी.—मध्यान्त्ये मध्यं शक्तिः अन्त्यं बीजम्।

**End:**

पाशाङ्कुशौ पुस्तकमक्षसूत्रं करैर्दधाना सकलामला(रा)र्च्या।
रक्ता त्रिनेत्री शशिशेखरेयं ध्येया सुपादा त्रिपुरा त्रिबाला॥
जपो लक्षांशेन होमः पुष्पैर्हयारिजैः॥
पूजा पूर्वोदिते पीठेऽङ्गरेत्याद्यैश्च सायकैः।
मातृभिर्दिग्धीशास्त्रैः प्रयोगाः पूर्ववन्मताः॥

**Colophon:**

इति मन्त्रमहोदधौ अष्टमतरङ्गे बालामन्त्रभेदकथनं समाप्तम्॥

टीका—चतुर्दशमाह—कामेति। कामपद्माद्रिपुत्रिणीं प्रत्येकं त्रयं क्लीं क्लीं क्लीं श्रीं श्रीं श्रीं ह्रीं ह्रीं ह्रीं इनद्वयं पद्वयं मम अनलाङ्गना स्वाहा। अन्यत्स्वरूपम्। एते चतुर्दश बालाभेदाः। तेषामृष्यादिध्यानान्याह। ध्यानमाह—पाशाङ्कुशेति। अङ्कुशाक्षसूत्रे दक्षयोः। हयारिः करवीरः सायकैः देवताभिः॥

**Colophon:**

इति मन्त्रमहोदधौ नौकायां बालामन्त्रभेदकथनं समाप्तम्॥
श्रीबालाम्बिकाकल्पं समाप्तम्॥

---

(j) विजृम्भितयोगभाष्यम्.

VIJṚMBHITAYOGABHĀṢYAM.

Foll. 29a—32a.

By Śaṅkarācārya. Similar to the work described under No. 4381 of the D.C.S. MSS., Vol. IX.

Contains the first Āśvāsa only.

**Beginning:**

एवं हठयोगलक्षणं विस्तरेण निशम्य प्राञ्जलः सद्गुरुदिन्द(रिद)मवदद्राजयोगं वद दापयेति सह। तं विनयसद्वचनगुरुभक्ताग्रगण्यं शिष्यं शृणु सावधानेनेत्यादरेणेदमाह—

राज(यो)गः राजप्रयुक्तो योगः । तथोच्यते—

योगानां राजते राजयोगः पूर्वोक्तयोगाः देहप्रयासकरा अयं तु निरायासेन मोक्षरूपपुरुषार्थप्रदः । हठपदस्याष्टाङ्गानि सन्ति । तदङ्गत्वविस्तृतं हठे भवन्ति । सूक्ष्माङ्गत्वं संक्षेपादस्य वक्ष्ये ।

**End:**

बुद्धिपरमात्मस्वरूपं सच्चिदानन्दलक्षणं ज्ञातुं भवति ।
तद्धर्मिणि बुद्धं संरोच्यात्मैक्यमिति सपञ्चसमुक्तम् ॥

**Colophon:**

इति परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचिते विजृम्भितयोगसूत्रभाष्ये प्रथमाश्वासः ॥

---

(*k*) राजयोगभाष्यम्.

RĀJAYŌGABHĀṢYAM.

Foll. 32*a*—34*b*.

By Śaṅkarācārya. Same work as that described under No. 4375 of the D.C.S. MSS., Vol. IX.

Incomplete.

Foll. 35—46 are left blank.

---

R. No. 2547.

Paper. 9¾ × 4¼ inches. Foll. 21. Lines, 7 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Bhajan Lal, bookseller, Amritsar, Punjab.

मुहूर्तमञ्जरी.

MUHŪRTAMAÑJARĪ.

A treatise in verse giving the proper auspicious time for the performance of different kinds of ceremonies from the time of conception of a person to his marriage and for various other purposes. The author is Yadunandana who is said to have completed the work in the year 176(?).

Contains the following subjects, arranged under four Gucchas:—

संस्कारमुहूर्तविचारगुच्छ—

१. नक्षत्रदेवता.
२. वर्ज्यानि.
३. सिद्धामृतयोगाः.
४. रजस्वलास्नानम्.
५. गर्भस्य चाधानम्.
६. पुंसवनसीमन्तकर्म.
७. प्रसूतिकास्नानम्.
८. नामकरणम्.

९. जलपूजा.
१०. अन्नप्राशनम्.
११. सत्कर्णवेधः.
१२. चौलक्षौरविधिः.
१३. अक्षरारम्भः
१४. विद्यारम्भः.
१५. व्रतबन्धः
१६. अग्निहोत्रविधिः.

विवाहविचारगुच्छ—

१. बलविचारः.
२. वरणगुरुरविचन्द्रविचारः.
३. विवाहनक्षत्रमासाः.
४. पञ्चशलाकाचक्रम्.
५. लत्ताशूलगण्डाः.
६. पत्युर्विवाहः.
७. विधौ पाणिग्रहस्य.
८. जामित्रम्.
९. बुधपञ्चकम्.
१०. एकार्गलः.
११. कान्तिसाम्यम्.
१२. दग्धतिथयः.
१३. तत्काललग्नविचारः.
१४. वधूप्रवेशः.
१५. द्विरागमनम्.

गृहारम्भप्रवेशराजाभिषेकयात्राविचारगुच्छ—

१. यात्रानक्षत्राणि.
२. यात्रानिषेधः.
३. कालपाशविचारः.
४. पञ्चकम्.
५. योगिनीविचारः.
६. . . . . . .

सर्वारम्भतात्कालिकलग्नविचारगुच्छ—

१. वस्त्रादिधारणम्.
२. वस्त्रादिविशेषः.
३. वृक्षलतारोपणम्.
४. राजदर्शनमथमुहूर्तम्.
५. वाजहस्तकर्मणी.
६. पशुप्रवेशः.
७. क्रयविक्रयणम्.
८. विपणिकर्मसूचीकर्म.
९. शस्त्रभूषाघटनम्.
१०. मुद्रिकापातनम्.
११. कुन्तादिधारणम्.
१२. वस्त्रक्षालनम्.
१३. तटाकादिखननन्नृत्यारम्भः.
१४. धर्मक्रियाकर्म.
१५. नौकारम्भः.
१६. नौकागमनसिद्धिकर्म.
१७. शिल्पविद्यारम्भः.
१८. घृतकाञ्चनादिस्पर्शः.
१९. हलप्रवाहः.
२०. बीजोत्पत्तिः.
२१. सस्यारोपणम्.
२२. धान्यच्छेदः.

२३. नवान्नप्राशनम्.
२४. धान्यस्थितिः.
२५. वैराभिचारशान्तिकादि.
२६. देवारामतटाकादिप्रतिष्ठा.
२७. गणेशादिस्थापनम्.
२८. दीक्षाग्रहणम्.
२९. रोगिमृत्युज्ञानम्.
३०. रोगिस्नानम्.
३१. भैषजकर्म.
३२. सिरामोक्षविरेकवान्तयः.
३३. सर्पदष्टमृतज्ञानम्.
३४ द्रव्यप्राप्तिज्ञानम्.
३५. ऋणवृद्धिविज्ञानम्.
३६. ऋणदानर्क्षज्ञानम्.
३७. नष्टवस्तुप्राप्तर्क्षज्ञानम्.
३८. नष्टवस्तुयत्नलाभज्ञानम्.
३९. दूरे नष्टवस्तुश्रवणज्ञानम्.
४०. नष्टलाभश्रवणज्ञानम्.
४१. तिर्यङ्मुखगणः.
४२. ऊर्ध्वमुखगणः.
४३. सर्वारम्भतात्कालिकलग्नम्.

Complete.

**Beginning:**

अथ मुहूर्तमञ्जरी लिख्यते—

कारुण्यपूर्णौ चरणौ शरण्यौ वन्दे गुरूणां विकचाम्बुजाभौ ।
ययोस्स्मृतेर्ज्ञानसुखप्रदायाः प्रत्यूहपुञ्जाः प्रलयं प्रयान्ति ॥
दस्रः कालाग्निधातृद्विजपतिगिरिशश्चादितिर्देवमन्त्री
सर्पाः पित्राख्ययोन्यर्यम(र्यमाख्यौ भग)दिवसकरत्वष्टृवाता ह्यषाग्नी ।
नक्षत्रेशा(श्र)मित्रत्रिदशपतिनिशाचारिवाणिश्वि(रीणि वि)श्वे
वेधा विष्णुर्वसुस्त्वप्पपि(ति)रजपदहिर्बुध्नपूषाभिधानाः ॥
इति नक्षत्रदेवता ॥

व्यतीपातवैधृत्यमापर्वभद्रा तिथिर्वृद्धिनेष्टाजनुर्भप्रकुक्षः ।
कवीज्यास्तसङ्क्रान्तिन्यूनाधिमासा कुजार्कार्किरिक्तांस्त्यजेद्रव्यकृत्ये ॥
विष्कम्भवज्रे घटिका हि तिस्रः व्याघातशूले नव पञ्चजस्तत् ।
प्रत्येषु कृत्येष्वतिगण्डगण्डे षडेव धीरः परिघादिमाधम् ॥
इति वर्ज्यानि ।

* * * *

**Colophon:**

इति श्रीमत्पण्डितयदुनन्दनविरचितायां मुहूर्तमञ्जर्यां संस्कारमुहूर्तविचारो नाम प्रथमो गुच्छः ॥

**End :**

जनेर्लमतो जन्मराशेस्तदीशे रिपौ खे च लाभे विलग्नत्वमेत्य ।
त्रिषट्खायसंस्थो ससकव्ययाष्टमशुद्धौ च सिद्धि क्रिया याति सर्वा ॥

**Colophon :**

इति सर्वारम्भतात्कालिकलग्नम् ॥

कृत्तिके पाण्डुरे पक्षे पु(बु)धैकादशीषु च ।
षडद्रिभूमिते वर्षे समाप्तिमियमागता ॥
गुच्छैश्चतुर्भिस्सहिता सुमङ्गला श्लोकैर्धरादिक्यमितैस्समन्विताः ।
विनिर्मितेयं यदुनन्दनेन सा-मतं सुखायास्तु मुहूर्तमञ्जरी ॥

इति श्रीमुहूर्तमञ्जरी समाप्ता ॥

---

R. No. 2548.

Paper. 6 × 4 inches. Foll. 23. Lines, 18 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. Viśvanātha Śāstri of Jagannathapuram, Kistna district.

सर्ववेदान्तसङ्ग्रहः.

SARVAVĒDĀNTASANGRAHAḤ.

Foll. 1a—22b. Fol. 23 is left blank.

By Saccidānandasvāmin, pupil of Rāmānandēndrasvāmin. Same work as that described under R. No. 1613 (a) ante.

Complete.

---

R. No. 2549.

Paper. 8½ × 4½ inches. Foll. 8. Lines, 15 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. P. Vēṅkaṭārya of Vijayarāyi, Kistna district.

लकारार्थवादः.

LAKĀRĀRTHAVĀDAḤ.

Similar to the work described under R. No. 1379 ante.

Incomplete.

**Beginning :**

धातुप्रकृतिकाश्च लकारस्तत्तन्यद्धणिच्प्रभृतयः प्रत्ययाः । केचिद्धात्वर्थान्वितस्वार्थं ब्रुवते । अर्थान्तरमनभिधानाच्च, केचिदाकाङ्क्षानिर्वाहकतया प्रकृति-

भिः स्वीयार्थबोधन एवोपकुर्वन्ति । तत्र लडादिदशलकाराणां लः कर्मणि च भावे चाकर्मकेभ्य इति सूत्रेण कर्तृकर्मभावेष्वनुशिष्टानां कर्तुस्सामान्यमर्थः । तावन्मात्राभिधानेनैव प्रथमान्तपदोपस्थाप्यविशेषणतया तदन्वयेन कृतिविशिष्टकर्तुर्बोधनिर्वाहाल्लकारस्य तद्बोधकतया लः कर्मणीति सूत्रविरोधः बोधकतया एव तत्र सप्तम्यर्थत्वन्न तु वाचकतायाः । गौरवेण विशिष्टधर्मिणि शक्तेर्बाधात् ।

**End :**

अतस्त्यादीनां तत्तद्रूपेण शक्तिकल्पनस्यावश्यकतया लाघवात् कर्मत्व एव तत्कल्पनात् । कर्मत्वं च गम्यते त्यज्यते ग्राम इत्यादौ धात्वर्थतावच्छेदकीभूतसंयोगविभागादिरेव विशेष्यतयाति.

---

R. No. 2550.

Paper. 12⅝ × 4 inches. Foll. 5. Lines, 9 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. P. Vēnkaṭācārya of Vijayarayi, Kistna district.

**विशिष्टाद्वैतशब्दनिर्णयः.**

**VIŚIṢṬĀDVAITAŚABDANIRṆAYAḤ.**

An investigation into the meaning of the expression Viśiṣṭādvaita.

Complete, but wants the beginning.

Copying date: 11th day of the dark fortnight of Āṣāḍha month in Samvat 1920.

**Beginning :**

भिन्नत्वात् । विशिष्टाद्वैतमित्यत्र कर्मधारयसमासाङ्गीकारे न काप्यनुपपत्तिरिति चेन्न, ब्रह्मणः सम्बन्धस्वरूपत्वे सम्बन्धस्योभयाश्रितत्वेन ब्रह्मणोऽप्याश्रयान्तरापेक्षणे निराश्रयत्वप्रतिपादकश्रुतिविरोधात् । ननु सम्बन्धो ह्यौत्यादिलक्षणं सम्बन्धप्रायिकत्वाभिप्रायं, न तु सार्वत्रिकत्वाभिप्रायमिति न ब्रह्मणः सम्बन्धरूपतयाश्रयान्तरापेक्षायां निराश्रयत्वभङ्गप्रसङ्ग इति चेन्न, ब्रह्मणस्सम्बन्धाभिन्नत्वाभावे सम्बन्धिरूपत्वकल्पनाया आवश्यकतया सविकारित्वप्रसङ्गे निर्विकारत्वप्रतिपादकश्रुतिविरोधात्, वैशिष्ट्याद्वैतापत्तेश्च ।

* * * *

कल्याणगुणविशिष्टस्य ब्रह्मणोऽभेदो विशिष्टाद्वैतशब्दार्थ इति चेन्न, सिद्धसाधनादिति । तदेतद्विशिष्टाद्वैताचार्यहृदयानभिज्ञकल्पितमिति मन्यामहे ।

विशिष्टयोः परब्रह्मणोरेवाद्वैतमिति षष्ठीसमासाश्रयणात् । नन्वेवं श्रुतिस्मृत्यादि-विरोधः ।

* * * *

तस्माद्विशिष्टाद्वैतमेव ब्रह्म वेदान्तवेद्यमिति न्यायविद्भिस्स्वीकर्तव्यम् । अपि च ब्रह्मशब्दः किं जातिवाचकः

**End:**

तदुक्तम्—

अन्यत्राज्ञानधर्माणामारोपो नैव सिध्यति ।
यदि सिद्धे . . . . रकूर्मरोमादिविभ्रमः ॥

इत्यादिकं तु भाष्यादावेव सुस्पष्टमित्युक्तमिति विस्तरभयान्नेह लिख्यते ।

यतीश्वरसरस्वतीसुरभिताशयानां मुदे
प्रसङ्गरणमण्डले विजयनाथमेतन्मया ।
कृतं सुकृतिनां सतां स्वगणपाश . . . नावले
सुधूत्य विजयं शुभं भगवते प्रयच्छन्तु वै ॥

---

## R. No. 2551.

Paper. 11⅜ × 7¾ inches. Foll. 115. Lines, 14 in a page. Telugu. Good.

Purchased in 1917–18 from M.R.Ry. Divakaruni Subba Rao of Ellore, Kistna district.

Fol. 1a contains the name of the work.

काशिकेदारमाहात्म्यम्.

KĀŚĪKEDĀRAMĀHĀTMYAM.

Deals with the greatness and religious sanctity of Kēdārakṣetra in the Himalayas.

Complete; as found in the Adhyayas 1 to 31 of the Brahmavaivarta (Khila).

**Beginning:**

विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्यवा-
ड्विघ्नव्यालकुलोपमत्त(र्द)गरुडो विघ्नेभपञ्चाननः ।
विघ्नोत्तुङ्गगिरीशमर्द(रिप्रभेद)नपविर्विघ्नाब्धिकुम्भोद्भवो
विघ्नाघौघघनप्रचण्डपवनो विघ्नेश्वरः पातु नः ॥
अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अफाललोचनश्शम्भुर्यो व्यासस्तं गुरुं भजे ॥

नैमिशेऽनिमिषक्षेत्रे मुनयश्शौनकादयः ।
कदाचिद्विश्वजिन्नाम सत्रमारभ्य भूसुराः ॥
ईजिरे दीर्घकालं ते शिवज्ञानैकवाञ्छया ।
शौनकोऽत्रिर्भरद्वाजो वसिष्ठो गालवश्शुचिः ॥

* * *

अस्मिन्नवसरे तत्र चागतः सर्वसूक्ष्मवित् ।
श्रुतिस्मृतिपुराणागमेतिहासालयस्सुधीः ॥
व्यासशिष्यस्सर्वदर्शी श्रेष्ठो रौमहर्षणिः ।
तं दृष्ट्वा ते शिवज्ञानपूर्णवारिधिमादरात् ॥
प्रत्युत्थाय समालिङ्ग्य मध्ये समुपवेशयन् ।
आसनाद्यैश्च संपूज्य पप्रच्छुस्स्वागतादिकम् ॥
पुनस्तमूचुर्मुनयः कुतोऽभ्यागमनं तव ।
रौमहर्षणिराहैतान् श्रीकेदारान्निजागमम् ॥
तदा ते मुनयस्सर्वे शिवतत्त्वार्थवाञ्छया ॥
पप्रच्छुस्तमतिप्रीत्या शिवज्ञानैकभाजनम् ।
किं चित्रं तत्र भगवन् केदारेशस्य नो वद ॥
रहस्यं परमेशस्य भवतः श्रोतुमुत्सुकाः ॥
तवाज्ञातं किंचिदपि सरहस्यं महेशितुः ।
सद्गुरोरुपदेशाच्च व्यासस्य च महामतेः ॥
इति पृष्टो व्यासशिष्यो मुनिभिस्तत्त्वदर्शिभिः ।
तान्वक्तुमारभद्धृष्टा शिवस्य शिवसत्कथाः ॥

सूत उवाच—

शृणुध्वं मुनयस्सर्वे धन्या यूयं न संशयः ।
यत्र शुश्रूषवश्शम्भो रहस्यं सर्वदुःखहम् ॥

* * * *

उपपाद्यममीनो यत् तेभ्यश्शिष्टं खिलं विदुः ।
सपादलक्षग्रन्थं वै रहस्यं परमेशितुः ॥
पृथगस्ति पुराणेभ्यश्शैवसिद्धान्तसंग्रहम् ।
इतिहासोपदेशेन पुराणेभ्यः पृथक् पृथक् ॥

एकैकस्य पुराणस्य उपाख्यानं बहुद्विजाः ।
नवलक्षं ग्रन्थतश्च तीर्थक्षेत्रप्रशंसनम् ।
काश्यादिक्षेत्रलिङ्गानां चान्यदेवर्षिनाकिनाम् ।
सरित्पर्वतवृक्षाणामृषिप्रोक्तं सनातनम् ॥
तथा श्रुतिष्वपि ऋचः खिलास्सामयजूंषि च ।
भारतादिष्वपि तथा खिलं सर्वं प्रमाणकम् ॥
खिलमात्रं पृथक्कृत्य नवलक्षं स्थितं भुवि ।
ततोऽधिकं दिवि पुनः पातालेति च शुश्रुम ॥
एतेषु सर्वग्रन्थेषु काशी सर्वत्र गीयते ।

* * * *

इदानीं गुरुणा साकं काशीं दृष्ट्वा ततो जवात् ।
अहं केदारनाथं च द्रष्टुमागां हिमाचले ॥
तत्र दृष्टं मयाश्चर्यं श्रीमत्केदारवैभवम् ।
काश्यां च यैवं सर्वं भवद्भिः श्रुतमेव हि ॥
सनत्कुमारयोगीन्द्रवामदेवाभिभाषणम् ।
रहस्यं गुरुणा मह्यमुपदिष्टं महाद्भुतम् ॥

* * * *

सूत उवाच—
शृणुध्वमृषयस्सर्वे श्रीमत्केदारवैभवम् ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यन्ते मानवा ध्रुवम् ॥
गिरिरूपेण यत्रस्थौ नरनारायणावृषी ।
अद्यापि हिमवत्पार्श्वे विष्वंशौ शङ्करं भजन् ॥
बदर्याश्रमसंज्ञे वै आस्ते नारायणो द्विधा ।
श्रीमत्केदारनाथाभ्यो(श्चस्य)दर्शनान्मोक्षदो नृणाम् ।
कैलासात्स्वयमागत्य नृणां मुक्त्यै स्थितो गिरौ ॥

* * * *

**Colophon:**

इति श्रीकाशीमूलरहस्ये ब्रह्मवैवर्ते खिले काशीकेदारमाहात्म्ये प्रथमोऽध्यायः ॥

* * * *

सूत उवाच—

शृणुध्वं मुनयस्सर्वे यद्रहस्यं शिवोदितम् ।
शिष्टं तद्ब्रह्मवैवर्तपुराणोक्ताद्वरं खिलम् ॥
खण्डत्रयं समाम्नातं काशीवैभवसंग्रहम् ॥
विश्वेशखण्डं प्रथमं देव्यै प्रोक्तं पिनाकिना ।
काश्यां च नित्ययात्राया विधानमहिमायुतम् ॥
ततश्चोङ्कारखण्डाख्यं द्वितीयं शिवभाषितम् ।
काश्यामोङ्कारलिङ्गादिसर्वयात्रासु वैभवम् ॥
ततस्तृतीयं केदारखण्डाख्यं शम्भुनोदितम् ।
काशीकेदारसर्वस्व महिमानं शिवावहम् ॥
तेषु खण्डेषु केदारखण्डमाहात्म्यसत्कथाः ।
वक्ष्ये शृणुत भो विप्रा यथावद्गुरुणोदिताः ॥

* * * *

नाथशर्मा—

शृणु देवि प्रवक्ष्यामि रहस्यं गोप्यमद्भुतम् ।
प्राचीनेति नवीनेति द्वे काश्यां मणिकर्णिके ॥
विराजते विश्वनाथकेदारेशपुरं शुभे ।

**End:**

पञ्चकोशस्थदेवानपि च बहुतरान् तीर्थसङ्घान् सगङ्गान्
सम्यक् संपूज्य पश्चाच्चरणमुपययुः काशिकेदारनाथम् ।
नत्वा सम्यक्प्रपूज्य प्रकटादिवि गिरा तस्य दिव्याज्ञया ते
स्वेच्छासञ्चारशीला हृदि विधृतशिवा नित्यमुक्ता विजह्रुः ॥

**Colophon:**

इति श्रीकाशीमूलरहस्ये ब्रह्मवैवर्ते खिले श्रीकाशिकेदारमाहात्म्ये एक-त्रिंशोऽध्यायः ॥

The scribe adds—

बार्हस्पत्यमानदुन्दुभिसंवत्सरभाद्रपदबहुल १० सोमवारं श्रीकाशीकेदार-माहात्म्यं संपूर्णम् ॥

In fol. 1156 it is stated that Kasikedarakhanda is complete.

R. No. **2552.**

Paper. 9¾ × 6½ inches. Foll. 35. Lines, 26 in a page. Telugu. Slightly injured.

Purchased in 1917-18 from M.R.Ry. Lalla Viśvanātha Śāstri of Jagannāthapuram, Kistna district.

(*a*) भुवनेश्वरीकल्पः.

BHUVANEŚVARĪKALPAH.

Foll. 1*a*—14*b*.

Same work as that described under No. 7988 of the D.C.S. MSS., Vol. XV, wherein see for the beginning.

Contains the Paṭalas 1 to 11 complete.

**End :**

भूर्जे च रोचनापङ्कैः स्वर्णपट्टे तु लेखिनी ॥
कुङ्कुमागरुकर्पूरचन्दनैः रोचनान्वितम् ।
लेपयित्वा विधानेन ताम्रनालेन वेष्टयेत् ॥
रक्तवस्त्रेण संवेष्ट्य धारयेद्वामके भुजे ।
यन्त्रराजमिदं प्रोक्तं हृल्लेखाया विनिर्गतम् ॥

**Colophon :**

इति श्रीभुवनाधिपत्याः कच्छपुटशास्त्रे मन्त्रकल्पे यन्त्रसाधनविधिर्नामैकादशः पटलः ॥

---

(*b*) भुवनेश्वरीकच्छपुटम्.

BHUVANEŚVARĪKACCHAPUṬAM.

Foll. 15*a*—25*b*. Foll. 26*a*—35*b* are left blank.

Same work as that described under No. 7985 of the D.C.S. MSS., Vol. XV.

Contains the Paṭalas one to three complete and the fourth incomplete.

---

R. No. **2553.**

Paper. 12¾ × 8½ inches (bound in 8½ × 3½ inches). Foll. 2. Lines, 40 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. Lalla Viśvanātha Śāstri of Jagannāthapuram, Kistna district.

राजयोगसिद्धान्तरहस्यम्.

RĀJAYŌGASIDDHĀNTARAHASYAM.

Foll. 1*a*—2*a*. Fol. 2*b* is left blank.

Same work as that described under No. 4377 of the D.C.S. MSS., Vol. IX, but with slight difference in the end.

Contains the Adhyāyas one and two complete.

**End:**

शृङ्गाटके पश्चु मनो नियम्य त्रिकोणमार्गे शशिभास्कराभ्याम् ।
बाह्यान्तरैकप्रणवैकशोभिनीरष्टावधाने हठराजयोगी ॥

Fol. 2a contains some stanzas of Daharōpāstikrama Prabōdhika.

---

R. No. 2554.

Paper. 9¼ × 4¼ inches. Foll. 50. Lines, 12 in a page. Telugu. Good.

Purchased in 1917–18 from M.R.Ry. Chirravūri Sitārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

Fol. 50b is left blank.

आपस्तम्बगृह्यसूत्रभाष्यम्.

APASTAMBAGṚHYASŪTRABHĀṢYAM.

By Kapardisvāmin. Same work as that described under No. 1186 of the D.C.S. MSS., Vol. II.

Complete.

---

R. No. 2555.

Paper. 10¼ × 5 inches. Foll. 108. Lines, 11 in a page. Telugu. Good.

Purchased in 1917–18 from M.R.Ry. Chirrāvūri Sitārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

संस्कारनिर्णयः.

SAMSKĀRANIRṆAYAḤ.

By Candracūḍa, son of Ummaṇabhaṭṭa. Same work as that described under No. 3588 of the D.C.S. MSS., Vol. VII. The author states that he has based his work on the Āpastamba-sūtra and its commentaries written by Haradatta and Sudarśana.

Name of the copyist: Palligāri Viśvanāthuḍu.

Complete.

**Beginning:**

प्रणिपत्य महादेवं चन्द्रचूडेन धीमता ।
संस्काराणां प्रयोगश्च निर्णयः प्रोच्यतेऽधुना ॥

तत्रादौ गर्भाधानमुच्यते—तत्र प्रथमरजोदर्शने शुभाशुभफलमुक्तम् । विधानमालायां वाराहे—

आवर्तौ विधवा नारी चैत्रे मासि भवेद्ध्रुवम् ।
वैशाखे बहुपुत्रा स्याज्ज्येष्ठे रोगवृता भवेत् ॥
आषाढे मृतजा प्रोक्ता श्रावणेच(ऽथ)धनीभवेत् ।
भाद्रे तु दुर्भगा क्लीवा ह्याश्विने च तपस्विनी ॥

**End:**

इमं जविभ्यः परिधिं दधामि मैषान्नु गादपरो अर्थमेतम् ।
शतं जीवन्तु शरदः पुरूचीस्तरो मृत्युं दधतां पर्वतेन ॥
इति मृत्योरन्तर्धानभूतं दाक्षिणतोऽश्मानं निदधाति ।
तस्य शुभमिच्छता चालनं न कुर्यात् इत्यलमतिविस्तरेण ॥
आपस्तम्बीयसूत्रं बुधवरसुलभं हारदत्तं च भाष्यं
दृष्ट्वा सौदर्शनं वा विविधकृतमहापद्धतीस्सनिबन्धान् ।
बद्धो यश्चन्द्रचूडाभिधबुधनिचयासम्मानेन रम्यः
संस्काराणां द्विजजनमुदितहृदयो निर्णयोऽयं समाप्तः ॥

**Colophon:**

इति श्रीमत्पौराणिकधर्माभट्टसूनुश्रीमद्विद्वन्मकुटमाणिक्यरम्मणभट्टसूरि-
सूनुचन्द्रचूडभट्टविरचितः संस्कारनिर्णयस्समाप्तिमगमत् ॥

The scribe adds—

श्रीमुखनामसंवत्सर मार्गशिरशुद्धत्रयोदश्यां भानुवासरे काश्यां लिखित-
मिदं पुस्तकम् ।

---

## R. No. 2556.

Paper. 13⅝ × 4 inches. Foll. 26. Lines, 12 in a page. Telugu. Good.

Purchased in 1917–18 from M.R.Ry Chirrāvūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

आपस्तम्बगृह्यप्रयोगवृत्तिः.

**ĀPASTAMBAGṚHYAPRAYŌGAVṚTTIḤ.**

By Nṛsiṁha. Same work as that described under R. No. 2158 ante. Complete.

---

## R. No. 2557.

Paper. 12⅝ × 7⅝ inches. Foll. 65. Lines, 10 in a page. Telugu. Good.

Purchased in 1917–18 from M.R.Ry. Chirrāvūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

Fol. 65*b* is left blank.

महावाक्यरत्नावलिः, सव्याख्या.

MAHĀVĀKYARATNĀVALIḤ WITH COMMENTARY.

Same work as that described under R. No. 1722 ante, but without colophon. The text is by Rāmacandrēndra and the commentary by Upaniṣadbrahmayōgin.

Complete.

---

R. No. 2558.

Paper. 9¾ × 5 inches. Foll. 38. Lines, 15 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Chirrāvūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

ग्रहलाघवम्, सव्याख्यानम्.

GRAHALĀGHAVAM WITH COMMENTARY.

Same work as that described under No. 913 ante. The text is by Gaṇēśa and the commentator is Viśvanātha.

Breaks off in the Sūryagrahaṇādhikāra.

---

R. No. 2559.

Paper. 6¾ × 3¾ inches. Foll. 29. Lines, 6 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Chirrāvūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

Fol. 1*a* contains the name of the work and fol. 29*b* is left blank.

तारासहस्रनामस्तोत्रम्.

TĀRĀSAHASRANĀMASTŌTRAM.

A eulogy in verse containing 1,000 significant names, all beginning with the letter त, on the Goddess Tārā, a manifestation of Śakti. It is said to have been revealed to Vasiṣṭha by Brahman.

Complete.

**Beginning :**

वसिष्ठ उवाच—

नाम्नां सहस्रं तारायाः मुखाम्भोजाद्विनिर्गतम् ।
मन्त्रसिद्धिकरं प्रोक्तं तन्मे वद पितामह ॥

ब्रह्मोवाच—

शृणु विप्र प्रवक्ष्यामि रहस्यं सर्वसिद्धिदम् ।
यस्योपदेशमात्रेण सर्वसिद्धिर्भविष्यति ॥
महाप्रलयकालादौ नष्टे स्थावरजङ्गमे ।
हाहाकारं समाकर्ण्य कृपयासंहृत(हर)तनौ ॥
नाम्ना तेजसमाख्याता तारा सा ब्रह्मरूपिणी ।
महाशून्यालये कृत्वा तत्र चैकाकिनी स्थिता ॥
पुनः षष्ठे द्विवर्षाभूद्दिव्यसाम्राज्यदायकम् ।
नाम्नां सहस्रं स्वस्यास्तु तकाराद्यं तयोस्स्मृतम् ॥

* * * *

तत्त्वज्ञानोपदेशेन संहर्ता शङ्करस्स्वयम् ॥
ऋषिच्छन्दादिकं ध्यानं मूलवत्परिकीर्तितम् ।
विनियोगो मन्त्रसिद्धिः पुरुषार्थचतुष्टये ॥
तारा तारादिकं चार्णा ताराद्या वेदबीजया ।
तारास्त्रिरहिता वर्णा ताराद्या ताररूपिणी ॥
तारा रात्रिसमुत्पन्ना तारा रात्रिवशोद्यता ।
तारा रात्रिजया शक्त्या तारा रात्रिस्वरूपिणी ॥

**End:**

वन्ध्यापि लभते पुत्रं निर्धनो धनमाप्नुयात् ।
निर्विद्यो लभते विद्यां तर्कव्याकरणादिकाम् ॥
इति निगदितमस्यास्तादिनाम्नां सहस्रं
वरदमनुनिदानं नित्यसाम्राज्यसिद्धिम् ।
विधिहरिगिरिशानां शक्तिदानैकदक्षं
समाविधि पठनीयैः कालितारागतज्ञैः ॥

**Colophon:**

इति श्रीब्रह्मयामलोक्तं तारायास्तकारादिसहस्रनामस्तोत्रं संपूर्णम् ॥

---

## R. No. 2560.

Paper. 10¾ × 4½ inches. Foll. 171. Lines, 10 in a page. Dēvanāgarī. Slightly injured.

Purchased in 1917–18 from M.R.Ry. Chirrāvūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

## लघुशब्देन्दुशेखरव्याख्या—विषमी.

## LAGHUŚABDĒNDUŚĒKHARAVYĀKHYĀ—VIṢAMĪ.

A commentary on the Laghuśabdēnduśēkhara of Nāgēśabhaṭṭa which work is described under No. 1414 of the D.C.S. MSS., Vol. III: by Rāghavēndraguru of Ātrēyagōtra. The commentator states that he summarizes in this work the Candrikā(?). Ratnakōśa is also mentioned.

Breaks off in the Strīpratyaya.

**Beginning:**

ब्रह्मेशाद्यैस्सुरवरगणैः स्तूयमानोऽप्यपारो
व्यक्ताव्यक्ते सृजति भरति(माप)यत्युच्चभावम् ।
यद्भूभङ्गात् सृजति भुवनं ब्रह्मरुद्रादि सा श्री-
र्वक्षःश्लिष्टा जयति स विभुः श्रीनिवासो वृषाद्रौ ॥
आत्रेयवंशविधुना सकलकलापारदृश्वना सुधिया ।
श्रीराघवेन्द्रगुरुणा क्रियते शब्देन्दुशेखरव्याख्या ॥
नवयुक्तिगुम्फितनया प्रौढां तां चन्द्रिकां तु संक्षिप्य ।
विषमपदवाक्यविवृतिं कुर्वेऽहं बालबोधाय ॥

पातञ्जल इत्यादिश्लोकत्रयमेकान्वयम् । सतीं दीव्यतीति विग्रहः । कक्षः शुष्ककाननम् । कक्षस्तु दोर्मूले शुष्ककानने इत्यभिधानम् । मनोरमोमार्धदेहमिति । तेन मनोरमोक्तार्थाप्रकाशनम् । मनोरमायाः कश्चिद्गुणत्वं सूचितं भवति । समुचितमिति । तत्त्वं चैतच्छास्त्रप्रवर्तकत्वसम्बन्धित्वात् । तिरस्कृत्येत्यर्थ इति । निवृत्तप्रेषणाद्धात्वर्थहेतुमति णिजिति भावः । वृत्तिपरिच्छेदकत्वेनेति । शक्तिग्राहकत्वेनेत्यर्थः । स्वरसन्धिस्तु न प्रवर्तते । वर्णोपदेशकालेऽजादिसंज्ञानामनिष्पादादिति कैयटोक्तं तु न युक्तम् । तदुपदेशकालेऽजादिसंज्ञानामनिष्पादेऽपि सवर्णसंज्ञादिफलस्य दीर्घादेः तुल्यास्यसूत्रादाविव स्वरसन्धेरत्र प्रवृत्तौ बाधकाभावादिति दीक्षितोक्तं दूषणमुद्दिधीर्षुणा रत्नकोशकारेणोक्तः कैयटग्रन्थः उपजीव्यविरोधात् सन्धिर्नेत्यर्थकतया व्याख्यातस्तद्दूषयितुमनुवदति—यत्त्विति ।

**End:**

स्त्रियाम् । सत्त्वादीनां गुणानामिति । ननु ब्रह्मशब्दस्य नपुंसकत्वमात्मशब्दस्य पुंस्त्वं चितिशब्दस्य स्त्रीत्वं कथम् ।

विग्रहे सुबुत्पत्तेः प्राक् समासात् स्वशब्दस्यापवादत्वात् षत्वनिषेधस्य सात्पदाद्योरित्यनेन सिद्धत्वात् ॥

R. No. **2561.**

Paper. 8 × 5½ inches. Foll. 4. Lines, 13 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. Chirrāvūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

तत्त्वबोधः.

TATTVABŌDHAḤ.

By Vāsudēvendra. Same work as that described under No. 4585 of the D.C.S. MSS., Vol. IX, and R. No. 1419 (a-6) ante.

Complete.

**Colophon:**

इति तत्त्वबोधस्समासः ॥

---

R. No. **2562.**

Paper. 9⅜ × 4¼ inches. Foll. 5. Lines, 9 in a page. Dēvanāgarī. Good.

Purchased in 1917-18 from M.R.Ry. Chirrāvūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

गायत्रीव्याख्यानम्.

GĀYATRĪVYĀKHYĀNAM.

Same work as that described under No. 6215 of the D.C.S. MSS., Vol. XII, wherein see for the beginning. The commentary is attributed to Vidyāraṇya.

Complete.

**End:**

अस्माकं श्रेयस्करेषु नित्यनैमित्तिकादिसत्कर्मसु बुद्धिपरम्परामपि प्रचोदयात् प्रेरयेदिति मन्त्रार्थः ।

एषा व्याख्या तु गायत्र्याः सर्वपापप्रणाशिनी ।
विज्ञातव्या प्रयत्नेन द्विजैस्सर्वशुभेप्सुभिः ॥

**Colophon:**

इति गायत्रीव्याख्यानं श्रीमद्विद्यारण्यस्वामिचरणोक्तं शुभम् ॥

उत्पत्तिं च लयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

* * * *

य एवं वेद आमात्रश्चतुर्थोऽव्यवहारार्थः प्रपञ्चोपशमः शिवो द्वे। द्वैत एवौकार आत्मानं सं . . विशत्यात्मनात्मानम् एवं वेद ॥

In the end, there are three lines containing stanzas in contemplation of God.

---

R. No. 2563.

Paper. 8¼ × 6½ inches. Foll. 36. Lines, 22 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. Chirravūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

सप्तशतीव्याख्या.

SAPTAŚATĪVYĀKHYĀ.

Foll. 1*a*—35*a*. Foll. 35*b* and 36 are left blank.

A commentary on the Dēvīmāhātmya which work is described under No. 2444 of the D.C.S. MSS., Vol. IV, Part II. By Pēru Dīkṣita, son of Lakṣmaṇārya of Paṭṭasa family. The commentary is called **Mantrakairava**.

Contains the Adhyāyas 1—13.

**Beginning:**

अथ कात्यायनीतन्त्रे मन्त्रोद्धारं निवेदयेत् ।
व्याख्याने प्रथमाध्याये मन्त्रान्वेदाम्बरध्रुवान् ॥

तत्र सत्सम्प्रदायसिद्धप्रथमपादत्वात्सप्ताक्षरीमन्त्रो व्याख्यायते । ओं नमश्चण्डिकायै अवति रक्षति उपासकं ब्रह्म वेत्ति रक्षाकवचेन ओङ्कारं नमः। चण्डत इति चण्डी सैव चण्डिका कोपना। षद्गौरादिभ्यश्चेति ङीप्, संज्ञायां कठि(नि) केऽण इति ह्रस्वः । चण्डस्य भवस्य स्त्री चण्डी चेति वामनः । (नमः) स्वस्तीत्यादिना चतुर्थी । भक्तरक्षणशत्रुशिक्षणकारिण्यै नम इत्यर्थः । मार्कण्डेय उवाच सावर्णीत्यारभ्य प्रश्रयावनतो नृपमित्यन्ताः एकोनविंशतिमन्त्राः । तत्राद्यस्सप्ताच्चरसप्तहस्कश्च । तदर्थस्तु कडि मदे मृगवत्कण्डते योगाद मदयतीति मृकण्डुः मृगाद्याय(मृगयुाद)यश्चेति उः । तस्या[पत]पत्यं पुमान् मार्कण्डेयः । उवाच स्वशिष्यायाष्टमनूत्पत्तिहेतुमुक्तवानित्यर्थः । उवाचोत्तरमन्त्रा अष्टादश । तत्रापि सप्तदशश्लोकार्धं चमन्त्रा इति सम्प्रदायः । तदुक्तं कात्यायनीतन्त्रे ।

* * * *

मन्त्रास्सर्वेऽब्धिसेन्दवः । तदुक्तं कात्यायनीतन्त्रे
सर्वे श्लोका इहाध्याये अष्टयुक्सप्ततिः क्रमात् ।
मध्ये द्वादशसङ्ख्याका अर्धमन्त्राः प्रकीर्तिताः ॥
सर्वाश्चाहुतयो ज्ञेयाश्चत्वारोत्तरकं शतम् ।

Colophon:

पट्टसान्वयसम्भूतपेरुदीक्षितचन्द्रमाः ।
स्फुटीचकार चरिते प्रथमे मन्त्रकैरवम् ॥

End:

मन्त्रास्तु श्लोकरूपाः पवनगुणशरा ५३१८ अर्धमन्त्राः करार्धाः ४२
तैर्मन्त्राः श्लोकरूपा द्विगुणितविबुधाः ६६ पञ्चमो दूतवाक्ये ।
किंचोवाच स्वरूपा गिरितनयसमा १७ सर्वमन्त्रास्तु चण्ड्यां
शून्याकाशाद्रयः स्युर्गदित इह मया लक्ष्मणार्यस्य मार्गे ॥
देवीमाहात्म्यगा मन्त्रा भान्ति सप्तशतं शुभाः ।
तस्मात्सप्तशती ती(चे)ति चण्डिकास्तव ईरितः ॥

Colophon:

पट्टसान्वयपाथोधिपेरुदीक्षितचन्द्रमाः ।
स्फुटीचकार दुर्गाया माहात्म्ये मन्त्रकैरवम् ॥

पट्टसान्वयकलशसिन्धुपूर्णसुधाकरलक्ष्मणतनूभवेन पेरुदीक्षितेन विरचिते श्रीदेवीमाहात्म्यव्याख्याने मन्त्रकैरवे त्रयोदशोऽध्यायः ॥

## R. No. 2564.

Paper. 8 × 5½ inches. Foll. 4. Lines, 13 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. Chirrāvūri Sitārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

Fol. 4b is left blank.

श्रीसूक्तभाष्यम्.

ŚRĪSŪKTABHĀṢYAM.

Same work as that described under No. 28 of the D.C.S. MSS., Vol. I, Part I, but with slight difference.

Complete.

## R. No. 2565.

Paper. 5¾ × 2¾ inches. Foll. 34. Lines, 9 in a page. Dēvanāgari. Good.

Purchased in 1917-18 from M.R.Ry. Chirrāvūri Sitārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

पीताम्बरीसहस्रनामावलिः.

PĪTĀMBARĪSAHASRANĀMĀVALIḤ.

Foll. 1a—26a. Foll. 27—34 are left blank.

One thousand significant names in praise of the Goddess Pītāmbarī, a manifestation of Śakti.

Incomplete.

**Beginning:**

ओं ब्रह्मास्त्रब्रह्मविद्यायै नमः । ओं ब्रह्मभूतायै सनातन्यै नमः । ओं ब्रह्मेश्यै नमः । ओं ब्रह्मकैवल्यायै बगलायै नमः । ओं ब्रह्मचारिण्यै नमः । ओं ब्रह्माण्यै नमः । ओं विष्णुरूपायै नमः । ओं शार्ङ्ग्यै सुरवन्दितायै नमः । ओं नित्यानन्दायै नमः । ओं नित्यसिद्धायै नमः ।

**End:**

ओं मालाधरमहोत्तमायै नमः । ओं मत्तसिंहसमोल्लासायै नमः । ओं मत्त-सिंहसमासनायै नमः ।

---

R. No. 2566.

Paper. 8½, 8, 8¾ × 7, 6½, 6¾ inches. Foll. 429. Lines, 20, 24, 26 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. Chirravūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

Bound in three volumes.

दैवज्ञविलासः.

DAIVAJÑAVILĀSAḤ.

Foll. 205a—206a give the contents of the work. Fol. 206(b) is left blank.

Same work as that described under No. 13434 of the D.C.S. MSS., Vol. XXV, wherein see for the beginning. The author is Kañcam Yallayārya, son of Vīramāmbā and Nārayārya and a devotee of God Nṛhari of Naragiri.

Complete in 1—168 Ullāsas.

**End:**

कासश्वासातिसारज्वरपि[द]टककटीकुष्ठकाष्ठप्रकारान्

मूत्रग्राहादराक्षश्वयथुगदशिरःकर्णशूलाक्षिरोगान् ।

ये चान्ये वातपित्तक्षतजकफकृतव्याधयस्सन्ति जन्तो-
स्तानप्यभ्यासयोगादवचरति पयः पित्तमन्ते निशायाः ॥

इत्थं हिताहितविवेकविधिप्रवीणं कालानुसारचरितं निरवद्यवादम् ।
देवद्विजातिगुरुभक्तिविविक्तचित्तं सन्तोषयन्ति सगदाल्पतस्वभावम् ॥

श्रुतिचरितसमृद्धिः कर्मदक्षो दयालौ
भिषजि निरवबन्धं देहरक्षां निवेश्य ।
भवति विपुलतेजास्स्वास्थ्यकीर्तिप्रभावः
स्वकुशलफलभोगी भूमिपालश्चिरायुः ॥

समस्तग्रन्थसन्दर्भसारं संगृह्य तत्वतः ।
अष्टोत्तरशतोल्लासैः सकलार्थं सविस्तरम् ॥
श्रीदैवज्ञविलासोऽयं कृतं यल्लार्यसूरिणा ।
द्वात्रिंशत्सहस्रसङ्ख्यया रचितस्फुटम् ॥

कर्त्ता यल्लः प्रपञ्चे कमलसुतहितारातिसिद्धान्तवेत्ता
वैरिञ्चे चञ्चरीको नरगिरिनृहरेः पादपङ्केरुहस्य ।
आकाङ्क्ष्यमान्त एते दधति मुकुरवयस्य पञ्चाङ्गमेकं
सोऽयं श्रीवीरमाम्बाजलधिसुरतरुर्नारयार्यस्य सूनुः ॥

**Colophon:**

इति सकलविबुधजनपारिजातकल्पयल्लयार्यवर्यविरचिते दैवज्ञविलासनामनि ग्रन्थे राजचरित्रखण्डे अष्टोत्तरशततमोल्लासः ॥

समाप्तोऽयं ग्रन्थः ॥

---

R. No. **2567.**

Paper. 8¾ × 4¾ inches. Foll. 67. Lines, 9 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Chigrāvūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

Fol. 1*a* is left blank.

**राज्यकौस्तुभः.**

**RĀJYAKAUSTUBHAḤ.**

A treatise giving certain details connected with coronation ceremonies. The topics dealt with herein are given below. By Anantadēva who is said to have written this work at the instance of Vājavāha.

Incomplete.

राज्याधिकारिनिर्णयः.
अभिषेककालः.
अभिषेकपूर्वकर्तव्यम्.
अभिषेकप्रकृतिद्रव्याणि.
राजलक्षणम्.
पट्टमहिषीलक्षणम्.
मन्त्रिलक्षणम्.
पुरोहितलक्षणम्.
ज्योतिर्विल्लक्षणम्.
शान्तिप्रयोगः.
विनायकस्नपनम्.
ईशानयोगः.
ग्रहयोगः.
नक्षत्रयोगः.
नैरृतयोगः.
ऐन्द्रीशान्तिः.
अभिषेकप्रयोगः.

**Beginning :**

अथ राज्याभिषेकः—

दध्ना पूरितमात्ममूर्ध्नि कलशं धृत्वा व्रजन्ती व्रजे
काचिद्गोपकुमारिका क नु गतिर्युक्तेति संपृच्छति ।
[तं]दृष्ट्वा श्रीमुरलीधरः स्मितयुतभ्रूयुग्मभङ्ग्या यया
तस्यै सूचितवान् गतिं समुचितां पायात्तया मे गतिम् ॥

यत्प्रताप उदि(ते दि)तेस्सुता विष्णुचक्र इव सर्वशत्रवः ।
न्यस्तहस्तगतशस्त्रबुद्ध्यो(बुद्ध)योगयमितास्तभागिनः ॥

वाजवाहनृपतेरनुज्ञया तस्य कौस्तुभनिबन्धगामिनी ।
दीधितिस्सदभिषेकगोचरानन्तदेवविदुषा प्रतन्यते ॥

अतीतभूपालनिबन्धरत्नैस्सन्तोषमायान्तु भुवीह सन्तः ।
श्रीवाजवाहस्य तु कौस्तुभेऽस्मिंस्त एव पश्यन्त्वधिकप्रकाशम् ॥

तत्र प्रथमं राज्याधिकारिनिर्णयः—

सत्स्वपि बहुषु पुत्रेष्वौरसो ज्येष्ठ एवाधिकारी । "औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च" इत्यादितः द्वादशविधपुत्राननुक्रम्य "आभावे पूर्वपूर्वेषां परान् समभिषेचयेत्" इति कालिकापुराणवचनात् ।

अथोपरिचरं राजा यौवराज्येऽभ्यषेचये(य)त् ।
ज्यायांसमौरसं पुत्रं सर्वराजगुणैर्युतम् ॥ इति ॥

* * * *

सत्स्वपि ज्येष्ठेषु क्षेत्रजादिषु कनीयस औरसस्यैवाधिकारः ।

न क्षेत्रजादींस्तनयान् राजा राज्येऽभिषेचयेत् ।

पितॄणां शोधयन्नित्यमौरसे तनये सति ॥ इति ॥

* * *

अथाभिषेककालः । गारुडे—

रोहिण्यार्द्रा तथा पुष्यो धनिष्ठा चोत्तरात्रयम् ।

वारुणं श्रवणं चैव एते चोर्ध्वमुखाः स्मृताः ।

एषु राज्याभिषेकं च पट्टबन्धं च कारयेत् ॥ इति ।

**End:**

लाङ्गकुक्षिस्तुपार्श्वश्च कण्ठनाहसमन्वितः ॥

बलसत्त्वसमायुक्तः स्निग्धच्छविमनोरमः ।

साङ्ग्रामिको भवेद्राज्ञामभिषेकोचितो गजः ॥ इति ।

राज्यभूतं मुख्यं गजं पूर्ववदभिषिच्यालङ्कृत्य सांवत्सर आरुह्य दक्षिणकर्णे मन्त्रयित्वावतरेत् । मन्त्रास्तु—

श्रीगजस्त्वं कृतो राज्ञा भव तस्य गजाग्रणीः ।

गन्धमाल्यानि भक्ष्यैस्त्वां पूरयिष्यति पार्थिवः ॥

---

R. No. **2568.**

Paper. 7¾ × 6 inches. Foll. 75. Lines, 14 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. Chigrāvūri Sitārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

Foll. 21—25 are left blank.

मणिः (भट्टोजिदीक्षितीयम्).

MAṆIḤ (BHAṬṬŌJIDĪKṢITĪYAM).

Same work as that described under R. No. 1621 ante, but with a different colophon. This is also called Caturvarṇāśramāhnikam. By Bhaṭṭōjidīkṣita, son of Lakṣmīdharasūri.

Complete.

**Colophon:**

इति श्रीपदवाक्यप्रमाणज्ञलक्ष्मीधरसूरेः सूनुना भट्टोजीदीक्षितेन विरचितं मणिर्नामाह्निकं समाप्तम् ॥

## R. No. 2569.

Paper. 8 × 6½ inches. Foll. 28. Lines, 17 in a page. Dēvanāgarī. Good.

Purchased in 1917-18 from M.R.Ry. Chirravūri Sitārāma Sōmayājulugāru of Vizianagram, Vizagpatam district.

### वनदुर्गोपनिषत्.
### VANADURGŌPANIṢAD.

Foll. 27*a* – 28*a* contain Allōpaniṣad and thereafter the Vanadurgōpaniṣad is continued and completed.

The Mantra relates to the Goddess Vanadurgā. To show that some portion of the Allōpaniṣad is found towards the end, extracts are also given herein.

Complete.

**Beginning:**

ओं अस्य श्रीवनदुर्गामहामन्त्रस्य किरातरूपधर ईश्वर ऋषिः । अनुष्टुप् छन्दः, अन्तर्यामी नारायण ईश्वरो वनदुर्गा गायत्री देवता । हुं बीजं, स्वाहा शक्तिः, ह्रीं कीलकं, मम वनदुर्गाप्रसादसिद्ध्यर्थे धर्मार्थकाममोक्षार्थे जपे विनियोगः । मूलेन व्यापकत्रयं कुर्यात् । ह्रीमिति व्यापकत्रयम् । ओं हंसिनी ह्रां अङ्गुष्ठाभ्यां हृदि । ओं शङ्खिनी ह्रीं तर्जनीभ्यां शिरः ।

* * * *

अरिशङ्खकृपाणखेटबाणान् सधनुष्कशूलतर्जनीं दधाना ।
भजतां महिषोत्तमाङ्गसंस्था नवदूर्वासदृशी श्रियेऽस्तु दुर्गा ॥
हेमप्रख्यामिन्दुखण्डान्तमौलिं शङ्खारिष्टाभीतिहस्तां त्रिनेत्राम् ।
हेमाब्जस्थां पीतवस्त्रां प्रसन्नां देवीं दुर्गां नित्यरूपां नमामि ॥

* * * *

ओं ह्रीं मलाभीषणे करालवदने विन्ध्यवासिनी ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः नादयक्षयोगिनीपरिवृते दुष्टग्रह हुं फट् स्वाहा । जम्भिनी मोहिनी स्तम्भिनी पूर्वद्वारं बन्ध बन्ध । दम्भ्रुं अग्निद्वारं बन्ध २ । ढढढओं यमद्वारं बन्ध २ । खं घ्रूं निरृतिद्वारं बन्ध २ । लं क्लीं वरुणद्वारं बन्ध २ ।

**End:**

कालदण्डकरालास्यां रक्तलोचनभीषणाम् ।
कालदण्ड(ध)परं मृत्युं विजयां बन्धयाम्यहम् ॥
पञ्चयोजनविस्तीर्णं मृत्योश्च मुखमण्डलम् ।
तस्माद्रक्ष महाविद्ये भद्रकालि नमोऽस्तु ते ॥

ओं दिव्यानि धत्ते इलले अस्मलां इले मित्रावरुणा हयामित्रो इलां ।
इलले इलां वरुणो मित्रो तेलकाम: ।

ओं अपां इलह्यं इलाहजमर्यमा ह वरुणो दध दीर्घमायुः बृहस्पते सूर्यहोतारमिन्द्रो महासुरेन्द्रः सन्तुष्टदेवाः ॥

* * * *

तन्मध्ये च गतो बिन्दुर्बिन्दुमध्यगतं मनः ।
मनोमध्यगतो नादो नादमध्यगताः कलाः ॥
कलामध्यगतो जीवो जीवमध्यगता परा ।
जीवः परः परो जीवस्सर्वं ब्रह्मेति भावयेत् ।

ओं शान्तिश्शान्तिश्शान्तिः ।

**Colophon:**

इति अथर्वणरहस्ये वनदुर्गोपनिषत्समाप्ता ॥

सं १९१२ ज्येष्ठकृष्ण ५ चन्द्रवासरे लिखितम् ।

R. No. **2570.**

Paper. 8 × 5 inches. Foll. 37. Lines, 25 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. Chigrāvūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

(*a*) मौद्गलस्मृतिः, सव्याख्या.

MAUDGALASMṚTIḤ WITH COMMENTARY.

Foll. 1*a*—16*a*. Foll. 16*b*—19*b* are left blank.

Same work as that described under R. No. 2239(*a*) ante.

Incomplete.

(*b*) पराशरस्मृतिः.

PARĀŚARASMṚTIḤ.

Foll. 20*a*—37*a*. Fol. 37*b* is left blank.

Same work as that described under No. 2633 of the D.C.S. MSS., Vol. V.

Contains the Adhyāyas 1—12 complete.

R. No. **2571.**

Paper. 8¾ × 6¾ inches. Foll. 43. Lines, 22 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. Chigrāvūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

Fol. 43*b* is left blank. Wants pages 25—36 in the middle.

**शिवसहस्रनामस्तोत्रम्, सव्याख्यानम्.**

**ŚIVASAHASRANĀMASTŌTRAM WITH COMMENTARY.**

A eulogy on God Śiva containing a thousand significant names. The commentary is called Sārabōdhinī, but the commentator's name is not given.

Complete; as found in the 71st Adhyāya of the Jñānasamhitā of the Śivapurāṇa.

Date of transcription: Saturday, the 12th of the dark fortnight of the Nijāṣāḍha month in the year Parītāpi, corresponding to August 11th of 1912, at Vizianagram.

**Beginning:**

(मू) सूत उवाच—

श्रूयतामृषयः श्रेष्ठाः कथयामि यथाश्रुतम् ।
विष्णुना प्रार्थितो येन सन्तुष्टः परमेश्वरः ॥
तदहं कथयाम्यद्य पुण्यं नामसहस्रकम् ॥

(व्या) कमलानां सहस्रेण नामभिर्यैः शिवोऽर्चितः ।
तान्येकसप्ततितमे कथितानि महात्मनः ॥
नत्वा श्रीशङ्करगुरुं तत्प्रेरितधिया मया ।
तानि नामानि दिव्यानि व्याख्यायन्ते यथामति ॥

नन्वत्र सहस्रनामस्तोत्रेऽर्थतः कचिच्छब्दतोऽपि नाम्नां पौनरुक्त्यमापद्येतेति चेन्न । प्रवृत्तिनिमित्तैक्येऽपि कचिच्छब्दभेदात् कचिच्छब्दैक्येऽपि प्रवृत्तिनिमित्तभेदाच्चापूर्वार्थत्वेन पौनरुक्त्याभावात् । न हि शिवपदोच्चारणजन्यमपूर्वं कल्याणपदोच्चारणादुत्पद्यते । अन्यथाग्नये जुष्टं निर्वपामीत्यत्र वह्नये जुष्टमित्युच्चारणेऽपि तदपूर्वोत्पत्त्यापत्तेः विधिगत एव शब्दः प्रयोक्तव्य इति मीमांसकसिद्धान्तो भज्येत ।

* * * *

श्रीविष्णुरुवाच—

(मू) शिवो हरो मृडो रुद्रः पुष्करः पुष्पलोचनः ।
अर्थिगम्यस्सदाचारः शर्वश्शम्भुर्महेश्वरः ॥

(व्या) शिव इति । भक्तमङ्गलकरत्वाच्छिवः । यद्वा निस्त्रैगुण्यतया शुद्धत्वाच्छिवः । यथोक्तं वायुसंहितायाम्—विशुद्धिः शिवता स्मृत इति । हरः हरति सर्वं संहरतीति हरः । हरतेः पचाद्यच् । मृडः मृडयति सुखयतीति मृडः । मृड सुखने, इगुपधत्वात्कः । रुद्रः संहारकाले प्रजाः संहरन् रोदयतीति वा रुद्रः । रुतं दुःखं रातीति वा रुद्रः । दुःखकारणं द्रावयतीति वा रुद्रः ।

**End:**

(मू) प्राप्य चक्रं शुभं ध्यानं स्तोत्रमेतन्निरन्तरम् ।
पपाठाध्यापयामास भक्तेभ्यस्तदुपादिशत् ॥

(व्या) एतत्सहस्रनामात्मकम् ।

(मू) अन्येऽपि ये पठिष्यन्ति ते विदन्तु तथा फलम् ।
इति पृष्टं समाख्यातं शृण्वतां पापहारकम् ॥

(व्या) एतदाख्यानमुपसंहरति—इतीति ।
अतः परं च किं श्रेष्ठाः प्रष्टुमिच्छथ वै पुनः ।

**Colophon :**

इति श्रीशिवमहापुराणे ज्ञानसंहितायां शिवसहस्रनामकथनं नामैकसप्ततितमोऽध्यायः ॥

इति श्रीशिवमहापुराणे ज्ञानसंहितायां सारबोधिन्यामेकसप्ततितमोऽध्यायः ॥

The scribe adds—

लिखितमिदं चिर्रापुर्पुपनामकविश्वनाथशास्त्रिणा स्वार्थं परार्थं च ।

---

## R. No. 2572.

Paper. $8\frac{1}{4} \times 4\frac{3}{4}$ inches. Foll. 34. Lines, 8 in a page. Dēvanāgari. Good.

Purchased in 1917–18 from M.R.Ry. Chiggāvūri Sitārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

(a) परमानन्दतन्त्रम्.

**PARAMĀNANDATANTRAM.**

Foll. 1b—9a. Fol. 1a contains the name of the work.

Same work as that described under No. 5672 of the D.C.S. MSS., Vol. XII, but with a different colophon.

Contains the 15th and the 16th Udrēkas complete.

**Colophon :**

इति श्रीपरानन्दतन्त्रे सपादलक्षग्रन्थे मन्त्रखण्डे द्वितीयपादे द्वात्रिंशद्दीक्षासंपुटितास्रायक्रमो नाम पञ्चदशोद्रेकः ॥

इति श्रीपरानन्दतन्त्रे सपादलक्षग्रन्थे मन्त्रखण्डे द्वितीयपादे पूर्णदीक्षाक्रमो नाम षोडशोद्रेकः ॥

---

(b) महालक्ष्मीरत्नकोशः.

**MAHĀLAKṢMĪRATNAKŌŚAḤ.**

Foll. 9b—28a.

Same work as that described under No. 8019 of the D.C.S. MSS., Vol. XV.

Contains the Adhyāyas 82—87.

---

(c) चिन्मन्त्रमालिनी.

CINMANTRAMĀLINĪ.

Foll. 28a—34b.

Deals with the conduct of the worship of the Goddess Nityā who is a manifestation of Śakti. By Prakāśānanda.

Contains the Nityōpāsanākrama.

**Beginning:**

अथ पञ्चदशनित्यानामुपासनाक्रमो लिख्यते —प्रतिपदारभ्य पर्वान्तं क्रमेण कामेश्वर्यादिचित्रान्तं तत्तत्तिथौ तत्तद्विद्यां पटि(पीठा)क्षरक्रमेण षष्टिसङ्ख्याजपं सन्ध्यात्रयेऽपि कुर्यात्। तद्यथा—प्रातस्स्नानवेलायां तत्तद्विद्यां त्रिर्जप्त्वापः पीत्वा तत्तद्विद्या जप्त्वाद्भिरात्मानमभिषिच्यामन्त्र्य पूर्वं वस्त्रपरिधानसन्ध्यावन्दनादिकं कृत्वा शुचौ देशे स्वगृहे वा मण्डलासने प्राङ्मुख उपविश्य पद्मासन(स्थ)स्सन् श्रीमहात्रिपुरसुन्दरीप्रीतिकामोऽहं कामेश्वरीनित्याविद्याजपं करिष्ये इति सङ्कल्प्य।

**End:**

पञ्चदश नित्याश्च परदेवतांशभूतत्वात्तासामृषिच्छन्दसी मूलदेवता तद्यथा दक्षिणामूर्तिः ऋषि, पङ्क्तिश्छन्दः, कामेश्वरी नित्या देवता यथा तथा कुर्यात् इतिवत् तत्तन्नाम्ना कुर्यादिति—उपदेशक्रमः ॥

**Colophon:**

इति प्रकाशानन्दविरचितायां चिन्मन्त्रमालिन्यां नित्योपासनाक्रमः समाप्तः ॥

---

R. No. **2573.**

**Paper.** $6\frac{3}{4} \times 4$ inches. Foll. 24. Lines, 10 in a page. Dēvanāgari. Good.

Purchased in 1917-18 from M.R.Ry. Chirravūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

लघुपद्धतिः.

LAGHUPADDHATIḤ.

On the conduct of the ceremonial worship of the Goddess Tripurasundarī with a view to propitiate Her: by Śrīvidyānandanātha, disciple of Saccidānandanātha.

Name of the copyist: Rāmacandraharsa of Manikikor family. Date of copying: Monday, the 7th day of the dark fortnight of the Kārttika month in the year Śārvari, Śaka 1759.

Complete.

**Beginning**:

अथ लघुपद्धतिर्लिख्यते—

प्रारम्भे च फले प्राप्ते यन्मदस्यन्दबिन्दवः ।
कारणानि प्रपञ्चस्य तं वन्दे वारणाननम् ॥
सच्चिदानन्दनाथाङ्घ्रिसरोरुहयुगं भजे ।
श्रीविद्यानन्दनाथेन लघुपद्धतिः लिख्यते ॥
आलोच्य सर्वतन्त्राणि यामलादि विशेषतः ।
ज्ञात्वा गुरुमुखात्तेषां रहस्यार्थं च तत्त्वतः ॥
प्रातः स्नात्वा विधानेन सन्ध्याकर्म यथाविधि ।
पूजागृहं ततो गत्वा अर्चयेच्चक्रनायकीम् ॥

तत्र भूशुद्ध्यादि पञ्चकर्म विधाय, महापादुकास्मरणं कृत्वा, प्राणायामादिकरषडङ्गन्यासं विधाय, सङ्कल्प । श्रीमहात्रिपुरसुन्दरीपूजाङ्गभूतं द्वारपूजां करिष्ये, सामान्यार्घ्यं विधाय, यथा त्रिकोणवृत्तचतुरश्रमण्डलं कृत्वा, ओं ह्रीं आधारशक्त्यै नमः, इति संपूज्य, आधारं संस्थाप्य, अस्त्रमन्त्रेण पात्रं प्रक्षाल्याधारे निधाय, हृन्मन्त्रेण जलेनापूर्य, गङ्गे चेत्यादिनाङ्कुशमुद्रया तीर्थमावाह्य, मूलेनाष्टवारमभिमन्त्र्य ।

प्राणायामत्रयं कृत्वा ऋष्यादिकं विधाय, सङ्कल्पं कुर्यात् । श्रीमहात्रिपुरसुन्दरीप्रीत्यर्थं पात्रस्थापनादि षोडशोपचारपूजां करिष्ये । अथ कलशस्थापनम् ।

**End**:

शत्रवो नाशमायान्तु मम निन्दाकराश्च ये ।
द्वेष्टारस्साधकानां च विनश्यन्तु शिवाज्ञया ॥
ये निन्दकास्ते विलयं प्रयान्तु ये साधकास्ते प्रवदन्तु सिद्धाः ।
सर्वत्र देवी करुणावलोके पुरा पुरेशी मम सन्निधात्री ॥
संपूजकानां प्रतिपालकानां गोविन्दयोगीन्द्रतपोधनानाम् ।
देशस्य राष्ट्रस्य पुरस्य नाथं करोतु शान्तिं भगवान् कुलेशः ॥

शके १७५९ शार्वरिनामसंवत्सरे कार्तिक वद्य ७ सोमवार चतुर्थप्रहरे समाप्तम् ॥

R. No. 2574.

Paper. 11 × 4⅝ inches. Foll. 19. Lines, 9 in a page. Dēvanāgari. Good.

Purchased in 1917–18 from M.R.Ry. Chirrāvūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

(a) शुक्रनीतिः.
ŚUKRANĪTIḤ.

Foll. 1b—6a. Foll. 1a and 6b are left blank.

Same work as that described under No. 3887 of the D.C.S MSS., Vol. VIII.

Contains from the 42nd stanza to the end of 143rd stanza in the 7th Prakaraṇa of the 4th Adhyāya.

---

(b) शिवलिङ्गपूजामहिमा.
ŚIVALIṄGAPŪJĀMAHIMĀ.

Foll. 7a—12b.

A collection of stanzas taken from various Purāṇas and Āgamas and dealing with the greatness of the worship of the different kinds of Śivaliṅgas.

Incomplete.

**Beginning:**

लिङ्गमाहात्म्यदीपिकायाम्--

शिवलिङ्गसहस्राणां पूजया यत्फलं लभेत् ।
ततः शतगुणं पुण्यं लिङ्गेऽनादिसमुद्भवे ॥
तेभ्यः शतगुणं प्रोक्तं रत्नलिङ्गस्य पूजने ।
गोमेदकादिलिङ्गानि रत्नलिङ्गानि सुव्रत ॥
रत्नलिङ्गसहस्राणां पूजया यत्फलं लभेत् ।
ततः शतगुणं पुण्यं धातुलिङ्गस्य पूजने ॥
धातुलिङ्गेष्वपि श्रेष्ठं हेमलिङ्गमिति स्मृतम् ।
तत्र संपूजिते शम्भुः प्रसीदति न संशयः ॥
धातुलिङ्गसहस्राणां पूजया यत्फलं लभेत् ।
ततश्शतगुणं पुण्यं मृत्तिकालिङ्गपूजने ॥

**End:**

शिवपञ्चाक्षरो मन्त्रो वैदिको वेदसंमतः ।
वेदेषु पठ्यते तद्वद्वेदान्तेष्वपि पठ्यते ॥

पाथादायासखेदक्षुभितफणिफणारत्ननिर्यन्निर्य-
च्छायामायापतङ्गद्युतिमुदितवियद्वाहिनीचक्रवाकम् ।
संभ्रान्तभ्रान्तचूडातुहिनकरकरालीकनालीकनाल-
च्छेदामोदानुधावद्द्रुहिणरथखगं धूर्जटेस्ताण्डवं नः ॥

(8) गायत्रीपुरश्चरणप्रयोगः.

GĀYATRĪPURAŚCARAṆAPRAYŌGAḤ.

Foll. 18a—19a. Fol. 19b is left blank.

On the details of procedure relating to the repetition of the Gāyatrīmantra as laid down in the Śāradātilaka, etc: by Sāmba, son of Bhaṭṭaśaṅkara.

Complete.

**Beginning:**

अथ शारदातिलकाद्युक्तो गायत्रीपुरश्चरणप्रयोगः । तत्रादौ दुष्कारनिवृत्त्यर्थं यथाशक्ति प्रायश्चित्तं कृत्वा, अयुतसङ्ख्यं यथासंभवं वा गायत्रीजपं कुर्यात् । ततः पुण्यदिने शुभस्वश्चेत्यादि मासपक्षाद्युल्लिख्य मम समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं चतुर्विंशतिलक्षसङ्ख्यया गायत्रीजपरूपं पुरश्चरणं करिष्य इति सङ्कल्प्य, निर्विघ्नसिद्ध्यर्थं गणपतिपूजनम् । ततस्स्वस्तिवाचनादि नान्दीश्राद्धान्तं कुर्यात् ।

* * * *

अथ देव्या आवाहनम् । गायत्र्या मन्त्रमध्ये मूर्तिं परिकल्प्य ब्रह्मादिकमऋषीन् स्मृत्वा प्राणानायम्य हृत्कमले चित्कलारूपां वक्ष्यमाणावरणसहितां ध्यात्वा मनसा पुष्पाञ्जलिं दत्वान्तःकरणशुद्धिं विधाय पुष्पाञ्जलिं गृहीत्वाऽन्तःकरणाद्गायत्र्या बहिरानीय वहन्नासारन्ध्रेण पुष्पसञ्चये संयोज्य ।

**End:**

एवं होमं समाप्य तद्दशांशेन गायत्र्यन्ते सवितारं तर्पयामीति तर्पणकार्यम् । तर्पणदशांशेन गायत्र्या स्वमूर्धनि मार्जनं कार्यम् । तदसंभवे द्विगुणो जपः कर्तव्यः । अभिषेकदशांशेन ब्राह्मणभोजनं कृत्वा दक्षिणां दत्वा यस्य स्मृत्येत्यादिना समापयेत् ॥

**Colophon:**

इति श्रीभट्टशङ्करात्मजभट्टशा(सा)म्बकृते गायत्रीपुरश्चरणप्रयोगः ॥

R. No. **2575.**

**Paper.** 6¾ × 8¼ inches. Foll. 5. Lines, 12 in a page. Dēvanāgarī. Good.

Purchased in 1917-18 from M.R.Ry. Chigrāvūri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

(*a*) महामुद्राः.

MAHĀMUDRĀḤ.

Foll. 1*a*—2*b*.

Deals with sitting postures and the regulation of breath in the practice of Yōga.

Almost complete.

**Beginning:**

पादाङ्गुष्ठौ तु पाणिभ्यां गृहीत्वा श्रवणावधि ।
धनुराकर्षणाकृष्टं धनुरासनमुच्यते ॥
प्रसार्य पादौ भुवि दण्डरूपौ दोर्भ्यां पदाग्रद्वितयं गृहीत्वा ।
जानूपरि न्यस्तललाटदेशो वसेदिदं पश्चिमतानमाहुः ॥
इति पश्चिमतानमासनाख्यं पश्चिमवाहिनं करोति ।

**End:**

चन्द्राङ्गे तु समभ्यस्य सूर्याङ्गे पुनरभ्यसेत् ।
भवतुल्यो भवेत्सङ्ख्या ततो मुद्रां विसर्जयेत् ॥
कथितेयं महामुद्रा जरामृत्युविनाशिनी ।
गोपनीया प्रयत्नेन न देया यस्य कस्यचित् ॥

---

(*b*) स्वरोदयः.

SVARŌDAYAḤ.

Foll. 3*a*—5*b*.

An astrological treatise dealing with certain predictions made by observing the breath of the astrologer at particular times.

Contains the second Adhyāya complete and the third incomplete: as found in the Brahmayāmala.

**Beginning:**

अथातस्संप्रवक्ष्यामि शरीरस्थस्वरोदयम् ।
हंसचारस्वरूपेण येन ज्ञानं त्रिकालजम् ॥
कुण्डलिनीमहाशक्तिर्नासास्या हिस्वरूपिणी ।
ततो दशोर्ध्वगा नाड्यः दश चाधोगतास्ततः ॥

द्वे द्वे तिर्यग्गते नाड्यौ चतुर्विंशतिसङ्ख्यया ।
कुण्डलिन्या महाशक्तेर्मूलमार्गो भवन्त्यमी ॥
ताभ्यस्सूक्ष्ममुखा नाड्यश्शरीरस्यातिपोषकाः ।
शतानि सप्त जायन्ते सप्तोत्तराणि सङ्ख्यया ॥
प्रधाना दश नाड्यस्तु दश वायुप्रवाहिकाः ।
नामानि नाडिकानां च वातादीनां [च] वदाम्यहम् ॥

* * * *

हकारो निर्गमः प्रोक्तस्सकारोऽन्तः प्रवेशने ।
हकारश्शम्भुरूपेण सकारश्शक्तिरुच्यते ॥
शक्तिरूपस्थितश्चन्द्रो वामनाडीप्रवाहकः ।
दक्षनाडीप्रवाहश्च शिवरूपी दिवाकरः ॥

* * * *

इत्यभ्यासरतो नित्यं स योगी नात्र संशयः ॥
यात्रादाने विवाहे च वस्त्रालङ्कारभूषणे ।
शुभकर्मणि सन्धौ च प्रवेशे च शशी शुभः ॥

**End:**

चन्द्रसूर्यस्वराभ्यासं ये कुर्वन्ति सदा नराः ।
अतीतानागतं ज्ञानं तेषां हस्तगतं सदा ॥

**Colophon:**

इति ब्रह्मयामलीयस्वरोदये हंसचारो नाम द्वितीयोऽध्यायः ॥
भेदा ये स्वरपञ्चके निगदिता नैसर्गिकाः कालजा-
स्तेषां बाल्यकुमारयौवनजरानैधन्यवस्थास्तथा ।
तेभ्योऽनन्तगुरूपदेशविधिना भेदप्रभेदांश्च ये
ते जानन्ति फलं शुभाशुभमयं कालत्रये निश्चितम् ॥

* * * *

दक्षनाड्यां प्रवाहे तु न गच्छेद्याम्यपश्चिमे ।
तत्रास्तु तद्सन्ध्यातो मृत्युरेव न संशयः ॥

---

R. No. 2576.

Paper. 9 × 3¾ inches. Foll. 11. Lines, 7 in a page. Dēvanāgarī. Good. Purchased in 1917–18 from M.R.Ry. Chirrāvuri Sitārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

संविन्माहात्म्यम्.

SAMVINMAHATMYAM.

Similar to the work described under No. 5747 of the D.C.S. MSS. Vol. XII.

Contains the Kalpas 11 to 15 complete, but wants the beginning in the 11th Kalpa.

**Beginning:**

न कौलादधिकं ज्ञानं न मुक्तेरधिकं फलम् ।
न शिवासदृशी देवी न संविस्तदृशौषधम् ॥
कलत्रसेवासदृशं न शास्त्रं कलत्रसेवासदृशो न धर्मः ।
कलत्रसेवासदृशो न मत्यः कलत्रसेवासदृशो न योगः ॥
कलत्रसेवासदृशी न विद्या कलत्रसेवासदृशं न कर्म ।
कलत्रभक्षणं ये तु न कुर्युः कौलिकोत्तमाः ।
चण्डालादधिका ज्ञेयास्ते नरा नात्र संशयः ॥
न संविद्भक्षणं मोहाश्च कलत्रमिति श्रुतेः ।

* * * *

**Colophon:**

इति श्रीमहात्रिपुरासिद्धान्ते संविन्माहात्म्यं नामैकादशः कल्पः ॥

* * * *

इति श्रीमहात्रिपुरासिद्धान्ते दिव्यौषधयुतसंविद्भक्षणमाहात्म्यं नाम द्वादशः कल्पः ॥

See under No. 5747 of the D.C.S. MSS., Vol. XII, for the end.

---

R. No. 2577.

Paper. 11 × 4¾ inches. Foll. 38. Lines, 7 in a page. Dêvanâgarî. Slightly injured.

Purchased in 1917–18 from M.R.Ry. Chigpavûri Sîtârâma Sômayâjulugaru of Vizianagram, Vizagapatam district.

इन्द्रजालकौतुकम्.

INDRAJÂLAKAUTUKAM.

Foll. numbered 1 to 4 are wanting.

A treatise on magic. The subjects dealt with herein will be apparent *from* the names of the Upadêśas given below. By Siddhanatha, son of Pârvatî.

Contains the following Upadeśas:—

१. वश्यादिकरणम्.
२. आकर्षणस्तम्भनादि.
३. मोहनोच्चाटनद्वेषणव्याधिकरणादि.
४. ग्रहक्लेशनिवारणादि.
५. अङ्कोलतैलनानाश्चर्यकौतुकादि.
६. यक्षिणीसाधनम्.
७. आहारानाहारलेपादिसिद्धिकर . . . इन्द्रजालविद्याञ्जनविद्यामृतसंजीवनीविधानम्.

Complete.

**Beginning:**

. . . . . . . . . रम्यारामाद्यशङ्करम् ।
षट्कोणं चिन्तयन्मस्तं ध्यात्वाहङ्कारमुज्वलम् ॥

* * * *

प्रातर्मुखं तु प्रक्षाल्य सप्तवाराभिमन्त्रितम् ।
यस्या नाम्ना पिबेत्तोयं सा स्त्री वश्या भवेद्ध्रुवम् ।
ओं नमः क्षिप्रकामिनि अमुकी मे वशमानय स्वाहा ॥
नागपुष्पं प्रियङ्गुं च तगरं पद्मकेसरम् ।
जटामांसीसमं निम्बं चूर्णयेन्मन्त्रवित्तमः ॥
स्वागं तु भजते तेन धूपयेत् कामुकस्त्रियः ।
ओं मिलिम्लि महाम्लि रक्ष रक्ष सर्वरक्षेऽरजो नो दुवेभ्यः स्वाहा ॥

* * * *

**Colophon:**

इति श्रीपार्वतीपुत्रसिद्धनाथविरचितायामिन्द्रजालविद्यायां वश्यादिकरणं प्रथमोपदेशः ॥

* * * *

इति श्रीपार्वतीपुत्रसिद्धनाथविरचितायां सिद्धखण्डे मन्त्रसारे आकर्षणस्तम्भनादि द्वितीयोपदेशः ॥

**End:**

दिगष्टसप्तनवभिः पाणिलेपे कृते सति ।
द्यूते विजयमाप्नोति यथा दुर्योधनो नृपः ॥
मन्तुं स्मरन् त्रिभिर्देवैर्लब्ध्वा च गुटिकां करे ।
बहिर्दिशरसि कक्ष्यां वै धृत्वा चौरैर्न बाध्यते ॥
गुणादि(का)सप्तमनुभिः भगलेपं तु कारयेत् ।
ऋतुस्नातां रमेदेवं वन्ध्या पुत्रवती भवेत् ॥

**Colophon:**

इति श्रीपार्वतीपुत्रसिद्धनाथविरचितायां सर्वजनमन्त्रतन्त्रसारे आहारमनाहारलेपादिसिद्धिकर . . . . . . न्द्रजालविद्याञ्जनविध्यमृतसंजीवनी विद्या नामोपदेशः ॥

The following is apparently the date given by the scribe:—

संवत् १८८३ शके १७४७ वर्षे पार्थिवनामाब्दे मार्गशीर्ष शुद्ध १० भौमवारे अश्विनीनक्षत्रे तद्दिने द्वितीयप्रहरे इदं पुस्तकं समाप्तमस्तु ॥

---

R. No. 2578.

Paper. 9¼ × 4¼ inches. Foll. 88. Lines, 11 in a page. Dēvanāgarī. Good.

Purchased in 1917-18 from M.R.Ry. Chiggāvāri Sītārāma Sōmayājulugāru of Vizianagram, Vizagapatam district.

मन्त्रचन्द्रिका.

**MANTRACANDRIKĀ.**

A collection of Tantric Mantras, a list of which is given below. The author states that he explains the procedure relating to the repetition of all those Mantras mentioned in the Śivārcanacandrikā of Śrīnivāsa and that they are treated in the order of Gaṇapati, Pārvatī, Kṛṣṇa, Sūrya and Śambhu. The compilation is by Janārdana, whose genealogy is found thus:

Śrīnivāsakavi
 |
Jagannivāsa
 |
Śirōmaṇi — Janārdana (compiler) — Cakrapāṇi

Contains the Prakāśas 1 to 11 complete, and the 12th incomplete.

Contains the following Mantras:—

| Fol. | | Fol. | |
|---|---|---|---|
| 1b. | एकाक्षरो गणेशमन्त्रः | 3a. | दशाक्षरः क्षिप्रगणपतिमन्त्रः |
| 2a. | त्रिरगणपतेस्त्रयो मन्त्राः | | चतुरक्षरो हेरम्बगणेशः |
| | लक्ष्मीगणेशमन्त्रः | 3b. | सुब्रह्मण्यगणेशमन्त्रः |
| 2b. | त्र्यक्षरः शक्तिगणेशमन्त्रः | | महागणपतिमन्त्रः |
| | चतुरक्षरः " | 5a. | त्रैलोक्यमोहनमन्त्रः |

Fol.
5*b*. द्वादशाक्षरशक्तिगणेशः
6*a*. एकादशाक्षरशक्तिगणेशः
6*b*. हरिद्रागणेशः
वक्रतुण्डगणेशमन्त्रः
7*a*. द्वितीयः षडक्षरो वक्रतुण्डः
आथर्वणिको मन्त्रः
7*b*. उच्छिष्टगणेशमन्त्रः
एकादशवर्णात्मको मन्त्रः
एकोनत्रिंशद्वर्णात्मको मन्त्रः
त्रिंशद्वर्णात्मको मन्त्रः
8*a*. शक्तिमन्त्रः
मातृकासरस्वतीमन्त्रः
8*b*. वाग्वादिनीमन्त्रः
9*a*. हंसवागीश्वरीमन्त्रः
9*b*. द्वितीया ,,
वाग्वादिनीमन्त्रद्वयम्
10*a*. वाग्वादिनीद्वितीयमन्त्रः
10*b*. पारिजातसरस्वतीमन्त्रः
सप्तकोटीश्वरीमन्त्रः
11*a*. वाग्वादिनीमन्त्रः
बालामन्त्रः
11*b*. भैरवीमन्त्रः
12*a*. वाणेश्वरीमन्त्रः
12*b*. कामेश्वरीमन्त्रः
13. राजमातङ्गीमन्त्रः
14*a*. द्वितीयो राजमातङ्गीमन्त्रः
14*b*. तृतीयो ,,
15*a*. चतुर्थो ,,
पञ्चमो ,,

Fol.
15*b*. षष्ठो राजमातङ्गीमन्त्रः
16*a*. सप्तमो ,,
अष्टमो ,,
नवमो ,,
16*b*. दशमो ,,
एकादशो ,,
17*a*. द्वादशो ,,
17*b*. भुवनेश्वरीमन्त्रः
18*a*. द्वितीयो भुवनेश्वरीमन्त्रः
तृतीयो ,,
18*b*. चतुर्थो ,,
दुर्गामन्त्रः
19*a*. महिषमर्दनीदुर्गामन्त्रः
19*b*. जयदुर्गामन्त्रः
20*a*. द्वितीय ,,
20*b*. तृतीय ,,
शूलिनीमन्त्रः
21*a*. वनदुर्गामन्त्रः
21*b*. लक्ष्मीमन्त्रः
22*a*. चतुरक्षरो लक्ष्मीमन्त्रः
22*b*. दशाक्षरो ,,
द्वादशाक्षरो ,,
24*b*. सप्तविंशत्यक्षरात्मको मन्त्रः
25*a*. चतुर्दशाक्षरो महालक्ष्मीमन्त्रः
25*b*. एकादशाक्षरो ,,
चतुर्दशाक्षरो ,,
26*a*. त्रिशक्तिलक्ष्मीमन्त्रः
साम्राज्य ,,
26*b*. सप्तार्णो ,,

Fol.
26*b*. अन्नपूर्णामन्त्रः.
27*a*. अन्नपूर्णान्नप्रदातृत्वमन्त्रः.
27*b*. अश्वारूढामन्त्रः.
28*a*. दशाक्षरो मन्त्रः.
गौरीमन्त्रः.
28*b*. पद्मावत्या मन्त्रः.
ज्येष्ठालक्ष्मीमन्त्रः.
29*b*. द्वितीयनित्यक्लिन्नमन्त्रः.
तृतीय ,,
चतुर्थ ,,
30*a*. त्रिपुटामन्त्रः.
30*b*. नित्यक्लिन्नामन्त्रः.
31*a*. वह्निवासिनीमन्त्रः.
31*b*. वज्रप्रस्तारिणीमन्त्रः.
32*a*. शिवदूतीमन्त्रः.
32*b*. त्वरितानित्यामन्त्रः.
33*a*. त्रिकण्टकीमन्त्रः.
33*b*. वज्र ,,
वैष्णव्यामन्त्रः.
34*a*. बगलामुखीमन्त्रः.
34*b*. छिन्नमस्तकामन्त्रः.
36*a*. उग्रतारामन्त्रः.
36*b*. दक्षिणकालीमन्त्रः.
37*a*. धूमावतीमन्त्रः.
37*b*. भद्रकालीमन्त्रः.
38*a*. महा ,,
उच्छिष्टचाण्डालीमन्त्रः.
38*b*. सिद्धवकामन्त्रः.
39*a*. धनदायक्षिणीमन्त्रः.

Fol.
39*a*. अष्टाक्षरो नारायणमन्त्रः.
39*b*. वासुदेवमन्त्रः.
40*a*. लक्ष्मीवासुदेवमन्त्रः.
40*b*. हरिहरात्मको मन्त्रः.
41*a*. दधिवामनमन्त्रः.
यज्ञेश्वर ,,
41*b*. भोग ,,
मायाबालवामनमन्त्रः.
42*a*. हयग्रीवमन्त्रः.
42*b*. द्वितीय ,,
तृतीय ,,
43*a*. चतुर्थ ,,
पञ्चम ,,
वराहमन्त्रः.
44*a*. द्वितीय ,,
तृतीय ,,
चतुर्थ ,,
44*b*. वराहदशाभिधमन्त्रः.
सुदर्शनमन्त्रः.
45*a*. द्वितीय ,,
श्रीकरो मन्त्रः.
46*b*. द्वितीय ,,
पुरुषोत्तममन्त्रः.
50*a*. द्वितीय ,,
हृषीकेशमन्त्रः.
50*b*. श्रीधरमन्त्रः.
परमात्ममन्त्रः.
51*a*. नरसिंहमन्त्रः.
51*b*. द्वितीय ,,

Fol.

51*b*. तृतीयनरसिंहमन्त्रः

52*a*. चतुर्थ ,,

52*b*. लक्ष्मीनृसिंहमन्त्रः

53*a*. द्वितीय ,,

तृतीय ,,

53*b*. वीरनृसिंहमन्त्रः

द्विपञ्चाशदक्षरवीरनृसिंहः

पञ्चाधिकसप्तत्यक्षरवीरनृसिंहः

अशीत्यक्षरवीरनृसिंहः

नृसिंहमन्त्रः

54*a*. सुदर्शनो नृसिंहमन्त्रः

54*b*. एकाक्षरो राममन्त्रः

द्व्यक्षरो ,,

55*b*. षडक्षर ,,

सप्ताक्षर ,,

अष्टाक्षर ,,

नवाक्षर ,,

56*a*. अष्टाक्षर ,,

दशाक्षर ,,

56*b*. द्वितीय ,,

द्वादशाक्षर ,,

57*a*. त्रयोदशाक्षर ,,

अष्टादशाक्षर ,,

57*b*. द्वात्रिंशदक्षर ,,

58*a*. सप्तचत्वारिंशदक्षरराममन्त्रः

सीतामन्त्रः

लक्ष्मणमन्त्रः

हनूमन्मन्त्रः

59*a*. गोपालमन्त्रः

Fol.

62*b*. कृष्णमन्त्रः

मुकुन्दमन्त्रः

बालकृष्णमन्त्रः

63*a*. अन्नप्रद ,,

कालियमर्दनबालकृष्णमन्त्रः

विंशत्यक्षर ,,

64*a*. द्वादशाक्षर ,,

षोडशाक्षर ,,

64*b*. त्रयोदशाक्षर ,,

एकादशाक्षर ,,

65*a*. द्वाविंशत्यक्षर ,,

अष्टाविंशत्यक्षरः कृष्णमन्त्रः

65*b*. द्विचत्वारिंशदक्षर ,,

66*a*. षोडशाक्षर ,,

एकोनत्रिंशदक्षर ,,

66*b*. सप्ताक्षर ,,

द्वादशाक्षर ,,

67*a*. अष्टाक्षरगोकुलनाथमन्त्रः

सिद्धगोपालमन्त्रः

67*b*. बालगोपालमन्त्रः

68*a*. ,, (अन्यः)

68*b*. संमोहनगोपालमन्त्रः

70*b*. सन्तानगोपालमन्त्रः

निगलच्छेदनाख्यकृष्णमन्त्रः

71*a*. जगत्संमोहनकृष्णमन्त्रः

71*b*. काममन्त्रः

72*a*. प्रणवाख्यकृष्णमन्त्रः

72*b*. कार्तवीर्यार्जुनमन्त्रः

73*a*. अष्टाक्षरसौरमन्त्रः

Fol.

षडक्षर सौरमन्त्रः.
सप्ताक्षर ,,
73b. चतुरक्षर ,,
त्र्यक्षर ,,
द्व्यक्षरविजय ,,
74a. ,, (अन्यः)
एकाक्षरो मार्ताण्डभैरवसौरमन्त्रः.
74b. चन्द्रमन्त्रः.
भौममन्त्रः.
75a. बुधमन्त्रः.
गुरुमन्त्रः.
शुक्रमन्त्रः.
75b. शनैश्चरमन्त्रः.
राहुमन्त्रः.
केतुमन्त्रः.
76a. अग्निमन्त्राः.
76b. चतुर्विंशत्यक्षराग्निमन्त्रः.
77a. षडक्षरमन्त्रः.
पञ्चाक्षरोमन्त्रः.
77b. सप्ताक्षरोमन्त्रः.
अष्टाक्षरोमन्त्रः.
78a. प्रासादमन्त्रः.
अष्टाक्षरः (अन्यः)

Fol.

78b. षट्त्रिंशदक्षरो दक्षिणामूर्तिमन्त्रः.
79b. चतुर्विंशत्यक्षरो ,,
द्वाविंशत्यक्षरो ,,
80b. नवाक्षरो ,,
,, (अन्यः)
80b. मृत्युञ्जयो मन्त्रः.
अघोरास्त्रमन्त्रः.
81a. पाशुपतास्त्रमन्त्रः.
81b. नीलकण्ठमन्त्रः.
82a. अष्टाक्षरो नीलकण्ठमन्त्रः.
82b. चिन्तामणिमन्त्रः.
83a. तुम्बुरुरुद्रमन्त्रः.
83b. क्षेत्रपालमन्त्रः.
84a. बटुकभैरवमन्त्रः.
त्र्यम्बकमन्त्रः.
84b. गायत्रीमन्त्रः.
85b. आग्नेयमन्त्रः.
86a. मन्त्रचक्रलेखनम्.
87a. सिद्धसाध्यादिशोधनम्.
88a. देवताविशेषतिथ्यादिनिरूपणम्.

**Beginning :**

यो योगिनामपि मनश्चपलीचकार
पुष्पेषुभिर्व्यथयति स्म बलीयसो यः ।
तं मङ्क्षु नेत्रशिखिना शमयांचकार
मारं हरं तमहमाशु नमामि भक्त्या ॥

वल्गच्चरणताडितक्षितितलं सुपर्वोपगो-
चलज्जलभृताम्बरं भ्रमितभीमनेत्रत्रयम् ।
जटापटलभेदितोपरिचराम्बुदं धूर्जटे-
स्तनोतु पटु ताण्डवं मम नवं नवं मङ्गलम् ॥
आसीदागमशास्त्रकीरवसतेस्सत्पञ्जरस्सज्जन-
व्यूहानन्दकरः कलानिधिकलाफालप्रियाकिङ्करः ।
नानाशास्त्रविचारचारुकवितासन्दोहविज्ञाखिल-
प्राज्ञस्तोमपरिष्टुतो बुधवरः श्रीश्रीनिवासः कृती ॥
आसीदशेषनरपालविशालमालजालप्रमार्जितमनोरमपत्पयोजः ।
सर्वागमाम्बुनिधिमन्थनमन्दराद्रिः श्रीश्रीनिवासतनयस्तु जगन्निवासः ॥
तन्नन्दनास्सुकृतिनः करुणार्द्रचित्ताः शैलेन्द्रजाचरणपङ्कजचञ्चरीकाः ।
ज्येष्ठश्शिखरोमणिरिति प्रथितः कनिष्ठस्तस्माज्जनार्दन इति ह्यनु चक्रपाणिः ॥
जनार्दनाभिधस्तेषु यथामति कुतूहलात् ।
तान्त्रिकाणामवबोधाय कुरुते मन्त्रचन्द्रिकाम् ॥
मन्त्राणि यानि हि शिवार्चनचन्द्रिकायां
श्रीश्रीनिवासकृतिना प्रकटीकृतानि ।
सर्वाणि तानि मुनिचिन्तनयुक् षडङ्ग-
युक्तान्यविस्तरतयेह वदामि साधु ॥
आदौ गणपतेर्मन्त्राः शिवायास्तदनन्तरम् ।
ततः कृष्णस्य सूर्यस्य शम्भोश्चोक्ता यथाक्रमम् ॥

अथ क्रमेण गणादीन् स्मृत्वा तेषां मन्त्रा मन्त्रभेदाश्च लिख्यन्ते—तत्रादा-वेकाक्षरो गणेशमन्त्रः ।

पञ्चात्मकं शशिधरं बीजं गणपतेर्विदुः ।
पञ्चात(त्म)कं गकारः शशिधरं विंदु(बिन्दु)युताङ्गम् ॥
वेदलक्षं जपेन्मन्त्रं दशांशं जुहुये(या)त्ततः ॥

गमिति गणेशमन्त्रेण प्राणायामत्रयं कृत्वा शिरसि गणकाय ऋषये नमः, मुखेन त्रिवृच्छन्दसे, हृदये ओं विघ्नेश्वराय देवतायै, गुह्ये ब्रह्म-बीजाय पादयो ।

* * * *

**Colophon:**

इति मन्त्रचन्द्रिकायां प्रथमः प्रकाशः ॥

इति गणपतिमन्त्रप्रकरणम् ॥

**End:**

इत्यायुधध्यानम् । इति ध्यात्वा जपान्ते ऋष्यादिकं न्यस्य समापयेत् ॥

इत्याग्नेयाख्यो मन्त्रः ॥

**Colophon:**

इति मन्त्रचन्द्रिकायामेकादशः प्रकाशः ॥

इति शिवप्रकरणम् ।

अथैवं लिखितमन्त्राणां सिद्धसाध्यसुसिद्धारीन् विचारयितुमकथहचक्रं लिख्यते—लक्ष्मीकुलार्णवे ॥

एकत्रिरुद्रनवनेत्रयुगार्कपङ्क्ति-
षष्ठ्यागषोडशचतुर्दशपञ्चकेषु ।
कोष्ठे लिखेन्मणितिथौ च तथावशिष्टे
वर्णान् हुताशनमितान् क्रमशोऽम्बिकायाः ॥

अथ दीक्षालग्नस्थानविशेषेषु स्थितानां ग्रहाणां शुभफलानि सारसंग्रहे—

त्रिषडायगताः पापाः शुभाः केन्द्रत्रिकोणगाः ।
दीक्षायां तु शुभास्सर्वे आयस्थास्सर्वनाशकाः ॥

आय एकादशस्थानम् । लग्नचतुर्थसप्तमदशम.

---

R. No. **2579.**

Paper. 8½ × 7 inches. Foll. 76. Lines, 24 in a page. Telugu. Good

Purchased in 1917-18 from M.R.Ry. Chirrāvūri Sitārāma Sōmayājulugāru of Vizianagram.

Foll. 71*a*, 75—76 are left blank.

**मन्त्रावलिः.**

**MANTRĀVALIḤ.**

This is also a collection of Mantras, the names of which are given below:—

| Fol. | | Fol. | |
|---|---|---|---|
| 1*a*. | रश्मिमालामन्त्रः (शैव). | 8*b*. | रश्मिमालामन्त्रः (वैष्णव). |
| 2*b*. | शक्तिरश्मिमालामन्त्रः. | 26*a*. | महामन्त्रप्रयोग (in Telugu). |

Fol.
27b. आसुरीतन्त्रम्.
32a. बगलाकवचम्.
33b. बगलामुखीमालामन्त्रः.
34b. प्रासादपञ्चाक्षरीकवचम्.
38a. अग्निप्राकारमहामन्त्रः.
40b. पराकाष्ठाब्रह्मविद्यामन्त्रः.
41a. पाशुपतास्त्रमन्त्रः.
41b. आसुरीयन्त्रराजः.
43. मन्त्रधर्माः.
48b. पराकाष्ठामन्त्रः.
49a. नारायणास्त्रप्रयोगमन्त्रः.
49b. नारायणाष्टाक्षरीमन्त्रः.
52a. नारायणकवचम्.
54a. पाशुपतास्त्र.
54b. न्यासखण्ड.
56a. शुद्धमातृकान्यासः.
57a. विसर्गन्यासः.
57b. बिन्दुविसर्गहल्लेखादिन्यासः.

Fol.
57b. श्रीबीजन्यासः.
58a. कामबीजन्यासः.
त्रिबीजादिमातृकान्यासः.
बालासंपुटितन्यासः.
58b. परासंपुटितमातृकान्यासः.
श्रीविद्यायुक्तमातृकान्यासः.
59a. हंसादिन्यासः.
परमहंसादिन्यासः.
प्रणवोत्थकलान्यासः.
59b. तेजस्वितयोत्थकलान्यासः.
60a. केशवादिमूर्तिरूपन्यासः.
60b. श्रीकण्ठादिमातृकान्यासः.
61b. प्रपञ्चयागमातृकान्यासः.
62a. मेरुतन्त्रम्.
69a. श्रीचक्रोद्धारविन्यासक्रमशु-
द्धालक्षणादिः.
73b. महानारायणयन्त्रक्रमः.
78b. बालामन्त्रः.


**Beginning :**

अस्य श्रीरश्मिमालामहामन्त्रस्य वामदेवादयो ऋषयः, गायत्र्यादीनि छन्दांसि, परमात्मा देवता ; मम श्रीसदाशिवप्रीत्यर्थे जपे विनियोगः ।

असङ्ख्यातमहःपुञ्जपिञ्जरीकृतविग्रहम् ।
रश्मिमालामयं वन्दे श्रीगुरुं शिवरूपिणम् ॥

ओं भूर्भुवस्सुवः, ओं तत्सवितुर्वरेणीयं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । परो रजसि सावदोम् । ओं नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा । ओं ऐं नमः । क्लीं शिवाय । सौः ओं ह्रीम् ।

दक्षिणामूर्तये तुभ्यं वटमूलनिवासिने ।
ध्यानैकनिरताङ्गाय नमो रुद्राय शम्भवे ॥

ह्रीं श्रीं क्लीं नमो भगवते दक्षिणामूर्तये हंसस्सोहं मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा । इति प्रथमपञ्चकम् ।

**End:**

सर्वभूतप्रेतपिशाचब्रह्मराक्षसयक्षराक्षसग्रहसंहारान्तकी, भूतप्रेतालशा-किनी डाकिनी कामिनी मोहिनी निवारणी वातपित्तश्लेष्म . . ण निवारणी सर्वापदुद्धारिणी ओं ह्रीं श्रीं क्लीं ह्लीं ह्रीं ह्रीं हूं फट् स्वाहा ।

---

R. No. **2560.**

Paper. 11 × 7 inches. Foll. 742. Lines, 16 in a page. Dēvanāgarī. Good.

Purchased in 1917–18 from M.R.Ry. Chirravūri Sītārama Sōmayājulugāru of Vizianagram.

Fol. 743 is left blank.

Bound in four volumes.

सिंहसिद्धान्तसिन्धुः.

**SIMHASIDDHĀNTASINDHUḤ**

A treatise containing details relating to the ritualistic worship of deities and to the formal repetition of Mantras, Kavacas, etc., and based upon Itihāsa, Purāṇas, Āgamas, Tantras and the Stōtras of Śaṅkarācārya: by Gōsvāmi Śivānanda Bhaṭṭa, son of Gōsvāmi Jagannivāsa Bhaṭṭa who was the son of Gōsvāmi Śrīnivāsa Bhaṭṭa and the preceptor of Dēvisiṁhanarapati whose genealogy is given below and at whose request the work was composed :—

Madhukara of Bundēla family.
|
Rāmasāhir.
|
Saṅgrāmasāhir.
|
Bhārata.
|
Dēvisiṁhanarapati.

Complete. Date of copying: 9th day of the bright fortnight of the Vaiśākha month corresponding to 28th April 1898.

**Beginning:**

यस्याङ्घ्रिद्वयपूजनेन निखिलास्सिद्धीर्लभन्ते नराः
बुद्धीः प्राप्य वसन्ति वेश्मसु(न)रास्तेषां समास्सम्पदः ।
भक्तस्वान्तनितान्तमोहदलने दक्षं विपक्षं वरं
विघ्नानां प्रणमाम्यनारतमहं तं श्रीगणाधीश्वरम् ॥

सर्वं सन्तसमा(मसा)वृतं जगदिदं भाभिस्समुद्भासय-
न्नम्भोजानि विकासयन् विरहिणः कोकान् समाश्वासयन् ।
शीतांशुं परिहासयन् गतरुचि सन्त्रासयन् वैरिणः
भक्तक्लेशमुदासयन् स भवतु क्षेमाय भासां पतिः ॥

* * * *

हप्पद्वैरिसमुच्चयप्रलयकरः कीर्तिद्युतिद्योतिता-
शेषाकाशदिगन्तरः पटुतरः भाग्यौघवित्तार्पणे ।
राजद्राजसभालभाजितगुणग्रामोऽभिरामो भृशं
भक्तः श्रीनृहरेर्विभाति भुवने बुन्देलभूपान्वयः ॥
यत्पाणी नृहरेः सदैव चरणावानर्चतुस्सादरं
दानं चाङ्घ्रियुगं महीदिविषदां प्रक्षालयांचक्रतुः ।
युद्धे चिक्षिपतुश्च मार्गणगणं हन्तुं परानीकिनीं
त्रैलोक्यप्रथिताह्वयो मधुकरो राजा स तत्राभवत् ॥
संफुल्लानि तनोति सर्वसुजनस्वान्ताम्बुजन्मानि या
सौख्यं व्यातनुते श्रुता श्रवणयोस्स्तुत्या कवीन्द्रव्रजैः ।
स्वर्लोके बलिसद्मनि क्षितितले यस्याः प्रकाशोऽनिशं
ख्याता चित्रचरित्रयुग्विजयते यत्कीर्तिसत्कौमुदी ॥
यदीयनाराचहता रणाग्रे नाराचतामापुरहो द्विषन्तः ।
तीक्ष्णास्सपक्षास्तपनस्य बिम्बं भित्त्वा द्रुतं यद्दिविशुर्दिवं ते ॥
सन्मानदाननिपुणस्तु तदात्मजन्मा सन्मानसस्थहरिभक्तिरुदारशक्तिः।
कौक्षेयकक्षतविपक्षजनो जगत्यां श्रीरामसाहिरिति नाम नृपो बभूव ॥
रामाख्यगो भक्तिभरेण तुष्टास्तस्मै ददुः स्वीयगुणान् समस्तान् ।
लोकास्ततस्तं प्रथितप्रभावं श्रीराम इत्येव समाख्ययोचुः ॥
युद्धे युद्धविदोऽर्जुनं नयविदो धीरा गिरामीश्वरं
सौन्दर्ये सुदृशस्स्मरं महसि यं तेजस्विनो भास्करम् ।
धर्मे धर्मविदोऽपि धर्मतनयं दानेऽर्थिसार्था बलिं
मन्यन्ते स्म महीतले समभवच्छ्रीरामसाहिर्नृपः ॥
आसीत्तदीयतनयो विनयोपपन्नः
स्वच्छाशयो बहुदयो विबुधव्रजेषु ।

युद्धे निकाममभयो विजयोर्जितश्रीः
संग्रामसाहिरिति भूमिपतिः प्रसिद्धः ॥
यत्सैन्ये चलिते प्रचेलुरचला जाता स्थिराप्यस्थिरा
धूलीभिर्निचितेऽम्बरे सममवद्भास्वानभास्वानलम् ।
अत्युच्चध्वजसङ्कुले सुरपथेऽभूदाशुगो नाशुगो
मेदिन्यां स बभूव भूरिविभवस्संग्रामसाहिर्नृपः ॥
तस्यात्मजो बलरजोभरुद्धभानुर्द्वेषद्दलनतीव्रमहः कृशानुः ।
अत्यद्भुतो गुणगणैः प्रथितो धरण्यां श्रीभारतो बहुलदानरतो बभूव ॥
यत्सैन्यात्खर्ववाजिव्रजखुरनिकरक्षुण्णभूमीरजोभिः
छन्नं मार्तण्डबिम्बं सममवदखिलं दृष्टिकाक्षे(ले)यथाभ्रैः ।
यस्येभान्वीक्ष्य मेघप्रतिमतनुरुचीन् संपराये जनौघा
नाद्रिभ्रान्ति तदायुर्यदिह मघवता सन्ति ते लूनपक्षाः ॥
तेरुः केऽपि नदीर्वनेषु विकलाश्चेरुर्निगूढाः परे
शैलानारुरुहुः श्रमेण मुमुहुश्चान्ये क्षुधा बाधिताः ।
भेजुः केचन भिक्षुवेषमपरे रेजुर्वधूरूपिणः
श्रुत्वा शत्रुनृपाः प्रयाणपटहं श्रीभारतक्ष्मापतेः ॥
अत्युच्चैर्द्विरदा घना भटरवो भीमो भृशं गर्जितं
दीप्ताः खड्गलताश्च यत्र तडितो बाणास्तु धारोत्कराः ।
येनेत्थं विषमो व्यधायि समरो मेघागमस्तद्भवा
रक्तौघास्सरितोऽसृजन्निरुपमो वीरोऽभवद्भारतः ॥
यत्कीर्तिः कविकीर्तनीयमहिमा चक्रे त्रिलोकीं सितां
हित्वा यद्रिपुभूभुजामपयशो विद्वेषबुद्ध्या परम् ।
तत्तु श्वैत्यमवाप्तुमात्मकलुषं त्यक्तुं द्विजानां पतिं
शुभ्रांशुं शरणं गतं तदमुनाप्यास्ते तदङ्कच्छलात् ॥

* * * *

तत्सूनुः परिपन्थिमन्थिविलसद्वीरोऽतिधीरो रणे
वल्गत्तुङ्गतुरङ्गनिष्ठुरखुरक्षुण्णक्ष्मामण्डलः ।
दानाम्भश्शमितार्थिनैस्व्यदहनः ख्याताभिधानः क्षितौ
देवीसिंहनरेश्वरो निरुपमो राजोत्तमो राजते ॥

निकामं कामं यो जयति निजरूपेण सुधिया
नये देवाचार्ये हरिचरणसेवावशमनाः ।
स किं दारिद्र्यारिर्विबुधनगतो लोचनपथं
नृपो देवीसिंहो पदतिविपदा विहल्लतमः ॥

• • • •

आसीत्तस्य गुरुर्गुरुर्गुणगणैर्मन्त्राब्धिपारंगमः
श्रीगोस्वामिजगन्निवास इति सन्नाम्ना जगद्विश्रुतः ।
यस्याज्ञावशवर्तिनः क्षितिभुजस्ते तेऽभवन् भूरिशो
येषां कीर्तिरतीव भाति भुवने दानं कृपाणेऽपि च ॥
तत्तातस्तु तथाभवद्वरसमः श्रीश्रीनिवासः कृती
ज्ञानोदारकुठारदारितजगज्जाड्योरुभूमीरुहः ।
नानातन्त्रविबोधमाप्य मनुजा यस्यानुकम्पाविधेः
शिष्या दैवतसेवनैरभिमता महाय सिद्धिं गताः ॥

• • • •

ज्येष्ठस्तस्य सुतो जनोदितशिवानन्दाभिधानः क्षितौ
श्रीविद्याचरणारविन्दयुगलध्यानैकतानोऽनिशम् ।
देवीसिंहनृपेण धर्मकलितस्वान्तेन संप्रार्थित-
स्तत्प्रीत्यै वितनोति धार्मिकजनश्रव्यं निबन्धोत्तमम् ॥
गुरुचरणसरोजानुग्रहप्राप्तबोधः
श्रवणजनितभक्तस्वान्तभूरिप्रमोदः ।
निखिलमनुरहस्योद्बोधकोऽयं निबन्धो
जयतु जगति नाम्ना सिंहसिद्धान्तसिन्धुः ॥
अत्र प्रातःकृत्यमादौ प्रोक्तं स्नानविधिस्ततः ।
रुद्राक्षधारणं च ततस्तिलकधारणम् ॥
सन्ध्याविधिस्तर्पणं च नद्यादेस्स्वगृहागमः ।
ततस्सूर्यार्घ्यदानं च श्रीशिवस्यार्चनं ततः ॥
अर्चनं द्वारदेवानां तेषां ध्यानमपीरितम् ।
आसनानि ततः प्रोक्तं पूजाद्रव्यविशोधनम् ॥
करशुद्धिश्च दिग्बन्धः प्राकारत्रयमानल(सन)म्
प्राणायामविधिः पश्चाद्भूतशुद्धिस्समीरिता ॥

ततः प्राणप्रतिष्ठा च मातृकान्यसनं ततः ।
तद्भेदा निखिलाः प्रोक्तास्तन्न्यासोत्थं फलं ततः ॥
स्वोपास्यमन्त्रऋष्यादिषडङ्गन्यसनं ततः ।
ततस्समीरितो न्यासो योगपीठस्य सिद्धिदः ॥
मूलमन्त्राङ्गभूतानां न्यासानां न्यसनं ततः ।
ततो मुद्राप्रदर्शनं च मुद्राणां लक्षणानि च ॥
ध्यानं च स्वेष्टदेवस्याप्यन्तर्यागविधिस्ततः ।
पूजाचक्रस्य निर्माणं प्रतिमायाश्च विस्तरात् ॥
सालग्रामशिलानां तु लक्षणान्यर्चनाफलम् ।
शिवलिङ्गस्य निर्माणं पश्चाद्देवस्थितिक्रमः ॥
ततस्त्वर्घ्यादिपात्राणि तत्स्थापनविधिस्ततः ।
आत्मपूजाविधिर्योगपीठपूजाविधिस्ततः ॥
स्वेष्टदेवावाहनं च स्थापनाद्यखिलं ततः ।
आवाहनादिमुद्राणां लक्षणं तत्प्रदर्शनम् ॥
उपचारास्ततः प्रोक्तास्तेषां च परिकल्पनम् ।
गन्धपुष्पविचारश्च विस्तरेणेरितस्ततः ॥
लयाङ्गपूजनं प्रोक्तमथावरणपूजनम् ।
अनन्तरं धूपदीपनैवेद्यानां समर्पणम् ॥
अथासनादिमुद्राणां लक्षणान्यखिलानि तु ।
बलिदानं ततः प्रोक्तं नित्यहोमविधिस्ततः ॥
ततस्ताम्बूलदानं च नीराजनमथेरितम् ।
ततो नित्यजपः प्रोक्तस्स्तुतिश्चैव प्रदक्षिणा ॥
नमस्कारास्ततः प्रोक्तास्ततो देवविसर्जनम् ।
नैवेद्यस्वीकृतेश्चैव विचारोऽथ निरूपितः
नित्यनैमित्तिके लुप्ते प्रायश्चित्तमपीरितम्
अथ प्रवासदुर्गादौ प्रोक्तं मानसपूजनम् ॥
आतुरीप्रमुखा भेदाः पूजायाश्चेरितास्ततः ।
अनिर्माल्यं सनिर्माल्यमर्चनं च द्विधेरितम् ॥

यतीनां च गृहस्थानामधिकारोऽपि तत्र वै ।
अथाभिगमनाद्याश्च पूजाभेदा निरूपिताः ॥
नित्यपूजाप्रयोगाश्च ततस्सम्यगुदीरिताः ।
ततो दीक्षाविधिस्तत्र दीक्षाभेदाः पुरेरिताः ॥
दीक्षाया ग्रहणार्थं तु श्रीगुरोर्मुख्यता ततः ।
लक्षणानि गुरोः पश्चात्सच्छिष्यस्येतरस्य च ॥
अधमत्वादि शिष्याणां परीक्षा गुरुशिष्ययोः ।
वर्णदीक्षानुरूपस्तु कालोऽप्यर्थनिरूपितः ॥
शूद्रदीक्षाविचारश्च मन्त्रो वर्णोचितास्ततः ।
ब्रह्मादिभेदो मन्त्राणां तद्दोषोपाय एव च ॥
मन्त्रदोषाश्च बहवस्तन्निरासविधिस्ततः ।
अथ ऋक्षादिचक्राणि रिपुमन्त्रोज्झिते विधिः ॥
अथ मासादिशुद्धिस्तु ततो भूमिपरीक्षणम् ।
समीकरणकं भूमेः प्राचीसाधनमेव च ॥
ततो मण्टपनिर्माणं कुण्डानां निर्मितिस्ततः ।
ततस्स्थण्डिलनिर्माणं स्रुक्स्रुवावीरितौ ततः ॥
वास्तुपूजा ततः प्रोक्ता प्रोक्तं चैवाङ्कुरार्पणम् ।
श्रीगुरोर्वक(र)णं चैव कुर्वी(त्वा)नि च ततो गुरोः ॥
सर्वतोभद्रमुख्यानां मण्डलानां च निर्मितिः ।
अथ कुम्भस्थापने च कुम्भे देवस्य पूजनम् ॥
होमो बलिस्ततः प्रोक्तं ताम्बूलादिसमर्पणम् ।
सशिष्यस्य गुरोः प्रोक्तं ततस्तु चरुभोजनम् ॥
ततश्शिष्यस्य शयनं ततः स्वप्नपरीक्षणम् ।
सुस्वप्नाश्चैव दुस्स्वप्नास्ततस्स्वप्ननिवेदनम् ॥
अथाग्निस्थापनं प्रातः कुण्डेषु हवनं ततः ।
ऋक्षादीनां बलिः प्रोक्तस्ततश्शिष्याध्वशोधनम् ॥
प्रोक्तश्शिष्यस्याभिषेकः कुम्भस्थेनाम्भसा ततः ।
मूलमन्त्रस्योपदेशस्ततो गुरुनमस्कृतिः ॥

गुरोश्च दक्षिणा प्रोक्ता ब्राह्मणानां च भोजनम् ।
अथान्या वर्णमय्याद्या दीक्षास्सर्वास्समीरिताः ॥
अथ प्रोक्तस्सदाचारः पादुकाचार एव च ।
अथोक्तस्समयाचारो होमद्रव्यमितिस्ततः ॥
अथानलस्य वर्णाद्या विस्तरेण समीरिताः ।
ततो दीक्षाप्रयोगश्च सुबोधः कथितोऽखिलः ॥
अथ पूर्णाभिषेकस्तु ततो नैमित्तिकार्चनम् ।
अथ पौरश्चरणिको विधिस्सर्वो निरूपितः ॥
तत्र प्रोक्तं प्रथमतः पुरश्चरणलक्षणम् ।
स्थानानि जपयोग्यानि ततो भूमिपरिग्रहः ॥
ततः कूर्मविचारस्तु जपमालास्ततोऽखिलाः ।
अथ रुद्राक्षमाहात्म्यं तद्धारणफलं महत् ॥
तेषां प्रतिष्ठाप्यन्येषामक्षाणां सा निरूपिता ।
करमाला ततः प्रोक्ता जपश्च विहितानि च ॥
अथोक्तानि निषिद्धानि जपारम्भोचितो विधिः ।
अथ भोज्यानि शयनं प्रातस्स्वप्ननिवेदनम् ॥
ततस्तु सिद्धिचिह्नानि ततो होमाद्युदीरितम् ।
पौरश्चरणिकः प्रोक्तं प्रयोगस्तदनन्तरम् ॥
मन्त्रसिद्धेरुपायास्तु ततोऽन्येपि समीरिताः ।
काम्यपूजाविधिस्सर्वे विस्तरेणात्र भाषितः ॥
काम्यपूजाप्रयोगोऽथाप्यग्निचक्रविचारणा ।
अथ गाणपता मन्त्रा उक्तास्सकलसिद्धिदाः ॥
तेषु प्रोक्तः प्रथमतो महागाणपतो मनुः ।
अथैकाक्षरमन्त्रस्य भेदा उक्तास्सुसिद्धिदाः ॥
हरिद्रागणपस्याथ वीरविघ्नेश्वरस्य च ।
ततश्शक्तिगणेशस्य प्रोक्तं मन्त्रचतुष्टयम् ॥
ततो लक्ष्मीगणेशस्य ततः क्षिप्रप्रसादतः ।
हेरम्बस्य ततो मन्त्रो मालामन्त्रश्च भाषितः ॥

ततस्सुब्रह्मण्यमनुर्वक्रतुण्डमनुत्रयम् ।
उच्छिष्टगणपस्याथ प्रोक्तं मन्त्रचतुष्टयम् ॥
सौरा मन्त्रास्ततः प्रोक्तास्तेष्वाद्योऽष्टाक्षरो मनुः ।
भेदास्तस्योदिता अन्ये त्र्यक्षरश्च ततो मनुः ॥
ततः षड्वर्णमष्टार्णो मनुर्मार्तण्डभैरवः ।
चतुर्वर्णो मनुः प्रोक्तो भुवनेश्यधिदैवतः ॥
अथाजपाख्यसंज्ञ(प्रो)क्तो विशेषस्तस्य चेरितः ।
ततश्चान्द्रो मनुः प्रोक्तो भौमस्य च बुधस्य च ॥
गुरोः शुक्रस्य सौरेश्च राहोः केतोरपीरिताः ।
हुताशनस्य संप्रोक्तास्ततो मन्त्राः सुसिद्धिदाः ॥
ततस्तु वैष्णवा मन्त्राः प्रोक्तास्सर्वे सुसिद्धिदाः ।
तेषु नारायणस्योक्तः पुरा वस्वक्षरो मनुः ॥
ततो हरिहरस्योक्तः श्रीकरस्याथ भाषितः ।
तत्त्ववर्णस्ततः प्रोक्तो मन्त्रो नारायणस्य तु ॥
वासुदेवस्याथ मनुर्लक्ष्मीपूर्वस्य तस्य च ।
पुरुषोत्तममन्त्रौ च ततः प्रोक्तौ सुसिद्धिदौ ॥
ततो हृषीकेशमन्त्रः श्रीधरस्येरितस्ततः ।
अच्युतेत्यादिमन्त्रस्तु ततस्तस्य मनुत्रयम् ॥
हयग्रीवस्य मन्त्राश्च ततः प्रोक्तास्सुसिद्धिदः ।
अथोऽधराङ्गसंज्ञौ च वाराहा मनवस्ततः ॥
ततो नृसिंहमन्त्रास्तु वामना मनवस्ततः ।
सुदर्शनस्य मन्त्रौ द्वौ राममन्त्रास्ततोऽखिलाः ॥
ततो हनूमन्मन्त्रस्तु मुकुन्दस्य मनुस्ततः ।
अथ श्रीकृष्णमन्त्रास्तु सर्वे प्रोक्तास्सुसिद्धिदाः ॥
उक्तः कामस्य मन्त्रोऽथ कार्तवीर्यमनुस्ततः ।
अथ प्रोक्ता महेशस्य मन्त्रास्सकलसिद्धिदाः ॥
तेषु पूर्वं पञ्चवर्णः प्रोक्तस्स च षडक्षरः ।
उमामहेश्वरस्योक्तौ ततो मन्त्रौ सुसिद्धिदौ ॥

ततः प्रासादमन्त्रस्तु प्रोक्तो वस्वर्णकस्ततः ।
मृत्युञ्जयस्य मन्त्रोऽथ प्रोक्त आरोग्यदो नृणाम् ॥
ततः श्रीदक्षिणामूर्तेस्त्रयो मन्त्रास्समीरिताः ।
मनुत्रयं नैलकण्ठं ततः पाशुपतो मनुः ॥
अथाघोरास्त्रमन्त्रश्च चिन्तामणिमनुस्ततः ।
ततस्तुम्बुरुबीजं च मन्त्रोऽथो खड्गरावणः ॥
ततो वटुकमन्त्रश्च क्षेत्रपालमनुस्ततः ।
श्रीप्रासादपरामन्त्रः पराप्रासादसंज्ञकः ॥
मन्त्रः प्रोक्तस्ततो मृत्युहन्ता त्रैयम्बको मनुः ।
अथ नानाविधाः प्रोक्ताश्शक्तिमन्त्रास्सुसिद्धिदाः ॥
तेष्वादौ भुवनेश्यास्तु प्रोक्ता मन्त्रास्सुसिद्धिदाः ।
ततस्सारस्वता मन्त्रा मातृकामन्त्रपूर्वकाः ॥
लक्ष्मीमन्त्रास्ततः प्रोक्तास्सर्वसम्पत्समृद्धिदाः ।
मातङ्गीमनवः प्रोक्तास्ततो वश्यादिसिद्धिदाः ॥
ततस्तु सुमुखीमन्त्रो दुर्गामन्त्रास्ततोऽखिलाः ।
ततस्तु भैरवीमन्त्राः प्रोक्तास्सर्वेप्सितप्रदाः ॥
ततोऽन्नपूर्णामन्त्रास्तु प्रोक्ता अन्नसमृद्धिदाः ।
अन्नप्रदाख्यमन्त्रोऽथ ततः कामेश्वरीमनुः ॥
पञ्चबाणेश्वरीमन्त्रः पञ्चकामेश्वरीमनुः ।
कामेश्वाक्षचक्षरीमन्त्रो बगलाख्यामनुस्ततः ॥
ततस्तु त्रिपुटामन्त्र उक्तश्शक्तिमनुस्ततः ।
अश्वारूढामनुरथो उक्तो गौरीमनुस्ततः ॥
स्त्रीवश्यदो मनुरथो ततः पद्मावतीमनुः ।
ततो ज्येष्ठामनुरथो त्रिकण्टक्या मनुद्वयम् ॥
त्रयोऽथ वैष्णवीमन्त्रा महाकृत्यामनुस्ततः ।
छिन्नमस्तामनुरथो धूमावत्या मनुस्ततः ॥
ततः श्रीकालिका(याश्च)मन्त्रस्तारास्ततोऽखिलाः ।
ततश्चमत्कारकर्यो विद्यास्सर्वा निरूपिताः ॥

उक्तास्ततः परं ज्योतिर्विद्या निर्वाणदायिनी ।
परनिष्कलदेव्यास्तु ततो विद्यास्समीरिताः ॥
ततस्सञ्जीवनी विद्या वाराह्याश्च मनुस्ततः ।
कुरुकुल्लामनुरथो यक्षिणीमनवस्तथा ॥
गायत्रीप्रमुखाः प्रोक्ता वैदिका मनवस्ततः ।
श्रीविद्यायास्ततो मन्त्रास्सविधाना निरूपिताः ॥
प्रोक्ताः पञ्चदशानां तु नित्यानां मनवस्ततः ।
त्रिविधाः पुरुषास्सन्ति रजस्सत्त्वतमोगुणैः ॥
तथैव प्रकृतिस्तेषां श्रद्धाश्चैव तथाविधाः ।
कल्पिता आगमग्रन्थास्तद्धितार्थं सविस्तराः ॥
तथा नानाविधा मार्गा गिरिजापतिना स्वयम् ।
यथा वेदेऽपि दृश्यन्ते प्रयोगाः कामनाप्रदाः ॥
तथैवागममध्येऽपि संसारस्य प्रवृत्तये ।
सर्वं नैव तु सर्वेषामिति शास्त्रस्य निर्णयः ॥

अधिकारिणां तु फलदा(य) न तथाऽनधिकारिणामित्युक्तत्वादस्माभिरत्र सर्वेऽप्युपासनामार्गा निरूप्यन्ते । यस्य यत्राधिकारस्तेन तस्याभ्युपगमो विधेयः । सर्वेषां मन्त्राणां दीक्षापूर्वकग्रहणोत्तरजपस्य फलदायकत्वात् दीक्षायां यथोक्तविधिना देवतापूजनस्यावश्यकर्तव्यत्वात्तद्विधिः प्रथमं प्रदर्श्यते—नारदपाञ्चरात्रे—

निशावसाने शयनात्स्मृत्वा नारायणं प्रभुम् ।
उत्थाय दक्षिणाङ्गेन वामपादं न्यसेद्भुवि ॥

निशावसाने पश्चिमयामे—

कच्चित् द्वौ मध्यमौ यामौ रात्रेः सुप्त्वा विशांपते ।
सचिन्तयसि धर्मार्थौ याम उत्थाय पश्चिमे ॥

इति महाभारते तत्रैवोत्थानोक्तेः । नारायणमित्युपलक्षणम् । तेन स्वेष्टदेवतां स्मृत्वेत्यर्थः । सारसंग्रहे—

रात्रिशेषे समुत्थाय कृत्वावश्यकमादरात् ।
रात्रिवासः परित्यज्य वाससी परिधाय च ॥

आचम्य शुद्धदेहस्सन् देवतायागमन्दिरम् ।
मार्जयित्वोपलिप्याथ भक्तियुक्तस्स्वशक्तितः ॥
उपविश्य शुचौ देशे प्राङ्मुखः प्रोक्त आसने ।
प्राणायामत्रयं कृत्वा कृत्वा न्यासं विधानतः ॥
न्यासमृष्यादिन्यासम् । तस्यैव तदानीमावश्यकत्वात् ।

* * * *

**Colophon:**

इति गोस्वामिश्रीनिवासभट्टपौत्रश्रीगोस्वामिजगन्निवासपुत्रगोस्वामिश्रीशिवानन्दभट्टविरचिते सिंहसिद्धान्तसिन्धौ प्रथमस्तरङ्गः ॥

**End:**

नित्याः षोडश मां पान्तु गजारूढास्स्वशक्तिभिः ।
तथा हयसमारूढाः पान्तु मां सर्वतस्सदा ॥
सिंहारूढास्तथा पान्तु मां रक्षतु(न्तु) गता अपि ।
रथारूढाश्च मां पान्तु सर्वतस्सर्वदा रणे ॥
तार्क्ष्यारूढाश्च मां पान्तु तथा व्योमगतास्तथा ।
भूतगास्सर्वगाः पान्तु मां सर्वत्र च सर्वदा ॥
भूतप्रेतपिशाचापस्मारकृत्यादिकान् गदान् ।
द्रावयन्तु स्वशक्तीनां भूषणैरायुधैर्मम ॥
गजाश्वद्वीपिपञ्चास्यतार्क्ष्यारूढाखिलायुधाः ।
असङ्ख्यास्शक्तयो देव्याः पान्तु मां सर्वतस्सदा ॥
सायंप्रातर्जपेन्नित्याकवचं सर्वरक्षकम् ।
कदाचिन्नाशुभं पश्येन्न शृणोति च मत्समः ॥
इति नित्याकवचम् ॥

**Colophon:**

इति गोस्वामिश्रीजगन्निवासात्मजगोस्वामिश्रीशिवानन्दभट्टविरचिते सिंहसिद्धान्तसिन्धौ द्विनवतितमस्तरङ्गः ॥

प्रोक्तं गणे(श)प्रमुखामराणामुपासनाया निखिलं विधानम् ।
विलोक्य तच्चेतसि साधकानां भूयादमन्दस्सततं प्रमोदः ॥

इदं पुस्तकं गणेशपन्तेन लिखितम् ॥

## R. No. 2581.

Paper. 8 × 5¼ inches. Foll. 24. Lines, 25 in a page. Telugu. Good.

Purchased in 1917–18 from M.R.Ry. Sundaram Pantulugāru of Vizagapatam district.

(a) द्विरूपकोशः.

**DVIRŪPAKŌŚAH.**

Foll. 1a—12b.

By Śrīharṣa. Same work as that described under No. 1607 of the D.C.S. MSS., Vol. III.

Complete.

The following stanza is added at the beginning:—

विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्यवाट्
विघ्नोत्तुङ्गगिरिप्रभेदनपविः विघ्नाब्धिकुम्भोद्भवः ।
विघ्नव्यालकुलोपमर्दगरुडः विघ्नेभपञ्चाननः
विघ्नाविघ्न(ओघ)घनप्रचण्डपवनो विघ्नेश्वरः पातु नः ॥

---

(b) सरस्वतीविलासः.

**SARASVATĪVILĀSAH.**

Foll. 13a—19a.

By Saridvallabhamiśra. Same work as that described under No. 1776 of the D.C.S. MSS., Vol. III.

Complete.

---

(c) विशेषामृतम्.

**VIŚEṢĀMṚTAM.**

Foll. 19b—24a. Fol. 24b is left blank.

By Trayambakamiśra. Same work as that described under No. 1752 of the D.C.S. MSS., Vol. III.

Complete.

Name of the copyist: Anagāpalli Kodugoṇḍu Nāgārao. Date of transcription: Sunday, the 10th day of the intercalated Āśvija in the year Vilambi.

---

## R. No. 2582.

Palm-leaf. 18 × 1⅝ inches. Foll. 58. Lines, 5 in a page. Telugu. Slightly injured.

Purchased in 1917–18 from M.R.Ry. Sundaram Pantulugāru of Vizianagram.

नामलिङ्गानुशासनव्याख्या— अमरकोशपदविवृतिः.

NĀMALIṄGĀNUŚĀSANAVYĀKHYĀ : AMARAKOŚAPADA-VIVṚTIḤ.

By Pĕddisūri, son of Kuppayabhaṭṭa. Same work as that described under No. 1697 of the D.C.S. MSS., Vol. III.; but with different colophon.

Wants the beginning and breaks off in the Samudravarga.

**Colophon :**

इति श्रीकुप्पयभट्टोपाध्यायसूनुपेद्दिसूरिविरचितायाममरकोशपदविवृतौ स्वर्गवर्गः ॥

---

R. No. **2583.**

Palm-leaf. 14½ × 1½ inches. Foll. 160. Lines, 5 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. Sundaram Pantulugāru of Vizagapatam.

(a) द्रव्यमुक्तावली, गुणपाठसहिता.

DRAVYAMUKTĀVALĪ WITH GUṆAPAṬHA.

Foll. 1a—56b.

A treatise on materia medica in medicine.

Contains the following topics :—

१. तोयवर्गः.
२. क्षीरवर्गः.
३. नवनीतवर्गः.
४. घृतवर्गः.
५. इक्षुमधुवर्गः.
६. तैलवर्गः.
७. मद्यवर्गः.
८. मूत्रवर्गः.
९. शूकधान्यवर्गः.
१०. शिम्बिधान्यवर्गः.
११. वण्ठकवर्गः.
१२. अपूपवर्गः.
१३. कृतान्नादिवर्गः.
१४. मृगमांसवर्गः.
१५. फलशाकवर्गः.
१६. कन्दवर्गः.
१७. भोजनवर्गः.
१८. वस्त्रवर्गः.
१९. घनसारादिवर्गः.
२०. ताम्बूलवर्गः.
२१. पुष्पवर्गः.

Name of the copyist : Bhulusu Sūryanārāyaṇa for Rāja Ratha-kṛṣṇammagāru. Date of copying : 2nd day of the bright fortnight of the month of Bhādrapada in the year Saumya.

**Beginning:**

कौपं सारसताटाकं काण्वप्रस्रवणोद्भवम् ।
वापीनदीतोयमिति तत्पुनः श्रुतमष्टधा ॥

ఉప్పునీటి గుణం—

स क्षारं पित्तकृत्कौपं दीपनं नातिवातलम् ।

మంచినీటి గుణం—

कौपं स्वादु त्रिदोषघ्नं लघु पथ्यं च सर्वदा ।

* * * *

द्रव्यमुक्तावल्यां क्षीरवर्गः ।

**Colophon:**

इति वर्गः ॥

* * * *

నెయ్యి గుణం—

शस्तं दिशति मेधाग्निर्बलायुः शुक्रचक्षुषाम् ।
बालवृद्धप्रजाकान्तिसौकुमार्यस्वरार्थिनाम् ॥
क्षतक्षीणपरीसर्पि शस्त्राग्निपितात्मनाम्(!) ।
वातपित्तकफोन्मादशोफालक्ष्मीज्वरापहम् ॥

**End:**

సైంధవగుణం—

लावण्यं कफवातघ्नं वचलाघं च पिच्छिलम् ।
श्रोतोरावहरं हृद्यमुपरागं च उच्यते(!) ॥

కొత్త నెయ్యి గుణం—

मृशास्यदोषं कफवातकारी दृष्टेर्विनाशं कृमिकासनुत्त ।

* * * *

तोयक्षीरं दधि तक्रं नवनीतं घृतं मधु ।
तैलं मद्यं मूत्रलं च शूकधान्यं तथैव च ॥
शिम्बिधान्यं पेयमन्नं पिष्टं सूपं च षट्रसकम् ।
मांसं विहङ्गमत्स्यं च शाकं पुष्पं तथैव च ॥
फलशारदं कन्दमूलं पचडीशुष्कमेव च ।
वटुकातिलपिष्टं च आनूतफलमेव च ॥
कटुका पुष्पवर्गं च इत्येते वर्गनिर्णयः ॥

**Colophon:**

इति द्रव्यमुक्तावलीगुणपाठः संपूर्णः ॥

(b) दक्षिणामूर्तिनिघण्टुः.

DAKṢIṆĀMŪRTINIGHAṆṬUḤ.

Foll. 57a—114b.

Same work as that described under No. 13270 of the D.C.S MSS., Vol. XXIII, but with introductory stanzas in the beginning. By Ellapantula Veṅkaṭeśvara. The portion beginning from stanza 146 is in disorder.

Complete in six Ullāsas.

Date of copying: 2nd day of the bright fortnight of the Bhādrapada in the year Saumya. Name of the copyist: Elamañci Narasiṁhapātru for Rāja Rādhākṛṣṇammagāru.

**Beginning**:

यन्मौलावमरापगा विजयते कल्लोलजालाकुला
यन्नेत्रावनलस्सदा विजयते ज्वालावली भासुरः ।
यन्मूर्तावचलात्मजा विजयते पुण्याङ्गहीनप्रभा
सेवा(सोऽव्या)न्नो जगदद्भुतात्मचरितश्शम्भुर्दयासागरः ॥

हित्वाभिषिक्तपरिपूर्तिकरं निघण्टुं
वैद्यो भवेयमिति यो यतते स लोके ।
दीपं विनान्धतमसापहृतिं चिकीर्षोः
मर्त्यस्य यास्यति तुलामपहानिबीजा(य लज्जाम्) ॥

यल्लापन्तुलवंशाब्धिसुधांशुर्वेङ्कटेश्वरः ।
निघण्टुं सर्वदा पूज्यं दक्षिणामूर्तिनामकम् ॥

यल्लापन्तुलवेङ्कटेश्वरकृतं वैद्यच्छटाशेवधि
नामाज्ञत्वतमोदिवाकरममुं पूज्यं निघण्टुं पठन् ।
सन्त्यज्यान्यनिघण्टुजालमपि योऽधीते स भागीरथीं
त्यक्त्वाहो मृगतृष्णिकां मृगयते तृष्णां यया नोत्तरेत् ॥

दोषघ्ना इददोषघ्ना मत्स्ययासान् महाद्भुतान् ।
विदुर्नान्यो द्रव्यो नारीविलासान्मोहकानि वा ॥

वट्ट—

अश्वत्थश्च सदाफलश्च स वटः प्लक्षश्च चूतद्वयं
लोध्रहन्टकपित्थबिल्ववरुणान्येत . . . र्जुनाः ! ।

गायत्री खदिरः कपीतनजपापाठाश्वगन्धामृता
वाशायुग्मफलाभया कलितकर्धात्रीक्षुदान्द्राणिका ॥

* * * *

Colophon:

इति श्रीयज्ञापन्तुल्वेङ्कटेश्वरविरचिते दक्षिणामूर्तिनिघण्टौ प्रथमोल्लासः ॥

End:

गोमूत्रम्—

गोमूत्रं गोजलं गोऽम्बु ब्रह्माम्भश्च ह्रिरेचनम् ।

ఐ.ఈ—

गोमयं च पवित्रं च गणं गोविड्डिमित्यपि(?) ॥

Colophon:

इति श्रीयज्ञापन्तुलवेङ्कटेश्वरविरचिते श्रीदक्षिणामूर्तिनिघण्टौ सर्वं षष्ठो-

ल्लासः ॥

---

(c) రసప్రదీపికా.

RASAPRADĪPIKĀ.

Foll. 115a—130b.

Breaks off in the second Ullāsa.

See the Telugu part of the Triennial Catalogue for description.

---

R. No. 2584.

Palm-leaf. 16¾ × 1½ inches. Foll. 55. Lines, 6 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. U. Rāmayyagāru of Cintalapoḍi, Kistna district.

तिथिप्रदीपिका.

TITHIPRADĪPIKĀ.

Foll 1a—52b. Fol. 53 contains Ēkādaśīnirṇaya, Dvādaśīnirṇaya, Samvatsaranirṇaya and Narakacaturdaśīnirṇaya. Foll. 54 and 55 contain Kuhūlakṣaṇa as found in the Daivajñavilāsa.

By Narasiṁhasūri. Same work as that described under No. 3123 of the D.C.S. MSS., Vol. VI. The following additional stanzas are found, according to which the author is the son of Janārdana and the grandson of Pratāpanṛsiṁhasudhī.

Incomplete.

Beginning:

आत्माहितमुपादाय पूर्वमा नरभारती ।
श्रीनारायणमारख्या संहितीयाधुना हि सा ॥

य एकोऽनेकात्मव्यपदपररूपप्रकृतिभि-
र्गुणात्मा कालात्मा(परतर)शिवात्मा शिवमतः ।
चिदात्मा लोकात्मा प्रकृतिपुरुषात्मा बहुवपु-
र्महात्मा विश्वात्मा स खलु परमात्मा विजयते ॥
श्रीमत्प्रतापनृ(नर)सिंहसुधीश्वरस्य सूनोर्मनीषिजनसंस्तुतभूरिकीर्तेः ।
त्रिस्कन्धविस्तरमहोदधिनाविकस्य सर्वागमार्थचतुरस्य जनार्दनस्य ॥

---

R. No. 2585.

Palm-leaf. 16¼ × 1½ inches. Foll. 24. Lines, 7 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. U. Rāmayyagāru of Chintalapūdi, Kistna district.

कालामृतम्.
KĀLĀMṚTAM.

Same work as that described under R. No. 741 ante, wherein see for the beginning. The additional stanza found in the beginning belongs to a commentary on the work.

Complete in 309 stanzas.

**Beginning:**

कालामृतस्य विवृतिं वापिराजाह्वयस्सुधीः ।
करोमि बालबोधाय गौतमीतीरसंस्थितः ॥

**End:**

राजादीनां सद्यश्शौचम् ।

सद्यस्स्यान्नृपकारुदानभिषजां कृत्स्नेष्वमात्यस्य वा-
कष्टापत्सु च पूर्वसंभृतमथोद्वाहोत्सवादिष्वपि(पि) ।
कृच्छ्रादिष्वगृहाश्रमेषु च सतां भीते यतौ निन्दिते
गोप्रायादिभिरिच्छतां च मरणे तत्रापि वेदे श्यहम् ॥

---

R. No. 2586.

Palm-leaf. 15 × 1½ inches. Foll. 114. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1916–17 by M.R.Ry. U. Rāmayyagāru of Cintalapūdi, Ellore taluk, Kistna district.

प्रयोगपद्धतिः.
PRAYOGAPADDHATIḤ.

By Śiṅgayārya. Same work as that described under R. Nos. 1709–1711 ante, but with slight variations in reading.

Wants the beginning and breaks off in the Vivāha.

**End:**

एवमेवोक्तं कविवल्लभस्यादित्यभट्टीये—

असपिण्डामसगोत्रामसमानप्रवरां वरयेद्वरवध्वोः पितृसन्ताने सप्तमादूर्ध्वं मातृसन्ताने पञ्चमादूर्ध्वं सापिण्ड्यनिवृत्तिः । यतस्सन्तानभेदः तदादि गणयेत्

पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तदा ।
त्रीनतीत्य मातृतः पञ्चातीत्य . . . . ॥

---

R. No. **2587.**

Palm-leaf. 14¾ × 1⅝ inches. Foll. 69. Lines, 7 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. U. Rāmayyagāru of Chintalapūḍi, Ellore taluk, Kistna district.

(*a*) प्रयोगपद्धतिः.

PRAYŌGAPADDHATIḤ.

Foll. 1*a*—59*b*.

A treatise laying down the procedure for the performance of different religious rites and ceremonies by or in relation to a person both during his lifetime and after death. In the beginning as well as in the scribe's statement the name of the work is written as Śiṅgābhaṭṭīyam, but there is no authority in the work itself for this designation.

Incomplete.

Name of the copyist: Upadhyāyula Vēṅkaṭanarasu. Date of transcription:—Monday, the tenth day of the dark fortnight of the Āsāḍha month in the year Kīlaka.

**Beginning:**

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे त्वमतश्शान्तिं प्रयच्छ मे ॥

सर्वसस्याश्रया भूमिर्वराहेण समुद्धृता ।
यस्मात्तस्मा . . . . . . . . . मे ॥

* * * *

सूतिकामृतिप्रायश्चित्तमुच्यते—

सूतिकायां मृतायां सूतिकामृतिप्रायश्चित्तं करिष्य इति सङ्कल्प्य, प्रथमं शुद्धजलेन तूष्णीं स्नापयित्वा । धौतवास परिधाप्य तीर्थोदकं शुद्धोदकं वादाय, एकस्मिन् कलशे चतुर्षु कलशेषु वा संपूर्य तेषु कलशेषु पञ्चत्वक्पञ्चपल्लवपञ्चमृत्तिकाः पञ्चामृतपञ्चगव्यपञ्चरत्नानि च तत्तन्मन्त्रैर्निक्षिप्य ।

* * * *

आम्नातचतुःकलशोदकैः ब्राह्मणैस्स्नापयित्वा ततः पञ्चगव्यैः स्नापयित्वा, धौतवस्त्रमाच्छाद्य, ऋत्विग्भ्यो दक्षिणां दत्वा प्रायश्चित्तार्थं कृच्छ्रत्रयं कुर्यात ततस्सा सूतिका शुद्धा भवति । ततस्तस्याः पैतृमेधिकम् ।

**Colophon:**

इति सूतिकामृतिप्रायश्चित्तम् ।

**End:**

मातुः गोत्रायाः प्रेतायाः प्रेतत्वविमुक्तिद्वारा वस्वादिपितृलोकप्राप्त्यर्थं स्वर्गलोकावाप्तिरस्त्विति भवन्तो ब्रुवन्तु ।

यथा पङ्कनिमग्ना गौः पथि सर्वान्त्समीक्षते ।
तथा कर्मविहीनोऽसौ सभां सर्वान् समीक्षते ॥
इध्ममध्येऽष्टभिर्दर्भैस्त्रिभिः परिधिरुच्यते ।
एवमेकादशान् दर्भान् रुद्राहुतिसमाचरेत् ॥

Foll. 60*a*—61*b* contain Ghaṭasphōṭavidhi.

---

(*b*) परिषद्विधायकप्रायश्चित्तम्.

PARIṢADVIDHĀYAKAPRĀYAŚCITTAM.

Foll. 62*a*—65*a*. Fol. 65*b* is left blank.
Similar to the work described under R. No. 1523(*b*) ante.
Incomplete.

**Beginning:**

दश द्वादश वा विप्रान् परिषदर्थमुपविश्य स्नात्वाचम्य, एवं तिथौ अमुकगोत्रस्य नामधेयस्य मम जन्माभ्यासाज्जन्मप्रभृत्येतत्क्षणपर्यन्तं बाल्ययौवनकौमारवार्धकेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु मया कृतानां प्रकाशकृतमहापातकचतुष्टयव्यतिरिक्तानाम्

* * * *

सर्वप्रायश्चित्तं निश्चित्योपदिशेति विज्ञाप्य पुनः प्रणमेत् । परिषदपि यजमानेन विज्ञापितानां पापानामपनोदकं सर्वप्रायश्चित्तमधिकारसामर्थ्येभ्यः साक्षाद्वा यथाशक्ति प्रत्याम्नायरूपेण वा निर्णीयेदं निर्णीतं षड्गुणितषडब्दकृच्छ्ररूपं सर्वप्रायश्चित्तं साक्षाद्वा यथाशक्ति प्रत्याम्नायत्र्यशीत्यधिकसङ्ख्याकप्रायश्चित्तं कृच्छ्रं तत्प्रत्याम्नायधेनुदानादिकं दास्यो(साये)पदिशेत्येकं विपश्चितं नियोजयेत् ।

**End:**

अत्यन्ताभ्यस्तेभ्यो ज्ञानतोऽज्ञानतश्च निरन्तराभ्यस्तेभ्योऽज्ञानतश्चिरकालाभ्यस्तेभ्यः बहुभ्यो बहुविधेभ्यस्सर्वेभ्यः पापेभ्यो विमुक्तो भूयाद्विमुक्तो भूयाद्विमुक्तो भूयात् । कृच्छ्रत्रयं कुर्यात् ।

Foll. 66a—68a contain Sarvaprāyaścittaprayōga. Foll. 68b—69b contain Mṛtaprathamadinaprayōga.

---

## R. No. 2588.

Palm-leaf. 13 × 1¼ inches. Foll. 18. Lines, 5 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Gōdapalli Vēṅkaṭanarasāvadhāni of Chātaparru, Kistna district.

### नृसिंहकारिकावृत्तिः.
### NṚSIMHAKĀRIKĀVṚTTIḤ.

By Nṛsiṁha. Same work as that described under R. No. 2158 ante, but with additional stanzas in the beginning. This is also called Āpastambaprayōgasārasaṅgraha.

Incomplete.

**Beginning:**

नमो लक्ष्मीनृसिंहाभ्यां स्थिताभ्यां मन्मनोऽम्बुजे ।
अहोबिलनिवासिभ्यां मनोवाक्कायकर्मभिः ॥
आचार्यवर्यान् भगवन्तमापस्तम्बं प्रणम्यापि च भाष्यकारान् ।
नृसिंहनाम्ना क्रियतेऽभिरामा श्रीकारिकावृत्तिरसंशयैषा ॥
गर्भीकृतार्थानि च हेतुगर्भितान्यन्यापदेशार्थयुतानि सन्त्यथ ।
सन्दिग्धसङ्कोचितगूढयुक्तैः मन्त्राणि संशोध्य विविच्य चोच्यते ॥
आदौ श्रौतानि कर्माणि सर्वाण्युक्त्वा ततः परम् ।
स्मार्तकर्माणि वक्ष्यामीत्यथशब्दं प्रयुक्तवान् ॥

---

## R. No. 2589.

Palm-leaf. 12¾ × 1¼ inches. Foll. 27. Lines, 5 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Sri Rāja Kandukūri Śivaprasādabhūṣaṇa Rao Bahadur, Zamindar of Narasapur, Kistna district.

शरभसाल्वमन्त्रकल्पः.

ŚARABHASĀLVAMANTRAKALPAḤ.

Slightly different from that described under No. 8097 of the D.C.S. MSS., Vol XV.

Contains the Adhyāyas 16—28, but wants beginning in 16th.

Date of transcription—Tuesday, the 9th of the dark fortnight of the Āṣāḍha month in the year Tāraṇa.

**End:**

नन्द्यावर्तमसूनस्य सारेण दशरात्रकम् ।
पिष्टं तु गुडिकां कृत्वा नातपे नैव धूसरे ॥
अञ्जयेत्तस्य सारेण स्तनदुग्धेन चाम्बिके ।
रुद्राञ्जनमितिप्रोक्तं महावेगं सुखावहम् ॥
सर्वभूतहरं क्षुद्रमोहज्वरविनाशनम् ।
विषघ्नं चापि वातघ्नं पिल्लिकं च व्यपोहनम् ॥
कुक्कुटमांसपुष्पाह . . तालीपत्रपत्रं च ससैन्धवद्रुमम् ।
बोधयुक्तमवजम्बलसारैः पेषितस्सह मनूक्तमेतत् ॥

**Colophon:**

श्रीभैरवागमे शरभसाल्वपक्षिराजकल्पे तैलाञ्जनविधिर्नामाष्टविंशोऽध्यायः ॥

---

R. No. 2590.

Palm-leaf. 18 × 1¼ inches. Foll. 242. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Vāsireḍḍi Candramaulīśvaraprasāda Bahadur, Zamindar of Muktyāla, Kistna district.

(a) धर्मसारसङ्ग्रहः.

DHARMASĀRASAṄGRAHAḤ.

Foll. 1a—171a. Fol. 171b is left blank.

A treatise dealing with the daily religious rites and duties of a twice-born and compiled from various Smṛtis and digests; by Rāmakṛṣṇasarasvatī, disciple of Nārāyaṇendrasarasvatī.

Contains the following Prakaraṇas:—

१. वर्णोत्पत्तियुगधर्मप्रकरणम्.
२. आचमनप्रकरणम्.
३. दन्तधावनप्रकरणम्.
४. दर्शतिथिप्रकरणम्.

५. नैमित्तिकस्नानप्रकरणम्.
६. मलापकर्षस्नानप्रकरणम्.
७. स्नानप्रकरणम्.
८. वस्त्रधारणप्रकरणम्.
९. ऊर्ध्वपुण्ड्रत्रिपुण्ड्रविधिः.
१०. यज्ञोपवीतप्रकरणम्.
११. सन्ध्याप्रकरणम्.
१२. ब्रह्मयज्ञप्रकरणम्.
१३. मध्याह्नस्नानप्रकरणम्.
१४. तर्पणप्रकरणम्.
१५. वैश्वदेवप्रकरणम्.
१६. देवपूजाप्रकरणम्.
१७. गुरुपूजाप्रकरणम्.
१८. नित्यश्राद्धप्रकरणम्.
१९. अतिथिप्रकरणम्.
२०. शयनलक्षणप्रकरणम्.


**Beginning:**

वागीशाद्याः सुमनसः . . . गजाननम् ॥
न्यग्रोधमूलनिलयं करुणासमुद्रं
चिन्मुद्रचिह्नितकरं परमात्मरूपम् ।
श्रीदक्षिणास्यमनिशं शशिखण्डमौलिं
कालाग्निदग्धमदनं शिरसा नमामि ॥
नारायणेन्द्रयतिपुङ्गवपादयुग्मं विघ्नाद्रिभेदभिदुरं शरणं वरेण्यम् ।
संसारसागरसमुत्तरणस्य पोतं चेतःप्रसन्नकमलेन समर्चयामि ॥
रामकृष्णेन्द्रयतिराड्दक्षिणास्यकृपावशात् ।
स्मृतिजालं समालोच्य धर्मसारस्य संग्रहम् ॥
अल्पश्रुतेन बहुलग्रन्थग्रहणमिच्छताम् ।
यथामति बुधप्रीत्यै करोति यतिमानमुम् ॥
सर्वेषां स्मृतिकर्तॄणां लेखकोऽहं न कल्पकः ।
सर्वस्मृतिवचांस्येव लिख्यन्तेऽत्र यथामति ॥

नन्वेतद्ग्रन्थारम्भ एवानुपपन्नः, पुरातनानां मन्वादिधर्मशास्त्राणां विद्यमानत्वात् । तेषां वा किं प्रयोजनं, येन तत्सङ्ग्रहरूपत्वादस्यापितदेव प्रयोजनं भविष्यतीति चेदत्र ब्रूमः—आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादिश्रुत्या सार्थवादया परमात्मसाधनं निःश्रेयससाधनमिति प्रतिपादितम् ।

* * * *

योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धय इत्यादिश्रुतिस्मृतिभिश्चित्तशुद्धिद्वारा यथावदनुष्ठितकर्मसाध्यत्वावगमात् यथावत्कर्मानुष्ठानं च धर्मशास्त्र-

मन्तरा न संभवति । मन्वादिधर्मशास्त्राणामतिविस्तृतत्वात्तद्विचारस्याशक्यत्वेन तत्प्रवेशक्षमानुजिघृक्षयायं ग्रन्थ आरभ्यते ।

धर्मशास्त्रकर्तारः विज्ञानेश्वरे—

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनाङ्गिराः ।
यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्तकाः ॥

* * * *

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च व्यावहारिकः ।
गोरक्षकश्शिल्पकश्च स्वर्णकारः कुलालकः ॥
तन्तुवायः क्षौरकश्च रजको वस्त्रभेदकः ।
चर्मखण्डनजातश्च तिलघातश्च लुब्धकः ॥
चण्डालश्चैवमातङ्गवर्णा अष्टादश स्मृताः ।
हिरण्यगर्भदेवस्य मुखबाहूरुपादजाः ॥
ब्राह्मणाः क्षत्रिया वैश्याश्चातुर्वर्णा जनोत्तमाः ।
इतरे चैव वर्णाश्च सङ्कराश्च चतुर्दश ॥
शूद्रस्त्रीवैश्यजातश्च पुरुषो व्यावहारिकः ।
वैश्यस्त्रीक्षत्रजातश्च गोपालक इति क्रमात् ॥

* * * *

सवर्णेभ्यो ब्राह्मणादिभ्यस्सवर्णासु ब्राह्मण्यादिषु विन्नासु सजातयो मातापितृसमानजातीयाः पुत्रा भवन्ति । किंच अनिन्द्येषु विवाहेषु ब्राह्मादिषु पुत्रास्सन्तानवर्धनाः अरोगिणो दीर्घायुषो धर्मप्रजासम्पन्ना भवन्ति ।

* * * *

**Colophon :**

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीनारायणेन्द्रसरस्वतीशिष्यरामकृष्णेन्द्र - सरस्वतीविरचिते धर्मसारसङ्ग्रहे वर्णोत्पत्तियुगधर्मप्रकरणं समाप्तम् ।

**End :**

ब्राह्ममुहूर्तमारभ्य शयनान्तानि कर्माणि निरूपितानि । तेषां करणे श्रेयः, अकरणे प्रत्यवायः ।

तदुक्तं कूर्मपुराणे—

इदं तदखिलं प्रोक्तमहन्यहनि वै मया ।
ब्राह्मणानां कृत्यजातमपवर्गफलप्रदम् ॥

नास्तिक्यादथवालस्यात् ब्राह्मणो न करोति यः ।
स याति नरकान् घोरान् काकयोनौ प्रजायते ॥
नान्यो विमुक्तये पन्था मुक्ताश्रमविधिं स्वकम् ।
तस्मात्कर्माणि कुर्वीत तुष्टये परमेष्ठिनः ॥ इति ॥

**Colophon:**

धर्मसारसंग्रहे शयनप्रकरणं समाप्तम् ॥

The scribe adds—

चौदेशान्वयजातेन वेदाद्रिभट्टसूनुना ।
नृसिंहयज्वना सा च धर्मसंग्रहस्समाप्तः ॥

---

(b) शुद्धिचन्द्रिका, सव्याख्या.

SUDDHICANDRIKĀ WITH COMMENTARY.

Foll. 172a—210a. Fol. 210b is left blank.

Same work as that described under Nos. 3038 and 3039 of the D.C.S. MSS., Vol. V, but with the additional stanza in the beginning given below.

Complete.

मन्वादिशास्त्रामृतसत्त्वयालयः श्रीकालिदासाभिधधीरचन्द्रमाः ।
तेने सुधीसिन्धुविवर्धिशौचध्वान्तान्धलोकेक्षणशुद्धिचन्द्रिकाम् ॥

---

(c) शुद्धिचन्द्रिका.

SUDDHICANDRIKĀ.

Foll. 211a—213b.

Same work as that described under No. 3038 of the D.C.S. MSS., Vol. V.

Complete.

---

(d) विष्णुपादादिकेशस्तुतिः, सव्याख्या.

VIṢṆUPĀDĀDIKEŚASTUTIḤ WITH COMMENTARY.

Foll. 214a—242a. Fol. 242b is left blank.

A hymn eulogising the various parts of the body of God Viṣṇu from his foot to the hair on his head, by Śaṅkarācārya. The commentary is called Sukhabōdhini.

Complete.

**Beginning:**

भगवत्पादपादादिकेशस्तुत्या मधुव्रतः ।
व्याख्या वितन्य(तन्य)ते रम्या नाम्नाऽसौ सुखबोधिनी ॥

इह खलु सकलजगदनुग्रहाय स्वेच्छाकृतविग्रहपरिग्रहाः परमकारुणिकाग्रगण्याः सर्वज्ञशिरोमणयः श्रीमच्छङ्करभगवत्पूज्यपादाः श्रीमद्द्वैपायनप्रणीतब्रह्मसूत्रव्याख्यानरूपश्रीमद्भाष्यकरणेन मुमुक्षुजिज्ञास्यं जगज्जन्मादिकारणं सकलोपनिषद्गम्यं सच्चिदानन्दाद्वयं प्रत्यगभिन्नं विष्ण्वाख्यं ब्रह्म मुख्याधिकारिभ्यः करतलबदरवत् स्फुटं प्रदर्श्य मन्दाधिकारिणामनुजिघृक्षया निर्विशेषं ब्रह्म साक्षात्कर्तुमनीश्वराः ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैरिति न्यायेन तस्यैव परतत्त्वस्य सकलश्रुतिस्मृतीतिहासपुराणवचनैः शुद्धसत्त्वावहितत्वेन सात्त्विकसेव्यत्वेन चाधिगतस्य शङ्खचक्रशार्ङ्गनन्दककौमोदकीरूपपञ्चायुधालङ्कृतस्य गरुडवाहनस्य शेषशायिनः श्रीमहालक्ष्मीभूमिदेवीसमेतस्य कौस्तुभश्रीवत्समुक्ताभरणकिरीटकटकाङ्गदादिसर्वाभरणभूषितस्य सकललोकातिशायस्य सुसौन्दर्यसीम्नो निरतिशयदयासमुद्रस्य सकलजगद्रक्षणदीक्षितस्य श्रीभगवतो नारायणस्य पादादिकेशस्तुतिं तदुपासनरूपां सकृत्पाठमात्रेण सकलपुरुषार्थसन्दोहिनीं द्विपञ्चाशच्छ्लोकात्मिकां कर्तुमारभते—

तत्रादौ वर्ण्यते शङ्खो भुजाग्रेऽवस्थितो हरेः ।
नीलशैलशिखारूढचन्द्रबिम्बश्रियं वहन् ॥

(मू)—

लक्ष्मीभर्तुर्भुजाग्रे कृतवसतिसितं यस्य रूपं विशालं
नीलाद्रेस्तुङ्गशृङ्गस्थितमिव रजनीनाथबिम्बं विभाति ।
पायान्नः पाञ्चजन्यस्स दितिसुतकुलत्रासनैः पूरयन् स्वैः
निध्वानैर्नीरदौघध्वनिपरिभवदैरम्बरं कम्बुराजः ॥

(व्या) ॥ लक्ष्मीभर्तुर्लक्ष्मीनायकस्य कम्बुराजः शङ्खराजः पाञ्चजन्यः भूताद्यहङ्कारात्मकः नः अस्मान् पायात् रक्षतु अनिष्टं निवर्तयन्निष्टं प्रापयत्वित्यर्थः ।

**End:**

नारायणीयपादादिकेशस्तुतिपरा जनाः ।
लीयन्ते ब्रह्मणीत्येतदाचार्येरुपवर्ण्यते ॥

मोदात्पादादिकेशस्तुतिमिति रचितां कीर्तयित्वा त्रिधाम्नः
पादाब्जद्वन्द्वसेवासमयकृतनुतिर्मस्तकेनानमेद्यः ।
उन्मूल्यैवात्मनैनोनिचयकवचतां पञ्चतामेत्य भानोः

बिम्बान्तर्गोचरं स प्रविशति परमानन्दमात्मस्वरूपम् ॥

(व्या) ॥ त्रिधाम्नः त्रीण्यभिव्यक्तिस्थानानि यस्य तस्य भगवतः इत्युक्तप्रकारेण रचितां कृतां पादादिकेशस्तुतिमेतत्स्तोत्रं कीर्तयित्वा सम्यक् पठित्वा यस्साधकः पादाब्जद्वन्द्वसेवासमयकृतनुतिः भगवत्पादारविन्दयुगलभजनवेलायां रचितप्रह्वीभावस्सन्नानमेत् नमस्कुर्यात् आत्मना स्वयमेवैनोनिचयकव-चतां पापसमूहरूपोरश्छदनं बन्धमुन्मूल्यैव समूलकाषं कषित्वैव पञ्चतामेत्य पाञ्चभौतिकदेहसम्बन्धपरित्यागं प्राप्य भानोः सूर्यस्य बिम्बान्तर्गोचरं मण्डलाभ्यन्तरे सन्निहितत्वेन प्रतीयमानं य एषोऽन्तरादित्ये हिरण्मयः पुरुष इत्यादिश्रुतेः परमानन्दमात्मस्वरूपं प्रविशति तत्रैव लीयते ब्रह्मानन्दरूपेणावतिष्ठत इति सिद्धम् ॥

**Colophon:**

इति श्रीमच्छङ्करभगवत्पादाचार्यविरचितविष्णुपादादिकेशस्तुतिव्याख्यानं संपूर्णम् ॥

---

## R. No. 2591.

Palm-leaf. 15½ × 1½ inches. Foll. 251. Lines, 5 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry Vasireddi Candramaulīśvaraprasāda Bahadur, Zamindar of Muktyāla, Kistna district.

Foll. 1 and 2*b* are left blank. Fol. 2*a* gives the contents of the Prātiśākhya.

(*a*) प्रातिशाख्यम् (यजुस्).

PRĀTIŚĀKHYAM (YAJUS).

Foll. 3*a*—17*b*.

Same work as that described under Nos. 928 and 929 of the D.C.S. MSS., Vol. II.

Complete.

---

(*b*) प्रातिशाख्यव्याख्यानम्—त्रिभाष्यरत्नम्.

PRĀTIŚĀKHYAVYĀKHYĀNAM : TRIBHĀṢYARATNAM.

Foll. 18*a*—159*b*.

Same work as that described under No. 931 of the D.C.S. MSS., Vol. II.

Complete.

**Colophon:**

सोमसूर्यकृतं भाष्यरत्नं सम्पूर्णम् ॥

---

(c) अरण्यशिक्षा.

ARAṆYAŚIKṢĀ.

Foll. 160a—169b.

Same work as that described under No. 865 of the D.C.S. MSS., Vol. II, but with an additional stanza in the end as given below:

Complete.

आरण्यकेन्द्रजनपाठवशेन शिक्षापीयूषमध्ययनतत्परविप्रतुष्ट्यै ।
वर्णस्वरोच्चारणसंशयनिर्णयाय पातुं समर्पितकृतं मुदिता लभेध्वम् ॥

**Colophon:**

आरण्यशिक्षा समाप्ता ॥

Fol. 170 contains Aniṅgyapadāni.

---

(d) जटावल्ली.

JAṬĀVALLI.

Foll. 171a—198b.

By Padmanābha, son of Lakṣmaṇārya. Similar to the work described under No. 908 of the D.C.S. MSS., Vol. II. The author states that he summarises what is found in the Tribhāṣyaratna.

Deals with the following topics:—

१. वर्णविवेक.
२. वर्गादिविवेक.
३. जटाविवेक.
४. वर्गादिविवेक.

Complete.

**Beginning:**

वाचं वररुचादींश्च प्रणम्यादिगुरून् हरिम् ।
करिष्यामि जटावल्लीं विद्वत्सुहृदयङ्गमाम् ॥
यथा त्रिभाष्यरत्ने च सङ्क्षिप्तेयं प्रकाश्यते ।
उदात्तादिगुणैर्युक्ता वाक्छन्दालंप्रबोधिका ॥

तत्रादौ तावज्जटावल्लीव्यवहारज्ञापनार्थं संज्ञासूत्राण्यनुवर्ण्यन्ते । यथा— अथ नवादितस्समानाक्षराणि । अथेति संज्ञाधिकारार्थः यजुर्वैदिकषष्टिसंज्ञकानां

सूत्रतस्सिद्धान्तानां वर्णानां समाम्नाये आदितः अकारमारभ्य नववर्णास्समानाक्षरसंज्ञा भवन्ति । अकारादिप्लुतरूपऊकारपर्यन्ता इति ज्ञेयम् । अ१, आ२, आ३, इ१, ई२, ई३, उ१, ऊ२, ऊ३ ।

षोडशादितस्स्वराः आदितः षोडश वर्णास्स्वरसंज्ञा भवन्ति । ऋ, ॠ, ऌ, ए, ऐ, ओ, औ, अकारादयश्च ।

शेषो व्यञ्जनानि । अकाराद्यौकारपर्यन्तेभ्यः शेषवर्णाः व्यञ्जनसंज्ञा भवन्ति ।

आद्याः पञ्चविंशतिः स्पर्शाः । व्यञ्जनेष्वाद्याः ककारादयः पञ्चविंशतिवर्णाः स्पर्शसंज्ञा भवन्ति । क्, ख्, ग्, घ्, ङ्, च्, छ्, ज्, झ्, ञ्, ट्, ठ्, ड्, ढ्, ण्, त्, थ्, द्, ध्, न्, प्, फ्, ब्, भ्, म् ।

पराश्चतस्रोऽन्तस्थाः । स्पर्शेभ्यः परे चतस्रो वर्णा अन्तस्थसंज्ञा भवन्ति । य्, र्, ल्, व् ।

* * * *

इति जटावल्ल्यां संज्ञाविवेकः ।

* * * *

ननु जटावल्लीं करिष्यामीति प्रतिज्ञातं ततस्तज्ज्ञानार्थं संज्ञानुवर्णनं तत आकाङ्क्षायां स्थानविवेकः कृतः । अतः प्रतिज्ञातानुवर्णनमेव युक्तम् । सत्यम्—जटावल्ल्या लक्षणमेतद्धि—

पदद्वयं समुत्क्रम्य व्युत्क्रमोत्क्रमसन्धिमान् ।
यथावत्स्वरसंयुक्तं प्रयुञ्ज्यात्सा जटा मता ॥

तस्माज्जटावल्ली पदद्वयज्ञानपूर्विका । पदज्ञानस्य वर्णज्ञानपूर्वकत्वात् युक्तोवर्णविवेकः ।

* * * *

**Colophon:**

इति पद्मनाभयज्वना कृतायां जटावल्ल्यां वर्णविवेकः ।

* * * *

तेन इमे अश्विना संवत्सर इत्यत्राकारलोपो न भवतीत्युक्तं त्रिभाष्यरत्ने । तस्मात् गोऽश्वो इत्यत्राकारलोपो न भवतीति केचित् ।

**End:**

प्रजापतेस्तपसा वावृधानस्सद्यो जातो दधिषे यज्ञमग्ने । स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः ।

वर्णपुष्पा जटावल्ली स्वरितोदात्तपल्लवा ।
आश्लिष्टपदसन्दर्भैरानिता नियमैः कृता ॥
योगिनो जनुषारेश्च वंशाब्धेस्संभवस्य च ।
लक्ष्मणार्यस्य पुत्रेण कृतेयं विदुषां मुदे ॥

**Colophon:**

इति पद्मनाभयज्वना कृता जटावल्ली समाप्ता ॥

---

(e) अवर्णि.

AVARṆI.

Foll. 199*a*—202*a*.

Same work as that described under No. 858 of the D.C.S. MSS., Vol. II.

Complete

---

(f) आवर्णि.

ĀVARṆI.

Foll. 202*a*—204*b*.

Same work as that described under No. 868 of the D.C.S. MSS., Vol. II.

Complete.

---

(g) अवर्णिव्याख्यानम्.

AVARṆIVYĀKHYĀNAM.

Foll. 205*a*—221*b*.

Same commentary as that described under No. 860 of the D.C.S. MSS., Vol. II, but slightly different in the beginning and in the end.

Complete.

---

(h) आवर्णिव्याख्यानम्.

ĀVARṆIVYĀKHYĀNAM.

Foll. 222*a*—231*a*. Fol. 231*b* is left blank.

Same commentary as that described under Nos. 870 and 871 of the D.C.S. MSS., Vol. II, but with slight difference in the beginning and in the end.

Complete.

(i) उच्चोदर्की, सव्याख्यानम्.

UCCŌDARKĪ WITH COMMENTARY.

Foll. 232a—236b.

Same work as that described under No. 876 of the D.C.S. MSS., Vol. II.

Complete.

Fol. 237 contains Yōhilakṣaṇa.

---

(j) उच्चोदर्की.

UCCŌDARKĪ.

Foll. 238.

Same work as that described under No. 875 of the D.C.S. MSS., Vol. II, but the following additional stanza is given in the end.

ईङ्ख्यानंशापदेष्वेषूदात्तस्वारात्पराक्षरम् ।
स्वारात्परस्योदात्तस्य सङ्ग्रहोऽयमितीरितः ॥

Complete.

---

(k) उच्चोदर्कीव्याख्या, लघुवृत्तिः.

UCCŌDARKĪVYĀKHYĀ: LAGHUVṚTTIḤ.

Foll. 238b—250b. Fol. 251 is left blank.

Same commentary as that described under No. 878 of the D.C.S. MSS., Vol. II, but with introductory stanzas in the beginning and additional stanzas in the end.

Complete.

**Beginning:**

सर्वान् देवान् गुरून्नत्वा लघुवृत्तिः प्रचक्ष्यते ।
उच्चोदर्कदशश्लोक्या बालव्युत्पत्तिसिद्धये ॥
श्रीकेशवार्यमार्याणां पादपङ्कजमञ्जसा ।
विद्यामणीनां यज्जिह्वा कोशवेश्मायते नमः ॥

**End:**

उदात्तात्परतो नास्ति प्रचयः पूर्वतोऽपि वा ।
स्वरितः प्रचयादूर्ध्वं निहतात्प्रचयः परम् ॥
पदादौ प्रचयो नास्ति स्वरादेकपदे नव ।
नास्त्युदात्तोऽद्य विज्ञेयो हस्तविन्यासकर्मणि ॥
त्रिपद्प्रभृतिन्यायो लोपालोपेषु विद्यते ।
तत्रस्थमन्ययुक्तं चेत्पूर्वधर्मो न विद्यते ॥

तस्य प्रमाणं प्रथमे प्रातिशाख्यप्रपाठके ।
रेफादेशेऽपि शब्दाश्च नचामेत्यार्षशब्दितः ॥

---

R. No. 2592.

Palm-leaf. 13¾ × 1½ inches. Foll. 18. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Vasireddi Chandramaulīsvaraprasāda Bahadur, Zamindar of Muktyāla, Kistna district.

## वल्लवीपल्लवोल्लासभाणः

## VALLAVĪPALLAVŌLLĀSABHĀṆAḤ.

A kind of drama technically called Bhāṇa describing the love and attachment between Pallavaśēkhara and Rasalalatikā. The author is Mañjulācārya of Vāsiṣṭhagōtra. He is said to have had three brothers. His genealogy is given thus:

Sūryapaṇḍita
- Buccayārya
- Veṅkaṭapaṇḍita
- Sarvajñapaṇḍita
  - Kṛṣṇamūrtikumāra alias Mañjulācārya.

Incomplete.

**Beginning :**

श्रीकान्ता तव जीवितं खलु ततो वक्षःस्थले लक्ष्यते
नैकान्ता मयि चित्तवृत्तिरिह ते बुद्धोतिमुग्धागतिः ।
का कान्तात्र मदुक्तिरित्यतिनरक्रोधाविकां राधिकां
श्रीकान्तैव भवत्यसीत्यनुनयन् पीताम्बरः पातु नः ॥

नान्द्यन्ते सूत्रधारः सोल्लासं परितोऽवलोक्य ।

उद्भूतस्तनमण्डलं स्ववपुषामुच्छ्वासलीलापुषा-
मुन्मीलद्रतिलाभमीलितदृशामुत्थानखेदस्पृशाम् ।
उद्यत्पोतकपोतकूजितकलतामुद्राभिवासोऽमुना-
मुन्मूर्च्छद्रतिशोषितामुपरतं हयं विजेजीयताम् ॥

* * * *

सफलीकृताश्चर्यतपश्चर्याधुर्यसमार्याचार्यवर्यकार्ये केसर्यहार्ये वसतो भगवतो वराहनरहरिदेवस्य समङ्गीकृतनिखिललोकावनभावस्य चैत्रयात्रोत्सवसमागतैः सहृदयहृदयानुरञ्जनमञ्जुतरवचनरचनामण्डितैः पण्डितैः ।

उद्यद्दिवाकरमरीचिदरस्मिताब्जनिर्यन्मरन्दलहरीमधुरोक्तिगुम्फम् ।
शृङ्गाररसङ्गसमभङ्गि किमप्यनङ्गजीवातुमङ्गलयरूपकमात्तरङ्गम् ॥ इति ॥

किमेतादृशं रूपकम् । विद्यते हि—

राकाकोकरिपूदयस्फुटनटद्दुग्धाब्धितुन्दान्तर-
त्वङ्गत्तुङ्गतरङ्गभङ्गकलनाशक्तोक्तियुक्तश्चितम् ।
सद्विद्याद्युतिखण्डिताखिलतमस्तोमत्वसार्थाह्वयो
वाधिष्ठान्वयजस्स्वतुल्यसहजस्सूर्यो बुधग्रामणीः ॥

तस्याभवन्निखिलशास्त्रसमग्रबोधवैधोमनस्तनयचिकरणप्रवीणाः ।
पुत्राः पवित्रनिगमत्रयसत्रचैत्राः चित्रातिमात्रसुचरित्रयुतास्त्रयस्ते ॥

तत्राग्रजस्सकलशास्त्ररहस्यभेत्तृधीर्ज्योतिषे वररुचिः खलु बुच्चयार्यः ।
तस्यानुजो विबुधमौलिमणिर्नयाध्ववाचस्पतिर्जयति वेङ्कटलब्धवर्णः ॥

कल्याणाचलधर्ममास्वदितरः कामाभिधातोदय-
स्सूर्यात्रेयसुदर्शनाधिकशुचिः श्रीमन्महादर्शनः ।
नित्यं सद्बुधसेवितो विजयते गोत्राग्रसंभावित-
स्संप्राप्तागमकान्तवाक् तदनुजस्सर्वज्ञनामा सुधीः ॥

लब्धवर्णोदितक्रौञ्चभेदिकाण्डातिविश्रुतः ।
कृष्णमूर्तिकुमारोऽस्ति कुमार इव तस्य कौ ॥

विधेयसोदरत्रयो विधीशसन्नुताशय-
स्सुधाप्रभूतवाक्चयस्सुधीविलासभाग्यः ।
बुधाभिधात्सुदेजगो विधूतभूजनानय-
स्सुधामनञ्जुलाह्वयस्सुधीरशिष्टिपारयः ॥

यस्तेन कृतो वल्लीपल्लवोल्लासनामधेयधुरीणो भाणस्स एव सभ्यसदभ्य-
र्हणप्रवीणः । यतः—

क्वचित्प्रसूनकेसरप्रसूनवल्लरीलल्लम्पधूलिकानिरर्गलक्षरज्झरीसहोदरी ।
क्वचित्प्रभिन्नदन्तिदानमारुता(हता)विलभ्रमत्कराभ्रदन्त्यदभ्रबृंहितोरुवैखरी ॥

* * * *

संप्रति सकलवारचकोरलोचनाजनमस्तकन्यस्तमणिः कुचवसुन्धराधरसमुल्ल-
लद्बन्धुरक्षरशृङ्गाकरणचतुरसरामुक्तमुक्तामणिः कटिनटसमारूढसारसनचारुतरही-
रघण्टिकासारघृणिः कमनजनमोहपारावारसमुत्तरणतरणिः कुलागतलास्यकला-
कलापपटीयसी रसालल्लतिकाया यवीयसी

* * * *

ततः प्रविशति पल्लवशेखरः—(स्मरणमभिनीय) ।

अवेदिदं करणमुत्तममात्मसूनुः पञ्चेषुमित्रमिति गाढतरप्रयत्नात् ।
धात्रा कृतेयमबला शतपत्रपत्रनेत्राननाब्जजितकैरविणीकलत्रा ॥

**End:**

शृङ्गारवनमिव मन्मथागमहितमहिलानिवहसहितम्, अद्रिराजपुरमिव सर्वमङ्गलोदयमुदितविबुधसमुदयम्, नन्दनमिव सुन्दरमन्दारहरिचन्दनपारिजातसन्तानकल्पद्रुमाकल्पम्, दिव्यानीकमिव समुन्नतध्वजवीररथकदम्बकोद्यानम्, हरशरीरमिव भुजङ्गपुङ्गवभूषणम्, वावदूकवदनमिव बहुलपदप्रतिपादितार्थम्, सरोवरमिव कमलाङ्कितसर्वतोमुखसदनमिन्द्रनीलवितर्दिविजितनागपुरं नागपुरमद्राक्षम् ।

---

R. No. 2593.

Paper. 6¾ × 4½ inches. Foll. 26. Lines, 11 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Sundaram Pantulugaru of Vizianagram, Vizagapatam district.

Foll. 6, 16*b*, 25*b* and 26 are left blank.

वेङ्कटेशमाहात्म्यम्.

VEṄKAṬEŚAMAHATMYAM.

Deals with the holiness and religious importance of the sacred shrine of Vēṅkaṭēśa on the top of the Tirupati Hills.

Contains the following Adhyayas, as found in the Ādityapurāṇa :—

१. . . . महिमानुवर्णनम्.
२. अभीष्टदानवर्णनम्.
३. अनन्तानन्तरूपवर्णनम्.
४. नाममहिमवर्णनम्.
५. अभीष्टदानमहिमानुवर्णनम्.

Complete.

**Beginning:**

श्रीशौनकादय ऊचुः—

श्रीवेङ्कटेशमाहात्म्यं श्रीनिवासप्रसादतः ।
श्रीप्रदं सर्वतस्सूत दयया प्रोक्तवानसि ॥
इतः परः श्रीनिवासः श्रीपतिस्सर्वतो हि नः ।
कथं प्रीतो भवेत्सद्यो ह्यभीष्टानि प्रवर्षयेत् ॥

वद्वदस्व कृपापूर्णं वेङ्कटेशकथामृतम् ।
भगवन् सर्वतत्त्वज्ञ दयापात्रं वयं तव ॥

श्रीसूत उवाच—

शृण्वन्तु मुनयो दिव्यं सावधानतया स्थिरम् ।
यदा पृष्टं तदैवाहं वक्ष्याम्येव च नान्यदा ॥
वेङ्कटाद्रिसमं स्थानं ब्रह्माण्डे नास्ति किंचन ।
वेङ्कटेशसमो देवो न भूतो न भविष्यति ॥

• • • •

अत्र वः कथयामीष्टमितिहासं मनोरमम् ।
यस्य स्मरणमात्रेण भक्तिर्विष्णुपदाम्बुजे ॥
वायुशिष्यो देवशर्मा विष्णुभक्तो जितेन्द्रियः ।
तपस्वी बहुनिष्ठावान् सर्वदा विष्णुचिन्तने ॥

• • • •

भार्यया प्रार्थितो नित्यं दारिद्र्यापगमे च या ।
भो नाथ हे पते स्वामिन् प्रसीद करुणाकर ॥

• • • •

ततो वायुः प्राह शिष्यं मधुरं वचनं हितम् ।
श्रीमद्वेङ्कटनाथस्य यात्रार्थं गच्छ माचिरम् ॥
ते . . मात्रं तेऽभीष्टसिद्धिर्भवति नान्यथा ।
लक्ष्मीपतेर्दयासिन्धोर्ब्रह्मादिवरदायिनः ॥
यात्रायां मास्तु सन्देहः शीघ्रं गच्छ सुभक्तिमान् ॥

• • • •

**Colophon:**

इति श्रीमदादित्यपुराणे श्रीवेङ्कटेशमाहात्म्ये पादनखाग्रगतगुणमहिना ।-
र्णनं नाम प्रथमोऽध्यायः ॥

**End:**

श्रीवेङ्कटेशस्य कथामृतं त्विदं महत्त्वसारं सुतपस्विपूजनम् ॥
श्रीवेङ्कटेशस्य महाभिधाभिधं लोकोत्तरं देवऋषिप्रियं च ।
समस्तपापौघविनाशकारणं समस्तपुण्यौघविवृद्धिकारणम् ॥
वक्तुः श्रोतुः पाठकस्य पारायणपरस्य च ।
परावरो वेङ्कटेशः प्रसन्नो भवति क्षणात् ॥

स्तोत्रेणैव हि सन्तुष्टो वेङ्कटेशो रमापतिः ।
ये यान् कामान् कामयन्ति तांस्तान्मुक्तिं ददाति च ॥

**Colophon:**

इति श्रीमदादित्यपुराणे वेङ्कटेशमाहात्म्ये अभीष्टदानमहिमवर्णनं नाम पञ्चमोऽध्यायः ॥

---

R. No. 2594.

Palm-leaf. 16 × 1⅜ inches. Foll. 144. Lines, 5 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Vāsireḍḍi Candramaulīśvaraprasāda Bahādūr, Zamindar of Muktyala, Kistna district.

Foll. 1a—2b contain Bhartranugamavidhi.

(a) कर्मप्रयोगप्रदीपिका.

KARMAPRAYOGAPRADĪPIKA.

Foll. 3a—102a. Foll. 102b and 103 contain Vaiśvadēvaprayōga. Foll. 62b and 77b are left blank.

A manual of ritualistic procedure relating to the performance of funeral ceremonies; by Sōmanāthabhaṭṭa, son of Kāmadēva Sōmayājin. Incomplete.

**Beginning:**

गजाननं भूतगणादिसेवितं कपित्थजम्बूफलसारभक्षितम् ।
उमासुतं शोकविनाशकारणं नमामि विघ्नेश्वरपादपङ्कजम् ॥

अथ पैतृमेधिकं कर्मोच्यते—

यस्य कस्यचित्पुरुषस्य मरणसंशये स्नापयित्वा यथोक्तं प्रायश्चित्तं कृत्वा गोमयेनोपलिप्तकुशास्तृतभूमौ दक्षिणाशिरसं संवेशयित्वा कर्ता प्राणानायम्य, एवंगुणविशेषणविशिष्टायां तिथौ पितुर्गोत्रस्य शर्मणः सुखेन प्राणोत्क्रमणार्थमुत्क्रान्तिसंज्ञकगोदानं करिष्य इति सङ्कल्प्य, ब्राह्मणमभ्यर्च्य ।

* * * *

एतद्विषये कपर्दिकारिका—

अनाहिताग्नेः संस्कार उच्यते पैतृमेधिकः ।
ब्रह्मविद्गुरित्येतावायुषः प्रमाणमित्यपि ॥

* * * *

अथानुगतवह्निस्तु यजमानो मृतो भवेत् ।
प्रेताधानं तथा कुर्यादित्यापस्तम्बशासनात् ॥
द्वे यद्गृहीतमापूर्वं प्रतिष्ठाप्याज्यसंस्कृतौ ।
तूष्णीं पञ्च जुहोतीति प्रेताधानमुदीरितम् ॥ इति ॥

* * * *

इति सूतिकामृतिप्रायश्चित्तविधिस्समाप्तः ।

अथ रजस्वलायां मृतायामप्येवमेव व्याख्यातम् । पूर्वं संसर्गार्थे शुद्धतोयेन स्नापयित्वा, पश्चात्कुम्भतोयैः स्नापयेत् । पूर्ववत्कृत्वा पैतृमेधिकं कुर्यात् ।

**Colophon:**

इति रजस्वलामृतिप्रायश्चित्तम् ।
सा शुद्धा भवति ।

* * * *

मृताशौचे तथा श्राद्धे मातापित्रोर्मृतेऽहनि ।
उपवासे च ताम्बूलं दिवा रात्रौ विवर्जयेत् ॥

**Colophon:**

इति श्रीकामदेवसोमयाजितनूभवसोमनाथभट्टविरचितकर्मप्रयोगदीपिकायां तर्पणविधिः समाप्तः ॥

**End:**

आपस्तम्बः—

बलाद्दासीकृता ये तु चण्डालम्लेच्छपुल्कसैः ।
अर्वाक्संवत्सरादूर्ध्वमूर्ध्वं षाण्मासिकं भवेत् ॥
तेषां मृतानां शुद्ध्यर्थमिति मानवभाषितम् ॥

**Colophon:**

इति दुर्मरणप्रायश्चित्तम् ।

दर्शे तिलोदकं पूर्वं पश्चाद्दद्यान्महालये ।
आब्दिके नापरं पूर्वं परेऽहनि गृहाद्बहिः ॥

---

(*b*) अघसङ्ग्रहदीपिका.

**AGHASAṄGRAHADĪPIKĀ.**

Foll. 103*b* – 122*a*. Foll. 122*b*—129*b* contain *Sadyaśśaucaśrāddhādiviṣayavacanāni*. Fol. 106*b* is left blank.

Similar to the work described under No. 3023 of the D.O.S. MSS., Vol. V.

Contains the following Paricchēdas:—

१. गर्भस्रावपाताद्याशौचम्.
२. ज्ञात्याद्याशौचम्.
३. स्त्रीमरणाद्याशौचम्.
४. आहिताग्निविषयाशौचम्.
५. सन्निपाताशौचम्.

Complete.

**Beginning:**

मातुर्गर्भविपत्तयं त्रिदिवसं मासत्रयेऽतो यथा
मासाहं त्रिषु सूतकाविधिरतः स्नानं पितुस्सर्वदा ।
ज्ञातीनां पतनादिजातमरणे पित्रोर्दशाहं सदा
नाम्नः प्राक् तदर्पितं सुतकत्रयाह्लात्तुदशाहं परम् ॥

मातुर्गर्भविपत्तु गर्भविपद्गर्भनाशः स्रावपातप्रसवात्मिका । यथा स्मृत्यन्तरे स्मर्यते—

आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं तु नारीणामयं प्रसव उच्यते ॥ इति ॥

स्रावपातप्रसवात्मिकासु गर्भविपत्सु मातुरेवायं भवति ।

* * * *

**Colophon:**

इत्यघसङ्कटदीपिकायां प्रथमपरिच्छेदः ॥

**End:**

तत्र यदि पूर्वाशौचस्यान्त्यदिवसे द्वितीयाशौचनिमित्तभूतं जननं मरणं वा भवेत्, तदा तदारभ्य त्र्यहाच्छुद्धिर्भवति । एकाहदिना . तु पूर्वाशौचस्यान्तिम(न्तिम)दिवसे सन्निपतितानामपि पूर्वाशौचमात्रेणैव शुद्धिर्भवति ॥

**Colophon:**

इत्यघसङ्कटदीपिकायां पञ्चमः परिच्छेदः ॥

---

(e) प्रायश्चित्ताभरणम्.

PRĀYAŚCITTĀBHARAṆAM.

Foll. 130a—144b.

Similar to the work described under R. No. 1527(b) ante

Complete.

**Beginning:**

प्रायश्चित्तव्रतानुष्ठानसङ्कल्पदिवसात्पूर्वेद्युः प्रातरुत्थाय कृतकृत्यकर्मानुष्ठान(नु) सर्वान् स्वग्रामवासिनः शान्तान् दान्तान् आचारसम्पन्नान् विदितसकलशास्त्रान् विपश्चितश्च ब्राह्मणानाहूय तेभ्यश्चिकीर्षितं कर्म निवेद्य भवद्भिः प्रवि

कृपया सर्वप्रायश्चित्ताख्यं. कर्म कारयितव्यमिति तान् प्रणामपुरस्सरं सम्प्रार्थ्य प्रायश्चित्तं करिष्य इति ।

• • • •

परिष(दं)त्रिः प्रदक्षिणीकृत्याञ्जली वर्तमानां परिषदः पुरतो निधाय दण्डवत्प्रणम्य परिषदे विज्ञापयेत् ।

End:

शुक्लवस्त्रधारणं दश दानानि चतुःपात्रप्रयोगं कृत्वा व्याहृतिभिराज्येनाष्टोत्तरशतहोमं कुर्यात् जयादिप्रभृतिविसर्जनान्तं ब्राह्मणभोजनं कुर्यात् ॥

Colophon:

प्रायश्चित्तविधिस्समाप्तः ॥

---

R. No. 2595.

Palm-leaf. 16 × 1½ inches. Foll. 78. Lines, 6 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Vasireddi Candramaulīśvaraprasāda Bahadur, Zamindar of Muktyala, Kistna district.

(a) नन्दिकेश्वरतिलकम्.

NANDIKEŚVARATILAKAM.

Foll. 1a—21b and 58a—71b.

Contains certain details, such as Nyāsa, Pūjā, Yantra, etc., regarding the Mantras addressed to God Śiva. The work is attributed to Nandikēśvara.

Name of the copyist: Mudikonda Sāmbayya. Copying date: Wednesday, the 5th day of the bright fortnight of the Mārgaśira month in the year Śukla.

Contains the Paṭalas one to six complete and the seventh incomplete.

Deals with the following topics:—

१. मन्त्रोद्धारक्रमः.
२. न्यासविधिः.
३. नानाकाम्यहोमविधिः.
४. साधनविधिः.
५. ध्यानविधिः.
६. पूजाविधिः.
७. अघोरास्त्रकल्पः.
८. अघोरास्त्र(विजयसंहितास्थम्).
९. पञ्चाक्षरीमन्त्रोद्धारः.
१०. वीरभद्रयन्त्रोद्धारः.
११. मृत्युञ्जययन्त्रोद्धारः.
१२. प्रासादपञ्चाक्षरीमन्त्रः.

**Beginning :**

कार्तिकेय उवाच—

[अथ] मन्त्रोद्धारं प्रवक्ष्यामि शृणु त्वा(त्वं) नन्दिकेश्वर ।
एकपादं द्विपादं च चतुष्पादं त्रिपादकम् ॥
सात्त्विकं राजसं प्रोक्तं तामसं च प्रवक्ष्यते ।
आग्नेयं(ग्नेय्यां)होमयेत्पश्चाद्बलिमन्त्रमतः परम् ॥
एवं दशविधं प्रोक्तमुद्धारं च ततः शृणु ।
प्रथमं भुवनेशं च बीजं प्रासादमुत्तमम् ॥
स्फुरद्वयं समायुक्तं प्रस्फुरद्वयमेव च ।
घोरशब्दं पुनः पश्चात्तरशब्दं ततो वदेत् ॥
तनुरूपचटद्वन्द्वं प्रचटद्वयमुद्धरेत् ।
कहद्वयसमायुक्तं वम बन्ध पुनः पुनः ॥
घातयद्वयसंयुक्तं कवचास्त्राग्निवल्लभा ।
पञ्चपञ्चाशतद्वर्णचतुष्पादं समुद्धरेत् ॥

मन्त्रोद्धारः ओं ह्रीं ह्रौं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोरतरतनुरूप चट-चट प्रचट प्रचट कह कह वम वम बन्ध बन्ध घातय हुं फट् स्वाहा। इति चतुष्पादविद्या ।

सजलघनसमाभं भीमदंष्ट्रं त्रिनेत्रं भुजगधरमघोरं रक्तवस्त्राङ्गरागम् ।
परशुडमरुखड्गं खेटकं बाणचापौ त्रिशिरमजकपालं बिभ्रतं भावयामि ॥
इति ध्यात्वा जपेत् ।

* * * *

**Colophon :**

इति नन्दिकेश्वरतिलके अघोरास्त्रे दशविधमन्त्रोद्धारक्रमः प्रथमः पटलः॥

* * * *

**Colophon :**

इति नन्दिकेश्वरतिलके पूजाविधिर्नाम षष्ठः पटलः ॥

* * * *

**Colophon :**

इति नन्दिकेश्वरतिलके विजयसंहितायामघोरास्त्रं संपूर्णम् ॥

**End :**

अष्टाक्षरं चतु(र)श्रन्तु बाणकोणे त्रयोदश ।
षट्कोणकं च प्रासादं मालावर्तुलसंस्थितः ॥
अष्टपत्रमघोरास्त्रं षोडशं शारभं तथा ।

बर्तुलं सपरीतं च साध्यं मन्त्रमालिखेत् ॥
द्वात्रिंशत्स्वरगायत्र्यां चतुष्षष्टिशिवाक्षरी ।
दशाक्षरं चाष्टकोणे मातृशूलानिकान्वितः ॥
तद्बहिः पार्थिवद्वन्द्वमष्टवज्रसमन्वितम् ।

Foll. 72a—75a contain Aghōrasahasrākṣarōddhāra. Foll. 75b—76b contain Aghōrēśvarīyantra. Fol. 77 contains Śītalāyantra. Fol. 77b is left blank. Fol. 78 contains some Telugu Padyas.

---

(b) अघोरस्तवः, सव्याख्यः

AGHŌRASTAVAḤ WITH COMMENTARY.

Foll. 25a—53b.

Same text as that described under No. 10304 of the D.C.S. MSS., Vol. XIX. The commentator's name is not given.

Almost complete.

**Beginning:**

वन्देमहि महीयांसं मान(जानु)लम्बिजटाधरम् ।
यत्कङ्कणझणत्कारस्वशब्दानुशासनम् ॥

अथात्र भगवान् दूर्वासो नाम वीरमाहेश्वरो मुनिः भक्तानुग्रहार्थमघोरस्तवमुक्तवान् । तत्राघोरस्तवे केचन श्लोकाः कामिकाद्यागमस्थिताः अत्र निबद्धाः कतिचन स्वकृताः । ततः श्लोकव्याख्यानावसरे स्वकीयत्वे परकीयत्वे विवेचनं करिष्यामः । तत्रादिमश्लोकः—

(मू.) सकलभुवननाथं( . . )वागिरभ्यर्चयामः ॥

(व्या) अस्यार्थः, सकलभुवननाथं सकलानि भुवनानि लोकाः सुरासुरयक्षगन्धर्वमनुष्यादयः तैः नाथ्यते प्रार्थ्यत इति नाथस्तथोक्तस्तम् । यद्वा सकलानां भुवनानां नाथः स्वामी तम् । अत एव सर्वदं स्वस्ववाञ्छितार्थप्रदमत एव सर्ववन्द्यं सर्वेषां वन्दनीयो वन्द्यस्तम् । सहमनुमनुनाथम् । मनुभिरङ्गमन्त्रैः सह वर्तत इति सहमनुः । सहमनुश्चासौ मनुनाथश्च सहमनुमनुनाथः । मनुनाथो मन्त्रराट् तं मन्त्रराट् . . . मनुरिति मन्त्रसंज्ञा पूजयित्वा संपूज्य, सशक्तिं सपरिवारम् ।

• • • •

शिवस्य सकलभुवननाथमित्यादिविशेषणैर्निरूपितम् । परमशिवशब्देन षड्विंशतितत्त्वात्मकत्वमघोरास्त्रस्य निरूपितम् । अत एव पाशुपतास्त्रादिकं सत्यविराजत्वं सिद्धमघोरास्त्रस्य । अघोरास्त्राख्यमघोरसंज्ञं सदाशिवस्य । हितनु घोरा

शिवा चेति । तस्यैते तनुवौ घोरान्या शिवान्या चेति श्रुतेः । शिवास्या तनुरघोरा । या ते रुद्र शिवा तनूरघोराऽपापकाशिनीति श्रुतेः । अतश्च सदाशिवात्मकत्वमघोरास्य श्रुतिसिद्धम् ।

**End:**

तदनन्तरं विशुद्धचक्रे षोडश चन्द्रकलाः षोडश विन्यसेत् । चन्द्रकलाविद्या सकलमन्त्राद्धिक्षा आज्ञाचक्रे द्विदले । तदनन्तरं वर्णद्वयं विन्यसेत् । अवशिष्टं हुंफडिति वर्णद्वयमादिमं बीजं भुवनेश्वरी च कुण्डं शक्तिसंचारपदेषु विलिखेत् । विन्यसेत् ।

Fol. 56 contains Mantrārgalacakralakṣaṇa and fol. 57 contains Siddhāricakra.

---

R. No. 2196.

Palm-leaf. $17\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 268. Lines, 6 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Vāsireḍḍi Candramauliśvaraprasāda Bahadur, Zamindar of Muktyala, Kistna district.

Foll. 1a—4b contain the deed of gift presented by two persons to one Sītannalingambhaṭṭa.

(a) कालविधानपद्धतिः, आन्ध्रटीकासहिता.

KĀLAVIDHĀNAPADDHATIḤ WITH TELUGU MEANING.

Foll. 5a—39a. Fol. 39 contains Kṣaurakartavyavacanāni.

Same text as that described under R. No. 1594(a) ante. The author of the Telugu commentary is stated to be Yallaya, son of Gaṅgadaivajña—vide the stanza given from the end.

Complete, but wants nine stanzas in the beginning.

विरच्यते कालविधानपद्धतेर्ज्योतिर्विदा कौतुकमान्ध्रटीका ।
बालप्रबोधार्थमतिप्रयत्नाद्दैवज्ञगौरात्मजयल्लयेन ॥

---

(b) विद्वज्जनवल्लभः.

VIDVAJJANAVALLABHAḤ.

Foll. 40a—49b.

By Bhōjarāja. Same work as that described under No. 13394 of the D.C.S. MSS., Vol. XXIV, wherein see for the beginning. Slightly different readings are noticeable here and there.

Complete.

Contains the following topics :—

१. शुभाशुभाध्यायः
२. शत्रुसमागमाध्यायः.
३. गमनागमनाध्यायः.
४. प्रोषिताध्यायः.
५. यात्राफलाध्यायः.
६. जयापजयाध्यायः.
७. सन्धानाध्यायः.
८. आथर्वणीयाध्यायः.
९. बन्धमोक्षाध्यायः.
१०. रोगाध्यायः.
११. कन्यावरणाध्यायः.
१२. गर्भवासाध्यायः.
१३. पुत्रजन्माध्यायः.
१४. वृष्ट्यध्यायः.
१५. निक्षिप्तधनाध्यायः.
१६. नष्टद्रव्याध्यायः.
१७. धातुमूलजीवचिन्ताध्यायः.

**Colophon:**

इति भोजराजविरचिते विद्वज्जनवल्लभे शुभाशुभाध्यायः प्रथमः ॥

**End:**

धातुर्मूलं भवति च धनं जीवमित्योजराशौ
युग्मे राशौ त्रयमपि भवेदेतदेव प्रतीपम् ।
लग्ने योऽंशस्सकलसुधिया गण्यमेव क्रमात्स्यात्
सङ्क्षेपोऽयं नियतमुदितं विस्तरादत्र भेदन् ॥
आह . . खिलवारिराशिरशना . . दिनी मेदिनी
धाम्नैकां नगरीमविमतिहतः प्रत्यर्थिपृच्छं फलम् ।
प्रश्नज्ञानमिदं सपार्थिवशिरोविन्यस्तपादाम्बुजः
श्रीविद्वज्जनवल्लभाख्यमकरोच्छ्रीभोजदेवो नृपः ॥

**Colophon:**

इति विद्वज्जनवल्लभे धातुमूलजीवचिन्ताध्यायः ॥

---

(c) दैवज्ञरत्नम्.

**DAIVAJÑARATNAM.**

Foll. 50b—94a. Fol. 94b is left blank.

A treatise containing details of information for the preparation of Hindu calendars: by Narasiṁha, son of Lakṣmaṇārya of Bharadvāja-gōtra and a native of Vidurapura. The author salutes Ānandatirtha in the beginning.

Contains the following Prakaraṇas :—

१. वारप्रकरणम्.
२. नक्षत्रप्रकरणम्.
३. योगप्रकरणम्.
४. करणप्रकरणम्.
५. रव्यादिचारप्रकरणम्.
६. ग्रहकूटप्रकरणम् (incomplete).

**Beginning:**

श्रीमल्लक्ष्मीनृसिंहं सकलसुरगुरुं श्रीमदानन्दतीर्थं
नत्वा सिद्धान्तवेत्ता विदुरपुरवरे नारसिंहः प्रसिद्धः ।
भारद्वाजे सुगोत्रे समुदितयशसो लक्ष्मणार्यस्य सूनुः
वक्ष्ये दैवज्ञरत्नं सकलजनहितं स्वल्पमत्यद्भुतं च ॥

अथ संवत्सरादिनिर्णयः—

प्रभवो विभवश्शुक्लः प्रमोदूतः प्रजापतिः ।
आङ्गिरसः श्रीमुखो भावो युवो धाता च ईश्वरः ॥
बहुधान्यः प्रमादी च विक्रमो वृषवत्सरः ।
चित्रभानुस्स्वभानुश्च तारणः पार्थिवो व्ययः ॥
सर्वजित्सर्वधारी च विरोधी विकृतिः खरः ।
नन्दनो विजयश्चैव जयो मन्मथदुर्मुखी ॥
हेमलम्बी विलम्बी च विकारी शार्वरी प्लवः ।
शुभकृच्छोभकृत्क्रोधी विश्वावसु पराभवः ॥
प्लवङ्गः कीलकस्सौम्यस्साधारणविरोधकृत् ।
परीधावी प्रमादी च आनन्दो राक्षसो नलः ॥
पिङ्गलः कालयुक्तिश्च सिद्धार्थी रौद्रि दुर्मतिः ।
दुन्दुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः ॥

अथायने—रत्नमालायाम्—

शिशिरपूर्वमृतुत्रयमुत्तरं त्वयनमाहुरहश्च तदामरम् ।
भवति दक्षिणमन्यदृतुत्रयं,निगदिता रजनी मुदिता च सा ॥
गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबन्धपूर्वम् ।
सौम्यायने कर्म शुभं विधेयं यद्गर्हितं तत्खलु दक्षिणे तु ॥

* * * *

**Colophon:**

इति नृसिंहविरचिते दैवज्ञरत्ने वारप्रकरणम् ॥

**End.**

इति श्रीनृसिंहविरचिते देवज्ञरत्ने ग्रहकूटप्रकरणम् ॥

अथ सङ्क्रान्तिः—ब्रह्मसिद्धान्ते—

अयने द्वे च विषुवे चतस्रः षडशीतयः ।
चतस्रो विष्णुपद्यश्च सङ्क्रान्त्यो द्वादश स्मृताः ॥
मृगकर्कटसङ्क्रान्ती द्वे तूदग्दक्षिणायने ।
विषुवे च तुलामेषौ गोलमध्ये ततोऽपराः ॥

* * * *

तिलदाता महाभोगी सर्वरोगविवर्जितः ।
होमं च भक्षणं कुर्याद्विधिरेवोत्तरायणे ॥

पर्वकालः—

अमायां च व्यतीपाते ग्रहणे चन्द्रसूर्ययोः ।
मन्वादयो युगादिश्च सङ्क्रान्तिर्धृतिस्तथा ॥

---

(*d*) शान्तिकल्पः.

ŚĀNTIKALPAḤ.

Foll. 95*a*—134*b*.

Details of procedure relating to various propitiatory rites prescribed for averting different kinds of evil. Similar to the work described under R. No. 437 ante.

Complete.

Deals with the following topics :—

| | |
|---|---|
| 95*a*—98*a*. | कुहूशान्तिः. |
| 98 | स्वनक्षत्रशान्तिः. |
| 99*a*—101*a*. | विषघटिकाजननशान्तिः. |
| 101*a*—102*a*. | कृष्णचतुर्दशीजननशान्तिः. |
| 102*a*—103*a*. | दर्शजननशान्तिः. |
| 103*a*—104*a*. | गृध्रोलूककपोतशान्तिः. |
| 104*a*—105*a*. | वायससंयोगदर्शनश्वेतवायसदर्शनशान्तिः. |
| 105*a*—106*a*. | शिंथिलीशान्तिः. |
| 106*a*—107*a*. | मधुमक्षिकादिशान्तिः. |
| 107 | कदलीशान्तिः. |

107b—109a अद्भुतशान्तिः.

109a ग्रहधूपादि.

109b धात्रीकल्पः.

110a—111a. पर्जन्यशान्तितरसूक्तं च.

111b गवादिमसूतिनिर्णयः.

112a—113b. महोत्पातशान्तिः.

113b—114b. अभयङ्करजातवेदससूक्तानि.

114b—115a. नामत्रयविधानम्.

115a—120b. नवग्रहशान्तिः.

121a—125a. रजस्वलाशान्तिः.

125a—134b. मूलाश्लेषाजननशान्तिः.

Foll. 135—136 contain Śatauṣadhināmāni.

---

(c) ज्यौतिषग्रन्थः.

JYAUTIṢAGRANTHAḤ.

Foll. 137a—151a. Fol. 151b is left blank.

A treatise on astronomy dealing with the topics given below; by Kṛṣṇabhaṭṭārya of Nandigrāma village and son of Narasiṁha of Hāritagōtra.

Contains the following topics:—

१. ज्योतिश्शास्त्रप्रशंसा.
२. मेरुप्रशंसा.
३. दैवज्ञलक्षणम्.
४. राजप्रशंसा.
५. पञ्चाङ्गप्रशंसा.
६. भचक्रभ्रमणम्.
७. कालनिर्णयः.
८. चतुर्युगप्रमाणानि.
९. आयर्भुक्तिनिर्णयः.

Incomplete.

**Beginning:**

वागीशाद्याःसुमनसः( . . . )तं नमामि गजाननम् ॥
श्रीशब्रह्मेशगणपान्नत्वा वाणीं श्रियं शिवाम् ॥
रविचन्द्रारसौम्येज्यसितमन्दविधुन्तुदान् ।
भुक्तिमुक्तिप्रदान् खेऽटान् सततं प्रणमाम्यहम् ॥

त्रैलोक्यैकप्रदीपाय सृष्टिस्थित्यन्तहेतवे ।
ऋग्यजुस्सामरूपाय नमः पङ्कजबन्धवे ॥
प्रणम्य पार्वतीनाथं नन्दिग्रामनिवासिनम् ।
भक्ताभीष्टप्रदातारं रामलिङ्गं नराम्यहम् ॥
इन्दिरामन्दिरं देवं मन्दहासमुखाम्बुजम् ।
नन्दिग्रामपुराध्यक्षं वन्दे केशवनायकम् ॥

श्रीभारद्वाजाभिधानान्वयजलधिविधुः सर्वशास्त्रप्रवीणो
गोत्रे जातः पवित्रे हरितवरमुनेर्नारसिंहस्य पुत्रः ।
कृष्णाम्भट्टार्यवर्यः स्मृतिविततयजुर्वेदसिद्धान्तवेत्ता
पञ्चाङ्गं नन्दिग्रामप्रथितवरपुरे साधु मोदं करोति ॥

ज्योतिश्शास्त्रप्रशंसा ।

• • • •

ज्योतिर्ज्ञानाज्जायते चायुरादावायुर्ज्ञानाज्जायते धर्मबुद्धिः ।
धर्मज्ञानाज्जायते ब्रह्मविद्या ब्रह्मज्ञानान्मुक्तिरेवास्य जन्तोः ॥
ग्रहनक्षत्रचरितं ज्ञात्वा गोलं च तत्त्वतः ।
ब्रह्मलोकमवाप्नोति पर्यायेणात्मवान् द्विजः ॥

• • • •

गणितं जातकं शाखां यो वेत्ति द्विजसत्तम ।
त्रिस्कन्धज्ञाननिर्दिष्टं संहितापारगश्च सः ॥

अथ ज्योतिश्शास्त्रं त्रिविधम्—

स्कन्धत्रयात्मकं शास्त्रमाद्यं सिद्धान्तसंज्ञकम् ।
द्वितीयं जातकं स्कन्धं तृतीयं संहिताह्वयम् ॥

अथ सिद्धान्तः प्रथमः कथ्यते—

ग्रहाणां मध्यभुक्तिस्तु स्फुटभुक्तिरनन्तरम् ।
दिक्साधनं ततः छायालग्नकालविनिर्णयम् ॥
चन्द्रार्कग्रहणं सम्यक्तयोश्च परिलेखनम् ।
समागमो युद्धभेदो भग्रहाणां युतिस्ततः ॥

• • • •

तच्छान्तिर्मिश्रकाध्यायास्तृतीयस्कन्धसम्भवाः ॥

अथ मेरुप्रशंसा कथ्यते—

भूलोकं चैव विस्तीर्णं पञ्चाशत्कोटियोजनम् ।

**End:**

अथ जीवराशीनां भुक्तिनिर्णयः चतुरशीतिलक्षाणि ।

धान्याहारं च षड्लक्षं सृजत्यन्तः प्रजापतिः ।

अन्नाहारं चतुष्कं स्याच्चन्द्रिकामपि तद्द्वयम् ॥

तृणाहारं बाणसङ्ख्या विष्णुर्वचनमब्रवीत् ।

• • • •

कन्दमूलाष्टकं प्रोक्तं दारुभक्षं चतुष्टयम् ।

चतुरशीतिलक्षाणां देवानां भुक्तिरुच्यते ॥

---

(*f*) पराशरस्मृतिः.

**PARĀŚARASMṚTIḤ.**

Foll. 152*a*—176*b*.

Same work as that described under No. 2633 of the D.C.S. MSS., Vol. V.

Contains the Adhyāyas 1 to 10 complete and the 11th incomplete, but wants the beginning in the first Adhyāya.

---

(*g*) स्मृतिभास्करः.

**SMṚTIBHĀSKARAḤ.**

Foll. 177*a*—192*a*.

Same work as that described under No. 2787 of the D.C.S. MSS., Vol. V.

Contains the Ācāra and the Vyavahāra-kāṇḍas only.

Fol. 192*b* contains Śrāddhakālaviṣayavacana.

---

(*h*) सन्ध्यावन्दनपद्धतिप्रकाशः.

**SANDHYĀVANDANAPADDHATIPRAKĀŚAḤ.**

Foll. 192*a*—263*a*. Fol. 263*b* is left blank.

Same work as that described under No. 2879 of the D.C.S. MSS., Vol. V. By Kṛṣṇapaṇḍita of Rāghavadaivajña family and son of Rāmabhaṭṭa and Lakṣmī. The author salutes the preceptors Kṛṣṇavidvanmaṇidāsika and Mukundāśramayōgīndra.

Contains the Gucchas one to four complete and certain matters relating to Yajñōpavīta (the sacred string worn by certain Hindus).

**Beginning:**

यस्मिन् दर्पणबिम्बजृम्भितपुरीसन्दर्भतुल्यं जगत्
भातं यस्य दसंविदो यत इदं रूप्यादिवद्भाव्यते ।
यस्याज्ञानविजृम्भिता परभिदा वारिन्दुभेदादिव-
त्तं भूमानमुपास्महे हृदि सदा वामार्धजानिं शिवम् ॥
पूर्णानन्दस्वरूपाय दक्षिणामूर्तये नमः ।
प्राज्ञान् प्राज्ञान् करोमीति दीक्षिता यस्य चिन्तया ॥
मुकुन्दाश्रमयोगीन्द्रपादपङ्कजमाश्रये ।
यत्सन्दर्शनमात्रेण प्राबल्यं जायते नृणाम् ॥
श्रीमत्कटाक्षक्षणवीक्षितानां वाणी सुरस्त्री रसनाञ्चले(ले)चला ।
प्रवर्तते तान्प्रणमामि नित्यं श्रीकृ(ष्ण)विद्वन्मणिदेशिकेन्द्रान् ॥
अरुन्धतीव व्रतभाग्यशालिनी स्वर्भारभूम्ने जननी जगन्नुता ।
श्रीरामभट्टस्तु पितामितागमः तावद्य वन्दामि सदिष्टसिद्धये ॥
श्रीमद्राघवदेवज्ञवंश्यः श्रीकृष्णपण्डितः ।
प्रकाशयाम्यहं स्पष्टं सन्ध्यावन्दनपद्धतिम् ॥
भाष्याणि वेदस्य विलोक्य निर्मिता विद्वत्प्रिया निर्णयकल्पवल्ल्यसौ ।
गम्भीरसंशोभिपदानुगुम्भिता कव्यागमश्रेणिशुशुत्सया मया ॥

इह खलु सकलसत्कर्मपरिगणनायामादितः परिगणनार्हस्य सन्ध्यावन्दनकलापस्य स्वरूपविशेषजिज्ञासा तथाकथञ्चिद्विगुणोऽपि श्रेयान स्वधर्मो विगुणोऽपि यस्मात् इति भगवदुपदेशात्स्वधर्मत्वेन श्रेयसीति हृदि निधाय निरन्तरशुश्रूषापरितोषितसदाचार्यमुखकमलोदीरितसिद्धान्तसारात्रिर्गलितश्रुविरह-स्वमाकलय्य यथायोगं प्रकाश्यते । तत्र तावत्सन्ध्यावन्दनं नित्यम्; अहरहः सन्ध्यामुपासीतेति श्रुतौ वीप्सावशात् ।

* * * *

किं तु यथोक्तमाश्रित्यैव कृत्वा तत्कालोचितानुष्ठानमेव कार्यमिति स्मृतिविदां स्थितिः । अतोऽप्यन्यत् स्मृतिवशादिज्ञेयं ग्रन्थविस्तरभयान्नेह बहु प्रपञ्चितमिति सारम् ॥

**Colophon:**

श्रीकृष्णं जगदेकपण्डितमणिः श्रीरामभट्टारकः
श्रीलक्ष्मीरापे यं जजान तनयं प्रत्यक्प्रबोधोज्वलम् ।
तन्न्यग्रोधसमीपवासिभगवन्मन्त्रानुचिन्ताफले
सन्ध्यावन्दननिर्णये निरगमद्गुच्छोऽप्यमादिः स्फुटम् ॥

**End:**

वचोभिरसन्ध्यादेवताभिवादनस्यानुक्तत्वात् द्विजाद्यभिवादनस्यैवोक्तत्वाच्च तदभिवादनं प्रस्तुतवाक्यार्थः सन्ध्याया अपि गरीयस्याः पुनराभिवन्दनमस्त्विति ॥

चतुर्थो गुच्छः ॥

अथ यज्ञोपवीतविचारः—अत्र यज्ञोपवीतशब्दो वस्त्राजिनब्रह्मसूत्रविन्यासभेदमात्रपरः अजिनं वासो वेति श्रुतेः, यज्ञोपवीते द्वे धार्ये इति स्मृतेश्च ।

* * * *

अनुवाकान्तेऽत्र प्रतीयमानं निवीतादिकं वासोविषयं न त्रिवृत्सूत्रविषयम् ; अजिनं वासो वेत्यनेन सदृशत्वात् ।

सदोपवीतिना कार्यं सदा बद्धशिखेन च ।
विशिखोऽनुपवीती च यत्करोति न तत्कृतम् ॥

इति कर्मकाल एवेति नाशङ्कनीयम् ॥

---

R. No. 2597.

Palm-leaf. 16½ × 1¾ inches. Foll. 42. Lines, 5 in a page. Telugu. Very much injured.

Presented in 1917-18 by M.R.Ry. Vasireddi Candramaulīśvaraprasāda Bahadur, Zamindar of Muktyala, Kistna district.

साहित्यकण्टकोद्धारः.

SĀHITYAKAṆṬAKODDHĀRAḤ.

Foll. 1a—36b. Foll. 37a—42a contain the Nāyakalakṣaṇanirūpaṇa. Fol. 42b is left blank.

Same work as that described under R. No. 2321 ante, but together with additional stanzas and introductory portion in the beginning from which the author's father is made out to be Nārāyaṇa of Śrīvatsagōtra who salutes Kōnēri and Viṭṭhala of the same Gōtra.

Contains the Pūrvaparicchēda complete and the Uttaraparicchēda incomplete.

**Beginning :**

सं . . . . . . . . शरीरिणाम् ।
सुधाकादम्बिनीभूतं तन्महस्समुपास्महे ॥
ध्यात्वा यं मुनयो मनस्सरसिजे संसारपाथोनिधेः
पारं यान्ति जनास्स . . महानकाहिभीरुस्खले ।
तं क्षीराब्धिशयानमम्बुजदृशं लक्ष्मीसमेतं विना
कं देवं शिरसा नमामि सततं विघ्नौघविच्छित्तये ॥
उमावामकायं हृताशेषमायं खलानाम(पा)यं श्रितानामुपायम् ।
असन्नामधेयं महस्सामगेयं सुरेशं गिरीशं महेशं तमीडे ॥

* * * *

(साहित्य)शास्त्रसरसीरुहसूर्यमूर्ती श्रीवत्सगोत्रकनकाचलसानुभूती ।
श्रीवैद्यशास्त्रकथने विजिताश्विनेयौ कोनेरिविट्ठलबुधौ प्रणमामि नित्यम् ॥
नित्यं वैद्यकशास्त्र(द्वय)विविधव्याख्यानदीक्षागुरुः
श्रीवत्सान्वयभूषणो यदभवत्तातस्तु पा(ना)रायणः ।
धू(मा)ता यस्य पतिव्रताभिधमहाधर्माविधित्वं गता
सोऽहं व्याकरणेन तस्य सरसं सारं लिखाम्यद्भुतम् ॥
ग्रन्थशीक्षाशतं वीक्ष्य ग्रान्थिकानुपसेव्य च ।
साहित्यकण्ठकोद्धारनामग्रन्थं करोम्यहम् ॥
न क्षुण्णोऽयं परैर्मार्गस्तत्र सञ्चरतो मम ।
पदे पदे प्रस्खलतस्सन्तस्सन्त्वबलाबलम् ॥
नामूलं लिख्यते . . . . . . . . . ।
अतोऽभितोऽर्थो . . . . स्सहसा बुधैः ॥
दूषणान्येव कुर्वन्तु किंतु दोषान् निरूप्य वै ।
फणिभाषितभाष्यज्ञा . . . . . . . . ॥

तत्रादौ सन्ध्यनुसारेणोदाहरणान्युच्यन्ते—

तद्दर्शनाय विविधा द्विजराजनार्यो नानाविधाश्च विबुधा अपि बाहुजाश्च ।
वैश्यास्तदेतरजना नृपसेवकाश्च अभ्याययुर्द्रुततरं विधिना विमुक्तिम् ॥

सौदामिनी लसति किं जलदे प्रयाते
अस्तं गते शशिनि तिष्ठति चन्द्रिका किम् ।
इति चोरपञ्चाशतीये बिल्हणः ।

---

R. No. 2598.

Palm-leaf. 15¾ × 1½ inches. Foll. 18. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Vāsireḍḍi Candramaulīśvaraprasāda Bahadur, Zamindar of Muktyala, Kistna district.

रसार्णवसुधाकरः.

RASĀRṆAVASUDHĀKARAḤ.

Same work as that described under R. No. 369(e) ante.

Contains the Rūpakaparibhāṣā only complete.

Name of the copyist: Gōkulapāḍi Kṛṣṇappa. Date of copying: 12th day of the bright fortnight of the Kārttika month in the year Kīlaka.

---

R. No. 2599.

Palm-leaf. 13¾ × 1¾ inches. Foll. 219. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Vāsireḍḍi Candramaulīśvaraprasāda Bahadur, Zamindar of Muktyala, Kistna district.

(a) दृग्दृश्यविवेकः.

DṚGDṚŚYAVIVĒKAḤ.

Foll. 1a—4a.

Same work as that described under No. 4605 of the D.C.S. MSS., Vol. IX, but with additional stanzas in the beginning and with different colophon as given below.

Complete.

कारणं चादिजगताम् (. . .) अद्वयं समुपास्महे ॥
परापश्यन्त्यादिदेहां प्रणताभीष्टदायिनीम् ।
सत्यज्ञानानन्दरूपां ध्यायेऽनन्यां सरस्वतीम् ॥
दृग्दृश्यौ द्वौ पदार्थौ स्थः परस्परसमन्वयात् ।
दृग्ब्रह्म दृश्यं मायेति सर्वशास्त्रार्थनिर्णयः ॥

**Colophon:**

इति श्रीवाक्यानुसन्धान(मन्थ)स्समाप्तः ॥

(*b*) निर्वाणषट्कम्.

NIRVĀṆAṢAṬKAM.

Foll. 4*b*—5*a*.

Similar to the work described under No. 1419(*d*) ante. This is also called Śivōhampañcaka.

Complete.

**Beginning:**

जाग्रत्युद्भूतबाह्येन्द्रियविषयसमुल्लाससाक्षिश्शि(श्री शि)वोऽहं
स्वप्ने दृष्टप्रपञ्चप्रतिफलनमनोवृत्तिसाक्षिश्शि(श्री शि)वोऽहम् ।
सुप्तौ चित्ते प्रलीने प्रबलितमहता(लतममहा)मोहसाक्षिश्शि(श्री शि)वोऽहं
नित्यानन्दस्तुरीये विगतकलिमलस्सर्वसाक्षिश्शि(श्री शि)वोऽहम् ॥

**End:**

अहं निर्विकल्पो निराकारमूर्तिर्विभुत्वं च सर्वत्र सर्वेन्द्रियाणाम् ।
न चासम्मतं नैव मुक्तिर्वचोभिश्चिदानन्दरूपं शिवोऽहं शिवोऽहम् ॥

**Colophon:**

इति पर (. . .) शङ्कराचार्यविरचितं निर्वाणषट्कप्रकरण(ग्रन्थः) समाप्तः ॥

---

(*c*) स्वात्मप्रकाशिका.

SVĀTMAPRAKĀŚIKĀ.

Foll. 5*a*—9*b*.

Same work as that described under No. 4774 of the D.C.S. MSS., Vol. IX, but wants the beginning.

Complete.

---

(*d*) पञ्चीकरणम्.

PAÑCĪKARAṆAM.

Foll. 10*a*—12*a*.

Same work as that described under No. 4635 of the D.C.S. MSS., Vol. IX, but with the following additional passages in the beginning.

Complete.

शुक्लाम्बरधरं विष्णुं (. . .) शान्तये ॥
सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तरूपाय गुरवे बुद्धिसाक्षिणे ॥

परब्रह्माद्यशेषगुरुपारम्पर्यक्रमेण स्वगुरुपादाम्बुजं यावत्तावत् प्रणमामि

* * * *

यस्य प्रसादादहमेव विष्णुर्मय्येव सर्वं परिकल्पितं च ।
इत्थं विजानामि सदात्मरूपं तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥
ततो हृदयकमलमध्ये सर्वतेजोमयं परब्रह्मस्वरूपं प्रणवं स्मरेत् ।

* * * *

अनात्मभूतदेहादावात्मबुद्धिस्तु देहिनाम् ।
न चापि तत्कृतो बन्धस्तन्नाशो मोक्ष उच्यते ॥
बन्धमोक्षौ न विद्येते नित्यमुक्तस्य चात्मनः ।
अथ परमहंसपरिव्राजकानां समाधिविधिं व्याख्यास्यामः ।

---

(*e*) महावाक्यार्थपञ्चीकरणम्.
MAHĀVĀKYĀRTHAPAÑCĪKARAṆAM.

Foll. 12*b*—13*b*.

Same work as that described under No. 4715 of the D.C.S. MSS., Vol. IX, but with Mahāvākyas, Ṛṣi-Cchandō-Dēvatādi and Dhyānaślōkas as given below.

Incomplete.

**Beginning:**

अस्य श्रीमहावाक्यमन्त्रस्य हंस ऋषिः, गायत्री छन्दः, परमहंसो देवता ।

* * * *

अहं ब्रह्मास्मि, तत्त्वमसि, अयमात्मा ब्रह्म । अथ महावाक्यार्थप्रबोधे प्रकारविधिं व्याख्यास्यामः—तत्त्वमसि ।

**End:**

एवं महावाक्यार्थस्मरणान्मुक्तिः ध्रुवा भवेत् । ब्रह्मैवेदं ब्रह्म भवति ॥

**Colophon:**

इत्यनुष्ठानविधिस्समाप्तः ॥

---

(*f*) स्कन्दोपनिषद्.
SKANDŌPANIṢAD.

Foll. 13*b*—14*b*.

Same work as that described under No. 837 of the D.C.S. MSS., Vol. I, Part III, but with the additional stanzas as given in the end.

Complete.

विष्णोर्गत्परमं पदम् ॥

देहो देवालयः प्रोक्तो जीवो देवस्सदाशिवः ।
त्यजदज्ञाननिर्माल्यं सोऽहम्भावेन पूजयेत् ॥

स्नानं मनोमलत्यागः शौचमिन्द्रियनिग्रहः ।

ब्रह्मामृतं पिबेद्भैक्षमेकान्तद्वैतवर्जितम् ॥

**Colophon:**

इति स्कन्दोपनिषत्समाप्ता ॥

---

(g) महावाक्योपदेशः.

MAHĀVĀKYOPADEŚAḤ.

Foll. 14b—15b.

Similar to the work described under No. 4715 of the D.C.S. MSS., Vol. IX.

Complete.

**Beginning:**

अथ महावाक्योपदेशं वक्ष्यामि । तत्त्वमसीत्यसौ महावाक्यं प्रथमशिष्यं प्र(ति) ज्ञापयेत् गुरुः । तेन तत्त्वमसीत्यस्मिन् महावाक्ये त्रीणि पदानि सन्ति । तत्पदस्य द्वावर्थौ वाच्यार्थौ लक्ष्यश्चेति । मायाशबलं ब्रह्म तत्पदस्य वाच्यार्थः ।

**End:**

तापत्रयविनिर्मुक्तसर्वोपाधिविनिर्मुक्तब्रह्मैवाहमस्मि । अहं ब्रह्मेत्यवस्थानं समाधिः । एवं वाक्यार्थं सदा स्मरंस्तु मुक्तिर्ध्रुवा भवेत् । तरति शोकमात्मविदिति श्रुतेः ।

**Colophon:**

इति महावाक्योपदेशस्समाप्तः ॥

---

(h) पञ्चप्रकरणम्.

PAÑCAPRAKARAṆAM.

Foll. 15b—19b.

A treatise on Advaita Vēdānta in five Prakaraṇas, the fifth explaining the meaning of the four Mahāvākyas taken from the four Vēdas and establishing the identity of the individual soul with the Supreme Brahman.

Contains the fifth Prakaraṇa only.

Name of the copyist: Dhavala Papayya, disciple of Bōdhānandasarasvati. Date of copying: Monday, the 13th day of the dark fortnight of the Āṣāḍha month in the year Plavaṅga.

**Beginning:**

श्रीरामाख्यमहं वन्दे यत्कृपापाङ्गवीक्षणात् ।
भवन्ति सह . . . . सच्चिदानन्दविग्रहः ॥

तदेवं पूर्वप्रकारेणोक्तम्—साधनं सम्पाद्य महावाक्यविचारेण आत्मज्ञानप्रकाशः सम्पादनीय इति वक्तुम् । चतुर्वेदानां च किं महावाक्यानि क्रमेण उच्यन्ते । तत्र प्रज्ञानं ब्रह्मेति ऋग्वेदस्य महावाक्यम्, अहं ब्रह्माहमस्मि—इति यजुर्वेदस्य, तत्त्वमसीति—सामवेदस्य, अयमात्मा ब्रह्मेत्यथर्वणवेदस्य । तदेवं चतुर्भिर्महावाक्यैरपि जीवात्मनः ब्रह्मरूपता प्रतिपादिता । अन्तर्महावाक्यस्यार्थं उच्यते ।

**End:**

अखिलभेदप्रतिभासरहितमखण्डब्रह्मैव अवतिष्ठते । स तस्य प्राणिदित्रामुत्तेसम एरेष्यन्त इति श्रुतिः? । आत्मलोभान्न परं विद्यत इति च । ब्रह्म वेद ब्रह्मैव भवति । ओं नमो ब्रह्मभ्यः ओं नमो ब्रह्मविद्भ्यः परं नास्ति न भूतो न भविष्यति ॥

**Colophon:**

इति पञ्चप्रकरणे आत्मप्रकाशनिरूपणं नाम पञ्चमप्रकरण(ग्रन्थ)स्समाप्तः । महावाक्य आत्मप्रकाशनिरूपणं पञ्चमप्रकरणं चतुर्वाक्यविवरणं समाप्तः(म्) ॥

---

(i) रहस्योपनिषद्.

RAHASYOPANIṢAD.

Foll. 20a—24a.

Same work as that described under No. 749 of the D.C.S. MSS., Vol. I, Part III, but with the additional stanzas in the beginning as given below.

Complete.

बोधानन्दकरं निरस्तसकलं कारुण्यपूर्णेक्षणं
बुद्धौ नावुपदेशकं च सततं पापात्मनां पापहम् ।
वैराग्यं च विरागिणं शुभकरं संस्वादुकस्सर्वदा
श्रीमद्देशिकवासुदेवयतिनां(मिनं) मुदात्मकोऽहं भजे ॥

परमानन्दसत्यात्मा प्रज्ञानात्मा सचिद्घनम् ।
आश्रये दक्षिणामूर्तिमवाङ्मनसगोचरम् ॥

(j) महावाक्यार्थपञ्चीकरणम्.
MAHĀVĀKYĀRTHAPAÑCĪKARAṆAM.

Foll. 24*a*—25*b*.

By Śaṅkarācārya. Same work as that described under No. 4715 of the D.C.S. MSS., Vol. IX.

Complete.

(k) ललितासहस्रनामभाष्यम्—सौभाग्यभास्करः.
LALITĀSAHASRANĀMABHĀṢYAM: SAUBHĀGYA-BHĀSKARAḤ.

Foll. 26*a*—219*b*. Foll. 141, 142 and 217*b* are left blank.

By Bhāskararāya alias Bhāsurānandanātha. Same work as that described under R. No. 332 ante.

Contains Kalās one, eight, two to seven and nine complete; tenth incomplete.

## R. No. 2600.

Palm-leaf. 15¾ × 1½ inches. Foll. 68. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1917–18 by M.R.Ry. Peddiṇṭi Appalācārya of Narasapur, Kistna district.

वैखानससङ्ग्रहस्मृतिमीमांसा.
VAIKHĀNASASAṄGRAHASMṚTIMĪMĀṀSĀ.

A treatise in six Paricchēdas establishing the necessity from the Vaikhānasa point of view for observing the five Saṁskāras or sacraments and explaining the greatness of consecrated images and their worship in temples. The work described under R. No. 1608(*b*) ante forms the fifth and the sixth Paricchēdas. By Śiṅgarārya. For further particulars, see under the No. quoted above.

Complete. Deals with the following topics:—

१. तापसंस्कारनिर्णयः.
२. पुण्ड्रसंस्कारनिर्णयः.
३. नामसंस्कारनिर्णयः.
४. मन्त्रसंस्कारनिर्णयः.
५, ६. देवलकनिर्णयः.

**Beginning:**

लक्ष्मीशं नारसिंहं ललितकरयुगे शङ्खचक्रे दधानं
पद्माक्षं ब्रह्मवन्द्यं प्रणवमयतनुं शेषपर्यङ्कसंस्थम् ।

प्रह्लादार्तिक्षमाभृत्प्रशमनभिदुरं सर्वलोकाधिनाथं
वन्देऽहं साक्षिभूतं सकलतनुभृतां ब्रह्मनिष्ठं महान्तम् ॥

ब्रह्मनिष्ठमिति । ब्रह्मणि वेदे निष्ठा स्थितिर्यस्य सः तथोक्तम् । ष्ठा गतिनिवृत्तावित्यस्माद्धातोः क्विप्प्रत्ययः । वेदेनैव प्रतिपादित इत्यर्थः ।

बदर्याः पूर्वदिग्भागादागतान् भूसुरोत्तमान् ।
वैखानसानहं वन्दे विष्ण्वर्चनविधायकान् ॥
सप्तगोत्रसमाख्यातान् यथार्थब्रह्मवादकान् ।
श्रौतस्मार्तक्रियोपेतान् श्रुतिमार्गविचक्षणान् ॥
इष्टदेवं नमस्कृत्य गुरून् वैखानसानपि ।
संस्काराः पञ्च निर्णीताः पृथगर्हन्ति वैदिकैः ॥ इति ॥

वैदिकैर्वेदोक्तसंस्कारकृतैः ब्राह्मणैश्चत्वारिंशत्संस्काराणामन्तर्भूतत्वेन पञ्चसंस्कारकर्तव्यकं(त्वं) कुत्र विधीयत इत्याशङ्क्याह—

तापः पुण्ड्रस्तथा नाम मन्त्रो यागः क्रमेण तु ।
संस्काराः पञ्च कर्तव्या ब्राह्मणस्य विधानतः ॥ इति ॥

वृद्धपराशरस्मरणात् । अत्रैते पञ्च संस्काराः अष्टादशसंस्कारसंस्कृतस्य वोत तत्संस्कारविहीनस्य वा कस्य कर्तव्या इत्यत आह । अष्टादशसंस्कारिणश्चापि पुनः पञ्च संस्काराः कर्तव्या एवेति चेदत्र श्रुतिप्रामाण्येन वा सूत्रप्रामाण्येन वोत धर्मशास्त्रेण वेति । एतेषां शरीरसंस्काराणामष्टादशोक्तमपरं येषु कर्मेति श्रुतेर्विद्यमानत्वात् श्रुतिप्रामाण्येनेति वक्तुं न शक्यते । सूत्रप्रामाण्येनेति चेदष्टादशसंस्काराश्शारीरा इति सूत्रकारेणोक्तत्वात्तदपि न सङ्गच्छेत् । धर्मशास्त्रेणेति चेत्—

निषेकादिश्मशानान्ताः क्रिया मन्त्रसमन्विताः ।
त्रयाणां तु विधीयन्ते तेषामेव द्विजन्मनाम् ।
अष्टादश च कर्माणि शारीराणि प्रचक्षते ॥

इति भृगुस्मरणात् तदपि न युक्तम् । अत्र केचन ऋषयः आपस्तम्बाश्वलायनादयश्शरीरसंस्कारा अष्टादशेति वदन्ति ।

* * * *

नन्वष्टादशसंस्काराणामन्तर्भूतानां पञ्चसंस्काराणां मध्ये प्रथमोद्दिष्टस्य केन प्रकारेण कर्तव्य(त्व)मित्याशङ्क्योच्यते—

सुदर्शनं धारयित्वा वह्नितप्तं द्विजोत्तमैः ।
उपनीय विधानेन पश्चात्कर्मसु योजयेत् ॥

इत्यादिस्मृत्युक्तप्रकारेण कर्तव्यमिति चेन्नैवम्—

शङ्खं चक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा ।
स शूद्रवद्बहिष्कार्यस्सर्वस्मात् द्विजकर्मणः ॥

इति निषेधस्मृतेस्सत्त्वात् । अत एवात्रिः—

मुख्यगौणादिकान् वीक्ष्य गौणे मुख्यं समाचरेत् ।
मुख्ये गौणं न कुर्वीत सर्वशास्त्रेषु निश्चयः ॥

इत्युक्तत्वात् सकलस्मृतिवाक्यानि तद्रूष्वेदानीं वेदाध्ययनपारम्पर्यागतादत्यन्तविशिष्टैर्नानागोत्रसंभूतैर्निखिलवेदेतिहासपुराणधर्मशास्त्राद्युपगतसिद्धान्तपरिनिष्ठितश्रद्धाबुद्धिभिर्विप्रैस्तापसंस्कारमननुष्ठेयमिति निश्चित्य क्षत्रियादिविषयमिति समर्थनीयम् ।

* * * *

मरीचिः—

गर्भे मास्यष्टमे विष्णुबलिं कुर्याद्यथाविधि ।
वैखानसेन सूत्रेण यथार्यं गर्भवैष्णवः ॥ इति ॥

सूत्रोक्तविष्णुबल्युक्तपायसहोमान्ते देवस्य पुरत आसीनः । प्राणानायम्य सङ्कल्प्य शङ्खचक्रे आदायाज्यभागान्ते विधिवत्प्रतिष्ठान्ते तत्तद्गायत्र्या अष्टोत्तरशताज्याहुतीर्हुत्वा सुदर्शनमन्त्रं जपित्वा पायसशेषाङ्कनं कृत्वा तत्पायसं पत्नीं प्राशयतीति विशेषो दर्शितवान् ।

* * * *

**Colophon:**

इति श्रीवैखानसे संग्रहस्मृतिमीमांसायां तापसंस्कारनिर्णयो नाम प्रथमः परिच्छेदः ॥

भारद्वाजान्वये जातं भक्ताम्भोरुहभास्करम् ।
वेङ्कटाचार्यसत्पुत्रं वन्दे आनन्ददेशिकम् ॥
भारद्वाजकुलोद्भूतं भावनार्यगुरूद्भवम् ।
श्रीमद्वेङ्कटनाथार्यं देशिकेन्द्रमहं भजे ॥

---

**R. No. 2601.**

Palm-leaf. 13⅝ × 1½ inches. Foll. 80. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Vāsireḍḍi Candramaulīśvaraprasāda Bahadur, Zamindar of Muktyala, Kistna district.

(a) शरभार्चनपद्धतिः.

ŚARABHĀRCANAPADDHATIḤ.

Foll. 1a—42a. Fol. 42b is left blank.

On details, such as the Kavaca, the Mantra, etc., relating to the worship of Śarabha or Śiva. This has been compiled by Rāmakṛṣṇa from Vātulāgama, Ākāśabhairavakalpa, etc.

Incomplete.

**Beginning:**

तद्भिन्नपदमानम्य भुवनेन्दुप्रपूरितम् ।
श्रीरामकृष्णः कुर्वेऽहं शरभार्चनपद्धतिम् ॥

तत्र श्रीमान साधकेन्द्रो ब्राह्मे मुहूर्ते उत्थाय कृतावश्यकक्रियो रात्रिवासस्त्यक्त्वा शिरस्सहस्रदलकमलकर्णिकायां वराभयकरं स्वशक्त्यालिङ्गितवामाङ्गं तं नामपूर्वकं गुरुं स्मृत्वा मानसोपचारैस्संपूज्य ।

* * * *

गुरुपङ्क्तिं नमस्कृत्य । शरभेशाष्टकं त्रिवारं मनसा जपेत् । अस्य श्रीशरभाष्टकमहामन्त्रस्य कालाग्निरुद्र ऋषिः, जगती छन्दः, भगवान् श्रीशरभेश्वरो देवता । खं बीजं, स्वाहा शक्तिः । चतुर्विधफलपुरुषार्थे जपे विनियोगः ।

* * * *

इति शरभाष्टकं जपित्वा शरभं गणेशं च नमस्कृत्य स्नानसामग्रीमादाय नद्यादौ गत्वा तीर्थं नमस्कृत्य जलेन मुखं नासाक्षिशोधनं मूलमन्त्रेण विधाय ।

* * * *

**Colophon:**

इति श्रीवातूले महातन्त्रे दिव्यागमे ब्रह्माणं प्रत्युमामहेश्वरसंवादे पक्षिराजसालुवमन्त्रे प्रतिपक्षनखदलने द्वितीयः पटलः ॥

* * * *

**Colophon:**

इति श्रीमदाकाशभैरवकल्पे प्रत्यक्षफलसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते शरभसाल्वपक्षिराजाख्यकवचं संपूर्णम् ॥

**End:**

ह्रीं हूं ओं श्रां श्रीं श्रूं महाशरभसालुवाय हुं फट् स्वाहा ॥

सदाचारविधिः ।

अथ सदाचारविधिः—

ईश्वर उवाच—प्रथमं तदष्टकमनन्तरं कवचम् । अनन्तरं दिग्बन्धनम् ।

श्रृणु देवि महागुह्यं परं पुण्यविवर्धनम् ।
शरभेशाष्टकं मन्त्रं वक्ष्ये . मिति तत्त्वतः ॥

(6) चिदम्बरमन्त्रप्रयोग.

CIDAMBARAMANTRAPRAYOGAḤ.

Foll. 43a—70a.

Deals with the repetition of the five-syllabled Mantra relating to God Naṭarāja or Śiva.

Complete.

**Beginning:**

पञ्चाक्षरीपुरश्चरणविधिः ।

वामदेवः—

श्रृणु योगिन् महाविद्यां ब्रह्मविद्यामनुत्तमाम् ।
सदाशिवस्य दयितां सर्वकामफलप्रदाम् ॥
उत्तमं सर्वविद्यानां सर्वमोक्षप्रदायिनीम् ।
अनया सदृशी विद्या त्रिषु लोकेषु दुर्लभा ॥

* * * *

प्रणवेन सहोपेतमनुं पञ्चाक्षरं मनुम् ।
जपन्ति ये नरा नित्यं धनिनोऽत्र न संशयः ॥

अस्य पञ्चाक्षरस्योद्धारः—

हृदयं वपरं साक्षी शान्तो मन्तान्वितो मरुत् ।
पञ्चाक्षरो मनुः प्रोक्तास्ताराद्येयं षडक्षरः ॥
अहमस्य मुनिः पङ्क्तिच्छन्दोऽस्य समुदीरितः ।
देवता परमात्मा च सदाशिव उदीरितः ॥
प्रणवं बीजमित्याहुर्नमश्शक्ति इतीरितः ।
सर्वत्र शक्तिधामान्तं शिवाय इति कीलकम् ॥ इत्युक्तम् ॥

* * * *

**Colophon:**

इति वामदेवसंहितायां ब्रह्मविद्याकथनं नाम पञ्चचत्वारिंशत्पटलः ॥

* * * *

अस्य श्रीचिदम्बरमहामन्त्रस्य ब्रह्मविष्णुरुद्र(।) ऋषिः(षयः), ऋग्यजुस्सामाथर्वणश्छन्दांसि, वेदशास्त्रचिदम्बरेश्वरनटेश्वरो देवता ।

* * * *

ध्यानम्—

वन्दे सिन्दूरवर्णं मणिमकुटलसच्चारुचन्द्रावतंसं
फालोद्य . . त्रांशं स्मितमुखकमलं दिव्यभूषोज्ज्वलाङ्गम् ।
वामोरुन्यस्तपाणेररुणकुवलयं सन्दधत्यत्र यायाः
श्लोचुङ्गस्तनाग्रे निहितकरतलं वेददं खेटहस्तम् ॥

पञ्चपूजा, मनुः ।

**End:**

तस्मिन् वृत्ते एकपञ्चाशद्दलानि विलिखेत् । तेषु दलेष्वेकपञ्चाशद्वर्णानि विलिखेत् । तद्बहिः भूरेखा विलिखेत् । अष्टदिक्षु हकारं हाकारं च विलिखेत् । एवं कृते चिदम्बरस्य पञ्चप्रकाशचक्रप्रस्तारः ॥

Foll. 71—77*b* contain Stambhana- Uccāṭana- Māraṇa- Vidvēṣaṇa-mantrayantracakras and Rudramālāmantras.

---

(*c*) दत्तात्रेयतन्त्रम्.

DATTĀTRĒYATANTRAM.

Foll. 77*b*—80*b*.

Same work as that described under No. 7868 of the D.C.S. MSS., Vol. XV.

Contains the Paṭalas four (wants the beginning) five, eight and the nine (incomplete).

---

R. No. 2602.

Palm-leaf. 15 × 1½ inches. Foll. 80. Lines, 7 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. U. Rāmayyagāru of Chintalapudi, Kistna district.

(*a*) गणितार्णवरविचन्द्रपदकानि.

GAṆITĀRṆAVARAVICANDRAPADAKĀNI.

Foll. 1*a*—13*b*. Foll. 14 and 15 contain Vikṣēpavikrāntipadakas.

Gives astronomical tables of calculation in relation to the movements of the sun, moon, etc.

Contains the Ravipadaka and Candrapadaka.

**Beginning:**

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| 1 | 0 | 4 | 27 | 4 | 28 | 0 | 3 | 21 | 8 |
| 2 | 0 | 8 | 55 | 4 | 28 | 0 | 1 | 21 | 7 |
| 3 | 0 | 13 | 23 | 4 | 27 | 0 | 0 | 21 | 3 |
| 4 | 0 | 17 | 50 | 4 | 27 | 0 | 1 | 21 | 6 |
| 5 | 0 | 22 | 17 | 4 | 27 | 0 | 2 | 22 | 5 |

**Colophon:**

इति गणितार्णवे रविपदकानि सम्पूर्णानि ॥

**End:**

| | | | | | | |
|---|---|---|---|---|---|---|
| 243 | 24 | 22 | 16 | 54 | 37 | 46 |
| 244 | 25 | 17 | 0 | 55 | 15 | 41 |
| 245 | 26 | 12 | 28 | 56 | 58 | 33 |
| 246 | 0 | 9 | 50 | 57 | 8 | 22 |
| 247 | 1 | 6 | 14 | 58 | 7 | 11 |
| 248 | 2 | 4 | 48 | 59 | 28 | 0 |

**Colophon:**

इति गणितार्णवे चन्द्रपदकानि समाप्तानि ॥

---

(*b*) ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Foll. 16*a*—17*b*.

An astronomical treatise determining the Ayana, the Tithi, eclipses, etc. The work was apparently composed between Śaka 1609 and 1669.

Contains the Dhruvānayana, the Ayanānayana, the Tithyānayana and the Grahaṇānayana.

**Beginning :**

श्रीमत्सुरासुराराध्यचरणाम्बुरुहद्वयाम् ।
चराचरजगद्धात्री चण्डिकां प्रणमाम्यहम् ॥
षष्टिर्विंशतिगुणितं व्यपगतसंवत्सरेण सम्मिश्रम् ।
नवगगनाब्धिसमेतं शकनृपकालं विजानीयात् ॥
शाका शतेन्दु ११०० संशुद्धाम्यस्तार्कै १२ मासयुक त्रिधा ।
२८ नागाश्वियुक् तत खागैः ७० आप्तयुग्रस ६ युकुरैः ॥ ३३ ॥

* * * *

निम्नं नन्दाप्तसंस्कुर्याद्दिनाब्धो लिखितक्रमात् ।
लिखिता सूर्यपदके भानुबाहुफलाघृतः ॥
व्यर्केन्दुघटिका भक्ता ऋक्षस्तिथ्यर्धसंज्ञिकाः ।
एकोनं . . . . . . . . दिकरणानि च ॥
शकुन्यादिस्थिरं कृष्णचतुर्दश्युत्तरार्धतः ।
भानोः पदेऽथवा चान्द्रे सन्दिग्धे लिखितेऽथ वा ॥

**End :**

चन्द्रबिम्बाल्पक्षेपकशून्यकं कङ्कणग्रहणं ज्ञेयमर्कबिम्बं प्रदृश्यते । ततः शून्यं चरशून्यमेव च ।

कङ्कणग्रहणं प्रोक्तं गौरीकालं प्रदृश्यते ।
उत्तराफल्गुनीधिष्ण्यप्रथमे पाद एव च ॥
जीवधिष्ण्यस्य मध्यस्य बोदयास्तोभयस्य तु ।
पादे तृतीये चित्रायामाद्यर्क्षे यमभस्य तु ॥

* * * *

एकाशीतिशतासङ्ख्यपदकारभ्य वै ऋणम् ।
तस्माद्द्विषष्टिरामान्तन . . . . तरे धनम् ॥

---

(c) సూర్యచంద్రగ్రహణానయనము.

SŪRYACANDRAGRAHAṆĀNAYANAMU.

Foll. 18a—39b.

See the Telugu Part of the Catalogue.

---

(d) గణితార్ణవము.

GAṆITĀRṆAVAMU.

Foll. 40a—57b.

Contains the Sūryagrahaṇa, the Candragrahaṇa and the Pātādhyāya only.

See the Telugu Part of the Catalogue.

---

(e) गणितार्णवः.

GAṆITĀRṆAVAḤ.

Foll. 58a—73b.

An astronomical treatise determining the position of the planets and their movements and thereby finding out the time of occurrence of eclipses: by Namanārya, son of Śrīmūlāna (?) of Kāśyapagōtra between Kali 4788 and 4848.

Contains the following Adhyāyas:—

१. तिथ्यध्यायः.
२. मध्यग्रहाधिकारः.
३. स्फुटग्रहाधिकारः.
४. उदयास्तमयाधिकारः.
५. उपकरणाध्यायः.
६. महापाताधिकारः.
७. ग्रहणाधिकारः.
८. सूर्यग्रहणाधिकारः

**Beginning:**

श्रीमन्तं निजदन्तकान्तिपटलाक्रान्ताखिलाशान्तरं
शान्तस्वान्तमनन्तविघ्ननिवहाद्धा(हृध्वा)न्तांशुमन्तं भजे ।
दन्तीशास्यमनन्तमाद्यमनघं प्रज्ञाप्रसादायतं
विघ्नच्छेदि यदीयमङ्घ्रिकमलं विस्पष्टमिष्टप्रदम् ॥
श्रीमत्काश्यपगोत्रजो द्विजमणिः श्रीमूले(लसे)नात्मजः
त्रिस्कन्धागमकन्थिमर्द(न्थ)नचणः प्राज्ञो हि नामाह्वयः ।
पूर्वाचार्यनिबद्धशुद्धगणितान्यालोच्य कुर्वोम्मुदे
सर्वेषां गणितार्णवं लघुतरं सिद्धान्तबुद्धिप्रदम् ॥
षष्टिघ्नैर्नहना गताब्दगजषट्तर्काब्धियुक्ता भवे-
त्कल्यब्दा रहिता स्वराब्धिमुनिभिर्वेदैर्ध्रुवाब्दाश्च ते ।
मासघ्नान् मधुपूर्वमाससहितान् स्वाघस्वचन्द्राग्निभा-
णैकैश्चोपरि भाजितं विरहितं कुर्यात्स्वशैलैर्हतम् ॥
संयोज्याद्रिकरान् भजेद्गुणपुरैः तच्चाधिमासायुतै-
र्विहृत्वाथ वियद्गुणैर्गतदिनैस्संयोजते वासराः ।
स्वेषानैर्गुणयेत्सुखाक्षतिनवाङ्कासं युजेदग्निपू-
र्णागासं क्षयवासरा विरहितेष्वर्कादिरह्नां गणः ॥

प्रवक्ष्यामि तारात्मतिथ्याः प्रकारं
रवीन्द्वोरिमौ च ध्रुवौ तारपूर्वौ ।
रवेर्बाणपक्षाद्रि दस्राः पुरार्थो
विधोः पुच्छहस्ताः स्वरालोकरामाः ॥

* * * *

तयोर्यदा खं पदकं तदा चेत्प्राच्या ग्रहस्य ध्रुवभ(स्य)गत्या ।
दिनार्धवृद्धिक्षयनाडिकाभिर्नाड्यश्च साध्यास्तिथिपूर्वकाणाम् ॥

Colophon:

इति श्रीमूलेनामनार्यविरचिते गणितार्णवे तिथ्यध्यायः प्रथमः ॥

End:

मध्यस्थित्या ताडयेद्वानुभुक्तिं खाङ्गैर्भक्तं स्यात्कलालम्बनान्ते ।
भानौ युक्ता सूनितास्तासु मोक्षास्स्पर्शान्तेऽर्कालम्बनैस्तत्प्रसाध्ये ॥
मध्यस्पर्शकमोक्षके च हरिजेऽनल्पाल्पके चेद्दले
पूर्वे चेत्परखण्डकल्पमहति स्थित्योर्यदादन्तरम् ।
मध्यस्पर्शकयोश्च मध्यहरिजः स्वान्त्यस्य वैपर्यये
शोध्येद्विन्नकपाल्योर्यदि . . तल्लम्बनैक्यं सदा ॥

Colophon:

इति श्रीमूलेनामनामनार्यविरचिते सूर्यसिद्धान्तक्रममार्गे गणितार्णवे सूर्यग्रहणाधिकारः अष्टमोऽध्यायः ॥

---

(*f*) सूर्यसिद्धान्तः, आन्ध्रटीकासहितः.

SŪRYASIDDHĀNTAḤ WITH TELUGU MEANING.

Foll. 74*a*—80*b*.

Same text as that described under No. 13508 of the D.C.S. MSS., Vol. XXIV.

Contains the Adhyayas four (complete), five (without the beginning) and six (without the end).

---

R. No. 2603.

Palm-leaf. 14 × 1¼ inches. Foll. 26. Lines, 5 in a page. Telugu. Injured. Half of the portion eaten by rats.

Presented in 1917–18 by M.R.Ry. Vidula Rāmacandra Sāstrigāru of Tiparru, Tanuku taluk, Kistna district.

(a) मोक्षनिर्णयः.

MŌKṢANIRṆAYAḤ

Foll. 1a—15a. Fol. 15b is left blank.

Herein the author Surēśvarācārya investigates what is meant by Mōkṣa basing his opinion on the different Śrutis, Smṛtis and Purāṇas.

Complete.

**Beginning:**

नमस्कृत्य जगन्नाथं मायया चन्द्रशेखरम् ।
गङ्गाधरं गरच्छायानीलकण्ठमुपास्महे ॥
. . . . . पुण्यां येऽधितिष्ठन्ति जन्तवः ।
व्याचष्टे तारकं ब्रह्म रुद्रस्तेषां दयानिधिः ॥
प्राणप्रयाणसमये . . . . . . . . . ते ।
मुच्यन्ते जन्तवस्सर्वे बन्धाद्यानायविद्यया ॥
मोक्षश्च तेषां तादात्म्यं घटेत रस्व(ल)योरिव ।
. . . . . . . . . . . . . नास्ति किञ्चन ॥
सालोक्यादे(दी)न्यविद्वद्भिस्साक्षान्मोक्षत्वमिष्यते ।
उपास्तेः फलरूपत्वात्तारतम्य . . . . ॥
. . . . . . . . . . द्विश्लेषः पूर्वकर्मणाम् ।
उत्तरेषां न च श्लेषो भवेन्मुक्तस्य जीवतः ॥
प्रारब्धं कर्म भोगेन क्षीयते ज्ञानकार(णात्) ।
(काश्यांविदेह) कैवल्यं भवतीति सुनिश्चितम् ॥

* * * *

तस्माद्धर्मेऽपि पाप्मगीरिति वचनात् । पुण्यकर्मस्थानां ब्रह्मेन्द्रादिशरीराणां पापकर्मस्थानां श्वसूकरशरी . . . . . . पात् पुण्यस्यापि कर्मणः पापत्वेन कीर्तनं युक्तम् । तथाच भगवद्गीतासु श्रूयते—

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुते . . . ।
. . . . ग्निकर्माणि भस्मासात्कुरुते तथा ॥

यथोक्तम्—जीवन्मुक्तस्य ज्ञानोत्तरकालीनकर्मणां श्लेषो न भवतीति । तत्रेदं प्रमाणम् ।

**End:**

येन केनापि यः कश्चिन्निमित्तेन परित्यजेत् ।
काश्यां प्राणास्स(न्स)र्वजन्तुर्मुक्त इत्यवगम्यताम् ॥

मोक्षस्य निर्णयः . . . . . . . . . . ।
सर्वेषामेव जन्तूनां प्रमाणैः प्रतिपादितः ॥
विश्वेश्वरो जयति विश्व(वि)मुक्तिहेतोः
काशीनिवासरसिकः करुणासमुद्रः ।
. . . . . . . . . . रभवाञ्छितस्य
जन्तोर्भवस्य कृतकं शिवसामरस्यम् ॥

**Colophon:**

इति श्रीसुरेश्वराचार्यविरचितः सकलश्रुतिस्मृतिपुराणवाक्यनिर्धारितः(मोक्ष)-निर्णयस्समाप्तः ॥

---

(b) वेदान्तविषयः.
**VEDĀNTAVIṢAYAḤ.**

Foll. 16a—25b.

Similar to the work described under No. 845(e) ante. A commentary on the Mahavākya portion.

Wants the beginning and the end.

**Beginning:**

(यदज्ञानप्र)भावेन जन्यादि जगतामभूत् ।
तद्ब्रह्म जगतां नित्यं मङ्गलं विदधातु सत् ॥

तद्ब्रह्म भवतां युष्माकं मङ्गलं पशुपुत्ररूपश्रेयः विदधातु करोतु इत्याशीः। किं तदित्यत आह—यदिति । यस्य ब्रह्मणः अज्ञानं मूलाविद्या तस्य प्रभावः विक्षेपशक्तिः तेन ।

* * * *

तत्त्वमसीत्यादिवाक्ये भागत्यागलक्षणाङ्गीकारादिति चेदुच्यते—विधिवाक्यं तत्तुल्यं वा तात्पर्यवद्वाक्यं यत्किंचिदनुग्रहार्थमन्यमर्थं नेतुमयुक्तमित्यभिप्रायात् ।

**End:**

न च वाच्यं मुक्तिप्रतिपादकश्रुतीनामेवैतच्छ्रुतिविरोधेनान्यार्थत्वं कल्पनीयमिति । श्रुतिविरोधे श्रुत्यन्तरसहकृतश्च.

R. No. **2604.**

Paper. 8¾ × 7 inches. Foll. 60. Lines, 18 to 22 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Satulūru Kṛṣṇamācāryulugāru of Tanuku in Kistna district.

(*a*) साहित्यकल्पलतिका.

SĀHITYAKALPALATIKĀ.

Foll. 1*a*—55*b*. Foll. 10*b*, 56*b* and 60*b* are left blank.

A treatise explaining away certain grammatical and other peculiarities occurring in literary productions, etc. The topics dealt with herein are given below. By Kṛṣṇasūri, son of Gōpālācārya of Śantalūri family.

Contains the following Stabakas :—

१. विशेषणविशेष्यभावसमर्थनम्.
२. व्याख्यानमर्यादानिरूपणम्.
३. यत्तच्छब्दादिस्थितिनियतिनिरूपणम्.
४. सकलप्रयोगसाधुत्वनिरूपणम्.
५. अमरमण्डनम्.

**Beginning :**

श्रीहयग्रीवहंसो विसरतु मम मानसे सरसि ।
कलुषाणि यं हि भजतां सद्यश्शिथिलीकरिष्यन्ते ॥
अवलोक्य साहितीपथनिद्रामद्रात्मवृत्तिशिष्यान् स्वान् ।
साहित्यकल्पलतिकामल्पधियामातनोमि साधुकृते ॥

लोके शास्त्रेषु काव्येषु वा तत्तत्पदार्थाभिवर्णनदशायामभिधेयानां परस्परं विशेषणविशेष्यभावोऽवश्यमपेक्षणीयः । तथाच विशेषणवाचकपदानां विशेष्य-वाचकपदाव्यवहितोत्तरवर्तिलिङ्गसङ्ख्यासमानलिङ्गसङ्ख्याविभक्तिमत्वमवश्यं भाव्यमिति प्राचामाचार्याणामभिमतिः ।

* * * *

दाराः पुंसि च भूम्न्येवेत्यनुशासनात् । तत्र च मूलानुक्तस्त्रीलिङ्गसमुच्चा-यकश्चशब्दः । दारायै पद्ममुख इत्यमरकोशटीकाकारोदाहृतभूरिप्रयोगदर्शनात् स्त्रीलिङ्गता प्रसिद्धैव । पुंलिङ्गतायामेव बहुत्वे(त)रसङ्ख्याव्यवच्छेद इति तत्ता-त्पर्यम् ।

* * * *

यथाहुः माघः—

लिङ्गसङ्ख्यादिभेदेऽपि विशेषणविशेष्ययोः ।
विभक्त्यैक्येन भवति विशेषणविशेष्यता ॥ इति ॥

* * * *

**Colophon:**

इति श्रीमच्छान्तल्लूरिवंशपारावारराकासुधाकरायमाणस्यानवद्यचतुर्दशविद्यापरिश्रमस्य गोपालाचार्यसूरेस्तनूजेन कृष्णसूरिणा विरचितायां साहित्यकल्पलतिकायां विशेषणविशेष्यभावसमर्थनं नाम प्रथमः स्तबकः ॥

**End:**

इत्थं विपक्षविबुधमस्तकन्यस्तसत्पदम् ।
श्रीहर्षस्यैव शिरसि स्थापितं कृष्णसूरिणा ॥
भेद्यभेदकभावं च व्याख्यापद्धतिरूपणम् ।
यत्तच्छब्दादिनियतिः प्रयोगाणां च साधनम् ॥
मण्डनं चामरकृते पश्यन्त्वत्र विवित्सवः ।
साहित्यकल्पलतिकास्तबकेषु यथाक्रमम् ॥
व्याख्यानानि च सन्ति मूलकृतयो लोके बुधैः कल्पिता
बह्व्यः क्वापि विमर्शनी कृतिरमूषां न प्रणीता पुरा ।
तादृक्सर्वविमर्शनी विरचिता सर्वार्थसंशोधनी
साहित्यामृतसारकल्पलतिका जीयान्मयातारकम् ॥

**Colophon:**

इति श्रीशान्तल्लूरिवंशपयःपारावारराकासुधाकरायमाणस्यानवद्यचतुर्दशविद्यापरिश्रमस्य गोपालाचार्यसूरेस्तनूजेन कृष्णसूरिणा विरचितायां साहित्यकल्पलतिकायां पञ्चमस्तबकः ॥

---

(b) स्त्रीपुनर्विवाहकरणनिरसनम्.

STRĪPUNARVIVĀHAKARAṆANIRASANAM.

Foll. 57*a*—60*a*. Fol. 56*a* contains the names of the work and of the author.

A treatise laying down that remarriage of women is not permissible according to Śāstras: by Kṛṣṇasūri, son of Gōpālācārya of Śāntalūri family.

Complete.

Name of the copyist: Veṅkaṭanarasiṁhācār of Śāntalūru.

**Beginning:**

अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चाधिगच्छति ॥

इति मनुस्मृतौ ।

अधर्मदण्डनं स्वर्गकीर्तिलोकविनाशनम् ।
सम्यक् तु दण्डनं राज्ञः स्वर्गकीर्तिजयावहम् ॥

इति विज्ञानेश्वरीयमूले याज्ञवल्क्यस्मृतौ अन्यास्वपि बहुस्मृतिष्वेवमेवोक्तत्वाद्दण्ड्यानां ब्राह्मणादीनामदण्डने अदण्ड्यानां तेषां दण्डने च महत्या अपयशःप्राप्तेर्नरकप्राप्तेश्च राज्ञः प्रतिपादितत्वात् ।

• • • •

यदि पूर्वस्माद्वरात् श्रेयान् विद्याभिजनाद्यतिशययुक्तोऽपर आगच्छति पूर्वस्य च पातकयोगात् दुर्वृत्तत्वं वा तथा दत्तामपि कन्यां वरेत् । एतच्च सप्तपदानुक्रमणात्प्राक् द्रष्टव्यमिति व्याख्यातं विज्ञानेश्वरेण । एवं च सकृत्प्रदीयते कन्येति कन्यायास्सकृदेव दानं विहितं नासकृद्दानम् । दत्तामपि वरेत्कन्यां श्रेयांश्चेद्वर आव्रजेदित्युक्तिस्तु सप्तपदानुक्रमणात् प्राक्कालविषयेति विज्ञानेश्वरेणैवोक्तम् । तथा अलङ्कृतां हरन् कन्यामिति व्यवहारकाण्डे स्त्रीसङ्ग्रहणप्रकरणोक्तवचनव्याख्यानस्य दण्डविधानाच्च ।

**End:**

तस्मात् स्त्रीणां पुनर्विवाहकरणस्य पूर्वोक्तबहुबाधकबाधितत्वादादित्यपुराणादिषु कलिवर्ज्यानां मध्ये परिगणितत्वाद्यथाकथंचित्तदङ्गीकारे अनवस्थादोषदूषितत्वात् सकलशिष्टजनानभिमतत्वात् स्त्रीणां पुनर्विवाहकर्तुः राज्ञां दण्डविषयत्वेनाभिहितत्वात् प्रायश्चित्तकाण्डेषु प्रायश्चित्तविषयत्वेन प्रतिपादितत्वाच्च स्त्रीणां पुनर्विवाहकरणप्रमाणं वायसदशनप्रमाणसमानमिति वेदितव्यम् ॥

**Colophon:**

इति श्रीशान्तलूरिवंशपयःपारावारराकासुधाकरायमाणस्यानवद्यचतुर्दशविद्यापरिश्रमस्य गोपालाचार्यसूरेस्तनूजेन कृष्णसूरिणा विरचितायां धर्मशास्त्रसंशयाविच्छेदनिकायां स्त्रीणां पुनर्विवाहकरणनिरसनम् ॥

### R. No. 2605.

Paper. $7\frac{3}{4} \times 6$ inches. Foll. 50. Lines, 32 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Prōrāpa Subbayyagāru, Pēkēru, Tanuku taluk, Kistna district.

(a) ज्यौतिषविषयः.

**JYAUTIṢAVIṢAYAḤ.**

Foll. 1a—6b. Foll. 7 and 8a contain Vāstuśāstra. Fol. 8b contains Svapnādhyāya.

Similar to the work described under No. 13697 of the D.C.S. MSS., Vol. XXIV.

Wants the beginning and the end.

**Beginning:**

राजयोगानाह—

भाग्ये कर्मणि तत्पती निवसितेऽप्येकत्र वा व्यत्यये
नान्योऽन्यर्क्षगतौ निरीक्षितयुतौ तौ राजयोगप्रदौ ।
धीजायाधनबन्धुपैश्च सहितौ तत्तद्गृहे संस्थितौ
सम्पत्सौख्यकरौ तयोर्निधनलाभक्ष्माधिपत्यं विना ॥

रिष्फाष्टारिगतस्य राशिरशुभा तद्वेशयुग्व्याष्टमं
भ्रष्टं स्यात्क्रमशस्सितज्ञगुरवः स्थानेषु सौख्यप्रदाः ।
मित्रोच्चस्वमपाप्यदृन्त्यमृतिगा दृष्टाश्शुभास्तानहो
तन्नाथा रिपुनीचमूढविजिताश्चेत्तद्गृहस्याश्शुभाः ॥

**End:**

प्रश्नलग्नस्थितो राहुः शनिरष्टमसंस्थितः ।
द्वादशे गुरुशुक्रौ तु कार्यहानिर्न संशयः ॥

प्रश्नलग्नस्थितो भानुः केन्द्रकोणे शनिः स्थितः ।
चन्द्रो द्वादशराशिस्थः कार्यहानिर्न संशयः ॥

---

(b) गौतमसंहिता.

**GAUTAMASAṀHITĀ.**

Foll. 9a—16b.

Same work as that described under R. No. 2240 ante.

Contains the Adhyāyas one to eight.

**Beginning :**

श्रीवाणीं शिरसा प्रणम्य विलसन्मद्वाक्यसंस्थापनीं
होराशास्त्रपयोनिधिप्रमथनात्सारं समाकर्षताम् ।
इथं चाष्टपदैः प्रयुक्तनियमं ह्यारूढशास्त्रं स्फुटं
वक्ष्ये भूपतियोगपद्धतिं सतामानन्दसन्दायिनीम् ॥

यः शङ्करार्चनविधौ मनसापि दक्षो यो देवतासु पितृमातृगुरुषु भक्तः ।
यो मानुषस्स्वकुलवृत्तिमुपैति तेषां भूपालकत्वमनिशं भुवि मानवानाम् ॥

पाकेश्वराणामुपहारकाले तदर्चनं दानजपादिकर्मणि ।
वस्त्रान्नधान्याभरणानि चैवं प्रदीयतां वेदविदे कुटुम्बिने ॥
यथासम्भवद्भक्तितया पूजनीयं नृपत्वं च भोग्यं महत्त्वं धनं च ।
प्रकुर्वन्नरस्सर्वसिद्धिं प्रयाति रिपूणां जयं कीर्तिमारोग्यमायुः ॥

* * * *

**Colophon :**

इति श्रीगौतमसंहितायां राजयोगपद्धतौ प्रथमोऽध्यायः ॥

**End :**

मन्त्रप्रभावबलभाग्यबहुप्रकारैः प्रोक्ता भवन्ति ननु कालविधावतंसे ॥

आरूढाद्वाग्यराज्येशौ पदाल्लाभगतौ यदि ।
आरूढे लाभराज्येशावारूढाधिपवीक्षितौ ॥
भाग्येशे मन्त्रपेनैव करोति पृथिवीपतिम् ।

**Colophon :**

इति श्रीगौतमसंहितायां कालविधावतंसे महाशास्त्रे जातकर्मपद्धतौ विशेषधनयोगाध्यायोऽष्टमः । आरूढजातकाध्यायः समाप्तः ॥

---

(c) उडुदशाप्रदीपिका.

UḌUDAŚĀPRADĪPIKĀ.

Foll. 17*a*—20*b*.

Same work as that described under R. No. 1618 (*b*) ante.

Contains 1—11 Paricchēdas.

Fol. 21*a* contains Grahavarṇacarya and fol. 22 contains a few Telugu passages relating to the Daśānirṇaya. Foll. 23 and 24 are left blank.

---

(*d*) ग्रहलाघवम्.

GRAHALAGHAVAM.

Foll. 25*a*—30*a*. Fol. 30*b* is left blank.

**Beginning :**

आभीरनारीपरिरम्भशुम्भत्काश्मीरसाराकलितोरुवक्षाः ।
चिरस्फुरद्विद्युदिवाम्बुवाहः पुष्णातु कृष्णः पृथुलां श्रियं नः ॥
बलपराजितवैरिमहीक्षिता हरिकथाकुतुकेन परीक्षिता ।
यदुकुलप्रभवस्य रमापतेश्चरितमभ्यर्थिताभिहितश्शुकः ॥
नरवर भवदीयं मानसं मानसज्ञं न वहति महतीयं बुद्धिरेषा विशेषात् ।
इदभवदधुना यद्वैष्णवं श्रोतुमिच्छा चरितममितभद्रप्रापणैकप्रवीणम् ॥
बहुविधभवकाननान्तरालभ्रमणभवश्रमशान्तिकारि भूरि ।
निपि(खिल)बहुमतं हितं मुनीन्द्रैः हरिचरितामृतमादराद्यथेच्छम् ॥

पुरा किल सकलजगद्विजयविजृम्भितदम्भोत्तम्भितैर्जम्भस्तम्भनप्रमुखनिखिलामरसमरविस्मरनिर्वकविक्रमैस्तत्तद्राजव्याजगोपिताकृतिभिर्दुष्टप्रकृतिभिः कंसप्रभृतिभिर्दैत्यपतिभिरभितः परिवृता महता भारेण पराहता महीयसी दोहीयसीभूय भूयसा श्रमेण पीडिता पितामहमासाद्य सद्यस्समुद्यदश्रुमुखी शनैरासाद्य तमध्यवोचत् ।

* * * *

बुधपती कविराजविराजिता गुरुयुता शतमन्युविभासिता ।
सहवसुस्सभाद्बलभित्पुरीसमधुरा मधुराभिधया पुरी ॥

या खलु निखिलभुवनावलोकनकुतुकतयेव सर्वोन्नतेन कुम्भसंभवस्तम्भितारम्भविन्ध्यकुम्भिनीधरपरिहासविधित्सयेव

* * * *

मधुरां मधुरिपुमधुरां मधुराजितसदुपकाननोपेताम् ।
अधिवसता गुणलसता क्षितिरविता सम्यगुग्रसेनेन ॥

ततस्समुदग्रशासन उग्रसेनो देवकीं नाम भ्रातृतनयां वसुदेवाय प्रदाय तस्याः प्रशस्तानि वस्तूनि हरिणाकृत्य कृत्यवित्ती दम्पती प्रेषयामास ।

* * * *

भगवानपि पद्मसंभवप्रमुखैस्सर्वसुरैरभिष्टुतः ।
वसुदेववधूदरादरं निरगाद्दिव्यवपुर्धरो हरिः ॥

**End :**

इति चिन्तय[न्नय]मानयानया स्थितमुच्[च]ासविशेषिण . . . . . . वातवान् ।

रवितुरङ्गरथप्रतिरोधनप्रथितसालमणिस्फुरिताम्बराम् ।
कलितसौधविहारिवधूश्रवःप्रियवियत्सरिदम्बुज . . . ॥

## R. No. 2609.

Paper. 11¾ × 8¾ inches. Foll. 38. Lines, 20 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Drōṇamrāju Calapatiraogaru of Pulla, Kistna district.

अर्चनाखण्डः.

### ARCANĀKHAṆḌAḤ.

Foll. 5*a*—32*a*. Foll. 1*a*—4*b* are left blank. On foll. 32*b*—34*a* the variations in reading are noted. Foll. 34*b* and 36—38 are left blank. Fol. 35 contains a copy of the letter written by Śaṅkarabhāratīgāru to certain persons.

Same work as that described under R. No. 1606(*b*) ante, but with the additional stanza in the beginning and with a different colophon.

Complete in seven Khaṇḍas.

**Beginning:**

अथ मरीचिप्रोक्तार्चनाविधिप्रारम्भः—

लक्ष्मीवल्लभमारब्धां विखनोमुनिमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

**Colophon:**

इति श्रीवैखानसार्चनकल्पे विस्तारमरीचिप्रोक्ते नित्यार्चनप्रकरणं स-
माप्तम् ॥

## R. No. 2610.

Paper. 11¾ × 8¾ inches. Foll. 88. Lines, 29 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Peddiṇṭi Appalācāriyar of Narasapur, Kistna district.

Foll. 60*b* and 62 are left blank.

ज्ञानवासिष्ठम्, सव्याख्यानम्.

### JÑĀNAVĀSIṢṬHAM WITH COMMENTARY.

Same work as that described under No. 1985 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Sargas 14—18 of the Sthitiprakaraṇa, the 14th being wanting in the beginning and 19 to 27 of the Upāsanaprakaraṇa, the 27th being incomplete.

Same text as that described under R. No. 913(a) ante, but without the first stanza.

Incomplete.

Fol. 81 contains stanzas relating to astrology.

---

R. No. 2606.

Palm-leaf. 17 × 1¼ inches. Foll. 35. Lines, 6 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Kaśibhaṭla Mahādēvuḍugāru of Kaḍali, Razole taluk, Godavari district.

(a) नलोदयम्.

NALŌDAYAM.

Foll. 1a—15a. Fol. 15b is left blank.

By Kālidāsa. Same work as that described under No. 11843 of the D.C.S. MSS., Vol. XX.

Complete.

---

(b) नलोदयव्याख्या.

NALŌDAYAVYĀKHYĀ.

Foll. 16a—35b.

By Ādityasūri. Same commentary as that described under No. 11855 of the D.C.S. MSS., Vol. XX, but with slightly different readings.

Contains the Ucchvāsas one and two complete

**Beginning:**

हृदयेति । हे हृदय यादवतः यदुकुलोद्भवात् पुरुषोत्तमात् सदा मागाः तत्रैव रमस्वेत्यर्थः । किंविधात् दुरासदायाः पापमेवाटव्यरण्यम् । अटव्यरण्यं विपिनमित्यमरः । तस्या दवतो दवाग्नेः । दवदावौ वनारण्यवह्नीत्यमरः ।

* * * *

**Colophon:**

इत्यादित्यसूरिविरचितायां नलोदयटीकायां प्रथमोच्छ्वासः ॥

**End:**

स्वयंवरादिति । नैषधो नलः स्वयंवरादनन्तरं महीं भुवं ररक्ष । किंविधः मही उत्सववान् । अहीनधीः । पुनः किंविधः राजराजरा: कुबेरसम्पत् । रास्तु द्वयोर्ध्वनौ स्वर्ण इति नाना(र्थ)रत्नमाला । रराज च ॥

**Colophon:**

इत्यादित्यसूरिविरचितायां नलोदयव्याख्यायां द्वितीयोच्छ्वासः ॥

R. No. 2607.

Palm-leaf. 17½ × 1½ inches. Foll. 100. Lines, 9 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Vedula Ramacandra Śāstrigāru of Tiparru, Tanuku taluk, Kistna district

(*a*) वेदसारशिवसहस्रनामव्याख्या.

VĒDASĀRAŚIVASAHASRANAMAVYĀKHYĀ.

Foll. 1*a*—94*a*.

By Paramaśivēndrasarasvati. Same commentary as that described under R. No. 1647 ante.

Complete

Name of the copyist: Susarla Subrahmaṇyēśvara Sōmayājin. Date of transcription: Thursday, the 13th day of the dark fortnight of the Śrāvaṇa month in the year Vikāri.

---

(*b*) वेदसारशिवसहस्रनामानि.

VĒDASĀRAŚIVASAHASRANAMANI.

Foll. 94*a*—100*b*.

Similar to the work described under R. No. 142(*d*) ante.

Complete.

**Beginning:**

ओं पराय देवाय नमः । ओं शङ्कराय नमः । ओं महात्मने नमः । ओं कामिने नमः । नीलकण्ठाय नमः । निर्मलाय नमः ।

**End:**

श्लोकाय नमः । वन्याय नमः । महाधर्माय नमः । त्रसन्नाय नमः । सर्वात्मज्योतिषे नमः । त्रिमूर्तीनां स्वयंभुवे नमः । आद्यातीताय नमः ॥

---

R. No. 2608.

Palm-leaf. 16 × 1½ inches. Foll. 29. Lines, 6 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Vedula Ramacandra Śāstrigāru of Tiparru, Tanuku taluk, Kistna district.

भागवतचम्पूः.

BHĀGAVATACAMPŪḤ.

A work in prose and verse dealing with the story of the birth and life of Śrī-Kṛṣṇa.

Incomplete.

**Beginning:**

आभीरनारीपरिरम्भशुम्भत्काश्मीरसाराकलितोरुवक्षाः ।
चिरस्फुरद्विद्युदिवाम्बुवाहः पुष्णातु कृष्णः पृथुलां श्रियं नः ॥
बलपराजितवैरिमहीक्षिता हरिकथाकुतुकेन परीक्षिता ।
यदुकुलप्रभवस्य रमापतेश्चरितमभ्यर्थिताभिहितश्शुकः ॥

नरवर भवदीयं मानसं मानसङ्गं न वहति महतीयं बुद्धिरेषा विशेषात् ।
उदभवदधुना यद्वर्णवं श्रोतुमिच्छा चरितममितभद्रप्रापणैकप्रवीणम् ॥
बहुविधभवकाननान्तरालभ्रमणभवश्रमशान्तिकारि भूरि ।
निपि(खिल)बहुमतं हितं मुनीन्द्रैः हरिचरितामृतमादराद्यथेच्छम् ॥

पुरा किल सकलजगद्विजयविजृम्भितदम्भोत्तम्भितैर्जम्भस्तम्भनप्रमुखनिखिलामरसमरविस्मरनिर्वक्रविक्रमैस्तत्तद्राजन्यव्याजगोपिताकृतिभिर्दुष्टप्रकृतिभिः कंसप्रभृतिभिर्दैत्यपतिभिरभितः परिवृता महता भारेण पराहता महीयसी द्रोहीयसीभूय भूयसा श्रमेण पीडिता पितामहमासाद्य सद्यस्समुद्यदश्रुमुखी शनैरासाद्य तमभ्यवोचत् ।

• • • •

बुधपती कविराजविराजिता गुरुयुता शतमन्युविभासिता ।
सहवसुस्समभाद्बलभित्पुरीसमधुरा मधुराभिधया पुरी ॥

या खलु निखिलभुवनावलोकनकुतुकतयेव सर्वोन्नतेन कुम्भसंभवस्तम्भितारम्भविन्ध्यकुम्भिनीधरपरिहासविविक्तयेव

• • • •

मधुरां मधुरिपुमधुरां मधुराजितसदुपकाननोपेताम् ।
अधिवसता गुणलसता क्षितिरविता सम्यगुग्रसेनेन ॥

ततस्समुदग्रशासन उग्रसेनो देवकीं नाम भ्रातृतनयां वसुदेवाय प्रदाय तस्याः प्रशस्तानि वस्तूनि हरिणाकृत्य कृत्यवित्तौ दम्पती प्रेषयामास ।

• • • •

भगवानपि पद्मसंभवप्रमुखैस्सर्वसुरैरभिष्टुतः ।
वसुदेववधूदरादरं निरगाद्दिव्यवपुर्धरो हरिः ॥

**End:**

इति चिन्तय[मग्य]मानयानया स्थितमुत्[.]सविशेषिण . . . . . . .
यातवान् ।

रवितुरङ्गरथप्रविरोधनप्रथितसालमणिस्फुरिताम्बराम् ।
कलितसौधविहारिवधूश्रवःप्रियवियत्सरिदम्बुज . . . ॥

---

R. No. **2609.**

**Paper.** 11¾ × 8¾ inches. Foll. 38. Lines, 20 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Drōṇamrāju Calapatiraogaru of Pulla, Kistna district.

**मर्चनाखण्डः.**

**ARCANĀKHAṆḌAḤ.**

Foll. 5*a*—32*a*. Foll. 1*a*—4*b* are left blank. On foll. 32*b*—34*a* the variations in reading are noted. Foll. 34*b* and 36—38 are left blank. Fol. 35 contains a copy of the letter written by Śaṅkarabhāratigāru to certain persons.

Same work as that described under R. No. 1606(*b*) ante, but with the additional stanza in the beginning and with a different colophon.

Complete in seven Khandas.

**Beginning:**

अथ मरीचिप्रोक्तार्चनाविधिप्रारम्भः—

लक्ष्मीवल्लभमाद्यन्तां विखनोमुनिमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

**Colophon:**

इति श्रीवैखानसार्चनकल्पे विस्तारमरीचिप्रोक्ते नित्यार्चनप्रकरणं समाप्तम् ॥

---

R. No. **2610.**

**Paper.** 11¾ × 8¾ inches. Foll. 88. Lines, 29 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Peddiṇṭi Appalācāriyar of Narasapur, Kistna district.

Foll. 60*b* and 62 are left blank.

**ज्ञानवासिष्ठम्, सव्याख्यानम्.**

**JÑĀNAVĀSIṢṬHAM WITH COMMENTARY.**

Same work as that described under No. 1985 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Sargas 14—18 of the Sthitiprakaraṇa, the 14th being wanting in the beginning and 19 to 27 of the Upāsanaprakaraṇa, the 27th being incomplete.

R. No. 2611.

Paper. 7½ × 5 inches. Foll. 28. Lines, 20 in a page. Dēvanāgari. Good.

Presented in 1917-18 by M.R.Ry. Śrī Rāja Kandukūri Śivaprasada-bhūṣaṇa Rao Bahadur, Zamindar of Narasapur, Kistna district.

**नित्योत्सवः.**

NITYŌTSAVAḤ.

Foll. 1a—25a. Foll. 25b—28 are left blank.

By Umānandanātha. Same work as that described under R. No. 2462 ante.

Contains the following Prakaraṇas :—

१. न्यासप्रकरण
२. जपप्रकरण } of Yauvanōllāsa.
३. नैमित्तिकप्रकरण

Wants 40 pages in the beginning.

**Beginning :**

ति हृदयाब्जः । २ । यं ३ अमृतायुः चन्द्राय भ्रूमध्ये ३ कं ४ धर्मा-युक्ताय भौमाय नेत्रयोः ३ चं ४ यशन्विनी बुधाय चोरकूपाधः

* * * *

इति ग्रहन्यासः । अथ नक्षत्रन्यासः—

ध्यानम्—

ज्वलत्कालानलप्रख्या वरदाभयपाणयः ।
नतिपाण्योऽश्विनीपूर्वाः सर्वाभरणभूषिताः ॥

इति ध्यात्वा । अं आं अश्विन्यै इति ललाटे । ३ । इं भरण्यै ।

* * * *

ललितायै नम इति हृदि न्यस्य योनिमुद्रां प्रदर्श्य, मूलं जप्त्वा पुनः कराङ्गन्यासं कुर्यादिति श्रीचक्रन्यासः । ललितोपाख्यानोक्तः श्रीचक्रन्यासोऽयम् । इमौ षोढा चक्रन्यासौ श्रीषोडशाक्षर्या अपि साधारणौ ॥

**Colophon :**

इति यौवनोल्लासे न्यासप्रकरणम् ॥

**End :**

इति पञ्चपर्वार्चनाविधिः ।

तन्त्रान्तरोक्तेषु युगमन्वादिषु विशेषदिवसेष्वपि श्रीदेव्यर्चनमभ्युदयायैव । सूत्रकारेण काम्यहोमस्यैवोक्तत्वात्पूजानुक्तिरिति शिवम् ॥

इति यौवनोल्लासे नैमित्तिकप्रकरणम् ॥

यथामति मयाकारि सेयं श्रीक्रमपद्धतिः ।
भ्रमं प्रमादस्खलितं क्षमयन्त्विह साधवः ॥

Colophon:

इति श्रीज्ञासुरानन्दनाथचरणारविन्दमिलिन्दायमानमानसेनोमानन्दनाथेन विरचिते कल्पसूत्रानुसारिणि नित्योत्सवे निबन्धे यौवनोल्लासस्तृतीयस्संपूर्णः॥

---

## R. No. 2612.

Paper. 8¼ × 7½ inches. Foll. 36. Lines, 25 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Kōmanḍūr Gōvindācāryulugāru of Vizayarāyi, Ellore taluk, Kistna district.

(a) सुदर्शनमीमांसा.

SUDARŚANAMĪMĀṀSĀ.

Foll. 1a—18a. Fol. 18b contains Taptacakrāṅkanapramāṇa.

Same work as that described under R. No. 1992 ante.

Complete.

The scribe adds—

अह्लापनाथ(?)ह्यनुजन्मनोऽस्य रामानुजस्य विदुषः प्रतिपक्षशास्त्रः ।
चक्रादिधारणमशोधयदेष गार्ग्यः श्रीवेङ्कटेश्वरकृतिः श्रुतियुक्तिसार्थैः ॥

---

(b) सर्वस्मृतिसारसङ्ग्रह..

SARVASMṚTISĀRASAṄGRAHAḤ.

Foll. 19a—22b. Foll. 23—34b and 35b are left blank. Fol. 35a contains a few lines of the Cakradhāraṇaviṣaya.

Similar to the work described under No. 5255 of the D.C.S. MSS., Vol. XI. Authoritative quotations are given from Bhārata, Brahmakaivarta, Pādmapurāṇa, Nāradapurāṇa and other works.

Incomplete.

Beginning:

भारते आरण्यपर्वणि धर्मराजं प्रति श्रीकृष्ण उवाच—

नान्यं देवं नमस्कुर्यान्नान्यं देवं निरीक्षयेत् ।
चक्राङ्कितस्सदा तिष्ठेन्मद्भक्तः पाण्डुनन्दन ॥

ब्रह्मकैवर्ते—

> एवमुक्त्वा विधातारं देवदेवो हरिः पिता ।
> पञ्चसंस्कारमत्यन्तपावनं सर्वदेहिनाम् ॥

पाद्मे पूर्वखण्डे च—

> चक्राङ्कितभुजा देवा रहिता भूभृदात्मजे ।
> यक्षराक्षसदैतेयदानवाः परिकीर्तिताः ॥

* * * *

अस्मिन् ग्रन्थे पुण्ड्रद्वयनिरूपणं बहुशोऽस्ति । एवमनेकस्मृतीतिहासपुराणागमपाञ्चरात्रवैखानसगौतमभारद्वाजहारीतपाराशर्यकल्पसूत्रादिषु च विस्तरेण देवासुरविभागार्थमैहिकामुष्मिकपरमसात्त्विकस्थानप्राप्तिहेतुभूतं सकलप्रमाणप्रसिद्धं तप्तशङ्खचक्राङ्कनोर्ध्वपुण्ड्रतुलसीवनमालिकाधारणहरिनामोच्चारणादिनवविधभक्तियुक्तज्ञानवान् । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इति भगवतोक्तमर्जुनं प्रति भगवच्छास्त्रे—

* * * *

द्विजन्मनामुपनयने तप्तचक्रधारणं दक्षिणभुजे तप्तशङ्खधारणं वामभुजे । इध्माधानादिपूर्वकम् । मोक्षार्थी प्रपन्नः ।

End:

अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवस्समिन्धते । विश्वस्यां विशि प्रविविशिवांसमीमहे स नो मुञ्चत्वंहसः ।

नारदपुराणे—

> शङ्खचक्रप्रदानं हि सर्वमन्यद्गुदादिकम् ।
> अङ्कितः शङ्खचक्राभ्यां सर्वैरङ्कित एव हि ॥

---

R. No. 2613.

Paper. 8 × 6 inches. Foll. 27. Lines, 26 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Śrī Rājā Kandukūri Śivaprasādabhūṣaṇa Rao Bahadur, Zamindar of Narasapur, Kistna district.

(a) शाबरचिन्तामणिः.

ŚĀBARACINTĀMAṆIḤ.

Foll. 1b—8b. Fol. 1a is left blank.

By Ādinātha. Same work as that described under No. 8101 of the D.C.S. MSS., Vol. XV. The foll. are in disorder.

Contains the Paṭalas one, two, ten, eight, seven, five and four complete, three incomplete.

---

(b) कच्छपुटतन्त्रम्.

KACCHAPUṬATANTRAM.

Foll. 9a—27b.

By Siddhanāgārjuna. Same work as that described under No. 7779 of the D.C.S. MSS., Vol. XV.

Contains the Paṭalas 4—12 complete and 3 incomplete, but wants the beginning in the 4th and the end in the 12th.

---

R. No. 2614.

Palm-leaf. 16¾ × 1⅞ inches. Foll. 77. Lines, 7 in a page. Telugu. Injured.

Presented in 1917–18 by M.R.Ry. Kāsibhaṭla Mahādēvalugāru of Kaḍali, Godavari district.

Foll. 1—7 and Foll. 64—77 are half-broken.

हिरण्यगर्भसंहिता.

HIRAṆYAGARBHASAṀHITĀ.

A Saṁhitā probably of the Pañcarātrāgama explaining several Mantras, such as Aṣṭākṣaramantra, Ṣaḍakṣaramantra, Rāmatārakamantra, etc., showing the supremacy of God Viṣṇu.

Contains the Adhyāyas 1—44.

Complete.

**Beginning:**

गुरुं गणपतिं दुर्गां बटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥

. . . . . . . . . . . . . ।
. . . . . . . . . . . . . ॥
. . . . . . . . . . . . . ।

याज्ञवल्क्योऽथ दूर्वासाः पुलस्त्यः क्रतुरङ्गिराः ॥
भरद्वाजो गालवश्च वालखिल्या मरीचिपाः ।
. . . .
हिरण्यगर्भो भगवान् वाण्यालङ्कृतविग्रहः ॥
आसीनः काञ्चने दिव्ये तत्र सिंहासने(सुखम्) ॥
. . . .

हिरण्यगर्भ उवाच—

साधु पृष्टं महाभाग . . . . . . . ।
. . . . . . वैष्णवः परमो मतः ॥
विष्णुरेव जगत्कर्ता यस्मिन्नेतत् स्थितं जगत् ।
यमामनन्ति मुनयो वेदान्तास्सकला . . . . ॥
. . . . . . . . . . . . ।
. . . . . . . द्विविधा सगुणा परा ॥
निर्गुणेति च या प्रोक्ता मनोवाचामगोचरा ।
अष्टाक्षरादयो मन्त्रास्सगुणात्म . . . ॥
. . . . . . . . . . . . ।
. . . मूर्तिर्निर्गुणा प्रोक्ता मनोवाचामगोचरा ॥
मनोवाचामविषयो मन्त्रराजः षडक्षरः ।
श्रीरामता . . . . . . . . ॥
. . . . . . . . स्वयं मनुः ।
हिरण्यगर्भस्य च मे नाम्ना ख्याता च संहिता ।
अस्यां श्रीतारकाभिख्यो रामस्साक्षात्प्रकाशते ॥

* * * *

**Colophon:**

इति श्रीहिरण्यगर्भसंहितायां महासिद्धान्ते षडक्षर . . . . . . . . . . ॥

* * * *

इत्थं दीक्षाभिषिक्तो यस्स एव परमेश्वरः ॥
सेवन्ते तं महेशानि शङ्खपद्मादिसिद्धयः ।
स यत्र वसति प्राज्ञस्तत्र काश्यादिकं वसेत् ॥
तस्य दर्शनमात्रेण वाजिमेधफलं लभेत् ।
अणिमाद्यष्टसिद्धीनां नायकोऽसौ भवेद्ध्रुवम् ॥
दीक्षाभिषेकविधिना रहितं मन्त्रराडपि ।
पुरश्चर्याकोटिभिर्वा न सिद्धिस्स्याच्छिवे ध्रुवम् ॥

**Colophon:**

इति श्रीहि( . . ) चतुर्थोऽध्यायः ॥

इति श्रीहिरण्य( . : . ) त्रिचत्वारिंशोऽध्यायः ॥

**End:**

पराय परमेशाय तारकब्रह्मरूपिणे ।
सच्चिदानन्दरूपाय रामाय ब्रह्मणे नमः ॥
. . . . . . . . . . . . . . /
. . . . निर्जितारातिं जानकीरमणं भजे ।
भद्रमस्तु शिवं चास्तु सत्यमस्तु वचो मम ।
युष्माभिस्सह रामो मे प्रसन्नोऽस्तु . . . ॥
. . . . . . . . . . त्रैवान्तरधीयत ।
ब्रह्मर्षयस्ततस्सर्वे तपस्संसिद्धवस्तुभिः ॥
पूजयामासुरेकान्ते स्रष्टारं जगतां पतिम् ।
ब्रह्मर्षयोऽथ . . . . . . . . . ।
. . . . . . . . . . . द्विजाः ॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥

**Colophon:**

इति श्रीहिरण्य . . . . . . . . . . . . . . .
. . . ॥

The scribe adds—

मषी मुमासि तारणाभिधे तु हा . . .
. . . . . . . . . . . . . ।
. . . . . . . . . . . . .
. . . . . . . . . . . . . ॥
. . . . मेति साशया गतिस्तथैव चाभया ।
सदैव रामसीतयोस्समन्त्रजापितो लघु ॥

---

R. No. **2615.**

Palm-leaf. 17¼ × 1⅝ inches. Foll. 92. Lines, 5 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Satulūru Kṛṣṇamācāryulugāru, Tanuku, Kistna district.

कृष्णकर्णामृतम्, सव्याख्यानम्.

KRṢṆAKARṆĀMṚTAM WITH COMMENTARY.

Same work as that described under R. No. 2183 ante, but with slight difference and with an additional stanza in the beginning.

Contains the second Sarga complete.

**Beginning :**

जनकदुहितृलोलस्सन्ततश्रीविशालस्सुललितशुभलीलस्संस्फुरद्दानशीलः ।
शमितपरनिरोधस्सत्यनित्यप्रबोधः प्रकटितगुणपूरः पातु भद्राद्रिनाथः ॥

**Colophon :**

इति श्रीकृष्णलीला(शुक)मुनिविरचिते श्रीकृष्ण(कर्णा)मृतस्तोत्रे द्वितीयाध्यायः ॥

इति श्रीमद्रघुनन्दनचरणारविन्दमकरन्दास्वादनकन्दलितसारस्वतेन नित्यनिर्मलाचारपरिपूरितेनाखण्डिततपःप्रचण्डमुनिप्रकाण्डमण्ड .

---

R. No. 2616.

Palm-leaf. 15¾ × 1½ inches. Foll. 53. Lines, 7 in a page. Telugu. Very much injured.

Presented in 1917–18 by M.R.Ry. Vāsireḍḍi Candramaulīśvaraprasāda Bahadur, Zamindar of Muktyala, Kistna district.

वसन्तभूषणभाणः.

VASANTABHŪṢAṆABHĀṆAḤ.

A kind of drama technically called Bhāṇa describing the passionate attachment between Vasantaśekhara and Vāsantikā. It is said to have been enacted on the occasion of the festival of God Varadarāja of Conjeeveram in the Vaiśākha month. By Nṛsiṁhasūri, son of Veṅkaṭasūri of Vaṅgipuram family and a native of Parāṅkuśapuram (Ponviḷaindakaḷattūr, Chingleput district). He studied under Sthalaśāyin and was a disciple of Parāṅkuśa of Vanaśaṭhāri Mutt.

Incomplete.

**Beginning :**

. . . . . . . . . . . ॥

अपि च—

कुण्डे नन्दसुते मनोऽप्रवरुजामन्दे प्रमुष्याम्बरं
सानन्दं व्रजसुन्दरीपरिषदो मन्दस्मितं बिभ्रति ।

मन्दं मन्दमुपेत्य तस्य सुतरां मन्दाक्षतस्सन्निधिं
तस्यास्सङ्कुचितारविन्दसदृशो यात्त्वाञ्जलिः पातु वः ॥

नान्द्यन्ते सूत्रधारः । (नेपथ्याभिमुखमवलोक्य) मारिष इतस्तावत् ।

(प्रविश्य पारिपार्श्वकः) ।

भाव एषोऽस्मि ।

सूत्रधारः—इह खलु सकलभुवनसमेधमाननिरुपममहिमगरिमाभिरामाम्, रम्यतरमर्ममयहर्म्यतलनिवासिविलासिनीजनकरतलदोधूयमानखर्विटपिविटपावि-निर्मुक्तप्रसूनपरम्पराविजिहीर्षासंभ्रमवंभ्रमद्भ्रमरमुखजृम्भमाणझङ्करणद्विगुणीकृत-तरुणीगणभूषणमञ्जुशिञ्जितसमञ्चिताभिः ।

* * * *

भगवतः करिगिरिनिलयस्य कमलाकामुकस्य वैशाखमहोत्सवसमय एव समवेतैः दुर्वादिदुर्वारगर्वानलनिर्वापणनिपुणवार्षिकमहावलाहकैः व्याख्यानवशाशेषविद्यानिष-वायमानैर्निखिलदिगन्तरनिरन्तरविजृम्भमाणयशोभरविश्रोभमानैरादिशि मादरमह-मार्यमिश्रैः ।

* * * *

सूत्र—(स्मृतिमभिनीय) किं न जानासि अस्ति हि समस्तवसुमतीतलतिल-कायमानः पराङ्कुशपुरं नाम महानग्रहारः । तत्र हि—

सत्वस्यैकनिवासभूर्भुवि शुचेः शुद्धान्तगेहं परं
धर्मस्य प्रभवस्तथैव च सदाचारस्य मुख्याश्रयः ।
भक्तिं भागवतेष्वचञ्चलतरां प्राप्तश्च वङ्क्यन्वयो-
दीतो वेङ्कटसूरिरित्यनुपमो यज्वाग्रणीरेधते ॥
सूनुस्तस्य सुमेधसामचरमस्साहित्यविद्याविदां
गोष्ठीभाजकनिष्ठिको भुवि सुधीरास्ते नृसिंहाह्वयः ।
तेनानेन वसन्तभूषणमिति ख्यातो विभायोज्वलो
भाणः खल्वभिनीयतामिति करे न्यस्तश्चिरादस्ति नः ॥

पारि—आ स्मृतवानस्मि । स एव खल्वयम् ।

स्थलशयनगुरोः प्रसादमात्रादमृतरुचेरिव शेवधेः कलानाम् ।
चरणकिसलयं न्यधत्त यस्मिन्ननु वचसामधिदेवतादरेण ॥

सूत्रधारः—(सविनयबहुमानमञ्जलिं बद्ध्वा) अयं खलु स महानुभावस्स-दाचारनिबिडचतुर्दशभुवनसृष्टिस्थितिसं . . . . . . . . . . . . . .

तोभयहिरण्यडम्भशमनस्तम्भसंभ्रमविहितोदयस्य, अङ्कालङ्कारमूत . . . . .
. . . . . . . . . . . . . . . . नीलशैलडम्बरविडम्बितो गरुडाचल-
कुटुम्बिनी . . . . . . . . . . . . . . . कैङ्कर्यरसभरितहृदन्तरैर्निर्भर-
निरतिशयनिजयशोभरविशोभितसकलदिगन्तैर्डम्भाधिककुमतिजनमानभावन .
. . . . . . . . विन्यासपवित्रीकृतवसुन्धरैरनवधिककृपाभरगुरुभिर्लौकिकगु-
रुभिः श्रीवणशठारिमुखयतिधुरन्धरैः . . . . . . . . . . . लालिते पदेऽ-
भिषिक्तस्ततोऽधिककैङ्कर्यपरितोषितलक्ष्मीनृसिंहकृपाकटाक्षपरिलब्धगजप्रमुखवि-
विधविरुदस्य . . . . . . . . . . ध्वजः परवादिगजाङ्कुशः पराङ्कुश
इति विजयते यतीशः ।

नमस्तस्मै वरेण्याय शरण्याय जनिश्रमम् ।
प्राप्तानां . . . . . . . . . ॥

* * * *

माधविकासमागमलालसमानसं प्रबन्धनायकं वसन्तशेखरं स्मृतवानसि ।

* * * *

किं भणसि । अद्य विशेषतः प्रियसुहृल्लाभेनेति सखे सर्वमास्तां तावत् । कथय
किमद्यापि वासन्तिकामुद्दिश्य केवलदूतीजनानुवर्तनं तव । किं भणसि, कथञ्चि-
देकदा तया समागमस्समजनीति, (सानन्दम्) सखे भगीरथ इव गङ्गां तां स्तन-
जितरथाङ्गां वासन्तिकां प्राप्तवानसि खलु, किं भणसि, तथ्यमाह भवानिति ।

**End:**

किं भणसि, वासन्तिका सा माधविका पुष्पापचयव्याजादुत्तरेण वेगा . .
. . . . . . दुपश्रुत्य तत्र गच्छन् माकन्दस्तबानयनाय मां प्राहिणोदिति,
मित्र नन्दन, किं भणसि, सखे गम्यतां पुनः दर्शनाय, मां मा स्म विस्मरस्त-
त्र तत्र वेश्यागृहेषु ।

---

R. No. **2617.**

Palm-leaf. 17¼ × 1½ inches. Foll. 212. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Vedula Rāmacandra Sāstrigāru, Tiparru, Tanuku taluk, Kistna district.

Fol. 212*b* is left blank.

**रसमञ्जरीव्याख्या—आमोदः.**

**RASAMAÑJARĪVYĀKHYĀ : ĀMODAḤ.**

By Raṅgaśāyin. Same work as that described under R. No. 804 ante, wherein see for the beginning.

Contains the Prakaraṇas one and two complete.

**End:**

समाप्यते विस्तरेति । विस्तरभिया प्रत्येकमेतासामुत्तममध्यमाधमभेदा नोदाहृता इति । विस्तर इत्यत्र प्रथने वावशब्द इति घञो निषेधाद्दोरित्यप्प्रत्ययः । एतासामष्टाविंशत्युत्तरशतभेदभिन्नानां मुग्धादिनायिकानामित्यर्थः । अन्ये भेदाः प्रतिभाशालिभिरुदाहरणीया इति भावः । इतिशब्दो नायिकाभेदनिरूपणसमाप्त्यर्थः । इति हेतुप्रकरणप्रकारादिसमाप्तिष्वित्यमरः ॥

**Colophon:**

इति श्रीमद्गुरिना . . . . . . पण्डितविरचितायां रसमञ्जरीव्याख्यायामामोदसमाख्यायां प्रोषितभर्तृकादिनायिकाविशेषनिरूपणं नाम द्वितीयप्रकरणम् ॥

---

## R. No. 2618.

Palm-leaf. 15 × 1¼ inches. Foll. 70. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1917–18 by M.R.Ry. Vedula Rāmacandra Śāstrigāru of Tiparru, Tanuku taluk, Kistna district.

(a) आश्वलायनसन्ध्याकर्मप्रयोगपद्धतिः.

ĀŚVALĀYANASANDHYĀKARMAPRAYOGAPADDHATIḤ.

Foll. 1a—11b.

Deals with the procedure relating to the performance of the Sandhyāvandana by the followers of the Ṛgvēda. By Bhaṭṭabhāskara.

Complete in four Gucchas.

**Beginning:**

श्रीरामं जानकीजानिं सच्चिदानन्दविग्रहम् ।
जन्माद्यस्य यतस्सम्यक् नमामि मुहुर्मुहुः ॥

अथ सन्ध्याकर्मपद्धतिर्लिख्यते—तत्र सन्धिकाले सन्ध्यावन्दनं कर्तव्यम् । तत्रार्धास्तमितसूर्यदर्शनकालमारभ्य नक्षत्रोदयपर्यन्तं यः कालस्सायं स कालः । तत्र सायं सन्ध्यामुपासीत । तदुक्तम्—

अर्धास्तमितकालाद्यस्सन्धिरातारकोदयात् ।
तत्र सन्ध्यामुपासीत सायङ्काले समाहितः ॥ इति ॥

नक्षत्रदर्शनकालमारभ्य सूर्यदर्शनाद्यः कालस्स प्रातस्सन्धिकालः । तत्र प्रातस्सन्ध्यामुपासीत । अयं च सन्ध्याद्वयस्य मुख्यकालः । तदभावे गौणकाले कर्तव्यम् । तदुक्तम्—

उत्तमं सूर्यसहिता मध्यमानुदितितारका ।
अधमा तारकोपेता सायंसन्ध्या त्रिधा मता ॥

* * * *

तत्रायं प्रयोगः—कृताप्लवः बद्धकच्छशिखः यज्ञोपवीती सपवित्रकरः भूमौ पादौ प्रतिष्ठाप्य स्वेष्टदेवतां हृदि निधाय, प्रकृतिस्थं फेनबुद्बुदरहितं माषमग्नमात्रं जलं सन्नताङ्गुलिना गोकर्णीकृतेन पाणिना गृहीत्वा ब्रह्मतीर्थेन त्रिस्तूष्णीं पिबेत् । तत्रापस्तम्बादिवत्साक्षात् स्वसूत्रोक्ताभावात् बोधायन . . . . . . चमनं लिख्यते—

**End:**

अङ्गुष्ठानामिकाभ्यां च चक्षुः श्रोत्रं पुनः पुनः ॥
कनिष्ठाङ्गुष्ठयोर्मूले नाभिदेशमुपस्पृशेत् ।
करमध्यं हृदि स्थाप्य कराग्रं शिरसि न्यसेत् ॥
मूलेन न च हस्तेन बाहुमूलमुपस्पृशेत् ।
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ॥

**Colophon:**

इति भट्टभास्करविरचितायामाश्वलायनसन्ध्याकर्मप्रयोगपद्धतिः समाप्ता ॥

---

(*b*) सन्ध्यावन्दनपद्धतिः.

SANDHYĀVANDANAPADDHATIḤ.

Foll. 12*a*—70*b*.

Same work as that described under R. No. 2596(*b*) ante.

Contains one to four Gucchas complete.

---

R. No. **2619.**

Paper. 8¼ × 5¼ inches. Foll. 12. Lines, 18 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Śrī Rāja Kandukūri Śivaprasādabhūṣaṇa Rao Bahadur, Zamindar of Narasapur, Kistna district.

भैरवागमः (भूततन्त्रम्)

BHAIRAVĀGAMAḤ (BHŪTATANTRAM).

Foll. 1a – 12a. Fol. 12b contains Jvaraharamantra.

Same work as that described under No. 7990 of the D.C.S. MSS., Vol. XV.

Contains the Paṭalas 10 to 27 complete, but wants the beginning in the 10th Paṭala.

**End:**

अग्निबीजं पञ्चसङ्ख्या श्रीं ह्रीं हुं फट् समुच्चरेत् ॥
स्वस्थस्य ज्वरमायाति शतवारं च मन्त्रितम् ।
तोयप्राशनमात्रेण पीतपस्नुसंयुतम् ॥
एतत्तन्त्रं मया चोक्तं गोपकं कुरु सर्वदा ।
गुरुः शिष्याय दातव्यं पुत्राय च विशेषतः ॥

**Colophon:**

इति श्रीभैरवागमे भूततन्त्रे सप्तविंशतिः पटलः ॥

---

R. No. 2620.

Palm-leaf. $16\frac{1}{4} \times 1\frac{1}{2}$ inches. Foll. 66. Lines, 7 in a page. Telugu. Much injured.

Presented in 1917–18 by M.R.Ry. Satuluru Kṛṣṇamācaryulugāru, Tanuku, in Kistna district.

**रामायणव्याख्या—सुबोधिनी.**

RĀMĀYAṆAVYĀKHYĀ: SUBŌDHINĪ.

A commentary on Vālmīki's Rāmāyaṇa: by Abhinavarāmabhadrāśrama, disciple of Raghurāmāśrama.

Contains the Bālakāṇḍa complete and the Ayōdhyākāṇḍa incomplete.

**Beginning:**

वन्दे गजाननं देवं वन्दनस्वामिनं शिवम् ।
धातारं च विधातारं श्रीरामं च गुरूनहम् ॥
श्रीरामं भरतं सीतां सुमित्रावर्धनं शुभम् ।
शत्रुघ्नमञ्जनासूनुं . . . . . सिद्धये ॥
कौसल्याविमलालवालजनितः कारुण्यरेखाङ्कुरः
पायान्नो . . . सोदरसमच्छायात्रयोदञ्चितः ।
सुग्रीवाङ्गदवायुसूनुसुमहाभूत्योपशाखाश्रितो
भक्ताभीष्टफलप्रदानचतुरः श्रीरामकल्पद्रुमः ॥

कोदण्डस्फुटशक्रचापकलितो गम्भीरवाग्गर्जितः
पायान्नो मिथिलाधिराजतनयाविद्युल्लताभूषितः ।
भक्तानीकसमस्तचातकमहासंसारतृष्णापहः
कारुण्यामृतवर्षपूरनिरतः श्रीरामनीलाम्बुदः ॥
रघुरामाश्रमगुरून् नत्वा श्रीरामरूपिणः ।
तत्पादभक्तितः कुर्वे रामायणसुबोधिनीम् ॥

अथ भगवान् परमकारुणिकः पद्मसंभवो भूलोकमप्यानाय(य्य) स्वेनैव कृतार्थीकर्तुं स्वर्लोके स्थितमतिविस्तृतं रघुवंशचरितं तत्र संक्षेपतो वाल्मीकिमुखेन प्रवर्तयितुकामः सर्वलोकसञ्चारिणं सर्वार्थोपदेशसमर्थं नारदमुपदिशति । वाल्मीकेराश्रमं प्रति प्रचोदयामास । ततः स्वाश्रमं प्रति . . . . . . . नारदं विधिवदभ्यर्च्य वाल्मीकिनामा महामुनिः परिपप्रच्छ । तपःस्वाध्यायनिरतमिति ।

* * * *

प्रश्नप्रकारमाह—को न्वस्मिन्नित्यादि . . . . प्रश्ने साम्प्रतमिदानीमस्मिन् लोके गुणवान् वक्ष्यमाणगुणव्यतिरिक्तदयादिगुणशाली । वीर्यवान् स्वयमविकृतः परजेता ।

* * * *

**Colophon:**

इति श्रीमदभिनवरामभद्राश्रमविरचितायां रामायणसुबोधिन्यां बालकाण्डव्याख्यायां प्रथमस्सर्गः ॥

* * * *

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरश्रीरघुरामाश्रमपूज्यपादशिष्येणाभिनवश्रीरामभद्राश्रमेण विरचितायां रामायणसुबोधिन्यां बालकाण्डव्याख्यायां सप्तसप्ततितमस्सर्गः ॥

रामभद्राश्रमकृता रामायणसुबोधिनी ।
व्याख्या श्रीबालकाण्डस्य श्रीरामस्य समर्पिता ॥
श्रीसाकेतपुरे पुरस्थविबुधैर्मातापितृभ्यां मुदा
कैकेयीतनयादिसोदरजनैस्संलालितस्सर्वदा ।

तानप्यात्मदयादिसद्गुणगणैस्सन्तोषयन् सौख्यदो
वैदेह्या सहितस्सुखेन निवसन् श्रीराघवः पातु माम् ॥

बालकाण्डटीका समाप्ता ॥

See under the work described under R. No. 1772 ante for the end.

---

R. No. 2621.

Palm-leaf. 18 x 1¼ inches. Foll. 55. Lines, 5 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. Kambhampāḍi Rāmakṛṣṇa Śāstrulugāru of Mukkamala, Tanuku taluk, Kistna district.

वृत्तदर्पणम्.

VṚTTADARPAṆAM.

Similar to the work described under No. 1782 of the D.C.S. MSS., Vol. III, which it purports to follow. By Sītārāma of Ātrēyagōtra and disciple of Kandāḍa Vēṅkaṭācārya. The author has composed Balabhadracaritra in Sanskrit, and Dharmāṅgacaritra, Satyavatīmāhātmya, Jagannāthamāhātmya, Kēśavakṣētramāhātmya, Ācāryaratnahāra, Śrīvacanabhūṣa in Telugu.

Contains the Adhyāyas one to four.

**Beginning:**

श्रीरमाश्रयश्राव्यसंश्रितसेव्यसत्वगुणाकरो
घोरसत्त्वमरुत्वदाशुलवुत्वदासुरभीकरः ।
सारतत्त्वविशेषबोधनसद्मपद्मदिवाकरो
दूरदूरमघं तु मे जवतो धुनोतु दयापरः ॥

इदं हि मल्लिकावृत्तम् ।

कन्दाडवेङ्कटाचार्यपदाम्बुजसमाश्रयः ।
कुठारपुरदिव्यश्रीकेशवस्तवतत्परः ॥
आत्रेयगोत्रजस्सर्वस्त्व्यापस्तम्बसूत्रकः ।
सीतारामो यजुश्शाखाध्यायी बुधजनाज्ञया ॥
बलभद्रचरित्राख्यप्रबन्धं पूर्णवर्धनम् ।
सत्यवत्युरुमाहात्म्यधर्माङ्गदचरित्रकम् ॥

जगन्नाथस्य माहात्म्यं संस्कृतोक्त्यनुसारतः ।
केशवक्षेत्रमाहात्म्यं संस्कृतोक्त्यनुसारतः ॥
आचार्यरत्नहारं च पूर्वाचार्यकथास्पदम् ।
श्रीमद्वचनभूषाख्यशास्त्रसद्द्राविडोक्तिषु ॥
ज्ञातेनार्थेन पूर्णं तन्नामके चेति षट्परम् ।
श्रीनाथदत्तया वाचा हृद्यया संस्कृतान्ध्रया ॥
छन्दोनियममादृत्य पुरा व्यरचयत्किल ।
षट्के तस्मिन् सहस्राणां ग्रन्थसङ्ख्या तु षोडश ॥
ततोऽध्यायचतुष्केण व्यकरोत्केशवस्तवम् ।
कदापि तस्य कविता श्रीशाश्रान्ये(न्य)पराभवत् ॥
सोऽहमद्य कृतिं वृत्तरत्नाकरपथानुगाम् ।
कुरुष्वेति बुधैरुक्तस्तत्कृतावुत्सुकोऽभवम् ॥
वृत्तरत्नाकरेऽध्यायाः षट् तत्र प्रथमान्तिमौ ।
संज्ञाः ष[..] प्रत्ययपराविती वृत्तलक्षणाः ॥
बुधाध्येयतदध्यायवृत्तलक्षणलक्षितम् ।
वृत्तजातं स्वरूपानुरूपं वक्ष्ये स्म पञ्चिदम् ॥

आदौ तावत्संग्रहेण गुर्वादिनियमो निरूप्यते—

द्वित्वाक्षरस्य बिन्दोश्च विसर्गस्य च पूर्वभाक् ।
वर्णश्च दीर्घवर्णश्च गुरुस्तादितरो लघुः ॥
विकल्पगुरुता ज्ञेया पादान्तिमलघुस्सदा ।
छन्दश्शास्त्रे हि सर्वत्र नियमस्त्वेष दृश्यते ॥

* * * *

आर्यासु सर्वत्र विषमो न जगणः पूर्वार्धे षष्ठो जगणः । विकल्पेन न लघुरपि । उत्तरार्धे षष्ठगणो लघुः । आर्या सामान्यतो द्विविधा, एकस्या पूर्वार्धे षष्ठं नलं न स्यात्किन्तु षष्ठो जगणः । उत्तरार्धेऽपि पञ्चमं नलं न स्यादपरस्यां पूर्वार्धे नलं षष्ठं चेत्तदाद्यवर्णे विश्रान्तिः । उत्तरार्धे नलं पञ्चमं चेच्चतुर्थगणान्ते विश्रान्तिः । आर्यावृत्तम्—

दीनोऽहं दीनोऽहं मानी दुर्मतिरतीव मदमत्तः ।
ज्ञानकृतामितदुरितो दीनोऽद्यातिभयमार्तः स्याम् ॥

हीन इत्येतद्वृत्तं नलरहितम् । पूर्वार्धे षष्ठो जगणः ।

* * * *

**Colophon:**

इति श्रीशाश्रितप्रेष्यसीतारामप्रदर्शिते ।

श्रीवृत्तदर्पणेऽध्यायः प्रथमो बुधमोददः ॥

अस्मिन्नध्यायस्थितग्रन्थसङ्ख्या—नान्दीग्रन्थाः २७ । अक्षराणि १७ । आर्यादिवृत्तानि ४२ । ग्रन्थाः ६१ । अक्षराणि १५ । वृत्तनामाक्षरग्रन्थाः ८ । लक्षणग्रन्थाः ४४ । एतत्कृत्स्नग्रन्थसङ्ख्या १४१ । एकचत्वारिंशदुत्तरशततमग्रन्थाः ।

**End:**

तृतीयपादे तजरगणाः प्रथमद्वितीयचतुर्थपादाः । उपस्थित . . . वृष-प्रथमद्वितीयचतुर्थपादसमाः । अत्र प्रथमपादः पूर्वार्धः द्वितीयतृतीयचतुर्थपादाः मिलित्वा उत्तरार्धः । पूर्वार्धस्योत्तरार्धस्य न सन्धिर्न समासः । विषमाक्षरगाथावृत्तम् । सर्वदास्योचितं दास्यमिति निश्चित्यधीरिह नरः । कुर्याच्छान्तो मुकुन्दभागवताचार्यदासताम् । सर्वदेत्यस्मिन् पादाक्षराणि न समानि । किन्तु विषमाणि ।

**Colophon:**

इति श्रीशाश्रितप्रेष्यसीतारामप्रदर्शिते श्रीवृत्तदर्पणेऽध्यायश्चतुर्थो विस्मयप्रदः ॥

अस्मिन्नध्यायस्थितग्रन्थसङ्ख्या—अनुष्टुप् १ । वृत्तानि १२ । ग्रन्थसङ्ख्या १८ । अक्षराणि ३१ । वृत्तनामाक्षरग्रन्थसङ्ख्या २ । लक्षणग्रन्थसङ्ख्या २४ । अक्षराणि १ । कृत्स्नग्रन्थसङ्ख्या ४६ । षट्चत्वारिंशद्ग्रन्थाः ॥

---

## R. No. 2622.

Palm-leaf. 16¼ × 1¾ inches. Foll. 102. Lines, 8 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Kasibhatla Mahadevulugaru, Kadali, Godavari district.

अध्यात्मरामायणसेतुः.
ADHYĀTMARĀMĀYAṆASETUḤ.

Foll. 1, 6 to 8, 39, 90 to 93 are wanting. Foll. 59 and 62 are found in duplicate.

By Rāma Varman. Same work as that described under No. 2158 of the D.C.S. MSS., Vol. IV, Part I, wherein see for the beginning.

Contains six Kāṇḍas complete and five Adhyāyas in the Uttarakāṇḍa.

**End:**

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्य पाठमात्रतोऽपि महाफलमाह—विज्ञानं विज्ञानजनकं करणत्वुलच्येति बोध्यम् । वेदान्तैरुपनिषद्वाक्यैः वेद्यं चरणं जगज्जन्मादिलक्षणं कर्म यस्य तेन । ननु पाठमात्रादेव तादृशमहाफलप्राप्तिः कथमित्याशङ्क्य भवत्येवेति सूचयंस्तत्र हेतुमाह । मद्वचनेषु भक्तिर्विश्वासो यदीत्यर्थः । गुरुवाक्यविश्वासस्यैव फलदायकत्वादिति भावः ॥

**Colophon:**

इति श्रीमत्सकलरायविपदुद्धरणसमर्थेत्यादिविरुदावलीविराजमानस्य हिम्मतिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतावध्यात्मरामायणसेतावुत्तरकाण्डे श्रीरामगीता नाम पञ्चमोऽध्यायः ॥

---

R. No. **2623.**

Palm-leaf. $13\frac{3}{4} \times 1\frac{1}{4}$ inches. Foll. 94. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Vedula Rāmacandra Śāstrigāru of Tiparru, Tanuku taluk, Kistna district.

Fol. 94*b* is left blank.

कणादनयभूषणम्.
KAṆĀDANAYABHŪṢAṆAM.

Same work as that described under No. 4335 of the D.C.S. MSS., Vol. IX, but with the following stanza in the place of the first stanza. Incomplete.

श्यामलं कोमलं लोललोचनं चलकुण्डलम् ।
रामं मुनिहृदम्भोजभ्रमरं सततं भजे ॥

## R. No. 2624.

Palm-leaf. 15¾ × 1¼ inches. Foll. 82. Lines, 5 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Vedula Rāmacandra Śāstrigāru of Tiparru, Tanuku taluk, Kistna district.

(*a*) अजपाकल्पः.

AJAPĀKALPAḤ.

Foll. 1*a*—2*b*.

Similar to the work described under No. 7732 of the D.C.S. MSS, Vol. XV.

Incomplete.

**Beginning:**

अथ क्रममाह—तत्र श्रीमान् साधकः रात्रिशेषे समुत्थायावश्यकी क्रियां कृत्वा रात्रिवासः परित्यज्य, वासोऽन्तरं परिधाय सुखासनगतः शिरसि श्रीगुरुं ध्यात्वा तत्पादुकावन्दनं कुर्यात् ।

ध्यानं यथा—

सहस्राम्बुजे कर्णिकमध्यसंस्थे सिंहासने संश्रितदिव्यमूर्तिम् ।
ध्यायेद्गुरुं चन्द्रशिलाप्रकाशं चित्पुस्तकाभीतिवरं दधानम् ॥

* * * *

अथाजपाविधिः—

गुरूपदेशेन ज्ञातं सहजसिद्धमजपाजपं निवेदयेत् । यथा—

हंसो गणेशो विधिरेव हंसो (हंसो) हरिर्हंसमहेशशम्भुः ।
हंसो हि जीवो गुरुदेवतात्मा हंसो हिमात्मा परमात्महंसः ॥

**End:**

सूर्योदयमारभ्याहोरात्रयोः श्वासनिश्वासात्मकं षट्छताधिकमेकविंशतिसहस्रसङ्ख्याकमजपाजपं करिष्ये—इति कृताञ्जलिपुटस्सन् सङ्कल्प्य ततो भूमिं प्रार्थयेत् ।

---

(*b*) श्रीचक्रपूजाविधिः.

ŚRĪCAKRAPŪJĀVIDHIḤ.

Foll. 2*b*—82*b*.

Similar to the work described under No. 5729 of the D.C.S. MSS., Vol. XII.

Name of the copyist: Veṅkaṭajōgi of Pallaballi. Copied from the MS. of Bhāskarabhaṭṭa Anantarāma on Monday, the 15th day of the bright fortnight of the Mārgaśira month in the year Parābhava.

Complete.

**Beginning:**

समुद्रमेखले देवि पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥
धारणं पोषणं त्वत्तो भूतानां देवि सर्वदा ।
तेन सत्त्वेन मां पाहि पापान्मोचय धारिणि ॥

इति भूमि प्रार्थ्य

* * * *

ऐं ह्रीं श्रीं श्रीं । ऐं ह्रीं श्रीं ओं श्रीं ह्रीं श्रीं कमलालये प्रसीद प्रसीद, श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः, श्रीं ह्रीं क्लीं श्रीं सकल ह्रीं श्रीं एतैश्चतुर्लक्ष्मीमन्त्रैर्मुखं प्रक्षालयेत् ।

* * * *

ततो वैदिकसन्ध्यानन्तरं तान्त्रिकसन्ध्यावन्दनं कुर्यात् । आत्मतत्त्वं शोधयामि स्वाहा ।

**End:**

इति भूमौ विसृज्य अर्घ्यं देव्याश्चक्रदेव्या विलीनास्सन्तु स्वाहा । चक्रदेव्याः प्रधानदेव्या विलीनास्सन्तु स्वाहा इति चक्रदेव्यः ।

* * * *

इदमेव शिवं शिवमेवेदं शिवमेवेदं शिवमेवेदम् ।
शिवशासनतश्शिवशासनतः शिवशासनतश्शिवशासनतः ॥

---

R. No. **2625.**

Palm-leaf. 14, 16 × 1¼ inches. Foll. 28. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Vedula Rāmacandra Śāstrigāru of Tiparru, Tanuku taluk, Kistna district.

(a) रामशतकम्.

RĀMAŚATAKAM.

Foll. 1a—12a. Fol. 12b is left blank.

A centum of stanzas in praise of Rāma, an incarnation of God Viṣṇu.

Contains 98 stanzas only.

**Beginning:**

अभिनवघनदाभस्वीयकायं सुरेन्द्रार्पितचरणसरोजं चिन्तितार्थप्रदेशम् ।
धरणिजानिसुमित्रापुत्रसंसेवितं श्रीरघुपतिमहमीडे नित्यमत्यन्तभक्त्या ॥

शार्दूलम्—

यं दृष्ट्वा यममेव दुर्जनचयो भीतिं भजत्यन्वहं
यं कल्पद्रुममीक्ष्य याचकगणाः स्व(स्वं)प्रार्थयन्तीप्सितम् ।
यं वैकुण्ठपतिं निरीक्ष्य विबुधाः सम्यक् स्तुवन्त्यादरात्
तं सौमित्रिधरात्मजान्वितमहं सेवे सदा राघवम् ॥

**End:**

कौसल्याजठराब्धिजो जनकजापण्येन वैदेहराट्-
क्रीतो रावणकीर्तिदुग्धमलिनीकारस्समारप्रभः ।
राजालीलसदुच्चहारतरलस्सूर्यान्वयालङ्कृतो
दक्षो लक्ष्मणलक्षितोऽवतु स नो रामेन्द्रनीलो मणिः ॥
स्वर्णं तूर्णगतिप्रभावतुरगे वातात्मजाधन्वितः
वह्नेरस्त्रबलेन राक्षसपतेर्नाभीसरोजास्थितम् ।
तं पीयूषघटीं विशोष्य तरसा ब्राह्मेण योऽस्त्रेण य-
च्छीर्षाणां दशकं क्षणेन तरसा चिच्छेद पायात्स नः ॥

---

(6) पट्टिसाचलमाहात्म्यम्.

**PAṬṬISĀCALAMĀHĀTMYAM.**

Foll. 18a—29a. Fol. 29b is left blank.

Similar to the work described under No. 2464 of the D.C.S. MSS., Vol. IV, Part II. Gives the origin of God Vīrabhadra in the shrine at Paṭṭisa.

Contains the Adhyāyas 42 to 47; as found in the Skāndapurāṇa.

**Beginning:**

वन्दे गणपतिं देवीं गिरां गौरीं गुरून्मम ।
यत्कटाक्षप्रसारेण भवेन्निर्विघ्नता मम ॥
साम्बं साम्बं भजे साधुजनालम्बं समस्तदम् ।
यत्सेवनाद्दनोद्दोद्दमुखाः प्रापुर्बहुश्रियः ॥

देवा ऊचुः—

नमो नमस्ते गणनाथ बोधस्वरूप पापार्तिहरप्रभाव ।
भवन्मुखाच्छ्रीगिरिकाशिकादिमाहात्म्यमस्माभिरतिश्रुतं पुरा ॥

यन्माहात्म्यश्रुतिः पापिपापतूलाग्निसन्निभः ।
चतुर्वर्गप्रदात्री च शृण्वतामण्वपि क्षणात् ॥
गणाधीशकटाक्षेण वयं ते पाविताः खलु ।
इदानीं पट्टिसाधीशवीरभद्रस्य भासुरम् ॥
माहात्म्यं वद तद्भक्त्या शुश्रूषूणां न आदरात् ।
पाहि पापाम्बुधेरस्मान् गणाधीश गुणाधिक ॥
वीरभद्रप्रभावाख्यप्लवेन करुणाकर ।
इति देवैर्गणाधीशः प्रार्थितो बहुभक्तितः ॥
भक्तपालनरक्तश्रीयुक्तो गणपतिः पुरा ।
स्वपित्रा शङ्करेणोक्तं स्वस्मै श्रीपट्टिसेशितुः ॥
माहात्म्यं वक्तुमारेभे देवताभ्यो गणेश्वरः ।

गणेश्वर उवाच—

हे देवास्संप्रवक्ष्यामि महापुण्यफलप्रदम्
मोक्षप्रदं मुमुक्षूणां मत्पित्रोक्तं पुरा मम
वीरभद्रस्य माहात्म्यं पट्टिसाचलवासिनः ।
शृणुध्वं भक्तिसंयुक्ता मदुक्तं महदद्भुतम् ॥

* * * *

**Colophon:**

इति श्रीस्कन्दपुराणे पट्टिसाचलमाहात्म्ये द्विचत्वारिंशोऽध्यायः ॥

साम्बशिव उवाच—

अस्ति स्वस्तलवास्तव्यसुरबृन्दनिषेवितः ।
नानारत्नचयोद्दीप्तनिजसौवर्णशृङ्गवान् ॥
काञ्चनाद्रिर्मेरुनामा सर्वसम्पन्मयो महान् ।
तस्य पुत्रास्त्रयो जाता भगवद्भक्तिसंयुताः ॥
भद्राचलः पुष्पगिरिः देवकूट इति श्रुताः ।
पुरा त्रिपुरसंहारकाले श्रीगिरिजापतेः ॥
यथा मेरुश्चापमभूत् तथासौ देवकूटकः ।
पट्टिसत्वं समासाद्य प्रीतिं चक्रे पिनाकिनः ॥
तदादि देवकूटोऽसौ पट्टिसाद्रिरिति श्रुतः ।

देवकूटः—

भद्राचलो मम भ्राता रामचन्द्रस्य धारणात् ।
कृतार्थोऽभवदत्यन्तमथ्वरेषु सुरेष्वपि ॥

* * * *

दत्तो मया वरः पूर्वं देवकूटस्य धीमतः ।
तमद्य सफलीकर्तुं तिष्ठ तन्मूर्ध्नि मा चिरम् ॥
इत्याज्ञप्तस्तदा वीरः पित्रा वित्रासितारिणा ।
तत्क्षणादेव देवेशो देवकूटस्य मूर्धनि ॥

**End:**

शृण्वन् माहात्म्यममलं भक्त्या जागरयेन्निशि ।
माहात्म्यश्रवणाच्छम्भोरभीष्टान्याप्नुयान्नरः ॥
श्रोतुः श्रावयितुश्चैव माहात्म्यं शङ्करप्रभोः ।
धर्मार्थकाममोक्षाश्च सिध्यन्ते नात्र संशयः ॥

**Colophon:**

इति श्रीस्कान्दपुराणे पट्टिसाचलमाहात्म्ये सप्तचत्वारिंशोऽध्यायः ॥

---

## R. No. 2626.

Palm-leaf. 15 × 1¼ inches. Foll. 131. Lines, 6 in a page. Telugu. Much injured.

Presented in 1917–18 by M.R.Ry. Vedula Rāmacandra Śāstrigāru of Tiparru, Tanuku taluk, Kistna district.

### पञ्चपादिकाटीका.
### PAÑCAPĀDIKĀṬĪKĀ.

A commentary on Padmapādācārya's Pañcapādikā, described under No. 4666 of the D.C.S. MSS., Vol. IX: by Nṛsiṁhāśramamuni, disciple of Jagannāthāśramamuni.

Contains the first Varṇaka complete.

Name of the copyist: Mupparāju Punnayya, Karnam of Penambodi.
Date of transcription: Thursday, the 15th day of the bright fortnight of the Bhādrapada month in the year Sādhāraṇa.

**Beginning:**

मायां कायाद्युपायं वियदिव पयसि स्वच्छमूर्तिं प्रविश्य
ब्रह्मादिष्वेव वीक्षाक्षणचितविभवेष्वात्मतन्त्रः पुरेषु ।

कीदृक्युच्चावचं यो हरिरनुदिवसं ज्योति . . . . .
स्तस्याङ्गं मङ्गलं नो दिशतु नरहरेस्तुङ्गमङ्गावसङ्गम् ॥
यस्याङ्घ्रिद्वन्द्वमद्वन्द्वं स्मृतं केनापि हेतुना ।
तनुते विमलां बुद्धिं तं वन्दे नृहरिं गुरुम् ॥
सर्वसाक्षिणमाश्रित्य नरकेसरिणं गुरुम् ।
विश्वेशं गिरिजां दु(र्गां व्याकुर्वे) पञ्चपादिकाम् ॥
निजनयननिमेषान्वेषयोरप्रभुत्वा-
महमिति यदि तथ्यं तत्समं पद्मयोनेः ।
स यदि परमपुंसा वीक्षितो विश्वकर्ता
मयि पततु पवित्रा तस्य कारुण्यवीक्षा ॥

श्रीमच्छारीरकमीमांसाभाष्यं व्याकर्तुं श्रोतृप्रवृत्त्यङ्गतया तत्प्रतिपाद्यं परमात्मतत्त्वं दर्शयन्निष्प्रत्यूहपरिसमाप्तये स्वाभिमतं ब्रह्म प्रणमति—अनादीति । ब्रह्मणे नमः । स्तादि(ति) शेषः । नमस्कार्यस्वरूपविशेषाज्ञाने तन्नमस्कारायोगात्तदर्थं तस्य अज आत्मा महान्, स(नि)त्यं (वि)ज्ञानमानन्दं ब्रह्म, सत्यं ज्ञाननन्तं ब्रह्म, सदेव सोम्येत्यादि शास्त्रसिद्धं स्वरूपम् । पूर्वार्धे संशय(अनादि)श्चासावानन्दश्चेति कर्मधारयः । अनाद्यानन्दस्वरूपायेत्यर्थः । आत्मशब्दः स्वरूपपरः ।

* * * *

इदानीं साक्षाद्गुरुं श्रीशङ्कराचार्यसंज्ञितं परमहंसपरिव्राजकाचार्यं नमति—नमामीति । अत्र यद्यपि यद्ब्रह्म वेदान्तप्रतिपाद्यं तदेव वैष्णवादिषु विष्णुरिति . . . ।

* * * *

ननु ब्रह्मजिज्ञासासूत्रस्य ब्रह्मज्ञानाय विचारः कर्तव्य इति वाक्यार्थः । तत्र च ज्ञानं प्रयोजनम् । ब्रह्म जिज्ञास्यत्वेनाज्ञातं विषयं, न च तदुभयमिदं भाष्यं प्रतिपादयति तत्राहाथादिति ।

**End:**

अथात इत्यादि सूत्रमिति यावत् । प्रवृत्त्यङ्गयेति प्रेक्षावतां निष्प्रयोजन- . . . . . . . . . . . . सूत्रं चेदनित्यनेकार्थत्वमेकसूत्रस्य न दूषणम् । प्रत्युतानुगुण . . . . . . . . . व्याख्यानभाष्यप्रपञ्चकं . . . . . . रसज्ञापनाय वृत्तानुवादपूर्वकमवतारयति एवमिति ।

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीजगन्नाथाश्रमपूज्यपादशिष्यश्रीमन्नृसिंहा(श्रममुनिविरचिता)यां पञ्चपादिकाटीकायां प्रथमवर्णकं समाप्तम् ॥

## R. No. 2627.

Palm-leaf. 16¾ × 1¼ inches. Foll. 21. Lines, 6 in a page. Telugu and Dēvanāgarī. Slightly injured.

Presented in 1917-18 by M.R.Ry. Vedula Rāmacandra Śāstrigāru of Tiparru, Tanuku taluk, Kistna district.

पातञ्जलयोगसूत्रम्, सवृत्ति.

PĀTAÑJALAYŌGASŪTRAM WITH VṚTTI.

Foll 1a—15b.

Patañjali's Yōga aphorisms described under No. 4349 of the D.C.S. MSS., Vol. IX, together with a commentary thereon called Yōgamaṇiprabhā: by Rāmānandasarasvati, disciple of Gōvindānanda.

Contains the Samādhipāda complete and the Sādhanapāda incomplete.

**Beginning:**

वन्दे क्लेशाद्यसंस्पृष्टं पुराणं पुरुषं हरिम् ।

प्रकृत्या सीतया युक्तं योगीशं योगदायिनम् ॥

पतञ्जलिं सूत्रकृतं प्रणम्य व्यासं मुनिं भाष्यकृतं च भक्त्या ।

भाष्यानुगां योगमणिप्रभाख्यां वृत्तिं विधास्यामि यथामतीह ॥

इह खलु भगवान् पतञ्जलिः प्रेक्षावत्प्रवृत्त्यङ्गं शास्त्रप्रतिपाद्यं दर्शयति—

अथ योगानुशासनम् ।

अत्राथशब्द आरम्भार्थः । योगशास्त्रमारभ्यत इत्यर्थः । यद्यपि हिरण्यगर्भेण शास्त्रं कृतं तथापि तद्विस्तृतमिति मत्वा तदनुसृतं शास्त्रमिदमारभ्यत इति द्योतयति । अनुशासनमिति । अत्र सूत्रे योगः शास्त्रप्रतिपाद्य उक्तः, अर्थात्तज्जिज्ञासुरधिकारी, फलं तु योगस्य कैवल्यं यथायोगं तेषां सम्बन्ध इत्यनुबन्धचतुष्टयं द्रष्टव्यम् । तत्र योगो द्विविधः—संप्रज्ञातोऽसंप्रज्ञातश्च । स च चित्तधर्मः । वृत्तीनां चित्तधर्मत्वेन तन्निरोधरूपयोगस्यापि तद्धर्मत्वात् । तस्य चित्तस्य पञ्च भूमयः—क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति । रजसात्यन्तं चलं क्षिप्तं दैत्यादीनाम् ।

* * *

**Colophon:**

इति श्रीगोविन्दानन्दपूज्यपादशिष्यरामानन्दसरस्वतीकृतायां पातञ्जलसूत्रवृत्तौ योगमणिप्रभायां समाधिपादः प्रथमः ॥

पूर्वस्मिन् पादे योगमुद्दिश्य लक्षणमुक्त्वा वृत्तीर्निरूप्य तन्निरोधोपायाभ्यासवैराग्ये प्रतिपाद्य चित्तस्थित्युपायान् कांश्चिदुक्त्वा द्विविधो योगस्सावान्तरभेदः प्रतिपादितः । तत्राभ्यासवैराग्ये चित्तशुद्धिसाध्ये इति मत्वा तच्छुद्धिहेतुमादौ क्रियायोगमाह—तपस्स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ।

**End:**

एवं यत्र क्रोध उदारस्तत्र रागो विच्छिन्नः । कालेनोदारा भूत्वा पुरुषपशुं क्लेशयन्ति । एते क्लेशा अविद्यामूलास्तस्याः पुरुषापरोक्षभ्रान्त्या निवृत्तौ निवर्तन्ते । तथा जीवन्मुक्तस्य क्षीणा इति पश्यामी ।

Foll. 16–17 contain Yōgaviṣaya in Telugu language and 18–21 Pātañjalayōgasūtravivṛti, which is a duplicate of what is written in Dēvanāgarī character in the work described above

---

R. No. 2628.

Palm-leaf. 7¼ × 1¼ inches. Foll. 192. Lines, 7 in a page. Telugu Injured.

Presented in 1917-18 by M.R.Ry. Vedula Rāmacandra Śāstrigāru of Tiparru, Kistna district.

षड्भाषाचन्द्रिका.

ṢAḌBHĀṢĀCANDRIKĀ.

Same work as that described under No. 1552 of the D.C.S. MSS., Vol. III, but with additional stanzas in the beginning as given below. By Lakṣmīdhara who is said to be a disciple of his brother, Kondubhaṭṭōpadhyāya.

Contains up to Subanta.

**Beginning:**

गिरिराजन्यकन्याया रमणं शरणं भजे ।
सकलागमवाग्वल्लीपल्लवत्पदसम्पदम् ॥
ओङ्कारार्याय विज्ञानदायिने लोकसाक्षिणे ।

**Colophon:**

इति श्रीमदखिलविद्यापरिवारदक्षिणामूर्तिमहादेवप्रसादलब्धपूर्वोत्तरमीमांसातर्कसाहित्यसार्वभौमचिरुकुरियेश्वरभट्टोपाध्यायतनयकोण्डुभट्टोपाध्यायशिष्येण सर्वाम्बिकागर्भशुक्तिमुक्तामणिना लक्ष्मीधरेण विरचितायां षड्भाषाचन्द्रिकायां सुबन्तविभागस्समाप्तः ॥

## R. No. 2629.

Palm-leaf. 17 × 1¾ inches. Foll. 60. Lines, 6 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Sōmañci Subbanna Śastrigāru of Pēkēru, Tanuku taluk, Kistna district

(*a*) दयाशतकम्.

DAYĀŚATAKAM.

Foll. 1*a*—7*a*. Fol. 7*b* is left blank.

Same text as that described under No. 10000 of the D.C.S. MSS., Vol. XVIII.

Almōst complete.

The scribe adds—

दुर्मत्यब्दे कार्तिके शुक्लपक्षे पञ्चम्यां शुक्रे कार्मुकेऽह्नो लिलेख ।
प्रेरेपाल्ये वंशवार्यो द्विजेशस्त्वेतत्सर्वं सादरं लक्ष्मणार्यः ॥

The scribe has written this also in Telugu Padyas.

---

(*b*) छन्दस्.

CHANDAS.

Foll. 8*a*—10*b*.

Same work as that described under No. 901 of the D.C.S. MSS., Vol. II, but with slight difference in the end.

Complete.

**End:**

प्रतिलोमगुणं द्विर्लाद्यम् । रूपशून्यं द्विशून्ये । तदर्थे तद्गुणितम् । द्विर्न्नुते-
नम् । तदन्तानाम् । एकानेथ । परेपूर्णम् । परेपूर्णमिति ।

The scribe adds—

दुर्मतौ कार्तिके शुक्ले पञ्चम्यां शुक्रे घटे दिवा ।
पैङ्गल्यनागसूत्राणि लक्ष्मीनारायणोऽलिखत् ॥

The scribe has written this in Telugu Padyas also.

---

(*c*) वृत्तरत्नार्णवः.

VṚTTARATNĀRṆAVAḤ.

Foll. 11*a*—21*b*.

A treatise on Sanskrit prosody written in six Adhyāyas by Nṛsiṁha, disciple of Rāmānandayōgīndra, as based on the Chandaśśāstra of Piṅgala and other authors.

Deals with the following topics :—

| | |
|---|---|
| १. संज्ञाधिकारः. | ५. विषमवृत्तनिरूपणम्. |
| २. मात्रावृत्तनिरूपणम्. | ६. षट्प्रत्ययनिरूपणम्. |
| ३–४. समवृत्तनिरूपणम्. | |

Complete.

**Beginning :**

श्रीरामानन्दयोगीन्द्रचरणाम्बुरुहद्वयम् ।
वन्दे यच्छिष्यवृन्देभ्यः पुरुषार्थप्रदायकम् ॥
यथा सुधाम्बुधिर्नित्यं भवति श्रीहरेर्मुदे ।
तथा नृसिंहरचितवृत्तरत्नार्णवोऽप्ययम् ॥
मात्रावर्णविभागेन यदुक्तं लौकिको द्विधा ।
पिङ्गलादिभिराचार्यैश्छन्दस्तदिह कथ्यते ॥
द्वादशसहस्रपरिमितग्रन्थोक्तं पिङ्गलादिभिर्मुनिभिः ।
छन्दश्शास्त्रं वक्ष्ये सुखबोधायेह तत् षडध्यायैः ॥
एतैर्मयरससंज्ञैस्तभजनसंज्ञैर्गणैश्च लघुना च ।
गुरुणा च वाङ्मयमिदं व्याप्तं श्रीविष्णुनेव जगदखिलम् ॥
त्रिगुरुर्मगणः प्रोक्तो यगणश्चादिलस्स्मृतः ।
मध्यलो रगणश्चान्त्यगुरुस्सगण उच्यते ॥

* * * *

इत्युक्ताः छन्दसां संज्ञाः क्रमशो वच्मि साम्प्रतम् ।
लक्षणं सर्ववृत्तानां मात्रावृत्तानुपूर्वशः ॥

**Colophon :**

इति श्रीरामानन्दपूज्यपादशिष्यनृसिंहभागवतविरचिते वृत्तरत्नार्णवे छन्दश्शास्त्रे संज्ञाधिकारो नाम प्रथमाध्यायः ॥

**End :**

तत्तच्छन्दोजातवृत्तसङ्ख्या द्विगुणिता यदि ।
एकोना शून्य इति प्रोक्ताः प्रस्तारकर्मणि ॥
प्रस्तारा नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया ।
सङ्ख्यानमध्वयोगश्च प्रत्ययाः षडुदीरिताः ॥
श्रीहरिप्रीतिकामेन वृत्तरत्नार्णवो मया ।
कृतस्सोऽयं हरेर्भूयान्मुदे क्षीरार्णवो यथा ॥

**Colophon:**

इति श्रीमद्रामानन्दपूज्यपादशिष्यश्रीनृसिंहभागवतविरचिते वृत्तरत्नार्णवे छन्दश्शास्त्रे षट्प्रत्ययनिरूपणं नाम षष्ठोऽध्यायः ॥

The scribe adds thus both in Sanskrit and Telugu languages:

दु(र्मत्य)ब्दे कार्तिके शुक्ले नवम्याब्जघटे मुदा ।
वृत्तरत्नार्णवं सर्वं लक्ष्मीनारायणोऽलिखत् ॥

---

(*d*) वृत्तरत्नाकरव्याख्या—धीशोधिनी.

VṚTTARATNĀKARAVYĀKHYĀ: DHĪŚODHINĪ

Foll. 22*a*—48*b*.

Same commentary as that described under Nos. 1793 and 1794 of the D.C.S. MSS., Vol. III, but with slightly different readings and without the introductory stanza in the beginning.

Complete in the following Adhyayas:—

१. संज्ञाधिकारः.
२. जात्यधिकारः.
३. समवृत्ताध्यायः.
४. अर्धसमवृत्ताध्यायः
५. विषमवृत्ताध्यायः.
६. षट्प्रत्ययाध्यायः.

**Beginning:**

प्रणम्याखिललोकेशं( . . . )वृत्तरत्नाकराभिधम् ॥

आदौ त्रिभिः श्लोकैराचार्यः प्रारिप्सितप्रबन्धाविघ्नपरिसमाप्तिहेतुभूता- नेकसंपत्तिसिद्धयेऽभिमतां देवतां प्रणम्य शिष्टजनपरिग्रहाय स्वाभिजात्यवृत्ते सङ्कीर्त्य श्रोतृजनमनःसमाधा(ना)याभिधेयं प्रतिजानीते—सुखेति । सन्तानः प्रवाहः । पव्येक इति स्वपितुस्संज्ञा । लक्ष्यलक्षणसंयुतमिति येन वाक्येन लक्षणं विधीयते तदेव लक्ष्यं भवतीत्यर्थः । अयमत्रान्वयः श्लोकत्रयमेकवाक्यम् । वेदार्थशैवशास्त्रज्ञः पव्येको द्विजोत्तमोऽभूत् ।

* * * *

**Colophon:**

इति संज्ञाध्यायः प्रथमः ।

**End:**

षट्त्रिंशदधिकग्रन्थातिरिक्तत्वाच्चिरन्तनैरभियुक्तैर्व्याख्यातृभिर्व्याख्यातत्वा- च्चाध(र्थे)स्ता(त्)दयमेते पूर्वोक्ताः षड्विधाः प्रस्तारादयः प्रमाणिता ज्ञाताः छन्द- श्शास्त्रप्रणेतृभिः पूर्वाचार्यैरिति ॥

**Colophon:**

इति वृत्तरत्नाकरव्याख्याने षट्प्रत्ययाध्यायः षष्ठः ॥

The scribe adds—

दुर्मतिवत्सरकार्तिककृष्णप्रतिपत्सोमज्ञये हि लिलेख ।
लक्ष्मीनारायणविद्वांस्तां वृत्त(र)मणीयां व्याख्यां सर्वाम् ॥

---

(e) वृत्तरत्नाकरः.

VRTTARATNĀKARAḤ.

Foll. 49a—55b.

Same work as that described under No. 1782 of the D.C.S. MSS. Vol. III.

Complete

The scribe adds—

मेरेपाख्येऽन्ववाये समजनि पुरुषोत्कृष्टनामाङ्कितोऽस्मा-
ल्लक्ष्मीनारायणाख्यस्सकलगुणनिधिर्भूसुरः प्राप जन्म ।
छन्दश्शास्त्रं समस्तं व्यलिखदमलधीर्यस्तु केदारसूक्तं
तद्दुर्मत्याख्यवर्षे शरदृतुसहिते कार्तिके कृष्णषष्ठ्याम् ॥

---

(f) श्रुतबोधः.

ŚRUTABODHAḤ.

Foll. 56a—58b.

Same work as that described under No. 1800 of the D.C.S. MSS., Vol. III.

Complete.

The scribe adds—

दुर्मत्यब्दे शरदृतुयुते कार्तिके कृष्णपक्षे
षष्ठ्यां मन्दे . . . नकराशौ लिलेख ।
. . . . . व्यलिखदमलं कालिदासेन सूक्तं
मेरेपाब्धौ कुवलयसुहृत्सत्कलाभिः प्रकीर्णो
लक्ष्मीनारायणवसुमतीयज्ञभाक्छूलिभक्तः ॥

---

(g) कविकण्ठपाशः.

KAVIKAṆṬHAPĀŚAḤ.

Foll. 59a—60b.

A treatise on Sanskrit poetical composition dealing mainly with the auspicious character of letters and groups of letters.

Complete.

**Beginning:**

आदौ स्वराष्षोडश कादयस्तु पञ्चोत्तरा विंशतिरीरितास्ते ।
याद्या नवैव प्रथितास्ततश्च पञ्चाशदेव प्रवदन्ति वर्णान् ॥
अनेकच्छन्दसां सम्यगज्ञात्वा लक्षणानि यः ।
करोति गद्यपद्यादीन् प्रभूणां मृत्युरेव सः ॥
अक्षरे परिशुद्धे तु नायको भूतिमृच्छति ।
अन्यत्र दोषबाहुल्यमुभयोस्स्यान्न संशयः ॥

गणविवेकः—

मयरसतजभनसंज्ञाः कथ्यन्तेऽष्टौ गणा विपश्चिद्भिः ।
सर्वेषां च गणानामेकैकं स्युस्त्रयस्त्रयो वर्णाः ॥

**End:**

भूवर्णस्सुखसम्पदीप्सित . . . . हर्षप्रदा अम्मया
आश्ले(म्ले)या लिपयः प्रणाशजनकाश्शोकप्रदा वायुजाः ।
दारिद्र्यं खलिपिव्रजैः प्रकटितं सर्वे प्रबन्धाश्रगाः
कर्तुः कारयितुश्शुभाशुभफलं श्रोतुर्दिशन्त्यन्वहम् ॥

**Colophon:**

इति कविकण्ठपाशः ॥

The scribe adds—

दुर्मतिकार्तिकसितेतरस्मिन्मरीचिवत्ससमिकार्मुकेऽह्नः ।
प्रेरेपलक्ष्मीरमणाभिधेयो लिलेख सर्वं कविकण्ठपाशम् ॥

The scribe has, at the end of all the foregoing works, given the date of transcription in Telugu Padyas

---

R. No. **2630.**

Palm-leaf. 17 × 1½ inches. Foll. 34. Lines, 8 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Sōmañci Subbanna Śāstrigāru of Pēkēru, Tanuku taluk, Kistna district.

Fol. 31 contains Ṣaḍsthalabrahmaṣaḍakṣarīmantra. Fol. 33*b* is left blank.

**प्रसङ्गरत्नावलिसङ्ग्रहः**

**PRASAṄGARATNĀVALISAṄGRAHAḤ.**

Same work as that described under No. 12068 of the D.C.S. MSS., Vol. XX, but without the introductory stanzas. The Paddhatis are in

disorder and some of the Paddhatis have only one stanza with their colophon.

Incomplete.

**Beginning:**

श्रीमदयोध्यानगरे (. . .) वाञ्छितार्थं मे ॥
इतिहासपुराणेषु यत्सारं तत्सुभाषितम् ।
सुभाषितसुधाज्ञानमज्ञानकुलनाशनम् ॥
यस्य संपुटिता नास्ति पिता यस्य स पण्डितः ।
सकृदुक्तां न पुष्णाति कुतस्तस्य सुभाषितम् ॥

* * * *

**Colophon:**

इत्याशीर्वचनपद्धतिः द्वितीया ॥

* * * *

इति प्रसङ्गरत्नावल्यां दशावतारपद्धतिस्तृतीया ॥

**End:**

हिमशिशिरवसन्ता ग्रीष्मवर्षाशरत्सु
स्त . . तपनवनाम्भोहर्म्यगोक्षीरपानैः ।
सुखमनुभव राजंस्त्वद्द्विषो यान्तु नाशं
दिवसकमलकज्जा शर्वरीरेणुपङ्क्तैः ॥
मर्त्याः कुत्र वसन्ति कुत्र विशिखाः पुष्पाणि का वारिधेः ।
कन्या धातुमुरारिमन्मथजितां का वा नु संबुद्धयः ॥
कस्मिन् मुक्तिकरी स्ती . . . . . . . . .

---

R. No. **2631.**

Palm-leaf. 10¾ × 1¼ inches. Foll. 87. Lines, 6 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Jyōsyula Veṅkaṭa Sōmayājulugāra of Mandapāka, Tanuku taluk, Kistna district.

(a) सन्ध्यावन्दनभाष्यम्.

SANDHYĀVANDANABHĀṢYAM.

Foll. 1a—14b.

By Tirumalayajvan. Same work as that described under R. No. 2258(b) ante. The few sentences found there after the colophon are not found herein.

Complete.

(*b*) रुद्रप्रश्नभाष्यम्.

RUDRAPRAŚNABHĀṢYAM.

Foll. 15*a*—37*b*.

Similar to the work described under No. 134 of the D.C.S. MSS., Vol. I, Part II.

Incomplete.

**Beginning:**

नमस्ते रुद्र मन्यवे—उत ते नम इति । हे रुद्र ते तव यो मन्युः तस्मै नमोऽस्तु । मन्युः अस्मद्वैरिष्वेव प्रसरतु । न त्वस्मासु । उतो अपि च ते इषवे नमः ।

**End:**

हे मीढुः कामानामभिवर्षक तोकायास्मत्पुत्राय तनयाय तदीयपुत्राय च मृडय सुखं देहि । मीढुष्ट . . गहि ।

---

## R. No. 2632.

Palm-leaf. 17¼ × 1½ inches. Foll. 51. Lines, 8 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

आपस्तम्बीयाध्वरतन्त्रव्याख्या—प्रयोगरत्नमाला.

ĀPASTAMBĪYĀDHVARATANTRAVYĀKHYĀ : PRAYŌGA-RATNAMĀLĀ.

Same work as that described under R. Nos. 795 and 1649 ante.

Contains the Praśnas three and four only, but the fourth is incomplete.

---

## R. No. 2633.

Palm-leaf. 16½ × 1½ inches. Foll. 74. Lines, 12 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

स्मृतिरत्नमहोदधिः.

SMṚTIRATNAMAHŌDADHIḤ.

By Paramānandaghana, pupil of Cidānandabrahmēndrasarasvatī. Same work as that described under No. 2804 of the D.C.S. MSS., Vol. V, but with additional Vedic Ṛks in the beginning.

Contains the Āśaucakāṇḍa complete.

अक्षिदुःखोत्थितस्यैवं । विप्रसन्ने कनीनिके ।
आङ्क्ते चाद्रणं नास्ति । ऋभूणां तन्निबोधत ।

. . .

अभिधून्वन्तोऽभिघ्नन्त इव ।
नमो महद्भ्यश्शिवविष्णुकेभ्यो नमो गुरुभ्यो मुनिपुङ्गवेभ्यः ।
नमस्सदा विघ्नविनायकेभ्यो नमो मनुव्यासपराशरेभ्यः ॥

---

R. No. **2634.**

Palm-leaf. 17¾ × 1½ inches. Foll. 35. Lines, 5 in a page. Telugu. Injured.

Presented in 1917–18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narassapur, Kistna district.

**चयनप्रयोगः.**

CAYANAPRAYŌGAḤ.

Foll. 1*a*—28*b*.

Same work as that described under No. 1131 of the D.C.S. MSS., Vol. II.

Contains Āruṇakētukāgniprayōga only.

Name of the copyist: Savitāla Vēṅkaṭācala Cetti. Date of copying: Monday, the 14th day of the bright fortnight of the Bhādrapada month in the year Sarvadhārin.

Foll. 29*a* to 35*a* contain a duplicate copy of this work. Fol. 35*b* is left blank.

---

R. No. **2635.**

Palm-leaf. 17 × 1⅝ inches. Foll. 28. Lines, 5 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narassapur, Kistna district.

(*a*) **पौण्डरीकानुक्रमणिका.**

PAUṆḌARĪKĀNUKRAMAṆIKĀ.

Foll. 1*a*—11*b*. Fol. 12*a* contains a few Vedic Ṛks of Śrautaprayōga. Fol. 12*b* is left blank.

On the ritualistic procedure relating to the performance of the sacrifice called Pauṇḍarīka. Similar to the work described under R. No. 116(*c*) ante.

Complete.

**Beginning:**

व्यूढो नवरात्रो महाव्रतं वैश्वानर इत्याश्वलायनोक्तद्वितीयपक्षमाश्रित्य प्रयोग उच्यते---

पृष्ठ्यः षडहस्त्र्यच्छन्दोमा इति व्यूढनवरात्रः । पौण्डरीकेन यक्ष्ये—सामिचित्येन पृष्ठ्यषडहबृहद्रयन्तरबृहत्पृष्ठछन्दोमत्रयव्यूढनवरात्रेण महाव्रतदशमेन वैश्वानरातिरात्रोत्तमेनायुतदक्षिणेनोत्तमाश्वसहस्रदक्षिणेन तेन परमेश्वरं प्र(प्री)णयानि(मि) । विघुदसि । सोमप्रवाकवरणादि ।

**End:**

तत अग्निष्टौमिकमग्निपत्युत्तरं परिग्राहं परिगृह्णातील्येवमादिमुख्यस्य सवनीयस्य पशोर्यूष्णो मृत्युग्रहः । यदा अहीनन्तदा प्रतिहर्त्रन्तानां क्रतुदक्षिणां दत्वा काठकाग्निकरणा देया ॥

**Colophon:**

इति पौण्डरीकानुक्रमणिका समाप्ता ॥

---

(6) द्वादशाहप्रयोगः.

DVĀDAŚĀHAPRAYŌGAH.

Foll. 13*a*—20*b*. Fol. 21*a* contains the name of the work. Fol. 21*b* is left blank.

On the details of procedure relating to the performance of a sacrifice which lasts for 12 days.

Incomplete.

**Beginning:**

द्वादशाहस्य प्रयोगः दृश्यते—उखासंभरणप्रभृत्यामिक्षापर्यन्तं यथा वसन्ते भविष्यति तथोपक्रमः । प्रातरग्निहोत्रं हुत्वा, प्राणानायम्य सङ्कल्पं करोति । द्वादशाहेनाहीनभूतेन सामिचित्येन व्यूढेन सर्वपृष्ठेन सर्वस्तोमेनान्वहं द्वादशशतदक्षिणेन यक्ष्ये । प्रजायेय स्वर्गं लोकमवाप्नवानीति सङ्कल्पः । विघुदसि सोमप्रवाकवरणादि कश्चिन्नाहीन इत्युक्ते अहीनभूतो द्वादशाहः । कश्चित्कल्याण्यो दक्षिणास्सन्ति कल्याण्यो दक्षिणाः ।

**End:**

उत्तरत्र्यहपक्षे सौर्यमेति माह्यनेव । शुक्राग्रः समूढपक्षे आग्रयणाग्रः अग्निष्ठस्त(दी)क्षितः तृतीये ऐन्द्रो.

(c) सौत्रामण्यनुक्रमणिका.

SAUTRĀMAṆYANUKRAMAṆIKĀ.

Foll. 23a—25a. Fol. 25b is left blank. Foll. 26 to 28b contain some Śrautaviṣayaprayōga.

Similar to the work described under No. 1114 of the D.C.S. MSS., Vol. II.

Incomplete.

**Beginning:**

सौत्रामण्या वक्ष्ये—विद्युदादि षड(ड्ढा)त्रः पश्चिष्टिश्च । इष्ट्यन्ते शाखाहरणमित्यादि । पक्वयूपश्चयस्वरवः वेदिमानकाले षड्विंशत्यङ्गुलिदण्डेन वेदिमानम् । दश पश्चात् द्वादश पुरस्तात्तिर्यगष्टौ वेदं(दिं)कृत्वा वेदिः प्रागुत्तरात्परिग्रहात्कृत्वापरेण यूपावटदेशमित्यादि । उत्तरवेद्यां क्रियमाणायां प्रतिप्रस्थाता चात्वालात्पुरीषमाहृत्य दक्षिणेनोत्तरवेदिं . . . भरं कृत्वाग्रेणान्वाहार्यपचनम् ।

**End:**

ब्राह्मणांस्तर्पणान्तं समस्ता सौत्रामणि । षड्विंशत्यङ्गुलयः प्रमाणं विमानदण्डेन दशाष्टतिर्यक् प्राग्द्वादशी वेदि(ः) तृतीय(ा) एषा स(ा)वित्रसौत्रामणी वेदिमाने ।

---

## R. No. 2636.

Palm-leaf. 16 × 1¾ inches. Foll. 31. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1917–18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugaru of Narasapur, Kistna district.

(a) आहिताग्निपैतृमेधिकप्रयोगः.

AHITĀGNIPAITṚMĒDHIKAPRAYŌGAḤ.

Foll. 1a—8b.

Similar to the work described under R. No. 378(a) ante.

Incomplete.

**Beginning:**

आहिताग्नेर्मरणसंशये यथोक्तं सर्वप्रायश्चित्तं कृत्वोत्क्रान्तिगोदानं कृत्वा ब्रह्मविदाप्नोति परं, भृगुर्वै वारुणिरिति ब्रह्मविदो दक्षिणे कर्णे जपति । आहिताग्नेर्यदा(था)निनः औपासनाग्निं सन्धाय सर्वाधानिनो लौकिकारणिभ्यामाग्निं

मथित्वा श्रोत्रियागाराद्वाहृत्याग्निं प्रेतसन्निधौ निधाय प्रेतपत्नी अपरेणाग्निं दर्भे-ष्वासीना मृतं भर्तारमन्वारभ्य प्राणानायम्य सङ्कल्पं कुर्यात् ।

**End :**

प्रथममग्निहोत्रप्रायश्चित्तम् । अतिपन्नाग्निहोत्रं करिष्ये । चतुर्गृहीतेनाज्येन स्रुचं पूरयित्वा महा . . हविर्होता नमः म . . . .

---

(*b*) आहिताग्निब्रह्ममेधप्रयोगः.

ĀHITĀGNIBRAHMAMĒDHAPRAYŌGAḤ.

Foll. 9*a*—31*b*.

Similar to the work described under R. No. 1523(*e*) ante. The work is also called Lōṣṭhacayanapaddhati. The author is Rāma Mahāpātra.

Date of copying: **5th** day of the dark fortnight of the Āśvija month.

Complete.

**Beginning:**

अथ ब्रह्ममेधप्रयोग उच्यते—

सर्वप्रायश्चित्तात्पूर्वमग्नीनां विहरणमुत्तमम् । एवंगुणविशेषणविशिष्टायां पुण्यतिथौ पितुर्गोत्रस्य शर्मणः अनुकृतनिष्कृतिलघुपापक्षयद्वारा सुखेनोत्क्रमण-सिद्ध्यर्थमुत्क्रान्तिसंज्ञिकधेनुदानं करिष्ये ।

अत्युत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रमणसिद्धये ।
तुभ्यं संप्रददे धेनुमिमामुत्क्रान्तिसंज्ञिकाम् ॥

अस्मै ब्राह्मणाय श्रीमहाविष्णुस्वरूपाय गोत्राय शर्मणः(णे)प्रतिग्रहीत्रे पितुर्गोत्रस्य शर्मणः सुखेनोत्क्रमणसिद्ध्यर्थमुत्क्रान्तिसंज्ञिकधेनुदानं तुभ्यमहं संप्रददे न मम ।

**End :**

एषा काठकाग्निचितो महाग्निचितश्चाविशेषेण कार्या । अग्निचित इत्य-विशेषेण वा कार्या । (न)केवलं लोष्टचितिः पुरुषस्य, किन्तु स्त्रिया अपि । अग्निचित इत्यविशेषणोक्तेः स्त्री . . . . . . चनात् । भवत्येवं शास्त्रं स्त्रीमर्यादा नेति गुरवः । गृहानेत्य पुण्याहं वाचयित्वा ब्राह्मणान् भोजयेत् । तत्र नान्दीसम्प्रदायात् ।

**Colophon :**

इति श्रीहरविदुषा . . . मल्लेन राममहापात्रेण लोष्टचितिसमये गुरु-मुखात् ज्ञात्वा कृता लोष्टचितेः पद्धतिः ॥

There are two lines at the end dealing with Aparaprayōga.

## R. No. **2637.**

Palm-leaf. 16¾ × 1⅝ inches. Foll. 67. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

Fol. 63*b* is left blank.

अग्निष्टोमहौत्रप्रयोगः.

AGNIṢṬŌMAHAUTRAPRAYŌGAḤ.

Foll. 1*a*—65*b*. Foll. 66—67 contain Pathikṛtpaśuprayōga.

Similar to the work described under R. No. 1208 ante.

Complete.

Copied by Mallāla Rāmabhadruḍu on Wednesday, the 12th day of the dark fortnight of the Kārttikai month in Bahudhānya year.

**Beginning :**

अथाग्निष्टोमस्य हौत्रं लिख्यते—

यज्ञेश्वरशर्मणस्सोमो भविष्यति तत्र भवता हौत्रं कर्तव्यमित्युक्तो होता को यज्ञ इति पृच्छेत् । ज्योतिष्टोमोऽग्निष्टोम इत्युक्ते क ऋत्विज इति पृच्छेत् । देवदत्तशर्मादय इत्युक्ते होता का दक्षिणेति पृच्छेत् ।

**End :**

धामभिस्स्वाहा इदं विष्णुः . . सुरे स्वाहा । भूस्स्वाहा । भुवस्स्वाहा । स्वस्स्वाहा । भूर्भुवस्स्वस्स्वाहा । ओं चमे तस्मै ते नमः । यज्ञपुच्छसहितोऽग्निष्टोमस्सन्तिष्ठते ॥

**Colophon :**

सोमहौत्रं संपूर्णम् ॥

---

## R. No. **2638.**

Palm-leaf. 18¾ × 2 inches. Foll. 46. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

आपस्तम्बश्रौतप्रयोगः

ĀPASTAMBAŚRAUTAPRAYŌGAḤ.

Same work as that described under No. 1093 of the D.C.S. MSS., Vol. II.

Contains the 13th and the 14th Praśnas, but the former wants the beginning.

## R. No. 2639.

Palm-leaf. 17¼ × 1⅜ inches. Foll. 22. Lines, 8 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

आपस्तम्बश्रौतेष्टिप्रयोगः.

ĀPASTAMBAŚRAUTĒṢṬIPRAYŌGAḤ.

Similar to the work described under No. 1087 of the D.C.S. MSS., Vol. II.

Contains the Prayōga relating to the following sacrifices:—Mahāpavitrēṣṭi, Pavitrēṣṭi, Mitravindēṣṭi, Mṛgārēṣṭi, Anvārambhaṇīyēṣṭi, Cāturhōtriya, and Āyuṣkāmēṣṭi.

**Beginning:**

अमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा प्राणानायम्य । विंशतिहविष्कया महापवित्रेष्ट्या यक्ष्ये—शुचिः पूतो विपाप्मा ब्रह्मवर्चसी भूयासम् । विधुद्धिहरणादि । अथ यज्ञाय इष्टं हविः । पौर्णमासं तन्त्रः । बर्हिराहरणमसूमयं बर्हिः प्रस्तरश्च । त्रेधा सन्नद्धम् । पुनरेकधा तस्मिन्मन्त्रस्तथेध्मः त्रयोविंशति दारुः ।

* * * *

**Colophon:**

महापवित्रेष्टिस्समाप्ता ॥

**End:**

या ते अग्ने यज्ञिया तनूरिति मन्त्राभ्यां समारोप्यारणिद्वयं सङ्गृह्य, उद्बुध्यस्वाग्ने, प्रविशस्व योनिमन्यां, बोधये जातवेदः अरणीमनुसङ्क्रमस्व जीर्णां तनुं जीर्णया नुदस्वेति मन्त्रेण पुनर्मथित्वा, अग्निं विहृत्य । जुह्वां चतुर्गृहीतं गृहीत्वा मनो ज्योतिरित्याहवनीये जुहोति । ततस्तन्वनुमतीष्टिं कुर्यात् ।

**Colophon:**

इति जीर्णारणिप्रायश्चित्तम् ॥

---

## R. No. 2640.

Palm-leaf. 16¾ × 1⅜ inches. Foll. 11. Lines, 6 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

षोडशीप्रस्तारप्रयोगः.

ṢŌḌAŚĪPRASTĀRAPRAYŌGAḤ.

Fol. 4*b* is left blank.

On the details of Mantras to be repeated in the construction of the altars for the performance of the Sōma sacrifice named Ṣōḍaśi.

Contains the Prastāras one to three complete.

**Begnning:**

तत्र प्रथमरीतौ पञ्चदश पादाः। द्वितीयरीतौ तिस्रोऽर्धाश्चतस्रः षोडश्य एकार्धा चेत्यष्टौ। तृतीयरीतौ तिस्रोऽर्धौ द्वे षोडश्यावेकार्धौ चेति षट्। चतुर्थरीतौ पञ्च पादाः। मिलित्वा पुच्छेष्टकास्त्रयस्त्रिंशत्।

* * * *

**Colophon:**

द्वितीयप्रस्तारमन्त्रोपधानस्समाप्तः ॥

**End:**

अथ दक्षिणपक्षे अष्टौ पक्षेष्टका एका पक्षमध्या च। अथात्मनि चतस्रः षोडश्यः। अथांते त्रयोदश्यां रीतौ द्वे अर्धे इति पञ्चदश। अथोत्तरपक्षे एकाष्टका पक्षे चेत्येकोनत्रिंशाह्लोकंपृणाः।

---

R. No. 2641.

Palm-leaf. 17 × 1¾ inches. Foll. 53. Lines, 5 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayajulugāru of Narasapur, Kistna district.

द्विसाहस्रप्रस्तारप्रयोगः.

DVISĀHASRAPRASTĀRAPRAYŌGAḤ.

Foll. 1*a*—52*a*. Fol. 52*b* is left blank. Fol. 53 contains Kālāgnirudrōpaniṣad.

On details of procedure relating to the performance of Hōma (fire-offerings) in the various portions of the sacrificial altars by the repetition of certain Vedic hymns.

Incomplete.

**Beginning:**

शिवौ सनन्दनौ नत्वा सर्वक्रतुविपश्चिता।
इष्टकानां द्विसाहस्रमन्त्रोपहतिरुच्यते ॥

शुल्बोपधानं विना मन्त्रोपधानायोगादादौ शुल्बोपधानमुच्यते—

द्विसाहस्रे तावदेकैका चितिः द्विप्रस्तारः। एकैकप्रस्तारो द्वे शतेष्टकाः। तत्र प्रथमप्रस्तारे दक्षिणोदगायताः षोडश रीतयः। शिरस्येका। पादा अतिरि-

क्ता च, पुच्छादिशिरःपर्यन्तं रीतिगणना। दक्षिणाद्युदगन्तमिष्टकागणना च ज्ञेया। तत्र पुच्छे चतस्रो रीतयः ।

**End:**

वषट्कारेण त्वा छन्दसा सादयामि तया हिङ्कारेण त्वा छन्दसा सादयामि तया प्रस्तावेन त्वा छन्दसा सादयामि तया प्रतिहारेण त्वा छन्दसा सादयामि तया निधनेन त्वा छन्दसा सादयामि तया.

---

## R. No. 2642.

Palm-leaf. 16¾ × 1½ inches. Foll. 74. Lines, 5 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

(a) आश्विनशस्त्रप्रयोगः.

**ĀŚVINAŚASTRAPRAYŌGAḤ.**

Foll. 1a—52b.

Sūktas in praise of the Aśvins repeated by the Acchāvāka priests in sacrifices.

Incomplete.

**Beginning:**

अच्छावाकस्तृतीयपर्यायशस्त्रयाज्यानन्तरं होतुराश्विनशस्त्रं शंसेत्। दक्षिणं जान्वाच्याग्नीध्रीये जुहुयात् । स्रुवेणाज्यस्थाल्या आज्यमादायाग्निरज्वी गायत्रेण छन्दसा तमश्यान्तमन्वारभे । तस्मै मामवतु तस्मै स्वाहा, अग्नय इदम् ।

**End:**

ये यजामहे प्रवामन्धांसि मद्यान्यस्थुररं गन्तं हविषो वीतये मे तिरो अद्या हवनानि श्रुतं न उमा व्येतमश्विनो मा नश्शर्म यच्छतम् आवि आयाभिरूतिभिका । सोमस्याग्ने वीही वौ ॥

---

(b) अतिरात्रपर्यायप्रयोगः.

**ATIRĀTRAPARYĀYAPRAYŌGAḤ.**

Foll. 52b—58b.

On the procedure relating to the performance of Atirātra sacrifice which is a variety of the Sōma sacrifices.

Complete.

**Beginning:**

हिं भूर्भुवस्वरोशों सावों पान्तमावो अन्धस इन्द्रमभिप्रगायत । विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनों त्रिः । पुरुहूतं पुरुष्टुतम् । पुरुहूतं पुरुष्टुतम् । गोदा·

न्यं स न श्रुतमिन्द्र इति ब्रवीतिं नोमिन्द्र इन्नो महानामिन्द्र इन्नो महानाम्। राता वाजा नान्नूतुर्महामभिग्वायमोंशों नावोम पादु शिप्प्यं घनो पादु शिप्प्यं घनः ।

**End:**

उक्थं वाचि येऽहेतिशा हरीरत आयुज्यमानाया हि वायुर्न नियुतानो अच्छ । पिबास्यन्धो अभिसृष्टो अस्मे इन्द्र स्वाहा ररिमाते मदाया वौ। सोमस्याप्रेविही वौ ।

**Colophon:**

तृतीयपर्यायस्समाप्तः ॥

Foll. 59*a*—61*a* contain Ukthyahōmaviṣaya. Fol. 61*b* is left blank. Foll. 62*a*—67*b* contain Ṣōdaśiprayōgaviṣaya.

---

(*c*) सौत्रामणिहौत्रप्रयोगः.

SAUTRĀMAṆIHAUTRAPRAYŌGAḤ.

Foll. 68*a*—70*b*.

On the duties to be performed by the Hōtṛ priests in the Sautrāmaṇi sacrifice.

Complete.

**Beginning:**

अथ सौत्रामण्या हौत्रप्रयोगः—

अथ त्रिपशुः । पश्विश्याबावाहनपर्यन्तं निरूढवत् । आवाहनकाल अग्निमग्न आवह, सोमपावह, अश्विनावावह, सरस्वतीमावह, इन्द्रमावह, वनस्पतिमावह, देवां आज्यपामित्यादि । स्रुगादापनान्ते । अथ प्रयाजाः ।

**End:**

अग्नीवरुणौ स्विष्टकृतः त्वन्नो अग्ने व . . ग्व्यस्मोम्। ये—हेऽग्नीवरुणौ भू—वस्स त्वं नो अग्नेऽव—पधि वौ। नेडाद्यावनूयाजो यजति। शेषं प्रकृतिवत्॥

Foll. 71*a* to 74*a* contain Paśuhautraprayōga. Fol. 74*b* is left blank

---

R. No. **2643.**

Palm-leaf. 17 × 1½ inches. Foll. 25 Lines, 6 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

श्येनकारिकाव्याख्या.

ŚYĒNAKĀRIKĀVYĀKHYĀ.

A commentary on the Śyēnakārikā which is a metrical treatise containing detailed instruction for the construction of a sacrificial altar resembling a hawk with its wings spread out.

Complete.

**Beginning**:

मन्त्रैर्या उपधेयास्स्युर्द्वितीयश्येनपावके ।
ता इष्टकाः प्रदर्श्यन्ते सर्वक्रतुविपश्चिता ॥

अस्ति द्वितीयश्येनाकृतिरग्निः । स च द्विविधः—ऊनाधिक(द्विशत)प्रस्तारकः, पूर्णप्रस्तारकश्च । तत्रोनाधिकद्विशतप्रस्तारकोऽपि द्विविधः—षट्षोडशीघटिकात्मकः, द्वादशषोडशीघटिकात्मकश्च । तत्र चरमस्य सर्वयाज्ञिकप्रसिद्धत्वात् समालभ्योपधेयानां मन्त्रैरिष्टकानां नामरूपोपस्थानानि कीर्त्यन्ते । तत्र प्रथमप्रस्तारे

* * * *

चतुर्थरीतौ द्वे पादे, पञ्चमरीतौ तिस्रः पादाः । उदक्श्रोण्यां षष्ठ्यां रीतौ द्वे षोडश्यौ एकार्धा च । उत्तरपक्षे एका पक्षेष्टका आत्मनि चतस्रः षोडश्यः । मिलित्वा एकोनत्रिंशच्छोकंपृणाः ॥

**Colophon**:

इति श्रीनिवासकारिकाभाष्यम् ॥

* * * *

**Colophon**:

इति श्येनविहारकारिकाव्याख्या ॥

**End**:

चतुर्थंतविशेषौ द्वे पार्श्वे, तिर्यक्चतुर्थके ।
चतुस्रक्तिरणूका स्यात्कर्णे एकश्चतुर्थकः ॥
अरत्निप्रमितो न[न्य]स्यादर्धाङ्गुलसमन्वितः ।
चयनं चाग्निमानं च तुर्ये सप्तविधाग्निना ॥

---

R. No. **2644**.

Palm-leaf. $14\frac{3}{4} \times 1\frac{1}{2}$ inches. Foll. 88. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1917–18 by M.R.Ry. Prērōpa Subbayyagāru of Pōkōru, Tanuku taluk, Kistna district.

(a) गौतमसंहिता.

GAUTAMASAMHITA.

Foll. 1a—14b.

Same work as that described under R. No. 2605 ante.

Contains the Adhyāyas two to seven complete and the eighth incomplete.

---

(b) वृद्धपाराशर्यम्.

VRDDHAPĀRĀŚARYAM.

Foll. 15a—39a. Foll. 39b and 40 contain some stanzas on astrology.

Same work as that described under No. 13898 of the D.C.S. MSS., Vol. XXIV, and R. No. 871(a) ante.

Contains the first two Adhyāyas complete.

---

(c) केरलज्यौतिषम्.

KĒRALAJYAUTIṢAM.

Foll. 41a—43b.

Similar to the work described under No. 13644 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

**Beginning:**

लग्नाधिपे पञ्चमस्थे भाग्याधिपसमन्विते ।
शुभं शरीरमायाति इति केरलनिर्णयः ॥
तनुस्थानाधिपे सूर्ये . . . . . गुरुसंयुते ।
भृगुणा वीक्षिते यत्र ब्राह्मणो जातिनिर्णयः ॥

**End:**

लाभाधिपे तृतीयस्थे पञ्चमाधिपसंयुते ।
याम्यदिग्धानलाभं च इति केरलनिश्चयः ॥
भाग्याधिपे विक्रमस्थे पापाधिपसमन्विते ।
पञ्चमे तु फलं दद्यादिति केरलनिश्चयः ॥

---

(d) द्वादशभावफलम्.

DVĀDAŚABHĀVAPHALAM.

Foll. 44a—48b.

Similar to the work described under No. 874(h) ante.

Complete.

**Beginning:**

देहस्थानाधिपतत्कारकसगुरुबुधशुक्रसम्पूर्णचन्द्राः केन्द्रत्रिकोणस्वोच्चस्वक्षेत्रशुभांशवर्गोत्तमांशपारिजातकुसुमकुड्मांशकयुक्ताश्चेत् तत्तद्दशायां सकलसौभाग्यभोगवाहनादिसकलसत्कीर्तिप्रतिष्ठादिसिद्धिः ।

**End:**

तत्स्थानाधिपशन्यङ्गारकसूर्यराहुकेतुभ्यां युक्ते स्थानस्थिताश्चेत्पुनर्जननं भवति । शुभांशे शीघ्रं पुनर्जननं भवति । पापयोगे अनेकसंवत्सरे नरकपापान्तरे पुनर्जननं भवति । तत्र शुभांशे शीघ्रं पुनर्जननं भवति । पूर्वोक्तषष्टिभागादीनामंशादियोगेन फलप्राप्तिः ॥

**Colophon:**

इति व्ययभावः । इति द्वादशभावास्समाप्ताः ॥

Foll. 48*b*—50*b* contain Kārakanighaṇṭu, Aṣṭakavargavinyāsakrama, and Saṭsthaladhyāya.

---

(*e*) ज्यौतिषविषयः, आन्ध्रटीकासहितः.

JYAUTIṢAVIṢAYAḤ WITH TELUGU MEANING.

Foll. 51*a*—68*a*. Fol. 68*b* is left blank.

Similar to the work described under No. 13748 of the D.C.S. MSS., Vol. XXIV.

Incomplete

**Beginning:**

देहाधिपस्सपापिष्ठ . . . ष्टपर्यायेषु स्थितश्चेद्देहसौख्यं न भवति । एवमेव फलं सर्वदा द्वादशभावेषु योज्यम् । स षष्ठपस्तत्र षष्ठाष्टमव्ययेषु स्थितश्चेत्तदेव फलम् ।

**End:**

मेषाद्याः कविसौम्यचन्द्ररविविच्छुक्रारजीवार्कज-
च्छायापुत्रसुरेज्यभूमितनया साक्षान्न हन्ति क्रमात् ।
किन्त्वेतत्सुतलाभशत्रुसहजार्थांशास्तथा भानुजोऽ-
प्यत्यन्तोत्कटघातुकादिजदशाभुक्तिष्वलं स्वोच्चगाः ॥
कन्याराहोस्सिहं प्रोक्तं केतोस्तु मिथुनं स्मृतम् ।
राहोरुच्चं धनुश्चैव केतोस्तु मिथुनं स्मृतम् ॥

### R. No. 2645.

Palm-leaf. 17 × 1¼ inches. Foll. 34. Lines, 8 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Sōmañci Subbarāya Śāstrulugāru, Pākōru, Tanuku taluk, Kistna district.

(a) प्रणवसारः, आन्ध्रटीकासहितः.

PRAṆAVASĀRAH WITH TELUGU MEANING.

Foll. 1a—15b.

A treatise investigating the meaning and significance of Praṇava in accordance with the Laiṅgāyatika doctrines: by Sannyāsa of Candraśekhara family and disciple of V(P)ēruka.

Contains the Prakaraṇas one to four complete.

**Beginning:**

श्रीकण्ठोद्भववेदचोदितलसद्वीरव्रतप्रक्रिया-
चर्यादेशिकदेशिकाय भुवनस्तुत्याय नुत्याय सद् ।
भाष्याकारधुरन्धराय सुमहद्भद्राय रुद्राय त-
त्साक्षाच्छ्रीवृषभाधिपांशुबसवानशाय तस्मै नमः ॥
वन्दे स्वान्तमहापुरातनगणं वन्दे महःकिङ्करं
वन्दे रुद्रगणानि भृत्यपदसद्वन्दे स्मरं भावये ।
वन्देऽहं बसवादिसर्वप्रमथान्वन्दे शरण्यं गतं
वन्दे नूतनमागतं शिवगणं वन्दे प्रभुत्वं(!) वः ॥
वन्दे श्रीगुरुलिङ्गजङ्गमगणान्वन्दे शरण्यं प्रजा
वन्दे भक्तमहेशलिङ्गगुरुणां वन्दे पदाम्भोरुहम् ।
वन्दे रक्तकदस्रताङ्घ्रियुगलं वन्दे प्रसन्नं त्वहं
वन्दे दिव्यमहत्त्वयुक्तचरणं वन्दे सदा प्रार्थये ॥
विश्वभ्रामितदग्धयोगाविभवं श्रीमन्मलीयाभगिं
कारुण्यान्वितमार्ययोर्गिरिमठं स्वस्यास्तमोहारिणम् ।
त्रैलिङ्गाङ्गविलिप्तदीक्षितक्रमं प्राज्ञप्रमोदाहितं
पव्यप्रापितचन्द्रशेखरगुरुं नित्यार्चनं भावये ॥
सर्वाम्नायविदं वदन्ति रहसि सद्गुरूपाद्वयं
पुण्यब्रह्मसदीक्षदक्षतयुतं भूमण्डलं वर्तते ।
शिष्याभ्रामितजीवमुक्तिफलदस्तत्त्वंपदस्यार्थये
दृश्यभ्रामितमुक्तहंसभवपदं तत्त्वार्थबोधोज्ज्वलः ॥

संन्यासाह्वयकूरचित्ततमसोऽन्धाव्यक्तदानाञ्जनं
चक्षुस्स्यापितचित्स्वरूपपुरतस्तत्तद्विपथाङ्कुलम् ।
बाह्याभ्यन्तरशोभितं दृढतरं किंचित्प्रपथाच्छिदा-
त्तत्सम्बोधपरात्परं गुरुपदं सत्यं स्मरं भावये ॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं निर्मितं येन तस्मै श्रीगुरवे नमः ॥
हृदयकुहरमध्ये भाति यच्चित्स्वरूपं
सकलभुवनबीजं कारणं ब्रह्मतत्त्वम् ।
प्रणवमयमचिन्त्यं प्राणिनां प्राणसंस्थं
प्रकृतिविलयरूपं देवदेवं नमामि ॥

* * * *

गुरुरुवाच—

नित्यं सर्वगतं परात्परतरं सूक्ष्मं शिवं केवलं
ज्ञानानन्दमयं निजं त्वनुपमं षट्त्रिंशतत्त्वाधिकम् ।
एतद्धृदये प्रवर्तति सदा नैर्गुण्यमन्तस्स्थितं
नादं निश्चलमादिमध्यरहितं नित्योत्सवं मुक्तये ॥

* * * *

**Colophon:**

इति श्रीमन्महाभक्तमाहेश्वरपादारविन्दमकरन्दपानमिलिन्दमानसे(न)श्री-मद्विरिमठमलीयभगीचन्द्रशेखरान्वयहस्ताम्बुजसंभूते(न)भक्तुलपेरुकाह्वयकरु-णाकलितसंन्यासनाम्ना प्रणीते प्रणवसारे प्रथमः प्रकरणः ॥

**End:**

स्थूलं च सूक्ष्मकं चैव कारणं निर्मलाङ्गकम् ।
आनन्दं चिन्मयं चैव चिद्रूपं शुद्धमे वपुः ॥
अष्टाङ्गं सर्वदेहानामष्टात्मं निर्मितं भवेत् ।

* * * *

पृथ्वीबीजं तथा मांसमापो द्रव्यं सुरामयम् ।
आत्मबीजसमायुक्तं जीवाजीवेन भक्षितः ॥

* * * *

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
एते गर्भगतं चैव तस्मै श्रीगुरवे नमः ॥

**Colophon:**

इति श्रीमन्महाभक्तमाहेश्वरपादारविन्दमकरन्दपानमिलिन्दमानसे(स) श्रीमद्गिरिमठमलियभगिचन्द्रशेखरान्वयहस्ताम्बुजसंभूते(त) भकुलुवेरुकाद्वयकरुणाकलितसंन्यासनामप्रणीतप्रणवसारे चतुर्थप्रकरणः ॥

---

(b) जीवेश्वरसन्धानक्रमः, आन्ध्रटीकासहितः.

JĪVEŚVARASANDHĀNAKRAMAḤ WITH TELUGU MEANING.

Foll. 16a—19a. Fol. 19b is left blank.

Explains according to Laiṅgāyatikas the nature and characteristics of Īśvara or God and Jīva or the individual soul and the way in which Jīva reaches and realises Īśvara: probably by Sannyāsa, disciple of Vēruka and patronised by Vallabharaya.

Complete.

**Beginning:**

श्रीमद्गुरोः पादसमाश्रितं वेदान्तसारानुसुभावितन्नम् ।
श्रीलिङ्गरूपानु सभावितश्चं दासानुसद्रास भजे भजेऽहम् ॥
श्रीशम्भुपादाब्जसमावितद्वं श्रीचिन्मयानन्दसमावितन्नम् ।
सद्भक्तपादाब्जससेवितन्नं दासानुतद्दासमजे भजेऽहम् ॥

* * * *

जीवेश्वरसम्बोधनं वक्ष्यामि—सुखदुःख(!) बुद्धाक्रिये । देहकर्ता । यथातथा इष्टविषये बुद्धिदुःखशब्दस्पर्शरूपरसगन्धसुखदुःखहेतवः । पुण्यपापकर्मानुसारे(ण) भूत्वा प्राप्तशरीरसन्धियोगवप्राप्तशरीरसन्धियोगमेव कुर्वाणो यथा दृश्यते तथापु(उ)पहत्य जीव इत्युच्यते ।

**End:**

नादं किंकिणि चौदलं च वृत्तं षट्पत्रवेणोर्तुलं
मध्यं दार्थियषोपपत्रदशकं द्वादश्यपत्रं तथा(!) ।
गोक्षुरवान्तरानालषोडशदलं द्वे पत्रकं गोल्कं
षष्ठाकृतिगुरुरिष्टलिङ्गचसवः कुर्यात्सदा मङ्गलम्(!) ॥

* * * *

**Colophon:**

इति श्रीगिरिमठमलियाभगिनिलयचन्द्रशेखराह्वयगुरुव(क)रजातपेरुकाद्वयकरुणाकलितश्रीबसवराजेन्द्रादिमप्रमकोट्यापादसेवितगुरुलिङ्गजङ्गमपादार-

विन्दमकरन्दपानानन्दपरवश संन्यासिलिङ्ग भारिलिङ्ग प्राणिलिङ्ग ध्यानिलिङ्ग गम्भीरलिङ्ग सन्धानिलिङ्ग निरीक्षण गलसप्पद्दुल्लु वल्लभराय प्रभुतेन्द्राज्ञाप्रसादं शिरसा धृत्वा जीवेश्वरसन्धानक्रमं संपूर्णम् ॥

---

(c) యోగవిషయాలు.

YŌGAVIṢAYĀLU.

Foll. 20—28.

For description and extracts see the Telugu part of this Triennial Catalogue. Foll. 29—30a contain some Telugu Padyas. Fol. 30b is left blank. Foll. 31—34a contain some Telugu Padyas. Fol. 34b is left blank.

---

R. No. 2646.

Palm-leaf. 15¾ × 1½ inches. Foll. 81. Lines, 9 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Prērōpa Subbayyagāru of Pōkēru, Tanuku taluk, Kistna district.

(a) चम्पूरामायणव्याख्यानम्—विद्वत्कौतूहलम्.

CAMPŪRĀMĀYAṆAVYĀKHYĀNAM: VIDVATKAUTŪHALAM.

Foll. 1a—76b.

By Kōḍamarti Kāmēśvarapaṇḍita. Same work as that described under R. No. 1671 ante, wherein see for the end.

Breaks off in the Ayōdhyākāṇḍa.

**Beginning:**

श्रियोपविष्टवामोरुं दशबाहुं किरीटिनम् ।
महागणपतिं वन्दे सर्व . . . . श्वरः ॥

. . गङ्गाधरधीरवर्यतनुजो . . . . .
श्रीविघ्नेश्वरपादपद्मभजनेनावाप्तविद्यस्सुधीः ।
चम्पूसंज्ञितभोजराज . . . . टीकां शुभां
गम्भीरां च मही . . . मुदे निर्माति कामेश्वरः ॥

कामेश्वरकविस्सोऽयं करोति विदुषां मुदे ।
विद्वत्कौतूहलाभिख्यां व्याख्यां पितुरनुग्रहात् ॥

श्रीकामेश्वरपण्डितः क्व महिता श्रीभोजभर्तुः कृतिः
क्वेयं चेत्यतिसंशयाकुलितहृदो मा भूत यूयं बुधाः ।

. . . . . शास्त्रवारणपटुर्व्याख्यासमर्थो सदा
श्रीविश्वेश्वरलोचनाञ्चलकृपावीक्षास्पदं कुर्वते ॥

अथ तत्रभवान् कवीश्वर . . . . महितमणिमालामलमरीचिम . . . चरणाम्भोजो भोजमहाराजः सत्यपो

*   *   *   *

आदावाशीर्वादरूपं मङ्गलं करोति—लक्ष्मीमिति । अत्र देवतावाचकस्य लक्ष्मीशब्दस्य प्रयोगाद्गणगणादिशुद्धिरध्येतृणां

*   *   *   *

शाखासु नवपल्लवो राजते तदा वेदान्तेषु भासमानमित्यर्थः । रूपकद्वयस्य सङ्करः । प्रवालो वल्लकीदण्डे विद्रुमे नवपल्लव इति विश्वः । अत्राङ्घ्रिद्वये प्रवालत्वनिरूपणेन कोमलत्वं . . . . . त्वं च सूचितम् । तदेवाह—अम्बुरुहेति । अम्बुनि रु(रो)हतीत्यम्बुरुहम् ।

**Colophon:**

*   *   *   *

इति श्रीमदखिलविद्यासम्प्रदायप्रवर्तकसाहित्यपदसार्वभौमश्रीकोण्डमर्तिवंशरत्नाकरसुधाकरब्रह्मान्तर्वाणीतनूभवस्य विश्वजनीनविद्यावैशद्यस्य विद्वन्मणेर्मल्लेश्वरपण्डितस्य सूनोर्गङ्गाधरवीरस्य तनूभवेन वेङ्कटेश्वरभागिनेयेन कामेश्वरेण विश्वेश्वरसाक्षान्निरीक्षणलब्धविद्येन विरचितायां चम्पूरामायणव्याख्यायां विद्वत्कौतूहलसमाख्यायां बालकाण्डः ॥

निष्प्रत्यूहं गणाधीशपदाम्भोजं भजाम्यहम् ।
यत्प्रसादान्महेशाद्या निर्विघ्नं लब्धसिद्धयः ॥

गच्छेति । भुज्यतेऽनेनेति भुजः बाहुः । टापं चैव हलन्तानामिति टाप् । दोर्दोषा च भुजाविति द्विरूपकोशः ।

---

(b) नामलिङ्गानुशासनव्याख्या—अमरकोशपदविवृतिः.

NĀMALIṄGĀNUŚĀSANAVYĀKHYĀ : AMARAKŌŚAPADAVIVṚTIḤ.

Foll. 77*a*—81*a*. Fol. 81*b* is left blank.

Same work as that described under No. 1697 of the D.C.S. MSS., Vol. III.

Contains the Bhū-and the Pura-Vargas complete in the second Kāṇḍa.

## R. No. 2647.

Palm-leaf. 16⅞ × 1½ inches. Foll. 46. Lines, 9 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Prērōpa Subbayyagāru of Pōkōru, Kistna district.

### जातकचिन्तामणिः.
### JĀTAKACINTĀMAṆIḤ.

Foll. 1a—40b.

A treatise explaining the nature of the influence exerted by the planets on the fortune of a person in their respective periods and sub-periods: by Āluṭūri Ēkāmra.

Incomplete.

**Beginning:**

श्रीमूर्तिरूपिणं देवं त्रयीवंद्यं शुभावहम् ।
त्रिगुणातीतमव्यक्तं वन्दे सूर्यं सदा विभुम् ॥
रव्यादिग्रहचारेण वच्म्यहं तु दशाफलम् ॥

रव्यादिग्रहाणां दशावर्षनिर्णयः—

इनशशिकुजराहु (. . .) भास्करादिक्रमेण ॥

ग्रन्थान्तरे—

षट्सूर्यो दशमश्चन्द्रस्सप्तसङ्ख्या धरासुतः ।
राहोरष्टादशश्चैव गुरोः षोडश वत्सराः ॥
एकोनविंशतिस्सौरेः बुधस्सप्तदशस्तथा ।
केतोश्च सप्तवर्षाणि भृगोर्विंशति च क्रमात् ॥

ग्रहाणां भुक्त्यानयनम्—

स्वदशां त्रिगुणीकृत्य तद्दशासु हतं पुनः ।
खाग्निना विभजेन्मासं शेषस्तु दिवसादयः ॥

ग्रहाणां दशाफलनिर्णयः—

होरासारे—संज्ञाध्याये यस्य यद्द्रव्यमुक्तं
कर्माजी(जी)वे यस्य यच्चोपदिष्टम् ।
भावस्थानान्यायोगोद्भवं च
तत्तत्सर्वं तस्य योज्यं दशायाम् ॥

**End:**

स्त्रीसौख्यं पुत्रवृद्धिं च यत्र कार्यार्थसिद्धिदः ।
गृहे कल्याणवृद्धिं च चतुष्पाज्जीवलाभकृत् ॥
पश्चिमां दिशमाश्रित्य प्रयाणं राजदर्शनम् ।
महाराजप्रसादेन इष्टसिद्धिर्भविष्यति ॥
दायेशाष्टमराशौ वा व्यये वा पापसंयुते ।
स्त्रीविवादं दारनाशं मानभङ्गं तथैव च ॥
आत्मभूपाद्भयप्राप्तिं स्थाननाशं तथैव च ।
द्वितीयसप्तमस्थे वा ह्यपमृत्युर्भविष्यति ॥
तद्दोषपरिहारार्थं मृत्युञ्जयजपं चरेत् ।
छागदानं प्रकुर्वीत सर्वसम्पत्प्रदायकम् ॥

**Colophon:**

श्रीमदालुट्टूर्यॆकामदेवज्ञकृतहोराप्रयुक्तसर्वशास्त्रसंग्रहजातकचिन्तामणौ शुक्रदशान्तर्दशाफलम् ॥

Foll. 40b—42b contain Daśāntarbhuktibhēda, 43a and 43b Rōgōtpattinirṇaya, and 44 to 46 Ṣaṣṭhāmśanirṇaya.

---

R. No. **2648.**

Palm-leaf. 18 × 1¼ inches. Foll. 197. Lines, 7 in a page. Telugu Good.

Presented in 1917-18 by M.R.Ry. Prava Sūrayya Śāstrigāru of Penumanchili, Narasapur taluk, Kistna district.

Foll. 61—63 are left blank.

स्मृतिकौमुदी.

SMṚTIKAUMUDĪ.

Same work as that described under No. 2772 of the D.C.S. MSS., Vol. V.

Contains the Ācāra incomplete.

---

R. No. **2649.**

Palm-leaf. 17 × 1¼ inches. Foll. 114. Lines, 6 in a page. Telugu. Injured.

Presented in 1917-18 by M.R.Ry. Prava Sūrayya Śāstrigāru of Penumanchili, Narasapur taluk, Kistna district.

(a) प्रातिशाख्यविवरणम्—त्रिभाष्यरत्नम्.
PRĀTIŚĀKHYAVIVARAṆAM: TRIBHĀṢYARATNAM.

Foll. 1a—81b. Fol. 82 is left blank.

Same work as that described under No. 931 of the D.C.S. MSS., Vol. II.

Complete.

Name of the copyist: Suśarla Subrahmaṇya of Kāśi. Date of copying: Thursday, the 12th day of the bright fortnight of the Āṣāḍha month in the year Jaya.

---

(b) शमानसन्धिव्याख्यानम्—पददर्पणम्.
ŚAMĀNASANDHIVYĀKHYĀNAM: PADADARPAṆAM.

Foll. 83a—95a.

Same work as that described under No. 981 of the D.C.S. MSS., Vol. II, but with different colophon.

Complete.

**Colophon:**

इति श्रीमद्भिर्महानुभावैर्विरचिते पददर्पणे शमानसन्ध्या(न्धि)व्याख्यायामध्यायस्समाप्तः ॥

---

(c) अनिङ्ग्यान्तम्, सव्याख्यानम्.
ANIṄGYĀNTAM WITH COMMENTARY.

Foll. 95a—105a.

Same work as that described under R. No. 485(b) ante, but with additional stanzas in the beginning and with a different colophon.

Complete.

**Beginning:**

गजदाबास्त्रयो वर्णा रादयश्चैव भादयः ।
यादिवान्तो हकारश्च शसौ तावन्यसंयुतौ ॥

एवं लुप्तविसर्गाणि पदान्यकारादिक्रमेण सम्यक् लक्षयित्वा तेनैव क्रमेण पदकाले एकारान्तादिपदानां व्यक्तिवेलुकु(विलक्षण)नामकेन ग्रन्थेन लक्षयितुमुपक्रमते—

**Colophon:**

इति श्रीमन्महर्षिकृतौ पददर्पणे व्यक्तिवेलुक(विलक्षण)नामैकाध्यायस्समाप्तः ॥

(d) नपरतपरम्, सव्याख्यानम्.

NAPARATAPARAM WITH COMMENTARY.

Foll. 105b—114a. Fol. 114b is left blank.

Similar to the work described under No. 918 of the D.C.S. MSS. Vol. II. The commentary is called Padadarpaṇa.

Complete.

Name of the copyist: Susarla Subrahmaṇya of Kāśī. Date of copying: Thursday, the 15th day of the bright fortnight of the Āśvija month in the year Jaya.

**Beginning:**

इदमकारादिवर्णानुक्रमेण एकारैकारान्तानि पदानि सम्यग्गृहयित्वा अकारादिवर्णानुसारेणैव परिशिष्टानि नकारान्तानि पदानि नतपराख्येन ग्रन्थेन लक्षयितुं प्रारभते—अथ यजुस्संहितायां च छ ज त थ द न म ल पराः तत्तत्स्थानानुनासिकाः पदान्ताः पदकाले नकारा दृश्यन्ते ।

**End:**

हिंसीद्धिनुयाद्धन्याद्रुद्धविष्मद्धविष्कृती । एतेष्वन्त्यानुनासिको नकारपरस्सन् पदकाले तकारमापद्यते । यथा —मा मा हिंसीन्निषसाद । प्र हिणुयान्निरृतिम् । न निहन्यान्न लोहितम् । परं हन्नाम । हविष्मन्निधनं पूर्वम् । हविष्कृन्निधनमुत्तरम् ॥

**Colophon:**

इति श्रीमत्पुरातनमहानुभावर्षिकृतौ पददर्पणे नकारपराख्याध्यायस्समाप्तः ॥

---

R. No. 2650.

Palm-leaf. 17 × 1¾ inches. Foll. 75. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1917–18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

(a) प्रायश्चित्तशतद्वयी

PRĀYAŚCITTAŚATADVAYI.

Foll. 1a—12b.

Same work as that described under No. 1080 of the D.C.S. MSS., Vol. II.

Complete in five Paṭalas.

At the end there are a few stanzas dealing with Dharmaśāstra.

---

(b) प्रायश्चित्तशतद्वयीव्याख्या—प्रयोगप्रदीपिका.

PRĀYAŚCITTAŚATADVAYĪVYĀKHYĀ: PRAYŌGA-PRADĪPIKĀ.

Foll. 13a—63b.

Same work as that described under R. No. 1858 ante.

Complete.

---

(c) आपस्तम्बश्रौतप्रायश्चित्तम्.

ĀPASTAMBAŚRAUTAPRĀYAŚCITTAM.

Foll. 63b—74a. Foll. 74a—75b contain Śrautaviṣayavacanas.

Similar to the work described under No. 1082 of the D.C.S. MSS., Vol. II. The work is attributed to Kēśava.

Complete.

**Beginning:**

यस्य कस्य चित्पिता पितामहो वा अग्रजो वाहिताग्निर्न भवति, तस्य तदनुमत्या आधानकरणेऽपि न दोषः । एवमेव कन्यापरिवेदनेऽपि दोषतदपवादौ द्रष्टव्यौ । आधानाधिकारिणि ज्येष्ठे पितामहे वा स्थिते तदनुमत्या आधाने न दोष इति सर्वं पराशरमाधवीये प्रपञ्चितम् । न स्त्रजापयस्कन्दने प्रायश्चित्तम् ।

**End:**

ब्रह्मणो मनसा ध्यानं पुनरुक्तेः प्रयोजनम् ।
त्रयाणां सवनानामप्येतत्प्राक् सवनाहुतेः ॥

समाप्तानि सोमप्रायश्चित्तानि ॥

सवनीयपशोः स्याच्चेत्पूतिगन्धस्समुत्सृजेत् ।
तमेवोष्णोदकैर्यद्वा प्रक्षाल्याजेन सर्पिषा ॥
पुनश्च श्रपयित्वैव तेनैव हविषा चरेत् ।
स्याच्चेत्तत्रापि दुर्गन्धस्तदा पश्वन्तरं भवेत् ॥
अग्निं नरादिग्निष्व्यादिदेवाङ्गनमगन्मनः ।
त्रयस्त्रिंशदादिपश्च स्युर्महात्रस्कानमूत्रयम् ॥

**Colophon:**

इति केशवीयं समाप्तम् ॥

R. No. 2651.

Palm-leaf. 18¾ × 1½ inches. Foll. 35. Lines, 6 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

Fol. 35*b* is left blank.

सामगणप्रयोगसरणिः.

SĀMAGAṆAPRAYŌGASARAṆIḤ.

Same work as that described under R. No. 2413(*a*) ante, but with introductory stanzas in the beginning and with colophon as given below.

Contains the Jyōtiṣṭōma complete.

Name of the copyist: Mukkavira Rāmacandra. Date of copying: Sunday, the 8th day of the bright fortnight of the Bhādrapada month in the year Saumya.

**Beginning:**

नत्वा पौरुषवारणेन्द्रशवलं धामानिशं सेवता-
मन्तर्ध्वान्तविभेदने पटुतरं शोणाब्जनालोपमम् ।
वाग्देवीं कमलासनां कमलभूवक्त्रान्तराले स्थितां
कुर्वे सामगणप्रयोगसरणिं कल्पार्थसारानुगाम् ॥

**Colophon:**

ज्योतिष्टोमस्समाप्तः ॥

---

R. No. 2652.

Palm-leaf. 17 × 1⅞ inches. Foll. 134. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1917–18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

Wants 20 foll. in the beginning.

आपस्तम्बश्रौतसूत्रभाष्यवृत्तिः.

ĀPASTAMBAŚRAUTASŪTRABHĀṢYAVṚTTIḤ.

By Kauśikarāma. Same work as that described under No. 1071 of the D.C.S. MSS., Vol. II.

Contains the Praśnas 10, 11, 12 and 13; but in the 10th Praśna Paṭalas 1, 2, beginning of 3 and 4 to 6 are wanting.

## R. No. 2653.

Palm-leaf. 15⅞ × 1¼ inches. Foll. 65. Lines, 6 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Sōmañci Yajñēsvara Sōmayājulugāru of Narasapur, Kistna district.

आपस्तम्बश्रौतसूत्रभाष्यम्.

ĀPASTAMBAŚRAUTASŪTRABHĀṢYAM.

By Kapardisvāmin. Same work as that described under Nos. R. 975(*b*) ante and 1067 of the D.C.S. MSS., Vol. II.

Contains from the second Paṭala of the 16th Praśna to the end of the 17th Praśna.

Date of copying: Friday, the 1st day of the dark fortnight of the Caitra month in the year Vijaya.

**Beginning:**

अग्निं चेष्यमाणः । अग्निरितीष्टकाकृतिस्थण्डिलमुच्यते । तत्संयोगात्क्रतुरप्यग्निरित्युच्यते । तं चेष्यमाणः स्थण्डिलाग्निगुणकेन क्रतुना यक्ष्यमाणो भवतीत्यर्थः । स च सोमार्थः, सोमाङ्गैरनुषङ्गवचनात् । तस्याग्नेरुपसदादिभिर्दीक्षादिभिश्च ।

* * * * *

**Colophon:**

इत्यापस्तम्बसूत्रविवरणे कपर्दिस्वामिभाष्ये षोडशप्रश्ने दशमः पटलः ॥

---

## R. No. 2654.

Palm-leaf. 14⅛ × 1⅜ inches. Foll. 26. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1917–18 by M.R.Ry. Sōmañci Yajñēsvara Sōmayājulugāru of Narasapur, Kistna district.

आपस्तम्बश्रौतसूत्रभाष्यम्.

ĀPASTAMBAŚRAUTASŪTRABHĀṢYAM.

By Dhūrtasvāmin. Same work as that described under No. 1060 of the D.C.S. MSS., Vol. II.

Contains the Praśnas two and three, the last of which breaks off in the fourth Paṭala.

---

## R. No. 2655.

Palm-leaf. 16 × 1⅜ inches. Foll. 37. Lines, 7 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Sōmañci Yajñēsvara Sōmayājulugāru of Narasapur, Kistna district.

(a) अतिरात्रप्रयोगः.

ATIRĀTRAPRAYŌGAḤ.

Foll. 1a—15b.

Similar to the work described under R. No. 60(a) ante.

Complete, but wants the beginning.

Name of the copyist: Sōmul Lakṣmipati Sōmayāji. Date of copying: 2nd day of the bright fortnight of the Āśvayuja month in the year Virōdhikṛt.

**Beginning:**

विश्वरूपा ज्योतिर्गानानि न सन्ति। भूर्गानानि च। एतदनुपपन्नं, प्रकृतिवद्विकृतिः कार्येति वचनात्। अग्निष्टोमः सर्वेषां क्रतूनां प्रकृतिरिति चेत् तन्नानुपपन्नं भवति, अग्निष्टोमात्सहचराणि ह्येतानि विश्वरूपा ज्योतींषीति वचनात्। प्राक् स्तोमविमोकात्समानम्। अथापरया द्वारा निष्क्रम्याग्रेण प्राग्वंशं प्राङ्मुखः स्थित्वा पात माग्न[ये] इत्यादियजमानोपहवान्तं कृत्वा।

**End:**

ऋतस्य त्वेति स्तोमविमोकः। ततो यजमानवाचनम्। तन्तवे मा ज्योतिषेत्यादि उदवसानीयेष्टिपर्यन्तं समानम्॥

**Colophon:**

अतिरात्रप्रयोगः समाप्तः॥

---

(b) सर्वतोमुखसामानि.

SARVATŌMUKHASĀMĀNI.

Foll. 16a—37b.

Same work as that described under R. No. 2293 ante.

Contains the Uttaravihāra and Paścimavihāra only.

---

R. No. 2656.

Palm-leaf. 14 × 1¼ inches. Foll. 131. Lines, 5 in a page. Telugu Injured.

Presented in 1917-18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

आह्निकम्.

ĀHNIKAM.

Similar to the work described under No. 2822 of the D.C.S. MSS., Vol. V.

Complete.

**Beginning:**

अथातो धर्मान् वक्ष्याम्याचारादेव धर्मार्थकाममोक्षान् लभते । ब्राह्मे मुहूर्ते दक्षिणाङ्गेनोत्थाय विष्णुचिन्तनपूर्वं . . . . . . . . . . .

समुद्रमेखले देवि पर्वतस्तनमण्डिते ।

विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

इति भूमिं प्रार्थ्योत्थाय पादौ प्रक्षाल्याचम्येष्टदेवताध्यानं कृत्वा सोपानतो नैरृत्यां दिशि दूरादावसथ्यान्मूत्रपुरीषे विसृजेत् ॥

**End:**

विधिकर्मानुष्ठानं कुर्यात । एवं वर्णाश्रमोक्तधर्मान् कृत्वा विष्ण्वर्पणं यः करोति स मुक्तो भवति । तेन विष्णुराराध्यते नान्यत्तत्रोपकारक इत्येतानि महर्षिप्रोक्तानि यथामति मया लिखितानि सत्पुरुषाः क्षन्तुमर्हन्त्यपशब्दं परिहार्य युक्तमेव गृह्णीयात । अनेन विधिना यः करोति पुनर्जन्मसंसारं न याति । प्रमादादकृतं चेन्नरकान् स गच्छति । यत्र क्रियामध्ये विष्णुस्मरणपूर्वकं चेद्धर्मार्थकाममोक्षाणां सिद्धिर्भवति ॥

---

## R. No. 2657.

Palm-leaf. 15 × 1¾ inches. Foll. 62. Lines, 7 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

Fol. 27*b* is left blank.

**पञ्चतन्त्रम्.**

PAÑCATANTRAM.

By Viṣṇuśarman. Same work as that described under No. 12184 of the D.C.S. MSS., Vol. XXI, but with different readings in the beginning and in the end.

Complete.

Name of the copyist: Rāma who wrote the MS. for Sōkuna Sōmayājulu. Date of copying: Wednesday, the 12th day of the dark fortnight of the Bhādrapada month in the year Plavaṅga.

**Beginning:**

एक एव हि शेषोऽयं भरणभ्रिरणक्षमः ॥

सूते सूकरयुवतिस्सुतशतमत्यन्तदुःखगं झटिति ।

करिणी चिराय सूते नृपसुतशतलालितं कलभम् ॥

एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना ।
शोभते तत्कुलं सर्वं चन्द्रेणैव तु शर्वरी ॥

* * * *

(यौवनं)धनसम्पत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥

इति सुदर्शनो नाम राजा . . . . . . . नित्यमुन्मार्गवर्तिनां नीतिशास्त्रोपदेशेन पुनर्जन्म करिष्यतीति राज्ञैवमुक्ते सति अत्रान्तरे विष्णुशर्मा नाम ब्राह्मणः सकलनीतिशास्त्रतत्त्वज्ञो बृहस्पतिरिवोत्थाय प्रतिज्ञातवान् ।

* * * *

**Colophon:**

इति पञ्चतन्त्रे मित्रभेदो नाम प्रथमं तन्त्रं समाप्तम् ॥

**End:**

अतोऽहं ब्रवीमि—कुदृष्टं कुपरामृष्टमिति । तस्मात् त्वमपि तादृश एव मूर्खः ।

प्रज्ञाद . . . . नश्च भाग्यहीनश्च यः पुमान् ।
वितथाश्चिन्तनास्तस्य भस्मन्याहुतयो यथा ॥

तथा च सहसा विदधीत न क्रियामिति श्लोकोऽप्यूहनीयः। इति वदन्तौ दम्पती यथासुखमनुभवन्तौ तिष्ठतः ॥

**Colophon:**

इति श्रीविष्णुशर्मकृतौ पञ्चतन्त्राख्ये राजनीतिसिद्धिप्रदे असमीक्ष्यकारित्वं नाम पञ्चमं तन्त्रं समाप्तम् ॥

य इदं पञ्चतन्त्राख्यं शृणोति पठतीव वा ।
कार्याकार्यविचारज्ञः स भवेच्छत्रुसंहरः ॥

---

R. No. 2658.

Palm-leaf. 15⅜ × 1⅝ inches. Foll. 180. Lines, 6 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Vadlamannāti Vēṅkaṭarāmayya-gāru of Masulipatam, Kistna district.

Foll. 62—64 are wanting.

अध्यात्मरामायणम्.

ADHYĀTMARĀMĀYAṆAM.

Same work as that described under No. 2153 of the D.C.S. MSS., Vol. IV, Part I, but with additional stanzas in the beginning as given below.

Complete in seven Kāṇḍas.

Copied by Mādirāju Rāmayya for Mannāṭi Vēṅkaṭa Sōmayāji from the MS. of Bālāyapalli Balakṛṣṇa Śāstri. The first six Kāṇḍas were copied from Wednesday, the 3rd day of the bright fortnight of the Kārttika month, to Thursday, the 7th day of the dark fortnight of the Posya month. The seventh, i.e., the Uttarakāṇḍa, was copied on Monday, the 3rd of the bright fortnight of the Jyēṣṭha month in the year Plava.

**Beginning:**

विनायकं नायकमौक्तिकं त्रयीहारावलेरावलितं भुजङ्गमैः ।
पिनाकिनं नाकिजनेड्यमंहसां निवारणं वारणवक्त्रमाश्रये ॥

वन्दे राममप्रमेयमाद्यममलं वन्देऽखिलव्यापकं
वन्दे घोरनिशाचराहिविवरं(गरुडं)वन्दे भवाब्धानिलम् ।
वन्दे सानुजमप्रतर्क्यविभवं वन्दे विधीन्द्रार्चितं
वन्दे भूमिसुतासमेतमनिशं वन्दे(ऽव्ययं) राघवम् ॥

रामोऽयं जन इत्येवं रामोऽहमिति धीर्न चेत् ।
सरामोहमिति ज्ञातुं सरामस्स जनान्तिकम् ॥

---

R. No. **2659.**

Palm-leaf. 17 × 1½ inches. Foll. 124. Lines, 8 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Vadlamannāṭi Vēṅkaṭarāmayya-gāru of Masulipatam, Kistna district.

Fol. 122*b* is left blank.

बृहन्नारदीयपुराणम्.

BṚHANNĀRADĪYAPURĀṆAM.

Foll. 1*a*—122*a*. Fol. 122*b* is left blank.

Same work as that described under No. 2139 of the D.C.S. MSS., Vol. IV, Part I, but with different introductory stanzas in the beginning.

Contains 1—38 Adhyāyas complete and not 1—36 Adhyāyas as stated in the colophon, which is apparently wrong.

एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना ।
शोभते तत्कुलं सर्वं चन्द्रेणैव तु शर्वरी ॥

* * * *

(यौवनं)धनसम्पत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥

इति सुदर्शनो नाम राजा . . . . . . . . नित्यमुन्मार्गवर्तिनां नीतिशास्त्रोपदेशेन पुनर्जन्म करिष्यतीति राज्ञैवमुक्ते सति अत्रान्तरे विष्णुशर्मा नाम ब्राह्मणः सकलनीतिशास्त्रतत्त्वज्ञो बृहस्पतिरिवोत्थाय प्रतिज्ञातवान् ।

* * * *

**Colophon:**

इति पञ्चतन्त्रे मित्रभेदो नाम प्रथमं तन्त्रं समाप्तम् ॥

**End:**

अतोऽहं ब्रवीमि—कुदृष्टं कुपरामृष्टमिति । तस्मात् त्वमपि तादृश एव मूर्खः ।

प्रज्ञाद . . . . नश्च भाग्यहीनश्च यः पुमान् ।
वितथाश्चिन्तनास्तस्य भस्मन्याहुतयो यथा ॥

तथा च सहसा विदधीत न क्रियामिति श्लोकोऽप्यूहनीयः । इति वदन्तौ दम्पती यथासुखमनुभवन्तौ स्थितः ॥

**Colophon:**

इति श्रीविष्णुशर्मकृतौ पञ्चतन्त्राख्ये राजनीतिसिद्धिप्रदे असमीक्ष्यकारित्वं नाम पञ्चमं तन्त्रं समाप्तम् ॥

य इदं पञ्चतन्त्राख्यं शृणोति पठतीव वा ।
कार्याकार्यविचारज्ञः स भवच्छत्रुसंहरः ॥

---

R. No. 2658.

Palm-leaf. 15⅞ × 1⅝ inches. Foll. 180. Lines, 6 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭarāmayya-gāru of Masulipatam, Kistna district.

Foll. 62—64 are wanting.

अध्यात्मरामायणम्.

ADHYĀTMARĀMĀYAṆAM.

Same work as that described under No. 2153 of the D.C.S. MSS., Vol. IV, Part I, but with additional stanzas in the beginning as given below.

Complete in seven Kāṇḍas.

Copied by Mādirāju Rāmayya for Mannāṭi Vēṅkaṭa Sōmayāji from the MS. of Bālāyapalli Bālakṛṣṇa Śāstri. The first six Kāṇḍas were copied from Wednesday, the 3rd day of the bright fortnight of the Kārttika month, to Thursday, the 7th day of the dark fortnight of the Puṣya month. The seventh, i.e., the Uttarakāṇḍa, was copied on Monday, the 3rd of the bright fortnight of the Jyēṣṭha month in the year Plava.

**Beginning:**

विनायकं नायकमौक्तिकं त्रयीहारावलेरावलितं भुजङ्गमैः ।
पिनाकिजं नाकिजनेब्धमंहसां निवारणं वारणवक्त्रमाश्रये ॥
वन्दे राममनेयमाद्यममलं वन्देऽखिलव्यापकं
वन्दे घोरनिशाचराहिविवरं(गरुडं)वन्दे भवाभ्रानिलम् ।
वन्दे सानुजमप्रतर्क्यविभवं वन्दे विधीन्द्रार्चितं
वन्दे भूमिसुतासमेतमनिशं वन्दे(ऽव्ययं) राघवम् ॥
रामोऽयं जन इत्येवं रामोऽहमिति धीर्न चेत् ।
सरामोहमिति ज्ञातुं सरामस्स जनान्तिकम् ॥

---

R. No. **2659.**

Palm-leaf. 17 × 1¾ inches. Foll. 124. Lines, 8 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Vadlamannāṭi Vēṅkaṭarāmayya-gāru of Masulipatam, Kistna district.

Fol. 122*b* is left blank.

बृहन्नारदीयपुराणम्.

BṚHANNĀRADĪYAPURĀṆAM.

Foll. 1*a*—122*a*. Fol. 122*b* is left blank.

Same work as that described under No. 2139 of the D.C.S. MSS., Vol. IV, Part I, but with different introductory stanzas in the beginning.

Contains 1—38 Adhyāyas complete and not 1—36 Adhyāyas as stated in the colophon, which is apparently wrong.

**Beginning:**

वन्दे वृन्दावनासीनमिन्दिरानन्दमन्दिरम् ।
उपेन्द्रं सान्द्रकारुण्यं पूर्णानन्दप्रभुं विभुम् ॥
ब्रह्मविष्णुमहेशाख्या यस्यांशा लोकसाधकाः ।
तमादिदेवं चिद्रूपं विशुद्धं परमं भजे ॥

Foll. 123—124 contain some stanzas describing the greatness of the devotees of God.

R. No. 2660.

Palm-leaf. 17 × 1½ inches. Foll. 105. Lines, 7 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭaramayya-gāru of Masulipatam, Kistna district.

दशानिर्णयः.

DAŚANIRṆAYAḤ.

Foll. 11*b*, 36*b* and 59*b* are left blank.

Same work as that described under No. 3124 of D.C.S. MSS., Vol. VI, and with colophon.

Contains 1 to 7 Nirṇayas complete, but in different order.

**Colophon:**

इति हारीतकुलतिलकस्य सरस्वतीवल्लभपौत्रस्य श्रीरङ्गनाथसूनोर्वैदिकसार्वभौमापरनामधेयस्य श्रीवेङ्कटनाथस्य कृतिषु दशानिर्णय्यामेकादशीनिर्णयस्समाप्तः ॥

R. No. 2661.

Palm-leaf. 16¾ × 1½ inches. Foll. 73. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭarāmayya-gāru of Masulipatam, Kistna district.

अध्यात्मरामायणम्.

ADHYĀTMARĀMĀYAṆAM.

Same work as that described under No. 2153 of the D.C.S. MSS., Vol. IV, Part I, but with additional stanzas in the beginning as given below.

Contains up to the end of the fifth Sarga of the Araṇyakāṇḍa, the Ayōdhyākāṇḍa being in disorder.

विनायकं नायकमौक्तिकं त्रयीहारावलेरावलितं भुजङ्गैः ।
पिनाकिजं नाकिजनेड्यमंहसां निवारणं वारणवक्त्रमाश्रये ॥

वन्दे रामममेयमाद्यममलं वन्देऽखिलव्यापकं
वन्दे घोरनिशाचराहिगरुडं वन्दे भवाम्रानिलम् ।
वन्दे सानुजमप्रतर्क्यविभवं वन्दे विधीन्द्रार्चितं
वन्दे भूमिसुतासमेतमनिशं वन्देऽव्ययं राघवम् ॥

---

## R. No. 2662.

Palm-leaf. $18 \times 1\frac{1}{4}$ inches. Foll. 116. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1917–18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭarāmayya-gāru of Masulipatam, Kistna district.

Foll. 11*a*—18*b* are wanting.

श्रीशैलखण्ड: (स्कान्द).

ŚRIŚAILAKHAṆḌAḤ (SKĀNDA).

Same work as that described under No. 2319 of the D.C.S. MSS., Vol. IV, Part I.

Contains from the end of the 1st Adhyāya to the end of the 64th Adhyāya.

---

## R. No. 2663.

Palm-leaf. $18 \times 1\frac{3}{8}$ inches. Foll. 261. Lines, 8 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭarāmayya-gāru of Masulipatam, Kistna district.

ब्रह्मसूत्रभाष्यम्.

BRAHMASŪTRABHĀṢYAM.

By Rāmānujācārya. Same work as that described under No. 4943 of the D.C.S. MSS., Vol. X.

Complete.

Name of the copyist: Kandaḍai Rāmānujācārya. Date of copying: Tuesday (Jayavāra), the 2nd of the dark fortnight of the Kārttikai month in the year Ānanda.

---

## R. No. 2664.

Palm-leaf. $14\frac{3}{4} \times 1\frac{3}{8}$ inches. Foll. 35. Lines, 8 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭarāmayya-gāru of Masulipatam, Kistna district.

कूर्मपुराणम्.

KŪRMAPURĀṆAM.

Same work as that described under No. 2107 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Adhyāyas from 17 to 33 of Uparibhāga, but wants the beginning in the 17th Adhyāya.

---

R. No. 2665.

Palm-leaf. 16¾ × 1¾ inches. Foll. 206. Lines, 8—9 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭarāmayya-gāru of Masulipatam, Kistna district.

(a) नृसिंहपुराणम्.

NṚSIṀHAPURĀṆAM.

Foll. 1a—111b.

Same work as that described under No. 2345 of the D.C.S. MSS., Vol. IV, Part II, but with slight difference.

Contains one to nine Adhyāyas complete.

---

(b) पाद्मपुराणम्.

PĀDMAPURĀṆAM.

Foll. 112a—203a. Fol. 203b is left blank. Foll. 204—206a contain a small portion of Bṛhannāradīyapurāṇa. Fol. 206b is left blank.

Same work as that described under Nos. 2129 and 2130 of the D.C.S. MSS., Vol. IV, Part I, wherein see for the end.

Contains 1 to 68 Adhyāyas in the Pātālakhaṇḍa.

**Beginning:**

नारायणं नमस्कृत्य( . . )जयमुदीरयेत् ॥

व्यास उवाच—

ततः परं धराधारं पृष्टवान् भुजगेश्वरम् ।
वात्स्यायनो मुनिवरः कथामेतां सुनिर्मलाम् ॥
शेषाशेषकदा(था)त्वत्तो जगत्सर्गलयादिकौ ।
भूगोलश्च खगोलश्च ज्योतिश्चक्रविनिर्णयः ॥
महत्तत्त्वादिसृष्टीनां पृथक्कथ्यं विनिर्णयम् ।
नानाराजचरित्राणि कथितानि त्वया ननु ॥

* * * *

**Colophon :**

इति श्रीमत्पद्मपुराणे पातालखण्डे शेषवात्स्यायनसंवादे रघुनाथस्य भरतावासनन्दिग्रामदर्शनं नाम प्रथमोऽध्यायः ॥

---

R. No. **2666.**

Palm-leaf. 18 × 1⅜ inches. Foll. 152. Lines, 7 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭarāmayyagāru of Masulipatam, Kistna district.

भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

By Rāmānujācārya. Same work as that described under No. 2078 of the D.C.S. MSS., Vol. IV, Part I, but without the first invocatory stanza.

Breaks off in the 18th Adhyāya.

---

R. No. **2667.**

Palm-leaf. 14⅜ × 1⅜ inches. Foll. 139. Lines, 6 in a page. Telugu. Much injured.

Presented in 1917–18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭarāmayyagāru of Masulipatam, Kistna district.

विष्णुसहस्रनामभाष्यम्.

VIṢṆUSAHASRANĀMABHĀṢYAM.

By Parāśarabhaṭṭa, son of Śrīvatsāṅkamiśra. Same work as that described under No. 9073 of the D.C.S. MSS., Vol. XVII, but without the introductory stanzas and with the following stanzas in the beginning and in the end.

Complete.

Date of copying : Wednesday, the 7th day of the dark fortnight of the Bhādrapada month in the year Virōdhikṛt.

**Beginning :**

शुक्लाम्बरधरं( . . )विघ्नोपशान्तये ॥

पलायध्वं पलायध्वं रे रे वादिभुजङ्गमाः ।

श्रीपराशरभट्टार्यवैनतेयो विराजते ॥

**End:**

श्रीपराशरभट्टार्यः( . . . )मेऽस्तु भूयसे ॥
प्रमाणनखनिर्भिन्नवादिमत्तेभमस्तकः ।
राजते निगमान् गर्जन् श्रीपराशरकेसरी ॥
श्रीपराशरभट्टार्यस्तनोतु मम मङ्गलम् ।
योऽवतीर्णो हरेरंशो रङ्गनाथस्य भूतले ॥
सहस्रनामव्याख्यानं कः करोत्यपि पण्डितः ।
ऋते तं देवदेवांशं कूरान्वयसमुद्भवम् ॥
श्रीकृष्णः पद्मपत्राक्षो गृह्णातु मम वन्दनम् ।
यत्परं नामसाहस्रं कथितं लोकपावनम् ॥
श्रीपराशरभट्टार्यः करुणामयमानसः ।
श्रीरङ्गराजतद्रूपं पातु मामभयप्रदः ॥
महाभाष्यादिवेत्ता च वेदवेदान्तपारगः ।
यावत्पुराणवेदाङ्गदेशिकोऽर्हति वेदितुम् ॥
लेखनेनैव पुण्यं स्यादिति निश्चित्य मानसे ।
सहस्रनाम्नां लिखितं व्याख्यानं न तदर्थवित् ॥

---

R. No. **2668.**

Palm-leaf. 17 × 1½ inches. Foll. 201. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1917-18 by M.R.Ry. Vadlamannaṭi Vēnkaṭaramayya-gāru of Masulipatam, Kistna district.

कृष्णयजुस्संहिताभाष्यम्.

KṚṢṆAYAJUSSAMHITĀBHĀṢYAM.

By Mādhavācārya. Same work as that described under No. 106 of the D.C.S. MSS., Vol. I, Part II.

Breaks off in the 14th Anuvāka in the third Praśna of the first Kāṇḍa.

---

R. No. **2669.**

Palm-leaf. 18 × 1¾ inches. Foll 96. Lines, 8 in a page. Telugu. Good and half the portion in the end eaten by rat.

Presented in 1917-18 by M.R.Ry. Vadlamannaṭi Vēnkaṭaramayya-gāru of Masulipatam, Kistna district.

काशीखण्डः (स्कान्द).
KĀŚIKHAṆḌAḤ (SKĀNDA).

Same work as that described under No. 2291 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Adhyāyas 33 (which wants the beginning) and 34 to 64 and breaks off in the 65th Adhyāya.

---

R. No. 2670.

Palm-leaf. $12\frac{1}{4} \times 1\frac{3}{8}$ inches. Foll. 103. Lines, 7 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭarāmayya-gāru of Masulipatam, Kistna district.

भार्गवपुराणम्.
BHĀRGAVAPURĀṆAM.

Same work as that described under No. 2352 of the D.C.S. MSS., Vol. IV, Part I, but with two stanzas after the end, which are given below here.

Complete.

भूतं सरश्च महदाह्वयभट्टनाथ-
श्रीभक्तिसारकुलशेखरयोगिवाहान् ।
भक्ताङ्घ्रिरेणुपरकालयतीन्द्रमुख्यान्
श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम् ॥
कासारो भूतयोगी च महदाख्यः कृते युगे ।
भक्तिसारो विष्णुचित्तस्त्रेतायां कुलशेखरः ॥
भक्ताङ्घ्रिरेणुर्द्वापारे मुनिवाहः परान्तकः ।
पराङ्कुशो मिश्रकविः कलौ रामानुजो मुनिः ॥

---

R. No. 2671.

Palm-leaf. $16 \times 1\frac{3}{8}$ inches. Foll. 200. Lines, 5 in a page. Telugu. Sligtly injured.

Presented in 1917-18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭarāmayya-gāru of Masulipatam, Kistna district.

धर्मखण्डः (स्कान्द).
DHARMAKHAṆḌAḤ (SKĀNDA).

Same work as that described under No. 2299 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Adhyāyas 1 to 50 complete and 51 incomplete.

R. No. 2672.

Palm-leaf. 16¼ × 1½ inches. Foll. 71. Lines, 6 in a page. Telugu. Injured.

Presented in 1917-18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭarāmayyagāru of Masulipatam, Kistna district.

ब्रह्मोत्तरखण्डः (स्कान्द).

BRAHMŌTTARAKHAṆḌAḤ (SKĀNDA).

Same work as that described under No. 2307 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Adhyāyas 8 to 23 without beginning and end and in imperfect and disordered condition.

---

R. No. 2673.

Palm-leaf. 17¼ × 1½ inches. Foll. 333. Lines, 7 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭarāmayyagāru of Masulipatam, Kistna district.

महाभारतम्.

MAHĀBHĀRATAM.

Same work as that described under No. 1947 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Śāntiparvan complete.

Name of the copyist: Tāḍēpalli Nāganna. Date of transcription: Monday, the 2nd day of the bright fortnight of the Śrāvaṇa month in the year Sarvajit.

---

R. No. 2674.

Palm-leaf. 18 × 1⅝ inches. Foll. 225. Lines, 7 in a page. Telugu. Much injured.

Presented in 1917-18 by M.R.Ry. Sōmañci Yajñēśvara Sōmayājulugāru of Narasapur, Kistna district.

Fol. 62*b* is left blank.

दैवज्ञविलासः.

DAIVAJÑAVILĀSAḤ.

Same work as that described under R. No. 1641 ante, wherein see for the beginning, but without the introductory stanzas.

Contains the Ullāsas 78 to 103 complete, 104 incomplete, and 105 without beginning and end. There is some slight difference in the numbering of the Ullāsas from 82 to 100.

**End:**

**Colophon:**

इति कर्म पल्लयार्यविरचिते देवज्ञविलासनामनि ग्रन्थे कर्मखण्डे वधू-प्रवेशस्त्रीधर्मादिलक्षणं नाम त्र्युत्तरशततमोल्लासः ॥

गुरुः—

अग्निहोत्रोपचरणं जीवनं स्वस्य कर्मभिः ।
धर्मनारीषु तुल्येषु पर्ववर्जं रतिक्रिया ॥
देवपित्रतिथीनां च पूजा दीनानुकम्पनम् ।
श्रुतिस्मृत्यर्थसंस्थानं धर्मा ये गृहमेधिनः ॥

* * * *

विष्णुपुराणे—

श्राद्धे नियुक्ता भुक्त्वा वा भोजयित्वा नियुज्यते(?) ।
वपाया रेतसो गर्ते मज्जयत्यात्मनः पितॄन् ॥

---

## R. No. 2675

Palm-leaf. 17, 16¾ × 1¼ inches. Foll. 112 Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1917–18 by M.R.Ry. Vadlamannāṭi Veṅkaṭaramayya-gāru of Masulipatam, Kistna district.

(a) तर्कसङ्ग्रहदीपिकाव्याख्या—नीलकण्ठप्रकाशिका.

### TARKASAṄGRAHADĪPIKĀVYĀKHYĀ: NĪLAKAṆṬHA-PRAKĀŚIKĀ.

Foll. 1a—50b.

By Nīlakaṇṭha. Same work as that described under No. 4167 of the D.C.S. MSS., Vol. VIII.

Breaks off in the Vidhivāda.

---

(b) कारिकावलीव्याख्या—मुक्तावली.

### KĀRIKĀVALĪVYĀKHYĀ: MUKTĀVALĪ.

Foll. 51a—60b.

By Viśvanātha. Same work as that described under No. 3939 of the D.C.S. MSS., Vol. VIII.

Breaks off in the Anumānakhaṇḍa.

(c) तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

Foll. 61a—86b.

By Annambhaṭṭa. Same work as that described under No. 4154 of the D.C.S. MSS., Vol. VIII.

Incomplete.

---

(d) तर्कसङ्ग्रहः.

TARKASAṄGRAHAḤ.

Foll. 87a—92b.

By Annambhaṭṭa. Same work as that described under No. 4143 of the D.C.S. MSS., Vol. VIII.

Complete.

---

(e) कारिकावली.

KĀRIKĀVALI.

Foll. 93a—99b.

By Viśvanātha. Same work as that described under No. 3928 of the D.C.S. MSS., Vol. VIII.

Incomplete.

---

(f) तर्कसङ्ग्रहव्याख्या—न्यायबोधिनी.

TARKASAṄGRAHAVYĀKHYĀ: NYĀYABŌDHINĪ.

Foll. 100a—112b.

Same work as that described under No. 4180 of the D.C.S. MSS., Vol. VIII.

Wants the beginning; otherwise complete.

---

R. No. **2676.**

Palm-leaf. 16¾ × 1⅛ inches. Foll. 48. Lines, 6 in a page. Telugu. Good.

Presented in 1917-18 by M.R.Ry. Vaḍlamannāṭi Vēṅkaṭaramayya-gāru of Masulipatam, Kistna district.

Fol. 44a is left blank.

याज्ञवल्क्यस्मृतिः, सव्याख्या.

YĀJÑAVALKYASMṚTIḤ WITH COMMENTARY.

Same work as that described under No. 2702 of the D.C.S. MSS., Vol. V.

Contains from the end of the Divyaprakaraṇa to the Strīdhanavibhāga (incomplete) in the Dāyavibhāga of the Vyavahārakāṇḍa.

---

R. No. 2677.

Paper. 10¾ × 4½ inches. Foll. 96. Lines, 24 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Bhamidipāṭi Cina Yajñanārāyaṇa Śarmagāru of Madugula, Vizagapatam district.

साङ्ख्यदर्शनम्, सभाष्यम्.

SĀṄKHYADARŚANAM WITH BHĀṢYAM.

Same work as that described under R. No. 2050(*e*) ante, wherein see for the beginning.

Contains the Adhyāyas one to six complete.

**End:**

प्रथमसूत्रेऽपि प्रतिबिम्बरूपेणैव दुःखनिवृत्तिर्विवक्षितेत्येक एवार्थः उपक्रमोपसंहारसूत्रयोरिति । बहुलांशस्य द्विरावृत्तिः शास्त्रसमाप्त्यर्था ।

शास्त्रमुख्यार्थविस्तारतन्त्राख्योऽनुक्तपूरणैः ।
षष्ठाध्याये क्रमः पश्चाद्दाकरार्थश्चोपसंहृतः ॥
साङ्ख्यकुल्याः समापूर्य वेदान्तमथितामृतैः ।
कपीलर्षि(र्षि)र्ज्ञानयज्ञमर्थीनाप्याययत्पुरा ॥
तद्वचः श्रद्धया तस्मिन् गुरौ च स्थिरभावतः ।
तत्प्रसादलब्धेनेदं तच्छास्त्रं विवृतं मया ॥

**Colophon:**

इति श्रीविज्ञानविरचिते कपिलसाङ्ख्यप्रवचनशास्त्रस्य भाष्ये तन्त्राध्यायः षष्ठः । समाप्तमिदं साङ्ख्यदर्शनम ॥

---

R. No. 2678.

Paper. 13¾ × 8¾ inches. Foll. 62. Lines, 38 in a page. Telugu. Good.

Presented in 1917–18 by M.R.Ry. Drōṇamrāju Calapati Raogāru of Pulla, Kistna district.

Foll. 1*a*—3*b* are left blank. Fol. 4*a* contains Pravaras of Rāma, Sītā, Kṛṣṇa and Rukmiṇī. Fol. 4*b* is left blank.

पाञ्चरात्रागमः.

PĀÑCARĀTRĀGAMAḤ.

Foll. 5a—48b. Foll. 4b, 36a, 45b, 50b—62 are left blank. Foll. 49—50a contain Tirumaṅgaiyāḻvāracaritam.

A manual of ritualistic procedure to be adopted according to the Kapiñjalasaṁhitā of the Pāñcarātrāgama for conducting the grand annual festival in a Viṣṇu temple.

Contains the following topics:—

१. विष्वक्सेनपूजाविधिः.
२. पुण्याहवाचनम्.
३. मृत्सङ्ग्रहणप्रयोगः.
४. अङ्कुरार्पणप्रयोगः.
५. रक्षाबन्धनप्रकरणम्.
६. अग्निमुखप्रकरणम्.
७. गरुडाधिवासप्रतिष्ठाप्रयोगः.
८. भेरीताडनविधिः.
९. बलिहरणम्.
१०. देवताह्वानविधिः.
११. ध्वजारोहणविधिः.
१२. उद्वाहविधिः.
१३. मङ्गलाष्टकम्.
१४. पुष्पयागोत्सवः.
१५. पञ्चकलशस्थापनम्.
१६. नित्यौपासनविधिः.

Copied by Dvaitādvaitamatasthāpana Kōṭīśvara Śāstri on 20th April 1905 in Pullār.

**Beginning:**

अथ विष्वक्सेनपूजा—

आचार्यः ऋत्विग्भिस्सह शुभदिवसे सायाह्ने स्नात्वा, धृतोर्ध्वपुण्ड्रस्सोत्तरीयपवित्रपाणिर्भगवद्भागवताचार्यसन्निधौ परिषद्विज्ञापनार्थं सत्पात्रद्रव्यमादाय, प्रणम्य, स्थित्वा, अत्रोपविष्टानामेतेषां भगवद्भागवताचार्याणां सन्निधौ विज्ञापना मया क्रियते । मामनुगृह्णाणवचनेन श्रूयताम् । अस्य श्रीभगवतो महापुरुषस्य श्रीरामचन्द्रस्य करिष्यमाणकर्मयोग्यतासिद्ध्यर्थं मया समर्पितामिमां परिषद्दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्य श्रीपाञ्चरात्रदिव्यागमविष्णुपद्मकपिञ्जलसंहितोक्तप्रकारेण संभवता नियमेन

* * * *

इति ध्यात्वा करिष्यमाणस्य कर्मणः अविघ्नपरिसमाप्तिद्वारा काममान आदौ विष्वक्सेनपूजां करिष्यामि । सपरिवाराय विष्वक्सेनाय नमः ध्यायामि ।

* * * *

**Colophon:**

इति विष्वक्सेनपूजाविधिस्समाप्ता ॥

**End :**

सर्वप्रायश्चित्तार्थं व्याहृतीर्होष्ये—ओं भूस्स्वाहा, ओं भुवस्स्वाहा, ओं सुवस्स्वाहा, ओं भूर्भुवस्सुवस्स्वाहा, वासुदेवाय नमः, सङ्कर्षणाय नमः, प्रद्युम्नाय नमः, अनिरुद्धाय नमः, इति पूर्ववत्परिषिञ्चति ॥

**Colophon :**

इति नित्यौपासनविधिस्समाप्तः ॥

---

R. No. **2679.**

Paper. 11 × 9⅜ inches. Foll. 88. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1917–18 from a MS. of Vēmūri Rāmagōvinda Śāstrigāru of Narasapur, Kistna district.

**चमत्कारचन्द्रिका.**

**CAMATKĀRACANDRIKĀ.**

Foll. 1*a*—87*b*. Fol. 88*a* contains the name of the owner of the MS. from which this was copied. Fol. 88*b* is left blank.

A treatise on poetics and rhetoric by Viśvēśvarakavi, disciple of Kāśīśvaramiśra, the author of the Rasamīmāṃsā. Each stanza given as illustration by the author is intended to extol the greatness of Śiṅgabhūpāla. The author of the work has written another work named Kandarpasambhava.

Deals with the following subjects :—

| | |
|---|---|
| १. वर्णपदविवेक. | ५. रसविवेक. |
| २. वाक्यनिरूपण. | ६. शब्दालङ्कारविवेक. |
| ३. अर्थगुणदोषप्रबन्धविशेष. | ७. अर्थालङ्कारविवेक. |
| ४. गुणविवेक. | ८. Do. |

Wants the beginning ; otherwise complete.

The original MS. is said to have been copied by Mallāgi Timmanna for Goṭṭi Somanātha Śāstri on Tuesday (Jayavāra), the 12th day of the dark fortnight of Vaikāśi in the year Tāruṇa.

**Beginning :**

. . . . . . . र्थत्वं विरुद्धार्थत्वम् ।

विरुद्धार्थं हि तद्यत्र विरुद्धार्थः प्रतीयते ।
इन्द्राणीनायभोगोऽयं गुडाकेशनिभः श्रिया ॥
राजते पाण्ड्यभूपालो गोपालसमवैभवः ।

पुरातनकविप्रोक्तस्सोऽपि दोषाय नो भवेत् ॥
धनुषि जनकपुत्रीनायकप्रौढिभाजा
विदलितनिजधर्मस्सिङ्गभूपालकेन ।
वपुषि कृतरयोभिश्चर्मचेलैर्जटालै-
रधिगतमरिभूपैरम्बिकानाथसाम्यम् ॥

अत्र जनकपुत्रीनायको रघुराम इति विवक्षायामपि पितृसुतापतिरिति यद्यपि विरुद्धार्थः । अम्बिकानाथ इत्यत्र च पार्वतीपतिरिति विवक्षायां जननीपतिरिति प्रतीयते तथापि न विरोधः ॥

* *

**Colophon:**

इति सरससाहित्यचातुरीधुरीणश्रीविश्वेश्वरकविचन्द्रप्रणीतायां श्रीसिङ्गभूपालकीर्तिसुधासारशीतलायां चमत्कारचन्द्रिकायां वर्णपदविवेको नाम प्रथमो विलासः ॥

**End:**

एवं सङ्करान्तराणि यथासंभवं महाकविप्रबन्धेषु रसज्ञैरनुसन्धेयानि ।
एवं निदर्शितं सम्प्रदायादालोच्य लक्षणम् ।
कल्पनाकल्पितं काव्यमाचन्द्रार्कं प्रकाशते ॥
लक्ष्यलक्षणनिर्माणविज्ञानकृतबुद्धिभिः ।
परीक्ष्यतामयं ग्रन्थो . . . . . यथा ॥

**Colophon:**

इति श्रीसरससाहित्यचातुरीधुरीणविश्वेश्वरकविचन्द्रप्रणीतायां श्रीसिङ्गभूपालकीर्तिसुधारसशीतलायां चमत्कारचन्द्रिकायामष्टमो विलासः ॥

CENTRAL ARCHAEOLOGICAL LIBRARY

"A book that is shut is but a block"

CENTRAL ARCHAEOLOGICAL LIBRARY

GOVT. OF INDIA
Department of Archaeology
NEW DELHI.

Please help us to keep the book clean and moving.

S. B., 148. N. DELHI.